॥ श्रीः ॥

॥ रघुवंशम् ॥

। संजीविन्या समेतम् ।

। प्रथमः सर्गः ।

मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्यो दक्षिणदृक्पातसंकुचद्वामदृष्टये ॥
अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥
शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यम्
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब कृतार्थसार्थवाहम्
वाणीं काणभुजीमजीगणदवाशासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाकलयद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥
मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया ।
व्याचष्टे कालिदासीयं काव्यत्रयमनाकुलम् ॥
कालिदासगिरां सारं कालिदासः सरस्वती ।
चतुर्मुखोऽथवा साक्षाद्विदुर्नान्ये तु मादृशाः ॥
तथापि दक्षिणावर्तनाथाद्यैः क्षुण्णवर्त्मसु ।
वयं च कालिदासोक्तिष्ववकाशं लभेमहि ॥
भारती कालिदासस्य दुर्व्याख्याविषमूर्छिता ।
एषा संजीविनी टीका तामद्योज्जीवयिष्यति ॥
इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ॥

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥१॥

इह खलु सकलकविशिरोमणिः कालिदासः " काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे " इत्याद्यालंकारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनताम् " काव्यालापांश्च वर्जयेत् " इत्यस्य निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन्रघुवंशाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनभूतविशिष्टदेवतानमस्कारस्य शिष्टाचारपरिप्राप्तत्वात् " आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् " इत्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात्काव्यनिर्माणस्य विशिष्टशब्दार्थप्रतिपत्तिमूलकत्वेन विशिष्टशब्दार्थयोश्च " शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा । अर्थरूपं यदखिलं धत्ते मुग्धेन्दुशेखरः " इति वायुपुराणसंहितावचनबलेन पार्वतीपरमेश्वरायत्तत्वदर्शनात्तत्प्रतिपित्सया तावेवाभिवादयते ।

(१.) वागर्थाविवेत्येकं पदम् । इवेन सह नित्यसमासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं चेति वक्तव्यम् । एवमन्यत्रापि द्रष्टव्यम् । वागर्थाविव शब्दार्थाविव संपृक्तौ । नित्यसंबद्धावित्यर्थः । नित्यसंबद्धयोरुपमानत्वेनोपादानात् । " नित्यः शब्दार्थसंबन्धः " इति मीमांसकाः । जगतो लोकस्य पितरौ । माता च पिता च पितरौ । " पिता मात्रा " इति द्वन्द्वैकशेषः । मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ " इत्यमरः । एतेन शर्वशिवयोः सर्वजगज्जनकतया वैशिष्ट्यमिष्टार्थप्रदानशक्तिः परमकारुणिकत्वं च सूच्यते । पर्वतस्यापत्यं स्त्री पार्वती । " तस्यापत्यम् " इत्यण् । " टिड्ढाणञ् " इत्यादिना ङीप् । पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ । [अपरेत्वन्यथा व्याचक्षते । पार्वतीं पातीति पार्वतीपो रुद्रः । लक्ष्मीः पद्मा रमा या मा इति हैमः कोषः । रमायाः लक्ष्म्याः ईश्वरः रमेश्वरः । यद्वा । पार्वतीं पिपर्तीति पार्वतीपरः शिवः । पृ पालनपूरणयोः इति धातुत्वात् । माया लक्ष्म्या ईश्वरो मेश्वरो हरिस्तौ वंदे इत्यस्मिन् पक्षे वागर्थाविवेत्युपमाया भिन्नलिंगत्वं न दोषाय । न लिंगवचने भिन्नः इत्यादि चा०] परमशब्दः सर्वोत्तमत्वद्योतनार्थः । मातुरभ्यर्हितत्वादल्पाक्षरत्वाच्च पार्वतीशब्दस्य पूर्वनिपातः । वागर्थप्रतिपत्तये शब्दार्थयोः सम्यग्ज्ञानार्थं वन्देऽभिवादये । अत्रोपमालंकारः स्फुट एव । तथोक्तम् —" स्वतःसिद्धेन भिन्नेन संपन्नेन च धर्मतः । साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकगोपमा " इति । प्रायिकश्चोपमालंकारः कालिदासोक्तकाव्यादौ । भूदेवताकस्य सर्वगुरोर्मगणस्य प्रयोगाच्छुभलाभः सूच्यते । तदुक्तम्—" शुभदो मो भूमिमयः " इति । वकारस्यामृतबीजत्वात्प्रचयगमनादिसिद्धिः । संप्रति कविः स्वाहंकारं परिहरति " क्व सूर्य–" इत्यादिश्लोकद्वयेन—

(1.) I salute (invoke) the parents of the universe, Pàrvatì and Parames'vara, who are in constant relation (with each other) like words and their signification for the sake of acquiring (for obtaining) a right understanding (the sound knowledge) of words and their meanings (ideas).

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥ २॥
मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥ ३॥
अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥ ४॥

(२.) प्रभवत्यस्मादिति प्रभवः कारणम्। "ऋदोरप्" "अकर्तरि च कारके संज्ञायाम्" इति साधुः। सूर्यः प्रभवो यस्य स सूर्यप्रभवो वंशः क्व। अल्पो विषयो ज्ञेयोऽर्थो [ग्राह्यभागः चा०] यस्याः सा मे मतिः प्रज्ञा च क्व [क्वशब्दो महदन्तरे सु०]। द्वौ क्वशब्दौ महदन्तरं सूचयतः। सूर्यवंशमाकलयितुं न शक्नोमीत्यर्थः। तथा च तद्विषयप्रबन्धनिरूपणं तु दूरापास्तमिति भावः। तथाहि। दुस्तरं तरितुमशक्यम्। "ईषद्दुःसुषु-" इत्यादिना खल्प्रत्ययः। सागरं मोहादज्ञानादुडुपेन (तृणादिनिर्मितेन) प्लवेन। "उडुपं तु प्लवः कोलः" इत्यमरः। अथवा चर्मावनद्धेन पानपात्रेण। "चर्मावनद्धमुडुपं प्लवः काष्ठं करण्डवत्" इति सज्जनः। तितीर्षुस्तरीतुमिच्छुरस्मि भवामि। तरतेः सन्नन्तादुप्रत्ययः। अल्पसाधनैरधिकारम्भो न सुकर इति भावः। इदं च वंशोत्कर्षकथनं स्वप्रबन्धमहत्त्वार्थमेव। तदुक्तम्–"प्रतिपाद्यमहिम्ना च प्रबन्धो हि महत्तरः" इति।

(३.) किं च मन्दो मूढः। "मूढाल्पापटुनिर्भाग्या मन्दाः स्युः" इत्यमरः। तथापि कवियशःप्रार्थी। कवीनां [वाल्मीकिप्रभृतीनां चा०] यशः काव्यनिर्माणेन जातं तत्प्रार्थनाशीलोऽहं प्रांशुनोन्नतपुरुषेण लभ्ये प्राप्ये फले फलविषये लोभादुद्बाहुः फलग्रहणायोच्छ्रितहस्तो वामनः खर्व इव। "खर्वो ह्रस्वश्च वामनः" इत्यमरः। उपहास्यतामुपहासविषयताम्। "ऋहलोर्ण्यत्" इति ण्यत्प्रत्ययः। गमिष्यामि प्राप्स्यामि (अहो मे मौर्ख्यं यन्मन्दोपि वश्यवचसां कवीनां यशः प्रेप्सुरहमुपहासास्पदं गमिष्यामीत्यात्मनि शंकितः)। मन्दश्चेत्तर्हि त्यज्यतामयमुद्योग इत्यत आह—

(४.) अथवा पक्षान्तरे पूर्वैः सूरिभिः कविभिर्वाल्मीकादिभिः कृतवाग्द्वारे कृतं रामायणादि-

(2.) Where is the race sprung from the sun (the race of which the sun is the cause) ? and where my scanty powers of mind (intellect) ? Actuated by my folly I wish to get across the ocean, though difficult to be passed over, by means of a small raft (a boat)

(3.) Stupid (incompetent) as I am, I should make myself the butt of ridicule (incur ridicule) were I to seek the fame of a poet (were I to become a candidate for the fame of a poet), like a dwarf who would be laughed at in greedily stretching up his hands to get the fruit that is accessible (only) to a tall person (obtainable by a tall man).

(4.) Or perhaps, when the ancient poets have already effected an entrance

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ ५ ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ ६ ॥

प्रबन्धरूपा या वाक्सैव द्वारं प्रवेशो यस्य तस्मिन् । अस्मिन्सूर्यप्रभवे वंशे कुले । जन्मनैकलक्षणः संतानो वंशः । वज्रेण मणिवेधकसूचीविशेषेण । " वज्रं त्वस्त्री कुलिशशस्त्रयोः । मणिवेधे रत्नभेदे " इति केशवः । समुत्कीर्णे विद्धे मणौ रत्ने सूत्रस्येव मे मम गतिः संचारोऽस्ति । वर्णनीये रघुवंशे मम वाक्प्रसरोऽस्तीत्यर्थः । एवं रघुवंशे लब्धप्रवेशस्तद्वर्णनां प्रतिजानानः " सोऽहम् " इत्यादिभिः पञ्चभिः श्लोकैः कुलकेनाह—

(५.) सोऽहम् । " रघूणामन्वयं वक्ष्ये " इत्युत्तरेण संबन्धः । किंविधानां रघूणामित्यत्रोत्तराणि विशेषणानि योज्यानि । आ जन्मनः । जन्मारभ्येत्यर्थः । " आङ्मर्यादाभिविध्योः " इत्यव्ययीभावः । शुद्धानाम् । सुप्सुपेति समासः । एवमुत्तरत्रापि द्रष्टव्यम् । आजन्मशुद्धानाम् । निषेकादिसर्वसंस्कारसंपन्नानामित्यर्थः । आफलोदयमा फलसिद्धेः कर्म येषां ते तथोक्तास्तेषाम् । प्रारब्धान्तगामिनामित्यर्थः । आसमुद्रं क्षितेरीशानाम् । सार्वभौमाणामित्यर्थः । आनाकं रथवर्त्म येषां तेषाम् । इन्द्रसहचारिणामित्यर्थः । अत्र सर्वत्राङोऽभिविध्यर्थत्वं द्रष्टव्यम् । अन्यथा मर्यादार्थत्वे जन्मादिषु शुद्ध्यभावप्रसङ्गात् ।

(६.) विधिमनतिक्रम्य यथाविधि । " यथासादृश्ये " इत्यव्ययीभावः । तथा हुतशब्देन सुप्सुपेति समासः । एवं " यथाकामार्चित- " इत्यादीनामपि द्रष्टव्यम् । यथाविधि हुता अग्नयो यैस्तेषाम् । यथाकाममभिलाषमनतिक्रम्यार्चितार्थिनाम् । यथापराधमपराधमनतिक्रम्य दण्डो येषां तेषाम् । यथाकालं कालमनतिक्रम्य प्रबोधिनां प्रबोधनशीलानाम् । चतुर्भिर्विशेषणैर्देवतायजनार्थिसत्कारदण्डधरत्वप्रजापालनसमयजागरूकत्वादीनि विवक्षितानि ।

into this dynasty by their poetic composition (prepared a door of description by poets of yore) I may have an access to it like a thread in a pearl bored through by means of a diamond-pin.

(5.) Such a one as I, therefore, proceed to describe the Raghus, who were pure from the very time of their birth, who persevered in action until it bore its fruit (who carried on their undertakings until they got success), who ruled the earth up to the ocean and whose chariots ran unhindered up to the gates of Svarga (whose chariot-track was up to heaven).

(6.) Who kept the sacrificial fires as enjoined by the rites, who satisfied all the desires of their supplicants (honoured supplicants by gifts according to their desires), who punished the offenders in proportion to their guilt, and who were roused into action at the proper time (being awake at the proper time.)

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ ७ ॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥ ८ ॥

(७.) त्यागाय। सत्पात्रे विनियोगस्त्यागः। तस्मै। "त्यागो विहापनं दानम्" इत्यमरः। संभृतार्थानां संचितधनानाम्। न तु दुर्व्यापाराय। सत्याय मितभाषिणां मितभाषणशीलानाम्। न तु पराभवाय। यशसे कीर्तये। "यशः कीर्तिः समज्ञा च" इत्यमरः। विजिगीषूणां विजेतुमिच्छूनाम्। न त्वर्थसंग्रहाय। प्रजायै संतानाय गृहमेधिनां दारपरिग्रहाणाम्। न तु कामोपभोगाय। अत्र "त्यागाय" इत्यादिषु "चतुर्थी तदर्थ–" इत्यादिना तादर्थ्ये चतुर्थीसमासविधानज्ञापकाच्चतुर्थी। गृहैर्दारैर्मेधन्ते संगच्छन्त इति गृहमेधिनः [पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनां। अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं। होमो दैवो बलिर्भौमो नृयज्ञोऽतिथिपूजनं। पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः। पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते याश्च वाहयन्। इति मनूक्तायाः पञ्चसूनारूपहिंसायाः कारी गृहमेधी गृहस्थः इत्यर्थः। चारित्रवर्द्धनस्तु गृहमेधो विवाहःसोऽस्तीति व्याचष्टे] "दारेष्वपि गृहाः" इत्यमरः। "जाया च गृहिणी गृहम्" इति हलायुधः। 'मेधृ संगमे' इति धातोर्णिनिः। एभिर्विशेषणैः परोपकारित्वं सत्यवचनत्वं यशःपरत्वं पितॄणां शुद्धत्वं च विवक्षितानि।

(८.) शिशोर्भावः शैशवं बाल्यम्। "प्राणभृज्जातिवयोवचनोद्गात्र-" इत्यञ्प्रत्ययः। "शिशुत्वं शैशवं बाल्यम्" इत्यमरः। तस्मिन्वयस्यभ्यस्तविद्यानाम्। एतेन ब्रह्मचर्याश्रमो विवक्षितः। यूनो भावो यौवनं तारुण्यम्। युवादित्वादण्प्रत्ययः। "तारुण्यं यौवनं समम्" इत्यमरः। तस्मिन्वयसि विषयैषिणां भोगाभिलाषिणाम्। एतेन गृहस्थाश्रमो विवक्षितः। वृद्धस्य भावो वार्द्धकं वृद्धत्वम्। "द्वन्द्वमनोज्ञादिभ्यश्च" इति वुञ्प्रत्ययः। "वार्द्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि" इति विश्वः। संघातार्थेऽत्र "वृद्धाच्च" इति वक्तव्यात्सामूहिको वुञ्। तस्मिन्वार्द्धके वयसि मुनीनां वृत्तिरिव वृत्तिर्येषां तेषाम्। एतेन वानप्रस्थाश्रमो विवक्षितः। अन्ते शरीरत्यागकाले योगेन परमात्मध्यानेन। [चित्तविरोधेन वा चा० तु०] "योगः संनहनोपायध्यानसंगतियुक्तिषु" इत्यमरः। तनुं देहं त्यजन्तीति तनुत्यजां देहत्यागिनाम्। "कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः" इत्यमरः। "अन्येभ्योऽपि दृश्यते" इति क्विप्। एतेन भिक्ष्वाश्रमो विवक्षितः।

(7.) Who collected wealth only for charity (for giving away), who spoke little in order to preserve truth (speaking measuredly for truth's sake), who wished to conquer for fame (were desirous of conquest for fame and not for wealth &c.), who entered upon a married life to continue their progeny (offspring).

(8.) Who devoted themselves to the acquisition of knowledge in their childhood, who enjoyed pleasures in their man-hood, who led an ascetic-life in their old

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९ ॥
तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ १० ॥
वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ ११ ॥

(९.) सोऽहं लब्धप्रवेशः । तनुवाग्विभवोऽपि स्वल्पवाणीप्रसारोऽपि [प्रपंचोपि चा० सु०] सन् । तेषां रघूणां गुणैस्तद्गुणैः । आजन्मशुद्ध्यादिभिः । कर्तृभिः । कर्णं मम श्रोत्रमागत्य चापलाय चापलं चपलकर्माविमृश्यकरणरूपं कर्तुम् । युवादित्वात्कर्मण्यम् । "क्रियार्थोपपदस्य" इत्यादिना चतुर्थी । प्रचोदितः प्रेरितः सन् । रघूणामन्वयं तद्विषयप्रबन्धं वक्ष्ये । कुलकम् । संप्रति स्वप्रबन्धपरीक्षार्थं सतः प्रार्थयते—

(१०.) तं रघुवंशाख्यं प्रबन्धं सदसतोर्गुणदोषयोर्व्यक्तेर्हेतवः कर्तारः सन्तः श्रोतुमर्हन्ति । तथाहि । हेम्नो विशुद्धिर्निर्दोषस्वरूपं श्यामिकापि लोहान्तरसंसर्गात्मको दोषोऽपि वाग्नौ संलक्ष्यते । नान्यत्र । तद्वदत्रापि सन्त एव गुणदोषविवेकाधिकारिणः । नान्य इति भावः (उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः । श्यामायते न युष्मासु यः काञ्चनमिवाग्निषु । इत्येवं समार्थः श्लोकांशः) । वर्ण्यं वस्तूपक्षिपति—

(११.) मनस ईषिणो मनीषिणो धीराः । विद्वांस इति यावत् । पृषोदरादित्वात्साधुः । तेषां माननीयः पूज्यः । छन्दसां वेदानाम् । "छन्दः पद्ये च वेदे च" इति विश्वः । प्रणव ओंकार इव [ओंकारप्रणवौ समौ इति हेमकोषः सु०] मह्यां क्षियन्तीशत इति महीक्षितः क्षितीश्वराः । क्षिधातोरैश्वर्यार्थात्क्विप् तुगागमश्च । तेषामाद्य आदिभूतः । विवस्वतः सूर्यस्यापत्यं पुमान्वैवस्वतो नाम वैवस्वत इति प्रसिद्धो मनुरासीत् ।

---

age, and who at the time of breathing their last quitted their bodies while absorbed in contemplation (by means of concentration of the mind in contemplating the supreme soul).

(9.) Though possessed of scanty powers of speech (though ...ished with a small stock of speech) I shall describe the family of the Raghus, ... as I am, by their attributes coming close to my ears, to an inconsiderate ...ing (being impelled to rashness by the report of their virtues coming to m...)

(10.) Therefore let the wise (alone) who are the source (ca... of the distinction between good and bad (between merit and demerit) liste... of this. Because the purity or alloy of gold can (easily) be determined (wheler ... s tested) by fire.

(11.) Once there lived a king by name Manu, the son of ...svata, revered by the wise and first of those who ruled over the earth, like th... ...stic syllable ॐ Om, the leading word in the Vedas.

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥ १२ ॥
व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ १३ ॥
सर्वातिरिक्तसारेण सर्वतेजोभिभाविना।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥ १४ ॥

(१२.) शुद्धिरस्यास्तीति शुद्धिमान्। तस्मिञ्शुद्धिमति तदन्वये तस्य मनोरन्वये वंशे। "अन्ववायोऽन्वयो वंशो गोत्रं चाभिजनं कुलम्" इति हलायुधः। अतिशयेन शुद्धिमाञ्शुद्धिमत्तरः। "द्विवचनविभज्योप-" इत्यादिना तरप्। दिलीप इति प्रसिद्धो राजा इन्दुरिव राजेन्दू राजश्रेष्ठः। उपमितं व्याघ्रादिना समासः। क्षीरनिधाविन्दुरिव प्रसूतो जातः। "व्यूढ-" इत्यादित्रिभिः श्लोकैर्दिलीपं विशिनष्टि—

(१३.) व्यूढं विपुलमुरो यस्य स व्यूढोरस्कः। उरःप्रभृतिभ्यः कप्। "व्यूढं विपुलं भद्रं स्फारं समं वरिष्ठं च" इति यादवः। वृषस्य स्कन्ध इव स्कन्धो यस्य स तथा। "सप्तम्युपमान-" इत्यादिनोत्तरपदलोपी बहुव्रीहिः। शालो वृक्ष इव प्रांशुरुन्नतः शालप्रांशुः। "प्राकारवृक्षयोः शालः शालः सर्जतरुः स्मृतः" इति यादवः। "उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे" इत्यमरः। महाभुजो महाबाहुः [महान्तौ जानुपर्यन्तौ भुजौ यस्य सः] आत्मकर्मक्षमं (आत्मनः कर्मणि क्षमं) स्वव्यापारानुरूपं देहमाश्रितः प्राप्तः क्षात्रः क्षत्रसंबन्धी धर्म इव। स्थितः। मूर्तिमान्पराक्रम इव स्थित इत्युत्प्रेक्षा।

(१४.) सर्वातिरिक्तसारेण सर्वेभ्यो भूतेभ्योऽधिकबलेन। "सारो बले स्थिरांशे च" इत्यमरः। सर्वाणि भूतानि तेजसाभिभवतीति सर्वतेजोभिभावी। तेन सर्वेभ्य उन्नतेनात्मना शरीरेण। "आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि" इति विश्वः। मेरुरिव। उर्वीं क्रान्त्वाक्रम्य स्थितः। मेरावपि विशेषणानि तुल्यानि। "अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः। तस्मादभिभवत्येष सर्वभूतानि तेजसा" इति मनुवचनाद्राज्ञः सर्वतेजोभिभावित्वं ज्ञेयम्।

(12.) In this pure family a purer soul was born by name Dilîpa, who was an excellent king, as the pure moon was produced in the pure milky ocean.

(13.) He had a broad chest, strong shoulders resembling those of an ox, was as tall as a S'âla-tree and wore long arms. It may be fairly supposed that he looked like the presiding god of heroism that had incorporated himself into a body fitted for (the performance of) his deeds.

(14.) Like the mountain Meru, he stood occupying the whole of the earth with his frame taller than all the living beings, with lustre transcending that of every other creature (on earth), and with strength exceeding that of all creatures.

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥ १५ ॥
भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ १६ ॥
रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥ १७ ॥

(१५.) आकारेण मूर्त्या सदृशी प्रज्ञा यस्य सः । प्रज्ञया सदृशागमः प्रज्ञानुरूपशास्त्रपरिश्रमः । आगमैः (शास्त्रमात्रैः मंत्रैर्वा । तथाहि । सर्ववेदः क्रियामूलं ऋषिभिर्बहुधोदितः । कालो देशः क्रियाकर्ता कारणं कार्यमागमः । सिद्धं सिद्धैः प्रमाणैस्तु हितं वात्र परत्र वा । आगमः शास्त्रमाप्तानामाप्तास्तत्वार्थवेदिनः । शृण्वतां जायते भक्तिः ततो गुरुमुपासते । स च विद्यागमान् वक्ति विद्यायुक् स्वाश्रितो नृपः । इत्यादिभिरागमपदंज्ञेयं) सदृश आरम्भः कर्म यस्य स तथोक्तः । आरभ्यत इत्यारम्भः कर्म । तत्सदृश उदयः फलसिद्धिर्यस्य स तथोक्तः ।

(१६.) भीमैश्च कान्तैश्च नृपगुणै राजगुणैस्तेजःप्रतापादिभिः कुलशीलदाक्षिण्यादिभिश्च स दिलीप उपजीविनामाश्रितानाम् । यादोभिर्जलजीवैः । " यादांसि जलजन्तवः " इत्यमरः । रत्नैश्चार्णव इव । अधृष्योऽनभिभवनीयश्चाभिगम्य आश्रयणीयश्च बभूव । [तेजो बलं सत्त्ववत्ता प्रभावः प्राप्तकालता । अधृष्यस्य गुणानेतान्नृपस्य मुनयो विदुः । कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता । सूक्ष्मदर्शित्वमुत्साहः सच्चित्यं स्थूललक्षता । विनीतता धार्मिकता गुणाश्चैवाभिगामिकाः इति कामंदकः चा०]

(१७.) नियन्तुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य संबन्धिन्यो नेमीनां चक्रधाराणां वृत्तिरिव वृत्तिर्व्यापारो यासां ताः । " चक्रधारा प्रधिर्नेमिः " इति यादवः । " चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान् " इत्यमरः । प्रजा आ मनोः । मनुमारभ्येत्यभिविधिः । पदद्वयं चैतत् । समासस्य विभाषितत्वात् । क्षुण्णादभ्यस्तात् [प्रसिद्धात्–चा०] प्रहताच्च वर्त्मन आचारपद्धतेः [वर्णाश्रमनियमात्–चा०] अध्वनश्च परमधिकम् । इतस्तत इत्यर्थः । रेखा प्रमाणमस्येति रेखामात्रं रेखाप्रमाणम् । ईषदपीत्यर्थः । " प्रमाणे द्वयसज्– " इत्या-

---

(15.) His intelligence was equal (in proportion) to his frame, his knowledge to his intelligence, his undertakings to his knowledge and his success to his undertakings.

(16.) By the combination of fierce yet amicable virtues he was to his dependents both ill-approachable and inviting as the ocean on account of (by reason of) its sea-monsters and jewels.

(17.) From the time of Manu, the subjects of that king had never gone out of the beaten track even to the extent of a line (lit. even as much as has a line for its measure), as the outer rim of a wheel does not rotate out of its beaten path (when there is a driver).

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ १८ ॥
सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥ १९ ॥
तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥ २० ॥

दिना मात्रच्प्रत्ययः। परशब्दविशेषणं चैतत्। न व्यतीयुर्नातिक्रान्तवत्यः। कुशलसारथिप्रेरिता रथनेमय इव तस्य प्रजाः पूर्वक्षुण्णमार्गं न जहुरिति भावः।

(१८.) स राजा प्रजानां भूत्या अर्थाय भूत्यर्थं वृद्ध्यर्थमेव। अर्थेन सह नित्यसमासः सर्वलिङ्गता च वक्तव्या। ग्रहणक्रियाविशेषणं चैतत्। ताभ्यः प्रजाभ्यो बलिं षष्ठांशरूपं करमग्रहीत्। "भागधेयः करो बलिः" इत्यमरः। तथाहि। रविः सहस्रं गुणा यस्मिन्कर्मणि तद्यथा तथा सहस्रगुणं सहस्रधोत्स्रष्टुं दातुम्। उत्सर्जनक्रियाविशेषणं चैतत्। रसमम्ब्वादत्ते गृह्णाति [सूर्यो जलानि ग्रीष्मे गृहीत्वा वर्षासु वर्षतीत्यागमः। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः। इति मनुः। एतेन किमुक्तं स प्रजाभ्यो गृहीतेन करेण यज्ञादिकं ततान तेन तुष्टैरिन्द्रादिभिर्वृष्टिस्तयान्नं तेन प्रजापुष्टिरिति परम्पराया बलेर्भूत्यर्थता–चा०]। "रसो गन्धे रसे स्वादे तिक्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे" इति विश्वः। संप्रति बुद्धिशौर्यसंपन्नस्य तस्यार्थसाधनेषु परानपेक्षत्वमाह—

(१९.) तस्य राज्ञः सेना चतुरङ्गबलम्। परिच्छाद्यतेऽनेनेति परिच्छद उपकरणं बभूव। छत्रचामरादितुल्यमभूदित्यर्थः। "पुंसि संज्ञायां घः प्रायेण" इति घप्रत्ययः। "छादेर्घेऽद्व्युपसर्गस्य" इत्युपधाह्रस्वः। अर्थस्य प्रयोजनस्य तु साधनं द्वयमेव। शास्त्रेषु (नीत्यागमेषु) अकुण्ठिताव्याहता बुद्धिः। धनुष्याततारोपिता मौर्वी ज्या च। "मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरः। नीतिपुरःसरमेव तस्य शौर्यमभूदित्यर्थः। राज्यमूलं मन्त्रसंरक्षणं तस्यासीदित्याह—

(२०.) संवृतमन्त्रस्य गुप्तविचारस्य। "वेदभेदे गुप्तवादे मन्त्रः" इत्यमरः। शोकहर्षादिसूचको भ्रुकुटीमुखरागादिराकारः। इङ्गितं चेष्टितं हृदयगतविकारो वा। "इङ्गितं

(18.) He received tributes from his subjects only for their own prosperity, as the sun absorbs water to return it a thousand times increased.

(19.) His army was to him like his paraphernalia. His means of accomplishing his objects (preservation of peace &c.) were only two-fold : consisting (first) of a genius that penetrated every S'âstra, and (secondly) of the cord stretched out on the bow.

(20.) His undertakings could only be inferred from the fruits they bore,

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥ २१ ॥
ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥ २२ ॥

इङ्गितो भावो बहिराकार आकृतिः" इति सज्जनः । गूढे आकारेङ्गिते यस्य [यद्वा गूढाकारं गुप्तरूपं इंगितं यस्य तथोक्तस्य--चा०] स्वभावचापलाद्भ्रमपरंपरया मुखरागादिलिङ्गैर्वा तृतीयगामिमन्त्रस्य तस्य । प्रारभ्यन्त इति प्रारम्भाः सामाद्युपायप्रयोगाः । प्रागित्यव्ययेन पूर्वजन्मोच्यते । तत्र भवाः प्राक्तनाः (पूर्ववर्तिकारणानि) "सायंचिर-" इत्यादिना ट्युल्प्रत्ययः । संस्काराः पूर्वकर्मवासना इव । फलेन कार्येणानुमेया अनुमातुं योग्या आसन् । अत्र याज्ञवल्क्यः—" मन्त्रमूलं यतो राज्यमतो मन्त्रं सुरक्षितम् । कुर्याद्यथा तन्न विदुः कर्मणामा फलोदयात् " इति । संप्रति सामाद्युपायान्विनैवात्मरक्षादिकं कृतवानित्याह–

(२१.) अत्रस्तोऽभीतः सन् । " त्रस्तो भीरुभीरुकभीलुकाः " इत्यमरः । त्रासोपाधिमन्तरेणैव त्रिवर्गसिद्धेः प्रथमसाधनत्वादेवात्मानं शरीरं जुगोप रक्षितवान् [यदाह, । विधाय रक्षान् परितः परेतरानिति–चा०] अनातुरोऽरुग्ण एव धर्मं सुकृतं भेजे । अर्जितवानित्यर्थः । अगृध्नुरगर्धनशीलः [लोभाभिलाषरहितः] एवार्थमाददे स्वीकृतवान् [यदाह । न्यायेनार्जनमर्थस्य । वसूनि वांछन्न वशी न मन्युनेतिच–चा०] "गृध्नुस्तु गर्धनः। लुब्धोऽभिलाषुकस्तृष्णक्समौ लोलुपलोलुभौ " इत्यमरः । " त्रसिगृधिधृषिक्षिपेः क्नुः" इति क्नुप्रत्ययः। असक्तः आसक्तिरहित एव सुखमन्वभूत् । [सेवेत विषयान्काले मुक्त्वा तत्परतां वशी इति कामन्दकः–चा०] परस्परविरुद्धानामपि गुणानां तत्र साहचर्यमासीदित्याह—

(२२.) ज्ञाने परवृत्तान्तज्ञाने सत्यपि मौनं वाङ्नियमनम् (नतु मूकीभावः) यथाह कामन्दकः—" नान्योपतापि वचनं मौनं व्रतचरिष्णुता " इति । शक्तौ प्रतीकारसामर्थ्येऽपि क्षमापकारसहनम् । अत्र चाणक्यः—" शक्तानां भूषणं क्षमा " इति । त्यागे वितरणे सत्यपि श्लाघाया विकत्थनस्य विपर्ययोऽभावः । अत्राह मनुः—" न दत्त्वा परिकीर्तयेत् "

---

for his policy was secret and his gestures and intentions unfathomed, like the merit of works performed in former lives.

(21.) Although above any fears, he kept a guard about his person. He practised virtue without being fatigued (Malli —even when he was not ill). Free from greediness he amassed immense wealth and he enjoyed happiness without being (excessively) attached to any thing.

(22.) Though knowing much, he was silent, though able to punish, forgiving, and though charitable, yet averse to praises (bestowed upon him by the objects of his charity). In fact, his virtues, from their association with virtues (of an opposite kind) seemed to have emanated from one common source (though really they were not).

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ॥ २३ ॥
प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ २४ ॥

इति । इत्थं तस्य गुणा ज्ञानादयो गुणैर्विरुद्धैर्मौनादिभिरनुबन्धित्वात्सहचारित्वात् । सह प्रसवो जन्म येषां ते सप्रसवाः । सोदरा इवाभूवन् । विरुद्धा अपि गुणास्तस्मिन्नविरोधेनैव स्थिता इत्यर्थः । [लोके तु ज्ञानमौनादयो गुणा अन्योन्यमसङ्गताः । अमुष्मिन् सहोदरा इव सम्मिलिता अभूवन्नित्यर्थः—चा०] द्विविधं वृद्धत्वं ज्ञानेन वयसा च । तत्र तस्य ज्ञानेन वृद्धत्वमाह—

(२३.) विषयैः शब्दादिभिः । " रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी " इत्यमरः । अनाकृष्टस्यावशीकृतस्य [वैराग्यवृद्धत्वं–चा०] विद्यानां वेदवेदाङ्गादीनां [आन्वीक्षिक्यादीनां–चा०] पारदृश्वनः (इति दृशेःक्वनिबिति दृशेर्धातोःक्वनिप्) पारमन्तं दृष्टवतः [विद्यावृद्धत्वं–चा०] दृशेः क्वनिप् । धर्मे रतिर्यस्य तस्य राज्ञः [शीलवृद्धत्वं–चा०] जरसा जरया विना (पृथग्विना नानेत्यादिना विनायोगे तृतीया) । " विस्रसा जरा " इत्यमरः । " षिद्भिदादिभ्योऽङ् " इत्यङ्प्रत्ययः । " जराया जरसन्यतरस्याम् " इति जरसादेशः । वृद्धत्वं वार्द्धकमासीत् [विशेषणैस्त्रित्वमाह–चा०] तस्य यूनोऽपि विषयवैराग्यादिज्ञानगुणसंपत्त्या ज्ञानतो वृद्धत्वमासीदित्यर्थः । नाथस्तु चतुर्विधं वृद्धत्वमिति ज्ञात्वा ' अनाकृष्टस्य ' इत्यादिना विशेषणत्रयेण वैराग्यज्ञानशीलवृद्धत्वान्युक्तानीत्यवोचत् ।

(२४.) प्रजायन्त इति प्रजा जनाः । "उपसर्गे च संज्ञायाम्" इति डप्रत्ययः । " प्रजा स्यात्संततौ जने " इत्यमरः । तासां विनयस्य शिक्षायाः (विनयं प्रणतौ प्राहुः शिक्षायां विनया मतेति विश्वः) आधानात्करणात् । सन्मार्गप्रवर्तनादिति यावत् । रक्षणाद्भयहेतुभ्यस्त्राणात् । आपन्निवारणादिति यावत् । भरणादन्नपानादिभिः पोषणादपि । अपिः समुच्चये । (इति हेतुत्रयात्) स राजा पिताभूत् [जनकः पुत्रेष्वपि एतत्त्रितयं कुरुते–चा०] तासां पितरस्तु जन्महेतवो जन्ममात्रकर्तारः केवलमुत्पादका एवाभूवन् । जननमात्र एव पितॄणां व्यापारः । सदा शिक्षारक्षणादिकं तु स एव करोतीति तस्मिन्पितृत्वव्यपदेशः । आहुश्च— " स पिता यस्तु पोषकः " इति (एतेन तस्य प्रजानुरञ्जनमुक्तं) ।

(23.) He delighting in justice (or virtue) may be called old without decrepitude, being not attracted by sensuous objects, seeing already the other end of (all) the branches of learning (versed in all lores).

(24.) By reason of his provision for their instructions (in moral training), protection and maintenance he was the father of his subjects, while their fathers were merely the causes of their birth.

स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥ २५ ॥
दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥ २६ ॥

(२५.) दण्डमर्हन्तीति दण्ड्याः । " दण्डादिभ्यो यः " इति यप्रत्ययः । " अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चैव गच्छति " इति शास्त्रवचनात् । तान्दण्ड्यानेव स्थित्यै लोकप्रतिष्ठायै दण्डयतः शिक्षयतः [यदाह । स्थित्यै प्रणयतो दण्डमिति–चा०] प्रसूतये संतानायैव परिणेतुर्दारान्परिगृह्णतः । मनीषिणो (मनीषा विद्यते यस्य तस्य तथोक्तस्य) विदुषः । दोषज्ञस्येति यावत् । " विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः । धीरो मनीषी " इत्यमरः । तस्य दिलीपस्यार्थकामावपि धर्म एवास्तां जातौ । अस्तेर्लङ् । अर्थकामसाधनयोर्दण्डविवाहयोर्लोकस्थापनप्रजोत्पादनरूपधर्मार्थत्वेनानुष्ठानादर्थकामावपि धर्मशेषतामापादयन्स राजा धर्मोत्तरोऽभूदित्यर्थः । आह च गौतमः—" न पूर्वाह्णमध्यंदिनापराह्णानफलान्कुर्यात् । यथाशक्ति धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यात् " इति । [अधुना तस्य धर्मप्रवृत्तिमाह–चा०] ।

(२६.) स राजा यज्ञाय यज्ञं कर्तुं गां भुवं दुदोह । करग्रहणेन रिक्तां चकारेत्यर्थः । मघवा देवेन्द्रः सस्याय सस्यं वर्धयितुं दिवं स्वर्गं दुदोह [दुह प्रपूरणे इत्यसौ धातुः प्रवासप्रस्थानादिवत्पूरणे विपरीतश्रावणे वर्तते । उक्तञ्च क्षीरतरंगिण्यां । प्रपूरणं रिक्तीकरणमिति–चा०] द्युलोकान्महीलोके वृष्टिमुत्पादयामासेत्यर्थः । " क्रियार्थोपपदस्य -" इत्यादिना यज्ञसस्याभ्यां चतुर्थी । एवमुभौ संपदो विनिमयेन परस्परमादानप्रतिदानाभ्यां भुवनद्वयं दधतुः पुपुषतुः [अन्योन्यमेकक्रियासंबन्धो व्यतिहारस्तस्य च विनिमयशब्देनोक्तत्वाद्दधतुरित्यत्र कर्त्तरि कर्मव्यतिहार इत्यात्मनेपदप्राप्तावपीतरेतरान्योन्योपपदेचेति निषेधार्थवाक्यप्रसङ्गान्न भवति–चा०] राजा यज्ञैरिन्द्रलोकमिन्द्रश्चोदकेन भूलोकं पुपोषेत्यर्थः । उक्तं च दण्डनीतौ—" राजा त्वर्थान्समाहृत्य कुर्यादिन्द्रमहोत्सवम् । प्रीणितो मेघवाहस्तु महतीं वृष्टिमावहेत् " इति (इन्द्रोऽपि समयवर्षितया सोऽपि करग्रहणेन महीं च संवर्धयामासतुरर्थात् उभावपि द्रविणाविनिमयेन पालयामासतुरित्यर्थः । ननु केवलमयमेव नृपोऽन्येऽप्येवं बभूवुरित्यत आह) ।

(25.) Even the wealth and desire consisted in the virtue (or duty) of this wise king who punished the offenders for the stability of the state and led a married life for progeny.

(26.) He milked the earth (took tributes) for sacrifices and Indra the heavens for corn. Thus by an exchange of benefits they ruled over both the worlds.

नकिलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥ २७ ॥
द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥ २८ ॥
तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्वे तस्यासन्परार्थैकफला गुणाः ॥ २९ ॥

(२७.) राजानोऽन्ये नृपा रक्षितुर्भयेभ्यस्त्रातुस्तस्य राज्ञो यशो नानुययुः किल [प्रसिद्धावुत्प्रेक्षायां वा-चा०] नानुचक्रुः खलु । कुतः । यद्यस्मात्कारणात्तस्करता चौर्यं परस्वेभ्यः परधनेभ्यः स्वविषयभूतेभ्यो व्यावृत्ता सती श्रुतौ वाचकशब्दे स्थिता प्रवृत्ता [अन्येषु राजसु वसुधां रक्षत्सु तस्करता परधनेषु स्थितिं चकार । अस्मिंस्तु परस्वं विहाय स्ववाचकं शब्दमेवाश्रयत्-सु०] अपहार्यान्तराभावात्तस्करशब्द एवापहृत इत्यर्थः । अथवा । " अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि " इति न्यायेन शब्दे स्थिता स्फुरिता न तु स्वरूपतोऽस्तीत्यर्थ : (अन्ये सहस्रशोऽपि राजानस्तस्य धर्मरते दिलीपस्य धवलयशोभाग्यं न केनापि प्रकारेणानुकर्तुं समर्थाः बभूवुरित्यर्थः) ।

(२८.) शिष्टो जनो द्वेष्यः शत्रुरपि । आर्तस्य रोगिण औषध यथौषधमिव । तस्य संमतोऽनुमत आसीत् । दुष्टो जनः प्रियोऽपि प्रेमास्पदीभूतोऽपि । उरगक्षता सर्पदष्टाङ्गुलीव । " छिन्द्याद्बाहुमपि दुष्टात्मनः " इति न्यायात् । त्याज्य आसीत् (तस्य इति कर्त्तरि षष्ठी) तस्य शिष्टः (हिताहितं विशिनष्टि विवेचयतीति शिष्टः) एव बन्धुर्दुष्ट (हितं दूषयतीति दुष्टः) एव शत्रुरित्यर्थः । तस्य परोपकारित्वमाह—

(२९.) वेधाः स्रष्टा । " स्रष्टा प्रजापतिर्वेधाः " इत्यमरः । तं दिलीपम् । समाधीयतेऽनेनेति समाधिः कारणसामग्री । महाभूतानां यः समाधिस्तेन महाभूतसमाधिना [परप्रयोजनघटनैकबुद्धीनि पृथिव्याप्तेजोवाय्वाकाशानि तेषां समाधिः सृष्टिकाले नियमविशेषस्तेन-चा०] विदधे ससर्ज नूनं ध्रुवम् । इत्युत्प्रेक्षा । तथाहि । तस्य राज्ञः सर्वे गुणा रूपरसादिमहाभूतगुणवदेव परार्थः परप्रयोजनमेवैकं मुख्यं फलं येषां ते तथोक्ता आसन् । महाभूतगुणोपमानेन कारणगुणाः कार्ये संक्रामन्तीति न्यायः सूचितः ।

(27.) Other princes could not indeed attain his fame as a protector; for having turned aside from others' wealth the word 'robbery' was only retained in the hearing (memory of the people).

(28.) As a medicine to a patient, even an enemy, if he be excellent, was acceptable to (honoured by) him and a wicked person though beloved was cast off by him like a finger bitten by a snake.

(29.) Doubtless the god Brahmâ formed him of the elements of great substances ; for he inherited all virtues whose sole effect is the good of others.

स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥ ३० ॥
तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥ ३१ ॥
कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥ ३२ ॥

(३०.) स दिलीपः । वेलाः समुद्रकूलानि । “ वेला कूलेऽपि वारिधेः ” इति विश्वः । ता एव वप्रवलयाः प्राकारवेष्टनानि यस्यास्ताम् । “ स्याच्चयो वप्रमस्त्रियाम् । प्राकारो वरणः शालः प्राचीनं प्रान्ततो वृतिः ” इत्यमरः । परितः खातं परिखा दुर्गवेष्टनम् । “खातं खेयं तु परिखा ” इत्यमरः । “अन्येष्वपि दृश्यते” इत्यत्रापि शब्दात्खनेर्डप्रत्ययः । अपरिखाः परिखाः संपद्यमानाः कृताः परिखीकृताः सागरा यस्यास्ताम् । अभूततद्भावे च्विः अविद्यमानमन्यस्य नृपस्य शासनं यस्यास्तामनन्यशासनामुर्वीमेकपुरीमिव शशास । अनायासेन शासितवानित्यर्थः [एकपुरीमित्यनेन सकलमहीमण्डलीपालनमनायासेन द्योत्यते—चा०]

(३१.) तस्य राज्ञो मगधवंशे जाता मगधवंशजा । “ सप्तम्यां जनेर्डः ” इति डप्रत्ययः । एतेनाभिजात्यमुक्तम् । दाक्षिण्यं परच्छन्दानुवर्तनम् । “दक्षिणः सरलोदारपरच्छन्दानुवर्तिषु ” इति शाश्वतः । तेन रूढं प्रसिद्धम् । तेन नाम्ना । अध्वरस्य यज्ञस्य दक्षिणा दक्षिणाख्या पत्नीव । सुदक्षिणेति प्रसिद्धा पत्न्यासीत् । अत्र श्रुतिः—‘यज्ञो गन्धर्वस्तस्य दक्षिणाप्सरसः ” इति । “ दक्षिणाया दाक्षिण्यं नामर्त्विजो दक्षिणत्वप्रापकत्वम् । ते दक्षन्ते दक्षिणां प्रतिगृह्य ” इति च ।

(३२.) वसुधाधिपः (पृथ्वीपतिः) अवरोधेऽन्तःपुरवर्गे महति सत्यपि । मनस्विन्या दृढचित्तया [मानिन्या-चा०] पतिचित्तानुवृत्त्यादिनिर्बन्धक्षमयेत्यर्थः । तया सुदक्षिणया लक्ष्म्या चात्मानं कलत्रवन्तं भार्यावन्तं मेने । “ कलत्रं श्रोणिभार्ययोः ” इत्यमरः । वसुधाधिप इत्यनेन वसुधया चेति गम्यते ।

(30.) He governed the earth which was subject to no other rule and whose encircling ramparts are the sea-shores and whose entrenchment is the ocean, like a single city.

(31.) He had a wife born in the family of the Magadha kings, by name Sudakshi*n*à, a name celebtated for its nobility, like Dakshi*n*à the wife of the sacrifice (a deity presiding over the gifts to priests).

(32.) Although his harem was large, the lord of the earth considered himself as having a wife on account of his high-minded Sudakshi*n*à and the goddess of Royal Fortune.

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ।
विलम्बितफलैः कालं स निनाय मनोरथैः ॥ ३३ ॥
संतानार्थाय विधये स्वभुजादवतारिता ।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥३४॥
अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।
तौ दंपती वशिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥ ३५ ॥

(३३.) स राजा । आत्मानुरूपायां (उचितायां) तस्याम् । आत्मनो जन्म यस्यासावात्मजन्मा पुत्रः । तस्मिन्समुत्सुकः (इष्टार्थोद्युक्त उत्सुकः इत्यमरः) । यद्वा । आत्मनो जन्मनि पुत्ररूपेणोत्पत्तौ समुत्सुकः सन् । " आत्मा वै पुत्रनामासि " इति श्रुतेः । विलम्बितं फलं पुत्रप्राप्तिरूपं येषां तैर्मनोरथैः कदा मे पुत्रो भवेदित्याशाभिः कालं निनाय यापयामास (अद्य भवति सुतो वा कल्ये इति चिन्तयन् स राजा कालमत्यवाहयत्) ।

(३४.) तेन दिलीपेन । संतानोऽर्थः प्रयोजनं यस्य तस्मै संतानार्थाय विधयेऽनुष्ठानाय । स्वभुजादवतारिता [इति कविसमयेनोक्तं—चा०] अवरोपिता जगतो लोकस्य गुर्वी धूर्भारः सचिवेषु (मंत्रिषु) निचिक्षिपे निहिता (स खलु संतानकामः विश्वस्तेषु सचिवेषु राज्यभारं निक्षिप्य भार्यां सुदक्षिणां च गृहीत्वारण्याभिमुखं प्रतस्थे) ।

(३५.) अथ धुरोऽवतारानन्तरं पुत्रकाम्ययात्मन पुत्रेच्छया । "काम्यच्च" इति पुत्रशब्दात्काम्यच्प्रत्ययः । "अ प्रत्ययात्" इति पुत्रकाम्यधातोरकारप्रत्ययः । ततष्टाप् । तया तौ दंपती जायापती । राजदन्तादिषु जायाशब्दस्य दमिति निपातनात्साधुः । प्रयतौ पूतौ विधातारं ब्रह्माणमभ्यर्च्य । "स खलु पुत्रार्थिभिरुपास्यते" इति मान्त्रिकाः । गुरोः कुलगुरोर्वशिष्ठस्याश्रमं जग्मतुः । पुत्रप्राप्त्युपायापेक्षयेति शेषः (आत्मार्थे चासृजत्पुत्रान् लोककर्तॄन् पितामहः । विश्वे-प्रजानां पतयो येभ्यो लोका विनिःसृताः । विश्वेशं प्रथमं नामत्येवं स राजा संतानार्थं ब्रह्माणं मानसविधिनोपास्य पश्चाद्वशिष्ठाश्रमं जगामेत्यर्थः) ।

(३६.) स्निग्धो मधुरो गम्भीरो निर्घोषो यस्य तमेकं स्यन्दनं रथम् । प्रावृषि भवः प्रावृषेण्यः । " प्रावृष एण्यः " इत्येण्यप्रत्ययः । तं प्रावृषेण्यं पयोवाहं मेघं विद्युदैरावताविव [मेघस्योपरि मेघो यः स ऐरावत उच्यते इति दक्षिणावर्तः यद्वा ऐरावतो नभःसंचरिष्णुः

(33.) He who was anxious for the birth of a son by her who was worthy of him, passed his time in (with) desires the fulfilment of which was put off.

(34.) In order to perform some ceremony with a view to gain progeny the heavy yoke of the world was taken down by him from his arms and transferred to his ministers.

(35.) Then the purified couple having worshipped the god Brahmá with the desire of getting a son went down to the hermitage of the sage Vas'ishtha, their family-preceptor.

स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥ ३६ ॥
मा भूदाश्रमपीडेति परिमेयपुरःसरौ
अनुभावविशेषात्तु सेनापरिवृताविव ॥ ३७
सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥ ३८ ॥

अत एवाभ्रमातङ्गनामा शक्रमातङ्गः । विद्युदैरावते इति पाठे त्वैरावतमिन्द्रधनुरित्यत्र पुंनपुंसकयोर्भिन्नलिंगस्यानिष्टत्वादुपमादूषणं चिन्तनीयं—चा०] आस्थितावारूढौ । जग्मतुरिति पूर्वेण संबन्धः । इरा आपः ॥ " इरा भूवाक्सुराप्सु स्यात् " इत्यमरः । इरावान्समुद्रः । तत्र भव ऐरावतोऽभ्रमातङ्गः । " ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः " इत्यमरः । " अभ्रमातङ्गत्वाच्चाभ्रस्थत्वादभ्ररूपत्वात् " इति क्षीरस्वामी । अत एव मेघारोहणं विद्युत्साहचर्यं च घटते । किंच विद्युत ऐरावतसाहचर्यादैरावती संज्ञा । ऐरावतस्य स्त्रीचैरावतीति क्षीरस्वामी । तस्मात्सुष्टूक्तं विद्युदैरावताविवेति । एकरथारोहणोक्त्या कार्यसिद्धिबीजं दंपत्योरत्यन्तसौमनस्यं सूचयति ।

(३७.) पुनः किंभूतौ दंपती । आश्रमपीडा मा भून्मास्त्विति हेतोः । "माङि लुङ् इत्याशीरर्थे लुङ् । "माङ्योगे" इत्यडागमनिषेधः । परिमेयपुरःसरौ (परिमेयाः गणनीयाः पुरःसराः अग्रेसराः ययोस्तौ तथोक्तौ) परिमितपरिचरौ । अनुभावविशेषात्तु तेजोविशेषात् (सार्वभौमप्रभावाधिक्याच्च अनुभावः प्रभावे स्यान्निश्चये भावबोधके इति मेदिनी) सेनापरिवृताविव स्थितौ (तपोवनवासिनामुपरोधो माभूत् । अत्रैव तावद्रथं स्थापय । यावदवतरामि । विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इत्येव समार्थः सन्दर्भः) ।

(३८.) पुनः कथंभूतौ । सुखः शीतलत्वात्प्रियः स्पर्शो येषां तैः [वने शैत्यमांद्यसौरभ्याणि कविसमयविशेषणे—चा०] शालनिर्यासगन्धिभिः सर्जतरुनिस्यन्दगन्धवद्भिः । " शालः सर्जतरुः स्मृतः " इति शाश्वतः । उत्किरन्ति विक्षिपन्तीत्युत्किराः । " इगुपध—" इत्यादिना किरतेः कप्रत्ययः । पुष्परेणूनामुत्किरास्तैः [एतेन सौगन्ध्यमुक्तं—सु०] आधूता मान्द्यादीषत्कम्पिता वनराजयः [अरण्यपंक्तयः एतेन मांद्यं । राजिः स्यात् पंक्तिलेखयोरिति विश्वः—चा०] यैस्तैर्वातैः सेव्यमानौ ।

---

(36) Seated in one car of an agreeable and deep sound, like the Lightning and Airâvata riding on an autumnal cloud,—

(37) (Though) having a limited retinue, in order that there might be no disturbance to the hermitage they appeared as if surrounded by an army because of their peculiar lustre.

(38.) (On their way) they were served with the breezes of an agreeable touch, scented with the fragrance of S'ála exudation, which (again) wafted over the dust of the pollens of flowers and by which the groves of forests were slightly shaken

मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥ ३९ ॥
परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥ ४० ॥

(३९.) रथनेमिस्वनोन्मुखैः (रथस्य नेमीनां चक्रधाराणां यः स्वनः शब्दः तेनोन्मुखाः तैः तथोक्तैः) । मेघध्वनिशङ्कयोन्नमितमुखैरित्यर्थः । शिखण्डिभिः [शिखण्डिन्य. शिखण्डिनश्च ते मयूरमिथुनैः—चा०] मयूरैः [स्त्रीपुंसभेदात द्विधाभेदेन-चा०] द्विधा भिन्नाः । शुद्धविकृतभेदेनाविष्कृतावस्थायां च्युताच्युतभेदेन वा षड्जो द्विविधः । तस्मादस्यात्केका अपि द्विधा भिन्ना इत्युच्यते । अत एवाह षड्जसंवादिनीरिति । षड्भ्यः स्थानेभ्यो जातः षड्जः । तदुक्तम्— “ नासाकण्ठमुरस्तालु जिह्वादन्तांश्च संस्पृशन् । षड्भ्यः संजायते यस्मात्तस्मात्षड्ज इति स्मृतः ” । स च तन्त्रीकण्ठजन्मा स्वरविशेषः । “ निषादर्षभगान्धारषड्जमध्यमधैवताः । पंचमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ” इत्यमरः । षड्जेन संवादिनीः सदृशीः । तदुक्तं मातङ्गेन—“ षड्जं मयूरो वदति (ऋषभं चातको वदेत्) ” इति । मनोभिरामा मनसः प्रियाः (आह्लाददायिनीः) । के मूर्ध्नि कायन्ति ध्वनन्तीति केका मयूरवाण्यः । “केका वाणी मयूरस्य” इत्यमरः । ताः केकाः शृण्वन्तौ । इति श्लोकार्थः ।

(४०.) विश्रम्भाददूरं समीपं यथा भवति तथोज्झितं वर्त्म यैस्तेषु । स्यन्दनाबद्धदृष्टिषु स्यन्दने रथे आबद्धासंजिता (लग्ना) दृष्टिर्नेत्रं यैस्तेषु (ग्रीवाभंगाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिरिति समार्थः श्लोकांशः) । “ दृग्दृष्टिर्नेत्रलोचनचक्षुर्नयनाम्बकेक्षणाक्षीणि ” इति हलायुधः । कौतुकवशाद्रथासक्तदृष्टिष्वित्यर्थः । मृग्यश्च मृगाश्च मृगाः । “ पुमान्स्त्रिया ” इत्येकशेषः । तेषां द्वन्द्वेषु मिथुनेषु । “ स्त्रीपुंसौ मिथुनं द्वन्द्वम्” इत्यमरः । परस्पराक्ष्णां सादृश्यं पश्यन्तौ [परस्परमिति कर्मव्यतिहारे सर्वनाम्नः समासवच्च बहुलमिति भावः-चा०] द्वन्द्वशब्दसामर्थ्यान्मृगीषु सुदक्षिणाक्षिसादृश्यं दिलीपो दिलीपाक्षिसादृश्यं च मृगेषु सुदक्षिणेत्येवं विवेक्तव्यम् ।

(४१.) श्रेणीबन्धात्पंक्तिबन्धनाद्वितोरस्तम्भामाधारस्तंभरहिताम् ।तोरणं बहिर्द्वारम्। “तोरणोऽस्त्री बहिर्द्वारम्” इत्यमरः।तत्र या स्रग्विरच्यते तां तोरणस्रजं (वन्दनमालां-चा०) वितन्वद्भिः (विस्तारयद्भिः) कुर्वद्भिरित्यर्थः । उत्प्रेक्षाव्यंजकेवशब्दप्रयोगाभावेऽपि गम्योत्प्रेक्षेयम् ।

(39.) They heard notes of peacocks with their heads up-lifted at the sound of the car-wheels, which, divided as they were into two parts, were very charming to the mind and in conformity with the षड्ज notes.

(40.) They (two) saw the similarity of each other's eyes in the pairs of antelopes, moved out of the way to a little distance with their sight (eyes) fixed on the car.

श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥ ४१ ॥
पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः ।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥ ४२ ॥
सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम् ॥ ४३ ॥
ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥ ४४ ॥

कलनिर्ह्रादैरव्यक्तमधुरध्वनिभिः सारसैः पक्षिविशेषैः । करणैः । क्वचिदुन्नमिताननौ (ऊर्ध्वकृतमुखौ) । " सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः " इति यादवः ।

(४२.) प्रार्थनासिद्धिशंसिनः (पुत्राभिलाषसिद्धिस्तां शंसितुं सूचयितुं शीलमस्य तथोक्तस्य) अनुकूलत्वादेव मनोरथसिद्धिसूचकस्य पवनस्यानुकूलत्वाद्गन्तव्यदिगभिमुखत्वात् [शुभगन्धे च शब्दे च सानुकूले च मारुते । प्रस्थिते सर्वकार्याणां सर्वसिद्धिर्ध्रुवं भवेदिति बालकाव्यः—चा०] । तुरगोत्कीर्णैः रजोभिः (धूलिभिः) अस्पृष्टा अलकाः (कुन्तलाः) देव्याः । वेष्टनमुष्णीषं च (उष्णीषन्तु शिरोवेष्टे किरीटे लक्षणान्तरे 'इति मेदिनी) राज्ञः । ययोस्तौ तथोक्तौ । " शिरसा वेष्टनशोभिना सुतः " इति वक्ष्यति ।

(४३.) सरसीषु [महासरःसु । महांति सरांसि सरस्यः इति जिनेन्द्रबुद्धिः—चा०] वीचिविक्षोभशीतलम् (वीचीनां जलकल्लोलानां विक्षोभश्चलनं तत्राधारभूतानां कमलानां शीतलत्वात्) ऊर्मिसंघटनेन शीतलं स्वनिःश्वासमनुकर्तुं शीलमस्येति स्वनिःश्वासानुकारिणम् । एतेन तयोरुत्कृष्टस्त्रीपुंसजातीयत्वमुक्तम् । अरविन्दानामामोदम् (परिमलं) उपजिघ्रन्तौ घ्राणेन गृह्णन्तौ ।

(४४.) आत्मविसृष्टेषु स्वदत्तेषु । यूपो नाम संस्कृतः पशुबन्धाय दारुविशेषः । यूपा एव चिह्नानि येषां तेषु ग्रामेष्वमोघाः सफलाः यज्वनां विधिनेष्टवताम् । "यज्वा तु विधिनेष्टवान् " इत्यमरः । " सुयजोर्ङ्वनिप् " इति ङ्वनिप्प्रत्ययः आशिष आशीर्वादान् । अर्घः पूजाविधिः ।

(41.) They were occasionally made to raise their faces (heads) by the cranes with their sweet warbling, who, on account of their forming a row, (appeared to have) stretched a front-door garland unsupported by any pillars.

(42.) On account of the favourableness of the wind promising the accomplishment of desire, they two were not touched in the hair and the turban by the mass of dust raised up by the horses.

(43.) They smelt the fragrance of the lotuses in the lotus-ponds, cooled by the dashing of the waves and imitating their own breath.

(44.) They accepted the efficacious blessings, after Arghya, of sacrificers

हैयंगवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥ ४५ ॥
काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥ ४६ ॥
तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः ।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥ ४७ ॥

तदर्थं द्रव्यमर्घ्यम् । " पादार्घाभ्यां च " इति यत्प्रत्ययः । " षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि " इत्यमरः । अर्घ्यस्यानुपदमन्वक् । अर्घ्यस्वीकारानन्तरमित्यर्थः । प्रतिगृह्णन्तौ स्वीकुर्वन्तौ । पदस्य पश्चादनुपदम् । पश्चादर्थेऽव्ययीभावः । " अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम् " इत्यमरः ।

(४५.) ह्यस्तनगोदोहोद्भवं घृतं हैयंगवीनम् । ह्यः पूर्वेद्युर्भवम् । "तत्तु हैयंगवीनं यद्ध्योगोदोहोद्भवं घृतम् " इत्यमरः । " हैयंगवीनं संज्ञायाम् " इति निपातः । तत्सद्योघृतमादायोपस्थितान्घोषवृद्धान् (आभीरान्)। "घोष आभीरपल्ली स्यात्" इत्यमरः। वन्यानां मार्गशाखिनां नामधेयानि पृच्छन्तौ । ' दुह्याच ' इत्यादिना पृच्छतेर्द्विकर्मकत्वम् । कुलकम् ।

(४६) व्रजतोर्गच्छतोः शुद्धवेषयोरुज्ज्वलनेपथ्ययोस्तयोः सुदक्षिणादिलीपयोः । हिमनिर्मुक्तयोश्चित्राचन्द्रमसोरिव । योगे सति काप्यनिर्वाच्याभिख्या शोभासीत् । " अभिख्या नामशोभयोः " इत्यमरः । " आतश्चोपसर्गे " इत्यङ्प्रत्ययः । चित्रा नक्षत्रविशेषः । शिशिरापगमे चैत्र्यां चित्रापूर्णचन्द्रमसोरिवेत्यर्थः ।

(४७.) प्रियं दर्शनं स्वकर्मकं यस्यासौ प्रियदर्शनः । योग्यदर्शनीय इत्यर्थः । भूमिपतिः पत्न्यै तत्तदद्भुतं वस्तु दर्शयंल्लङ्घितमतिवाहितमप्यध्वानं न बुबुधे न ज्ञातवान् । बुधः सौम्य उपमोपमानं यस्येति विग्रहः [प्रियदर्शनः अपूर्ववस्तुद्रष्टा बुधश्चन्द्रपुत्रो ग्रहस्तेन तुल्योपि न बुबुधे इति विरोधाभासोलंकारः-चा०] इदं विशेषणं तत्तद्दर्शयन्नित्युपयोगितयैवास्य ज्ञातृत्वसूचनार्थम् ।

---

in villages which were granted to them by himself and which were marked with sacrificial posts.

(45.) They asked the names of the wild trees on the way to the old cowherds who had come to them with fresh ghee (lit: having taken with them fresh ghee).

(46.) Some indescribable splendour was seen on them as they drove away, with clean garments, as is seen on the Chitrà and the moon in their conjunction when they are relieved from mists.

(47.) That lord of the earth, of agreeable appearance, who was like the gods, showing to his wife (now) this and (now) that, did not even know the way already) passed.

स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥ ४८ ॥
वनान्तरादुपावृत्तैः समित्कुशफलाहरैः ।
पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥ ४९ ॥
आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ।
अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥ ५० ॥

(४८.) दुष्प्रापयशा दुष्प्रापमन्यदुर्लभं यशो यस्य स तथोक्तः । श्रान्तवाहनो (श्रान्तानि खिन्नानि वाहनानि तुरगा यस्य स) दूरोपगमनात्क्लान्तयुग्यः । महिष्याः सखा महिषीसखः [कृताभिषेका महिषीति हैमः कोषः–चा०] । " राजाहःसखिभ्यष्टच् " इति टच्प्रत्ययः । सहायान्तरनिरपेक्ष इति भावः । स राजा सायं सायंकाले संयमिनो नियमवतस्तस्य महर्षेर्वसिष्ठस्याश्रम प्रापत्प्राप । पुषादित्वादङ् [अनुप्रासालंकारोयं–चा०] । तमाश्रमं विशिनष्टि—

(४९.) वनान्तरादन्यस्माद्वनादुपावृत्तैः प्रत्यावृत्तैः [आश्रमवनच्छेदस्यायुक्तत्वाद्वनान्तरादुपावृत्तैरित्युक्तं–चा०] । समिधश्च कुशांश्च फलानि चाहर्तुं शीलं येषामिति समित्कुशफलाहराः, तैः । " आङि ताच्छील्ये " इति हरतेराङ्पूर्वादच्प्रत्ययः । अदृश्यैर्दर्शनायोग्यैरग्निभिर्वैतानिकैः प्रत्युद्याताः प्रत्युद्गताः । तैस्तपस्विभिः पूर्यमाणम् (व्याप्यमानं) । "प्रोष्यागच्छतामाहिताग्नीनामग्नयः प्रत्युद्यान्ति " इति श्रुतेः । यथाह—" कामं पितरं प्रोषितवन्तं पुत्राः प्रत्याधावन्ति । एवमेतमग्नयः प्रत्याधावन्ति सशकलान्दारूनिवाहरन् " इति [आहिताग्नीनामग्नयः स्वयं प्रत्युद्गमं कुर्वन्तीति पौराणिकाः–सु०] ।

(५०.) नीवाराणां भाग एव भागधेयोऽशः (वण्टो वा) । " रूपनामभागेभ्यो धेयः " इति वक्तव्यसूत्रात्स्वार्थाभिधेये धेयप्रत्ययः । तस्योचितैः (योग्यैः) अत एवोटजानां पर्णशालानां द्वाररोधिभिर्द्वाररोधकैः (अर्थात् मुनिगृहद्वारावरणशीलैः) मृगैः । ऋषिपत्नीनाम् (मुनिस्त्रीणां) अपत्यै (पुत्रैः) इव । आकीर्णं व्याप्तम् ।

(48.) He, of a glory difficult to be attained by others, with horses fatigued and with his queen for a companion, got to the hermitage, in the evening, of that great sage who observed vows—

(49.) The hermitage which was being filled up with the hermits who had then returned from another forest bringing with them sacrificial sticks, Kus'a, and fruits, and who were welcomed by their invisible holy fires—

(50.) The hermitage which abounded with antelopes, blocking up the doors of the huts, which were accustomed to (eat) a part of the Nîvàra-corn, like children of the wives of the sages—

सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहंगानामालवालाम्बुपायिनाम् ॥ ५१ ॥
आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ॥ ५२ ॥
अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥ ५३ ॥
अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः ।
तामवारोहयत्पत्नीं रथादवततार च ॥ ५४ ॥

(५१.) सेकान्ते वृक्षमूलसेचनावसाने मुनिकन्याभिः (ऋषिसुताभिः) । मैत्रीभिः । आलवालेषु जलावापप्रदेशेषु यदम्बु तत्पायिनाम् (तरुमूलकृतोदकाधारगतं सत्रावाम्बु पातुं शीलं येषां तथोक्तानां) । "स्यादालवालमावापः" इत्यमरः । विहगानां पक्षिणां विश्वासाय विश्रम्भाय । "समौ विश्वासविश्रम्भौ" इत्यमरः । तत्क्षणे सेकक्षणे उज्झिताः (त्यक्ताः) वृक्षका ह्रस्ववृक्षाः यस्मिंस्तम् । ह्रस्वार्थे कप्रत्ययः ।

(५२.) आतपस्य (घर्मस्य) अत्ययेऽपगमे सति संक्षिप्ता राशीकृता नीवारास्तृणधान्यानि यासु तासु । "नीवारास्तृणधान्यानि" इत्यमरः । उटजानां पर्णशालानामङ्गनभूमिषु चत्वरभागेषु । "पर्णशालोटजोऽस्त्रियाम्" इति । "अङ्गनं चत्वराजिरे" इति चामरः । निषादिभिरुपविष्टैर्मृगैर्वर्तितो निष्पादितो [प्रारब्धः । कर्मणा रोमन्थतपोभ्यां वर्तिचरोरित्यत्र सूत्रे यो वर्तिधातुस्तदनुसारेण वर्तित इति प्रयोगः—चा०] रोमन्थश्चर्वितचर्वणं यस्मिन्नाश्रमे तम् ।

(५३.) अभ्युत्थिताः प्रज्वलिताः । होमयोग्या इत्यर्थः । "समिद्धेऽग्नावाहुतीर्जुहोति" इति वचनात् । तेषामग्नीनां पिशुनैः सूचकैः पवनोद्धूतैः (मारुतोत्थापितैः) आहुतिगन्धः (आज्यगन्धः) येषामस्तीत्याहुतिगन्धिनः । तैर्धूमैराश्रमोन्मुखानतिथीन्पुनानं पवित्रीकुर्वाणम् [विरोधाभासः—चा०] कुलकम् ।

(५४) अथाश्रमप्राप्त्यनन्तरं स राजा यन्तारं सारथिम् । धुरं वहन्तीति धुर्याः युग्याः

(51.) The hermitage, in which the trees had been quitted by the hermits' daughters the moment after watering (them), for inspiring confidence in the birds which drank the water from the basins (that encircled the trees)—

(52.) The hermitage where, on the setting of the sun, Nivara-corn had been heaped and where the antelopes sitting on the court-yard-grounds of the huts had done their rumination—

(53.) The hermitage purifying the guests, with faces turned toward it (the hermitage), by means of smoke indicative of the flaming (sacred) fires and scattered by the wind and charged with the smell of the offerings—

(54.) Then having commanded his charioteer to rest the yoked animals (horses) he caused (helped) his wife to descend from the car and himself alighted from it.

तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ ५५ ॥
विधेः सायंतनस्यान्ते स ददर्श तपोनिधिम् ।
अन्वासितमरुंधत्या स्वाहयेव हविर्भुजम् ॥ ५६ ॥
तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥ ५७ ॥

(तुरङ्गाः) ।"धुरो यड्ढकौ" इति यत्प्रत्ययः। "धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः" इत्यमरः। धुर्यान्रथाश्वान्विश्रामय विनीतश्रमान्कुर्वित्यादिश्याज्ञाप्य (आदृष्टाः क्रियन्तामित्यर्थः) तां पत्नीं रथादवारोहयदवतारितवान्स्वयं चावततार ।

(५५) सभायां (संसदि) साधवः सभ्याः (आचारज्ञाः) "सभाया यः" इति यप्रत्ययः । गुप्ततमेन्द्रिया अत्यन्तानियमितेन्द्रिया मुनयः सभार्याय (सपत्नीकाय) गोप्त्रे (प्रजा) रक्षकाय । नयः शास्त्रमेव चक्षुस्तत्त्वावेदकं प्रमाणं यस्य तस्मै नयचक्षुषे । अत एवार्हते प्रशस्ताय (मान्याय) पूज्यायेत्यर्थः । "अर्हः प्रशंसायाम्" इति शतृप्रत्ययः । तस्मै राज्ञेऽर्हणां पूजां चक्रुः । "पूजा नमस्यापचितिः सपर्याचार्हणाः समाः" इत्यमरः ।

(५६) स राजा सायंतनस्य सायंभवस्य । "सायंचिरम्-"इत्यादिना ट्युल्प्रत्ययः। विधेर्जपहोमाद्यनुष्ठानस्यान्तेऽवसानेऽरुंधत्यान्वासितं पश्चादुपवेशनेनोपसेवितम् । कर्मणि क्तः। उपसर्गवशात्सकर्मकत्वम् । अन्वास्यैनामित्यादिवदुपपद्यते । तपोनिधिं वशिष्ठम्। स्वाहया स्वाहादेव्या । "अथाग्नायी स्वाहा च हुतभुक्प्रिया" इत्यमरः । अन्वासितं हविर्भुजमिव ददर्श (अद्राक्षीत्) । "समित्पुष्पकुशाग्न्यम्बुमृदन्नाक्षतपाणिकः । जपं होमं च कुर्वाणो नाभिवाद्यो द्विजो भवेत्" इत्यनुष्ठानस्य मध्येऽभिवादननिषेधाद्विधेरन्ते ददर्शेत्युक्तम् । अन्वासनं चात्र पतिव्रताधर्मत्वेनोक्तं न तु कर्माङ्गत्वेन। विधेरन्त इति कर्मणः समाप्त्यभिधानात् [अग्नेरौपम्येन वशिष्ठस्य तेजस्वित्वं पावनत्वं चोक्तं चा०] ।

(५७) मागधी मगधराजपुत्री राज्ञी सुदक्षिणा राजा च तयोररुंधतीवशिष्ठयोः पादाञ्जगृहतुः (उपसंग्रहणं चक्रतुः)। "पादः पदङ्घ्रिश्चरणोऽस्त्रियाम्" इत्यमरः । पादग्रहणमभिवादनम् । गुरुपत्नी गुरुश्च । कर्तारौ । सा च स च तौ सुदक्षिणादिलीपौ कर्मभूतौ प्रीत्या ह-

---

(55.) Him who was accompanied by his wife, the protector, and who was respectable and whose eyes were the S'ástras (conversant with truth) the hospitable Munis (sages) whose senses were perfectly kept under restraint gave respect (received with due honour).

(56.) At the end of the evening rites he saw the treasure of penance (the great Muni); behind him sat Arundhati like Sváhá sitting behind Fire.

(57.) The king and the queen, the Magadha-princess bowed down at (lit: took) their feet. The preceptor and his wife welcomed them with affection,

तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् । jolting
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥ ५८ ॥
अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ।
अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ॥ ५९ ॥

र्षेण प्रतिननन्दतुः [दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः इति मनुः—चा०] आशीर्वादादिभिः संभावयांचक्रतुरित्यर्थः [चारित्रवर्द्धनस्तु पादौ इति पाठं गृहीत्वा तमेव समर्थयति। ननु पादानिति वक्तव्ये पादाविति कथं द्विवचनप्रयोगः । पादजातेर्द्वित्रविवक्षितत्वात् । स्त्रीणां चक्षुरित्यादिवन्न दोषः। उक्तं च वामनेन "स्तनादौ द्वित्वं द्वित्वाविष्टा जातिः प्रायेण " इति । यथा माघे " स्तनौ दधानास्तरुण्यः " इति । मागधीपदेन विशिष्टवंशत्वं ज्ञाप्यते । तेन च गुरुजनचरणप्रणामौचित्यं द्योत्यते । ननु कथं राजा राज्ञीत्यादीनामेकवचनानां जगृहतुः प्रतिननन्दतुरिति द्विवचनक्रियाभि : सम्बन्धः । द्वयोर्नाम्नोर्बहूनां वा यदि वाक्यं समुच्चये। अङ्गवच्चाश्रिता संख्यापाद्यादौ वा विशेषतः इति विकल्पविधानान्न दोषः—चा०] । •

(५८) मुनिः। अतिथ्यर्थमातिथ्यम् । "अतिथेर्ञ्यः" इति ञ्यप्रत्ययः। आतिथ्यस्य क्रिया । तया शान्तो रथक्षोभेण यः परिश्रमः स यस्य स तं तथोक्तम् । राज्यमेवाश्रमस्तत्र मुनिम् । मुनितुल्यमित्यर्थः। तं दिलीपं राज्ये कुशलं पप्रच्छ । पृच्छतेस्तु द्विकर्मकत्वमित्युक्तम् । यद्यपि राज्यशब्दः पुरोहितादिष्वन्तर्गतत्वाद्राजकर्मवचनः।तथाप्यत्र सप्ताङ्गवचनः। "उपपन्नं ननु शिवं सप्तस्वङ्गेषु" इत्युत्तरविरोधात् । तथाह मनुः—" स्वाम्यमात्यपुरं राष्ट्रं कोशदण्डौ तथा सुहृत् । सप्तैतानि समस्तानि लोकेऽस्मिन्राज्यमुच्यते " इति । तत्र " ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च " इति मनुवचने सत्यपि तस्य राज्ञो महानुभावत्वाद्ब्राह्मणोचितः कुशलप्रश्न एव कृत इत्यनुसंधेयम् । अत एवोक्तं ' राज्याश्रममुनिम् ' इति ।

(५९) अथ प्रश्नानन्तरं विजितारिपुरो विजितशत्रुनगरो वदतां वक्तृणां वरः श्रेष्ठः (वाग्मिनामग्रेसरः) " यतश्च निर्धारणम् " इति षष्ठी। अर्थपती राजाथर्वणोऽथर्ववेदस्य निधेः [अथर्ववेदाभिज्ञस्य । अथर्वनिधिपदेन दुरितोपशमननिमित्तशान्तिकपौष्टिकप्रवीणत्वं पौरोहित्योचितत्वं द्योतते । तथाहि "पुरोहितं च कुर्वीत दैवज्ञमुदितोदितम् । दण्डनीत्यां च कुशलमथर्वाङ्गिरसे तथा " इति मिताक्षरायां—चा०] तस्य मुनेः पुरोऽग्रेऽर्थ्यामर्थादनपेताम् । " ध-

(58) Him who was the Muni of the hermitage in the form of the kingdom and whose fatigue caused by the joltings of the chariot had been relieved (removed) by the hospitable reception, asked the Muni about the prosperity (well-being) of the kingdom.

(59.) Then the lord of wealth, the best of the eloquent and by whom the enemies' cities were conquered, spoke in words replete with sense before that repository of the Atharva Veda (the sage Vas'istha). •

उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ॥ ६० ॥
तव मन्त्रकृतो मन्त्रैर्दूरात्प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ ६१ ॥
हविरावर्जितं होतस्त्वया विधिवदग्निषु ।
वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम् ॥ ६२ ॥

भपथ्यर्थन्याय इनपेत " इति यत्प्रत्यय । वाचमाददे । वक्तुमुपक्रान्तवानित्यर्थः । अथर्वनिधेरित्यनेन पुरोहितकृत्याभिज्ञत्वात्तत्कर्मनिर्वाहकत्व मुनेरस्तीति सूच्यते । यथाह कामन्दकः—" त्रय्यां च दण्डनीत्यां च कुशलः स्यात्पुरोहित. । अथर्वविहितं कुर्यान्नित्य शान्तिकपौष्टिकम् " इति ।

(६०) हे गुरो । सप्तस्वङ्गेषु स्वाम्यमात्यादिषु । " स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । सप्ताङ्गानि " इत्यमरः । शिवं कुशलमुपपन्नं ननु युक्तमेव । नन्ववधारणे । "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु " इत्यमरः । कथमित्यत्राह—यस्य मे दैवीनां देवेभ्य आगतानां दुर्भिक्षादीना मानुषीणां मनुष्येभ्य आगतानां चौरभयादीनाम् । उभयत्रापि " तत आगतः " इत्यण् । " टिड्ढाणञ्–" इत्यादिना ङीप् । आपदां व्यसनानां (कर्तृकर्मणोः कृतीति षष्ठी) त्वं प्रतिहर्ता वारयितासि । अत्राह कामन्दकः—" हुताशनो जलं व्याधिर्दुर्भिक्षं मरणं तथा । इति पञ्चविधं दैवं मानुषं व्यसनं ततः । आयुक्तकेभ्यश्चौरेभ्यः परेभ्यो राजवल्लभात् । पृथिवीपतिलोभाच्च नराणां पञ्चधा मतम् " इति । तत्र मानुषापत्प्रतीकारमाह—

(६१.) दूरात्परोक्ष एव प्रशमितारिभिः । मन्त्रान्कृतवान्मन्त्रकृत् [मंत्रं संहिताविभागं कृतवान्–चा०] " सुकर्मपापमन्त्रपुण्येषु कृञः " इति क्विप् । तस्य मन्त्रकृतः मन्त्राणां स्रष्टुः प्रयोक्तुर्वा तव मन्त्रैः । कर्तृभिः । दृष्टं प्रत्यक्षं यल्लक्ष्य तन्मात्रं भिन्दन्तीति दृष्टलक्ष्यभिदो मे शराः प्रत्यादिश्यन्त इव । वयमेव समर्थाः किमेभिः पिष्टपेषकैरिति निराक्रियन्त इव [इव शब्देनात्मनः पौरुषं संभावयति–चा०] इत्युत्प्रेक्षा । " प्रत्यादेशो निराकृतिः " इत्यमरः । त्वन्मन्त्रसामर्थ्यादेव न पौरुषं फलतीति भावः । संप्रति दैविकापत्प्रतीकारमाह—

(६२.) हे होतस्त्वया विधिवदग्निष्वावर्जितं प्रक्षिप्तं हविराज्यादिकम् । कर्तृ । अवग्र-

---

(60) Prosperity with respect to the seven members (departments) of my kingdom is a matter of course since thou art the preventer (remover) of (all) divine as well as human calamities that may befall me

(61) My arrows which pierce only visible objects are, as it were, repelled (rendered futile) by your Mantras that check (discomfit) the enemies from a distance —you who are the creator of the Mantras

(62) Offered by thee in conformity with the established rites into the (sacrificial) fires, O sacrificer, the oblation becomes a shower to the crops dried up (withered) by drought

पुरुषायुषजीविन्यो निरातङ्का निरीतयः।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ॥ ६३ ॥
त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना।
सानुबन्धाः कथं न स्युः संपदो मे निरापदः ॥ ६४ ॥
किंतु वध्वां तवैतस्यामदृष्टसदृशप्रजम्।
न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥ ६५ ॥

ह्रो वर्षप्रतिबन्धः (वृष्टिविघातः)। " अवे ग्रहो वर्षप्रतिबन्धे " इत्यप्प्रत्ययः। " वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ " इत्यमरः। तेन विशोषिणां विशुष्यतां शस्यानां वृष्टिर्भवति। वृष्टिरूपेण शस्यान्युपजीवयतीति भावः। अत्र मनुः—" अग्नौ दत्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः " इति।

(६३.) आयुर्जीवितकालः। पुरुषस्यायुः पुरुषायुषम्। वर्षशतमित्यर्थः। " शतायुर्वै पुरुषः " इति श्रुतेः। " अचतुर- " आदिसूत्रेणाच्प्रत्ययान्तो निपातः। मदीयाः प्रजाः। पुरुषायुषं जीवन्तीति पुरुषायुषजीविन्यः। निरातङ्काः (निर्गतः आतङ्कः रोगसन्तापभयं याभ्यस्ताः तथोक्ताः) निर्भयाः। " आतङ्को भयमाशङ्का " इति हलायुधः। निरीतयोऽतिवृष्ट्यादिरहिता इति यत्तस्य सर्वस्य त्वद्ब्रह्मवर्चसं तव व्रताध्ययनसंपत्तिरेव हेतुः " व्रताध्ययनसंपत्तिरित्येतद्ब्रह्मवर्चसम् " इति हलायुधः। ब्रह्मणो वर्चो ब्रह्मवर्चसम्। "ब्रह्महस्तिभ्यां वर्चसः " इत्यच्प्रत्ययः " अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः। अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः " इति कामन्दकः।

(६४.) ब्रह्मा योनिः कारणं यस्य तेन ब्रह्मपुत्रेण [अथवा ब्रह्मणस्तपसो योनिः कारणं तेन—चा०] गुरुणा त्वयैवमुक्तप्रकारेण चिन्त्यमानस्यानुध्यायमानस्य। अत एव निरापदो व्यसनहीनस्य मे संपदः सानुबन्धाः सानुस्यूतयः (सप्रवाहाः) अविच्छिन्ना इति यावत्। कथं न स्युः। स्युरेवेत्यर्थः [संवीतस्य हि लोकेस्मिन्नदोषान्वेषणं क्षमं। शिवालिङ्गस्य संस्थाने कस्याभस्मत्वभावना—चा०]। संप्रत्यागमनप्रयोजनमाह—

(६५.) किंतु तवैतस्यां वध्वां स्नुषायाम्। "वधूर्जाया स्नुषा चैव" इत्यमरः। अदृष्टा सदृश्यनुरूपा प्रजा (सन्तानं) येन तं मां [सदृशप्रजमित्यनेन सर्वथा सन्तानभावो नास्ति—

(63.) If my subjects live for the (whole) period of human life and if they are free from fears and calamities, the cause of this is your rigorous penance (religious duties of reading, meditation and penance).

(64.) (In short) how can my prosperity be not continued (uninterrupted) since I am free from (every) distress and thus taken care of by thee, my preceptor, sprung from Brahmá ?

(65,) But, though producing gems, the earth, with all its continents, does

नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥ ६६ ॥
मत्परं दुर्लभं मत्वा नूनमावर्जितं मया।
पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ॥ ६७ ॥

चा०] सद्वीपापि [इति सार्वभौमं सूच्यते–चा०] । रत्नानि सूयत इति रत्नसूरपि । " सत्सूद्विष–" इत्यादिना क्विप् । मेदिनी नावति न प्रीणाति (रत्नदापि मही अप्रजस्य मे न किमपि सुखमावहतीत्यर्थः) । अवधातू रक्षणगतिप्रीत्याद्यर्थेषूपदेशादत्र प्रीणने । रत्नसूरपीत्यनेन सर्वरत्नेभ्यः पुत्ररत्नमेव श्लाघ्यमिति सूचितम् । तदेव प्रतिपादयति—

(६६.) मत्तः परं मदनन्तरम् । " पञ्चम्यास्तसिल् " पिण्डविच्छेददर्शिनः पिण्डदानविच्छेदमुत्प्रेक्षमाणाः । वंशोद्भवा वंश्याः पितरः । स्वधेत्यव्ययं पितृभोज्ये वर्तते । तस्याः संग्रहे तत्परा आसक्ताः सन्तः श्राद्धे पितृकर्मणि । " पितृदानं निवापः स्याच्छ्राद्धं तत्कर्म शास्त्रतः " इत्यमरः । प्रकामभुजः पर्याप्तभोजिनो न भवन्ति नूनं सत्यम् (मन्मृतेरनन्तरं स्वधासंग्रहैकबुद्ध्यो मे पितरः पिण्डदानलोपमवलोक्य श्राद्धे पर्याप्तं न किल भोक्ष्यन्ते तथाहि। अस्मात्परं बत यथाश्रुतिसंभृतानि । को नः कुले निवपनानि नियच्छतीति । नूनं प्रसूतिविकलेन मया प्रसिक्त । धौताश्रुशेषमुदक पितरः पिबन्ति इत्येवं समार्थः श्लोकांशः) । " कामं प्रकामं पर्याप्तम् " इत्यमरः । निर्धना ह्यापद्धनं कियदपि संगृह्णंतीति भावः ।

(६७.) मत्परं मदनन्तरम्। "अन्यारात्–" इत्यादिना पञ्चमी । दुर्लभं दुर्लभ्यं (दुष्प्राप्यं) मत्वा (ज्ञात्वा) मयावर्जित (दत्तं) पयः पूर्वैः पितृभिः स्वनिःश्वासैर्दुःखजः कवोष्णमीषदुष्णं यथा तथोपभुज्यते । [दिलीपानन्तरं पयो न लप्स्याम इति शोकावेशान्निर्गच्छद्भिर्निःश्वासैरीषदुष्णं पितरः स्वीकुर्वते इति तात्पर्यार्थः—चा०] । नूनमिति तर्के [उत्तरे वा–चा०] कवोष्णमिति कुशब्दस्य कवादेशः । "कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति " इत्यमरः ।

(६८.) इज्या यागः । "व्रजयजोर्भावे क्यप्" इति क्यप्प्रत्ययः । तया [दानेन च–चा०] विशुद्धात्मा विशुद्धचेतनः प्रजालोपेन संतत्यभावेन निमीलितः कृतनिमीलनः सोऽहम् । लोक्यते इति लोकः । न लोक्यते इत्यलोकः । लोकश्चालोकश्चात्र स्त इति लोकश्चासावलोकश्चे-

---

not (at all) please me, who have not seen a worthy offspring (the image of self) in this thy daughter-in-law (Sudakshinâ).

(66.) Surely after my death, my ancestors, foreseeing the prevention of rice-balls (the PINDA given in honour of the manes) and (therefore) given up to the laying by of (the greater part of) the Svadhâ-food (offered to them now), do not eat to their satisfaction at Shrâddha-ceremony (that I perform every year).

(67.) Indeed the oblation of water, offered by me, is drunk by my ancestors, (being made) lukewarm by their sighs, thinking it unobtainable after my death.

सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥ ६८ ॥
लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।
संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥ ६९ ॥
तया हीनं विनेतर्मां कथं पश्यन्न दूयसे।
सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ॥ ७० ॥
असह्यपीडं भगवन्नृणमन्त्यमवेहि मे।
अरुंतुदमिवालानमनिर्वाणस्य दन्तिनः ॥ ७१ ॥

ति वा लोकालोकः चक्रवालोऽचल इव। "लोकालोकश्चक्रवालः" इत्यमरः। प्रकाशते इति प्रकाशश्च देवर्णविमोचनात। न प्रकाशते इत्यप्रकाशश्च पितृणा विमोचनात्। पचाद्यच्। अस्मीति शेषः। लोकालोकोऽप्यन्तः सूर्यसपर्कोद्बहिस्तमोव्याप्त्या च प्रकाशश्चाप्रकाशश्चेति मन्तव्यम्। ननु तपोदानादिसंपन्नस्य किमपत्यैरित्यत्राह—

(६९.) समुद्भवत्यस्मादिति समुद्भवः कारणम्। तपोदाने समुद्भवो यस्य तत्तपोदानसमुद्भवं यत्पुण्यं तल्लोकान्तरे परलोके सुखं सुखकरम्। शुद्धवंशे भवा शुद्धवंश्या संततिर्हि परत्र परलोके इह च लोके शर्मणे सुखाय (तपोदानक्रियादिभिः समुद्भूतं पुण्य परलोकसुखावहं भवति परं तु अमलिनकुले जाता संततिःउभावपि लोके सुखाय संपत्स्यते)। "शर्मशातसुखानि च" इत्यमरः। भवतीति शेषः।

(७०.) हे विनेतः गुरो तया संतत्या हीनमनपत्यं माम्। स्नेहात्प्रेम्णा स्वयमेव सिक्तं जलसेकेन वर्धितं वन्ध्यमफलम्। "वन्ध्योऽफलोऽवकेशी च" इत्यमरः। आश्रमस्य [आश्रमशब्देन स्नेहाधिक्यं–चा०] वृक्षकं वृक्षपोतमिव। पश्यन्कथ न दूयसे न परितप्यसे। विनेतरित्यनेन समर्थोऽप्युपेक्षसे इति गम्यते।

(७१.) हे भगवन्मे ममान्त्यमृणं पैतृकमृणम्। अनिर्वाणस्य मज्जनरहितस्य। "निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने" इति यादवः। दन्तिनो गजस्य। अरुर्मर्म तुदतीत्यरुंतुदं मर्मस्पृक्।

(68.) (Hence) with my soul sanctified by the performance of the sacrifices to the Gods, (yet) obscured by the extinction of offspring [the race , I am both shining and dark, like the mountain Lokáloka

(69.) The merit arising from penance and alms-giving procures felicity only in the next world, while offspring born of a pure family (origin) are for happiness both here and hereafter.

(70.) How are you, O my preceptor, not troubled to see me destitute of it, as in the case of a sterile (barren) tree in your hermitage that has been watered by you in person through affection (for it)?

(71.) Know then, my venerable sage, the pangs of this last debt of mine to be unbearable, like the sharp chain to an elephant who has been unwashed.

तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि ।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥ ७२ ॥
इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ॥ ७३ ॥
सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ॥ ७४ ॥

"व्रणोऽस्त्रियामीर्ममरुः" इति । "अरुंतुदस्तु मर्मस्पृक्" इति चामरः । "विध्वरुषोस्तुदः" इति खश्प्रत्ययः । "अरुर्द्विषत्—" इत्यादिना मुमागमः । आलानं बन्धनस्तम्भमिव । "आलानं बन्धनस्तम्भे" इत्यमरः । असह्या सोढुमशक्या पीडा दुःखं यस्मिस्तदवेहि । दुःसहदुःखजनकं विद्धीत्यर्थः । "निर्वाणोत्थानशयनानि त्रीणि गजकर्माणि" इतिपालकाव्ये । "ऋणं देवस्य यागेन ऋषीणां दानकर्मणा । संतत्या पितृलोकानां शोधयित्वा परिव्रजेत्" ।

(७२.) हे तात तस्मात्पैतृकादृणाद्यथा मुच्ये मुक्तो भवामि । कर्मणि लट् । तथा संविधातुं कर्तुमर्हसि । हि यस्मात्कारणादिक्ष्वाकूणामिक्ष्वाकुवंश्यानाम् । तद्राजत्वाद्बहुष्वणो लुक् । दुरापे दुष्प्राप्येऽर्थे । सिद्धयस्त्वदधीनास्त्वदायत्ताः । इक्ष्वाकूणामिति शेषे षष्ठी "न लोक–" इत्यादिना कृद्योगेषष्ठीनिषेधात् [कथं कर्तरि षष्ठी । आक्षिपंत्यरविन्दानि मुग्धे तव मुखश्रियं । कोशदण्डसमग्राणां किमेषामस्ति दुष्करमित्यादावलंकारिकैरादृतत्वान्न दोषः । यदाह च भोजः । इदं शास्त्रमाहात्म्यदर्शनालसचेतसां । अपशब्दपदाभाति न च सौभाग्यमुज्झतीति–चा०] ।

(७३.) इति राज्ञा विज्ञापितः ऋषिर्ध्यानेन (समाधिना) स्तिमिते (निश्चले) लोचने (नेत्रे) यस्य ध्यानस्तिमितलोचनो निश्चलाक्षः सन्क्षणमात्रम् । सुप्तमीनो (सुप्ताः निद्रां प्राप्ताः मीनाः मत्स्याः यत्र स तथोक्तः) ह्रदः (तडागः) इव । तस्थौ (स्थितः) ।

(७४.) स मुनिः प्रणिधानेन ("प्रणिधानं प्रयत्ने स्यात् प्रवेशे च समाहितौ इतिविश्वः") चित्तैकाग्र्येण [योगसमाधिना–चा०] भावितात्मा शुद्धान्तःकरणो भुवो भर्तुर्नृपस्य संततेः स्तम्भकारणं संतानप्रतिबन्धकारणमपश्यत् । अथानन्तरमेनं नृपं प्रत्यबोधयत् । स्वदृष्टं ज्ञापितवानित्यर्थः । एनमिति "गतिबुद्धि" इत्यादिनाणिकर्तुः कर्मत्वम् ।

(72.) Therefore, O Sire, be pleased to do that by which I may be freed from that debt For the accomplishments of the objects, difficult to be obtained by the kings born in the family of Ikshváku, are dependent on thee.

(73.) Thus requested by the king, the *R*ishi remained still for a moment with his eyes closed in deep meditation, like a large lake whose fish are asleep.

(74.) He, by means of concentration, knew the cause of the impediment of the progeny of the lord of the earth, and then with a pure heart enlightened him (on the matter).

पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः।
आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥ ७५ ॥
धर्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन्।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ॥ ७६ ॥
अवजानासि मां यस्मादतस्ते न भविष्यति।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥ ७७ ॥

(७५.) पुरा पूर्वं शक्रमिन्द्रमुपस्थाय संसेव्योर्वीं प्रति भुवमुद्दिश्य यास्यतो गमिष्यतस्तव पथि (मार्गे) कल्पतरुच्छायां (देवद्रुमच्छायां) आश्रिता सुरभिः कामधेनुरासीत्। तत्र स्थितेत्यर्थः [अर्थात् सूर्यवंश्याः सर्वेऽपि शक्रस्याराधनार्थे दिवि गच्छन्तो भुवनत्रयेऽस्खलितगतयः आसन्-सु०]। ततः किमित्याह-

(७६.) ऋतुः पुष्पम्। रज इति यावत्। " ऋतुः स्त्रीकुसुमेऽपि च " इत्यमरः। ऋतुना निमित्तेन [रजोदर्शनादूर्ध्वं चतुर्थे दिने-सु०] स्नातामिमां राज्ञीं सुदक्षिणां धर्मस्यऋत्वभिगमनलक्षणस्य लोपाद्भ्रंशाद्यो भयस्तस्मात्स्मरन्ध्यायन्। "मृदङ्गं दैवतं विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत विज्ञातांश्च वनस्पतीन् " इति शास्त्रात्प्रदक्षिणक्रियार्हायां प्रदक्षिणकरणयोग्यायां तस्यां धेन्वां त्वं साधु प्रदक्षिणादिसत्कारं नाचरो नाचरितवानसि। व्यासक्ता हि विस्मरन्तीति भावः। ऋतुकालाभिगमने मनुः-" ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा" इति। अकरणे दोषमाह पराशरः-" ऋतुस्नातां तु यो भार्यां स्वस्थः सन्नोपगच्छति। बालगोघ्नापराधेन विध्यते नात्र संशयः " इति।

(७७.) यस्मात्कारणान्मामवजानासि तिरस्करोषि। अतः कारणान्मत्प्रसूतिं मम संततिमनाराध्यासेवयित्वा ते तव प्रजा न भविष्यतीति सा सुरभिस्त्वां शशाप (यन्मामनादृत्य इतः गतोऽसि तद्विना मत्प्रसूत्याराधनं तव प्रजाः न कदापि भविष्यतीत्येवं सा कामधेनुतस्मै राज्ञे शापं दत्तवतीत्यर्थः)। शप आक्रोशे। कथं तदस्माभिर्न श्रुतमित्याह-

(७८.) हे राजन्स शापस्त्वया न श्रुतः। सारथिना च न श्रुतः। अश्रवणे हेतुमाह-क्रीडार्थमागता उद्दामानो दाम्न उद्गताः (उत्कटाः) दिग्गजा यस्मिंस्तथोक्ते आकाशगङ्गायाः

(75.) Formerly when you were going down toward the earth after having attended on Indra, the milch-cow (which grants every boon) had taken her refuge (stand) under the shade of the Kalpa-tree on your way.

(76.) Thinking of this your queen, who had bathed after menstruation (and so prepared herself for sexual intercourse), on account of the fear of the violation of duty, you did not behave well towards her (the cow) who was so worthy of the honor of being gone round.

(77.) "Since you disregard me, you shall have no progeny without worshipping my calf (lit. born of me) " : thus she cursed you.

स शापो न त्वया राजन्न च सारथिना श्रुतः ।
नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ॥ ७८ ॥
ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः ।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥ ७९ ॥
हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
भुजंगपिहितद्वारं पातालमधितिष्ठति ॥ ८० ॥
सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥ ८१ ॥

मन्दाकिन्याः स्रोतसि प्रवाहे नदति सति (शब्दायमाने सति) । अस्तु प्रस्तुते किमायातमित्यत्राह–

(७९.) तदवज्ञानात्तस्या धेनोरवज्ञानादपमानादात्मनः स्वस्याप्तुमिष्टमीप्सितं मनोरथम् । आप्नोतेः सन्नन्तात्क्तः । ईकारश्च । सार्गलं सप्रतिबन्धं विद्धि जानीहि । तथाहि । पूज्यपूजाया व्यतिक्रमोऽतिक्रमणं श्रेयः प्रतिबध्नाति [रुणद्धि । उक्तञ्च । अपूज्या यत्र पूज्यन्ते पूज्यपूजा व्यतिक्रमः । दुर्भिक्षं मारिरोगाश्च भवंत्येवं न संशयः–सु०] । तर्हि गत्वा तामाराधयामि । सा वा कथंचिदागमिष्यतीत्याशा न कर्तव्येत्याह—

(८०.) सा च सुरभिरिदानीं (सांप्रत) दीर्घं (अविश्रान्तं) सत्रं ("सत्रमाच्छादने यज्ञे सदा दाने वनेपि च" इत्यमरः) चिरकालसाध्यो यागविशेषो यस्य तस्य प्रचेतसः (वरुणस्य) हविषे दध्याज्यादिहविरर्थं भुजंगपिहितद्वारं भुजंगावरुद्धद्वारं ततो दुष्प्रवेशं पातालमधितिष्ठति । पाताले तिष्ठतीत्यर्थः । " अधिशीङ्स्थासां कर्म " इति कर्मत्वम् । तर्हि का गतिरित्यत आह—

(८१.) तस्याः सुरभेरियं तदीया । तां सुतां सुरभेः प्रतिनिधिं (तुल्यरूपां) कृत्वा शुचिः शुद्धः । सह पत्न्या वर्तत इति सपत्नीकः सन् । " नद्यृतश्च " इति कप्प्रत्ययः । आराधय । हि यस्मात्कारणात्सा प्रीता तुष्टा सती । कामान्दोग्धीति कामदुघा भवति । "दुहः कब्घश्च " इति कप्प्रत्ययः । घादेशश्च ।

(78.) That curse, O king, was not heard either by you or by your charioteer since the stream of the celestial Gangà was roaring on account of the intoxicated elephants of the (eight) quarters (let loose in it)

(79.) Know then the accomplishment of your desire to be barred on account of your disrespect towards her ; for the denial of worship to the worshipful prevents one's welfare.

(80.) Now she dwells in Pàtàla, the gates of which are closed by the serpents, for (the purpose of supplying) ghee to Pracheta engaged in a long continued Sacrifice.

(81.) Having made the daughter of the Surabhi her representative, you, purified as you are, worship (propitiate) her in company with your wife ; for if pleased she gratifies (all) desires.

इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥ ८२ ॥
ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ।
बिभ्रती श्वेतरोमाङ्कं संध्येव शशिनं नवम् ॥ ८३ ॥
भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि ।
प्रस्नवेनाभिवर्षन्ती वत्सालोकप्रवर्तिना ॥ ८४ ॥
रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ।
तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ॥ ८५ ॥

(८२.) इति वादिनो वदत एव होतुर्हवनशीलस्य। "तृन्" इति तृन्प्रत्ययः । अस्य मुनेराहुतीनां (आज्यादीनां) साधनं कारणं नन्दयतीति व्युत्पत्त्या नन्दिनी नाम अनिन्द्या अगर्ह्या प्रशस्ता धेनुः (गौः) वनात् (काननात्) आववृते प्रत्यागता (तस्मिन्मुनौ एवं उक्तमात्रे एव सा कामधेनुर्वनात्प्रतिनिवृत्ता तत्राविर्बभूवेत्यर्थः) "अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम्" इति भावः [होतुरिति सम्बन्धे षष्ठी—चा०] । सम्प्रति धेनुं विशिनष्टि—

(८३) पल्लववत्स्निग्धा चासौ पाटला (रक्ता) च । संध्यायामप्येतद्विशेषणं योज्यम् । ललाटे (भाले) उदयो यस्य स ललाटोदयः । तमाभुग्नमीषद्वक्रम् । "आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि" इत्यमरः । "उदितश्च" इति निष्ठातस्य नत्वम् । श्वेतरोमाण्येवाङ्कस्तं बिभ्रती । नवं शशिनं बिभ्रती संध्येव स्थिता ।

(८४.) कोष्णेन किंचिदुष्णेन । "कवं चोष्णे" इति चकारात्कादेशः । अवभृथादप्यवभृथस्नानादपि (यागान्तस्नानादपि) मेध्येन पवित्रेण । "पूतं पवित्रं मेध्यं च" इत्यमरः । वत्सस्यालोकेन प्रदर्शनेन प्रवर्तिना प्रवहता प्रस्नवेन क्षीराभिस्यन्दनेन भुवमभिवर्षन्ती सिञ्चन्ती । कुण्डम् (कुण्ड्यते रक्ष्यते जलं वह्निर्वा अत्र जलाधारपात्रविशेषं) इव ऊधः आपीनं यस्याः सा कुण्डोध्नी । "ऊधस्तु क्लीबमापीनम्" इत्यमरः "ऊधसोऽनङ्" इत्यनङादेशः । "बहुव्रीहेरूधसो ङीष्" इति ङीष् ।

(८५.) खुरोद्धूतैः (उत्थापितैः) अन्तिकात्समीपे गात्रं स्पृशद्भिः । "दूरान्तिकार्थेभ्यो

(82.) Scarcely had the sacrificer spoken thus, when the spotless cow Nandini by name, the source of his offerings, returned from the forest.

(83) Bearing a little crooked (curved) mark of white hair over the forehead, she (the cow), tender and ruddy like a (fresh) leaf, appeared like the evening having the new moon tender and crimson like a sprout.

(84.) That cow with a full udder sprinkling the earth by discharge of her lukewarm milk which gushed (issued) forth at the sight of the calf and which was even more sacred than the Avabhritha ablutions—

(85.) The cow imparting to the ruler of the earth the sanctity pro-

तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥ ८६ ॥
अदूरवर्तिनीं सिद्धिं राजन्विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ ८७ ॥
वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।
विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥ ८८ ॥

द्वितीया च " इति चकारात्पञ्चमी । रजसां कणैः (धूलिलेशैः) महीं क्षियते ईष्टे इति महीक्षित् । तस्य । तीर्थाभिषेकेण जातां तीर्थाभिषेकजाम् (तीर्थे पुण्यक्षेत्रे यज्ञे वा अभिषेकः स्नानं तस्माज्जातां) शुद्धिम् (नैर्मल्यं) आदधाना कुर्वाणा । एतेन वायव्यं स्नानमुक्तम् । उक्तं च मनुना—" आग्नेयं भस्मना स्नानमवगाह्यं तु वारुणम् । आपोहिष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतम् " इति ।

(८६.) निमित्तज्ञः शकुनज्ञस्तपोनिधिर्वशिष्ठः । पुण्यं [मनोज्ञ पुण्यावहं वा—चा०] दर्शनं यस्यास्तां तां धेनु दृष्ट्वा । आशंसितं मनोरथः । नपुंसके भावे क्तः । तत्रावन्ध्यं सफलं प्रार्थनं यस्य स तम् । अवन्ध्यमनोरथमित्यर्थः । याजयितुं योग्यं याज्यं (यजमानं) पार्थिवं पुनरब्रवीत् [ननु अभीष्टसिद्धेरुत्पत्स्यमानत्वादिदानीं कथमाशंसितां वंध्यामिति । अत्यासन्नसिद्धत्वेनोक्तत्वान्न दोषः—चा०] ।

(८७.) हे राजन्नात्मनः कार्यस्य सिद्धिम् (मनोभीष्टसिद्धिं) अदूरवर्तिनीं [समीपस्थां—चा०] शीघ्रभाविनीं विगणय विद्धि । यद्यस्मात्कारणात्कल्याणी मङ्गलमूर्तिः । " बह्वादिभ्यश्च " इति ङीप् । इयं धेनुर्नाम्नि कीर्तिते कथिते सत्येवोपस्थिता (संप्राप्ता) ।

(८८.) वने भवं वन्यं कन्दमूलादिकं वृत्तिराहारो यस्य तथाभूतः सन् । इमां गां (धेनुं) शश्वत्सदा । आ प्रसादादविच्छेदेनेत्यर्थः । आत्मनस्तव । कर्तुः । अनुगमनेनानुसरणेन । अभ्यसनेनानुष्ठातुरभ्यासेन विद्यामिव । प्रसादयितुं प्रसन्नां कर्तुमर्हसि (योग्योभवसि) गवानुसरणप्रकारमाह—

---

duced by holy bathings, by touching his body from near with particles of dust raised up by her hoofs—

(86.) Having seen that cow of sacred appearance, that treasure of penance, who had the knowledge of causes (omens), again addressed him who was fit to have sacrifices done for him and whose longing for his objects was not to be fruitless.

' (87.) Consider, O king, that the accomplishment of your desire is not far distant, for this holy cow has made her appearance the moment that her name was uttered (by me).

(88.) Living on a forest-fare you should propitiate this cow by constantly following her (by your personal attendance upon her), as one propitiates learning by constant study.

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥ ८९ ॥
वधूर्भक्तिमती चैनामर्चितामातपोवनात् ।
प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥ ९० ॥
इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव ।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ॥ ९१ ॥
तथेति प्रतिजग्राह प्रीतिमान्सपरिग्रहः ।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः ॥ ९२ ॥

(८९.) अस्यां नन्दिन्यां प्रस्थितायां (गतायां त्वमपि अस्या पृष्ठतः) प्रतिष्ठेथाः प्रयाहि। "समवप्रविभ्यः स्थः" इत्यात्मनेपदम् । स्थितायां निवृत्तगतिकायां स्थितिमाचरेः स्थितिं कुरु । तिष्ठेत्यर्थः । निषण्णायामुपविष्टायां निषीदोपविश । विध्यर्थे लोट् । पीतमम्भः (जलं) यया तस्यां पीताम्भसि सत्यामपः (तोयं) पिबेः पिब [अथ पत्न्याः परिचर्याप्रकारमाह–चा०]॥

(९०.) वधूर्जाया च भक्तिमती प्रयता सती गन्धादिभिरर्चितामेनां गां प्रातरातपोवनात् । (तपोवनपर्यन्तं) आङ् मर्यादायाम् । पदद्वयं चैतत् । अन्वेत्वनुगच्छतु । सायमपि प्रत्युद्व्रजेत्प्रत्युद्गच्छेत् । विध्यर्थे लिङ् ।

(९१.) इत्यनेन प्रकारेण त्वमाप्रसादात्प्रसादपर्यन्तम् । "आङ् मर्यादाभिविध्योः" इत्यस्य वैभाषिकत्वादसमासत्वम् । अस्या धेनोः परिचर्यापरः शुश्रूषापरो भव । ते तव अविघ्नं विघ्नस्याभावोऽस्तु । "अव्ययं विभक्ति–" इत्यादिनार्थाभावेऽव्ययीभावः पितेव पुत्रिणां सत्पुत्रवताम् । प्रशंसायामिनिप्रत्ययः धुर्यग्रे स्थेयास्तिष्ठेः [यथान्यः पुत्रवान् भारं वहति तथा त्वमपि भूयाः इत्यर्थः । त्वया यथा ते पिता पुत्रवांस्तथा त्वमपि भूयाः इति–चा०] आशीरर्थे लिङ् । "एर्लिङि" इत्याकारस्यैकारादेशः । त्वत्सदृशो भवत्पुत्रोऽस्त्विति भावः ।

(९२.) देशकालज्ञः । देशोऽग्निसंनिधिः । कालोऽग्निहोत्रावमानसमयः । विशिष्टदेशकालोत्पन्नमार्षं ज्ञानमव्याहतमिति जानन् । अत एव प्रीतिमान् (सानन्दः) शिष्योऽन्तेवासी राजा सपरिग्रहः सपत्नीकः । "पत्नीपरिजनादानमूलशापाः परिग्रहाः" इत्यमरः । आनतो विनयनम्रः (प्रह्वः) सन् । शासितुर्गुरोरादेशमाज्ञां तथेति प्रतिजग्राह स्वीचकार [देशकालत्वेन गोरक्षणप्रवृत्तिकरणत्वं सूच्यते–चा०]।

(89.) On her walking you must walk, when she stands you must stand, when she sits you must sit, and when she drinks water you must drink water.

(90.) And let your purified wife, full of devotion, follow her when worshipped in the morning, as far as the forest of penance, and let her also go to meet (receive) her in the evening.

(91.) In this way, be intent on serving her until her satisfaction (propitiation). May there be no obstruction to you ! And may you stand like your father at the head of those having good sons!

(92.) The pupil, understanding places and times (of fire-sacrifices) and being delighted, accepted in company with his wife, with a low bow, the command of his preceptor saying " even so ".

अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम् ॥ ९३ ॥
सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः ।
कल्पवित्कल्पयामास वन्यामेवास्य संविधाम् ॥९४ ॥
निर्दिष्टां कुलपतिना स पर्णशालामध्यास्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदितावसानां संविष्टः कुशशयने निशां निनाय ॥ ९५ ॥

(९३.) अथ प्रदोषे रात्रौ (रजनीमुखे) दोषज्ञो विद्वान् । " विद्वान्विपश्चिद्दोषज्ञः " इत्यमरः। सूनृतवाक्सत्यप्रियवाक्। "प्रियं सत्यं च सूनृतम्" इति हलायुधः। स्रष्टुः सूनुर्ब्रह्मपुत्रो मुनिः (वशिष्ठः) । अनेन प्रकृतकार्यनिर्वाहकत्वं सूचयति । ऊर्जितश्रियं (ऊर्जिता प्रबला श्रीर्यस्य स तथोक्त) विशांपतिं मनुजेश्वरम् । " द्वौ विशौ वैश्यमनुजौ " इत्यमरः । संवेशाय निद्रायै । " स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि " इत्यमरः । विससर्जाज्ञापयामास ।

(९४.) कल्पवित् (कल्पं शास्त्रं वेत्तीति "कल्पवित् कल्पश्च प्रभवे न्याये शास्त्रे ब्रह्मविधाविति" इति विश्वः)। व्रतप्रयोगाभिज्ञो मुनिः। तपःसिद्धौ सत्यामपि। तपसैव राजयोग्याहारसंपादनसामर्थ्ये सत्यपीत्यर्थः। नियमापेक्षया तदाप्रभृत्येव व्रतचर्यापेक्षया । अस्य राज्ञो वन्याम् (वने साधुर्वन्या तां तथोक्तां) एव । सविधीयतेऽनयेति संविधाम् । कुशादिशयनसामग्रीम् । " आतश्चोपसर्गे" इति कप्रत्ययः। "अकर्तरि च कारके संज्ञायाम्" इति कर्माद्यर्थत्वम् । कल्पयामास संपादयामास [यद्यपि तपोमाहात्म्यान्नानाविधानि भक्ष्यभोज्यानि सुकराणि तथापि शास्त्रप्रतिपादितप्रयोगाभिज्ञो मुनिर्भूपस्य व्रतविषयनियमार्थं वन्यामेव वृत्तिं कृतवानिति तात्पर्यं–चा०]।

(९५.) स राजा कुलपतिना (कुलं मुनिसमुदायः तस्य पतिः प्रधानं तेन तथोक्तेन) मुनिकुलेश्वरेण वशिष्ठेन निर्दिष्टां(दर्शितां) पर्णशालाम्(पर्णकुटीं) अध्यास्याधिष्ठाय । तस्यामधिष्ठानं कृत्वेत्यर्थः। "अधिशीङ्–" इत्यादिनाधारस्य कर्मत्वम् । कर्मणि द्वितीया।प्रयतो नियतः परिग्रहः पत्नी द्वितीयो यस्येति स तथोक्तः । कुशानां शयने [कुशैर्दर्भैः परिकल्पितं शयनं तस्मिन् । शाकपार्थिवादिसमासः–चा०] संविष्टः सुप्तः सन् । तस्य वशिष्ठस्य शिष्याणामध्ययनेनापररात्रे वेदपाठेन निवेदित (ज्ञापितं) अवसानं(विरामः ,यस्यास्तां निशां निनाय गमयामास । अपररात्रेऽध्ययने मनुः—"निशान्ते न परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत्"। "न चापररात्रमधीत्य पुनः स्वपेत्" इति गौतमश्च । प्रहर्षणीवृत्तमेतत्। तदुक्तम्—"म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयम्"। इति श्री महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये वशिष्ठाश्रमाभिगमनो नाम प्रथमः सर्गः।

(93.) Then after the twilight, the wise son of the Creator, truthful and agreeable in words, dismissed the lord of men of distinguished fortune to take rest.

(94.) Notwithstanding the power of his penance, the Muni, conversant with the observances of vows, supplied him but with a wild (hermit's) accomodation out of regard for his vow.

(95.) He with his pure wife as his second (companion) having occupied a hut made of leaves, pointed out to him by the lord of the clan, and lying on a bed of Kus'a grass, passed the night the close of which was indicated to him by his (Muni's) disciples reading the Veda.

अथ द्वितीयः सर्गः

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥
तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥ २ ॥

आशासु राशीभवदङ्गवल्लीभासैव दासीकृतदुग्धसिन्धुम् ।
मन्दस्मितैर्निन्दितशारदेन्दुं वन्देऽरविन्दासनसुन्दरि त्वाम् ॥

(१.) अथ निशानयनानन्तरं यशोधनः (यशः कीर्तिरेव धनं द्रविणं यस्य स तथोक्तः) प्रजानामधिपः प्रजेश्वरः (दिलीपः) प्रभाते प्रातःकाले जायया सुदक्षिणया । प्रतिग्राहयित्र्या । प्रतिग्राहिते स्वीकारिते गन्धमाल्ये (चन्दनपुष्पस्रजौ) यया सा जायाप्रतिग्राहितगन्धमाल्या । तां तथोक्ताम् । पीतं पानमस्यास्तीति पीतः । पीतवानित्यर्थः । " अर्शआदिभ्योऽच् " इत्यच्प्रत्ययः । " पीता गावो भुक्ता ब्राह्मणाः " इति महाभाष्ये दर्शनात् । (पूर्वं) पीतः (पायितः । पश्चात्) प्रतिबद्धो वत्सो यस्यास्तामृषेर्धेनुं वनाय वनं गन्तुम् । " क्रियार्थोपपद-" इत्यादिना चतुर्थी । मुमोच मुक्तवान् । जायापदसामर्थ्यात्सुदक्षिणायाः पुत्रजननयोग्यत्वमनुसंधेयम् । तथाहि श्रुतिः—" पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम् । तस्यां पुनर्नवो भूत्वा दशमे मासि जायते । तज्जाया जाया भवति यदस्यां जायते पुनः " इति । यशोधनः इत्यनेन पुत्रवत्ताकीर्तिलोभाद्राजान्हं गोरक्षणे प्रवृत्त इति गम्यते । अस्मिन्सर्गे वृत्तमुपजातिः —" अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः " इति ।

(२.) पांसवो दोषा आसां सन्तीति पांसुलाः स्वैरिण्यः । " स्वैरिणी पांसुला " इत्यमरः । " सिध्मादिभ्यश्च " इति लच्प्रत्ययः । अपांसुलानां पतिव्रतानां धुरि अग्रे कीर्तनीया परिगणनीया मनुष्येश्वरधर्मपत्नी [उक्तश्च ।"पतिं धर्मरतं पत्नी साध्वी शुश्रूषते तु या । नित्यं त्वनल्पहृदया धर्मपत्नीं तु तां विदुरिति–चा०] । खुरन्यासैः (खुराणां क्षेपणैः) पवित्राः पांसवः (धूलयः) यस्य तम् । " रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः " इत्यमरः । तस्या धेनोर्मार्गम् (तपोवनपर्यन्तं) । स्मृतिर्मन्वादिवाक्यं श्रुतेर्वेदवाक्यस्यार्थमभिधेयमिव । अन्वगच्छदनुसृतवती च ।

(1.) Then in the morning the lord of the people, whose (whole) wealth consisted in glory, set free the cow of the sage (to go) to a forest, whose young had had his fill of drink, and had then been tied to his post, and who had been made to accept sandle and garlands by his wife.

(2.) The lawful wife of the lord of men, who deserved to be ranked at the head of chaste women, followed her path, the dust on which was purified by the prints of her hoofs, as the Smriti follows the meaning (sense or idea) of S'ruti (the Veda).

निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ॥ ३ ॥
व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥ ४ ॥
आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट्समाराधनतत्परोऽभूत् ॥ ५ ॥

यथा स्मृतिः श्रुतिक्षुण्णमेवार्थमनुसरति तथा सापि गोखुरक्षुण्णमेव मार्गमनुससारेत्यर्थः । धर्मपत्नीत्यत्राश्वघासादिवत्तादर्थ्ये षष्ठीसमासः प्रकृतिविकाराभावात् । पांसुलपथवृत्तावप्यपांसुलानामिति विरोधालंकारोध्वन्यते ।

(३.) दयालुः कारुणिकः । " स्याद्दयालुः कारुणिकः " इत्यमरः । " स्पृहिगृहि–" इत्यादिना लुच्प्रत्ययः । यशोभिः सुरभिर्मनोज्ञः प्रसिद्धः [श्रेष्ठो वा–चा०] । "सुरभिः स्यात्मनोज्ञेऽपि" इति विश्वः । राजा तां दयितां निवर्त्य सौरभेयीं (सुरभेरपत्यं स्त्री तां तथोक्तां) कामधेनुसुतां नन्दिनीम् । धरन्तीति धराः । पचाद्यच् । पयसां धराः पयोधराः स्तनाः । "स्त्रीस्तनाब्दौ पयोधरौ" इत्यमरः । अपयोधराः पयोधराः संपद्यमानाः पयोधरीभूताः। अभूततद्भावे च्विः । " कुगतिप्रादयः " इति समासः । पयोधरीभूताश्चत्वारः समुद्रा यस्यास्ताम् । " अनेकमन्यपदार्थे" इत्यनेकपदार्थग्रहणसामर्थ्यात्त्रिपदो बहुव्रीहिः । गोरूपधरां (गोरूपमाकारस्तस्य धरा तां तथोक्तां) उर्वीमिव । जुगोप ररक्ष । भूरक्षणप्रयत्नेनेव ररक्षेति भावः । धेनुपक्षे पयसा दुग्धेनाधरीभूताश्चत्वारः समुद्रा यस्याः सा तथोक्ताम् । दुग्धतिरस्कृतसागरामित्यर्थः ।

(४.) व्रताय (गोपालनरूपव्रत नियमः तस्मै) धेनोरनुचरेण । न तु जीवनायेति भावः । तेन दिलीपेन शेषोऽवशिष्टोऽप्यनुयायिवर्गोऽनुचरवर्गो न्यषेधि निवर्तितः । शेषत्वं सुदक्षिणापेक्षया । कथं तर्ह्यात्मरक्षणमत आह न चेति । तस्य दिलीपस्य शरीररक्षा च अन्यतः पुरुषान्तरान्न । कुतः । हि यस्मात्कारणान्मनोः । प्रसूयत इति प्रसूतिः संततिः स्ववीर्यगुप्ता स्ववीर्येणैव रक्षिता । न हि स्वनिर्वाहकस्य परापेक्षेति भावः ।

(५.) सम्राण्मण्डलेश्वरः । " येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञ-

---

(3) The tender-hearted king, pleasing on account of his fame, having made that beloved (of his) return, protected that daughter of Surabhi as if (he protected) the Earth who had then assumed the form of a cow, with the four oceans serving as her udders

(4.) By him, who followed the cow for his vow, were made to return even the rest of his followers ; the protection of his person was not from any other man ; for the offspring of Manu were protected by their own valour.

(5.) That universal emperor became diligent in her propitiation by offering her palatable mouthfuls of grass, by scratching (her body), by warding

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥ ६ ॥
स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ॥ ७ ॥
लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् ।
रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्वान् ॥ ८ ॥

या राज्ञः स सम्राट्" इत्यमरः । स राजा । आस्वादवद्भी रसवद्भिः (रुचिरैः) । स्वादयुक्तैरित्यर्थः । तृणानां कवलैर्ग्रासैः । "ग्रासस्तु कवलार्थकः" इत्यमरः । कण्डूयनैः खर्जनैः (गात्रकर्षणैः) । दंशानां वनमक्षिकाणां निवारणैः । "दंशस्तु वनमक्षिका" इत्यमरः । अव्याहतैरप्रतिहतैः स्वैरगतैः स्वच्छन्दगमनैश्च । तस्या धेन्वाः समाराधनतत्परः शुश्रूषासक्तोऽभूत् । तदेव परं प्रधानं यस्येति तत्परः । "तत्परौ प्रसितासक्तौ" इत्यमरः (इत्थं स राजा प्रजाभिलाषी सन् तस्या नन्दिन्याः सेवादक्षो बभूवेत्यर्थः) ।

(६.) भूपतिस्तां गां स्थितां सतीं स्थितः सन् । स्थितिरूर्ध्वावस्थानम् । प्रयातां प्रस्थितामुच्चलितः प्रस्थितः । निषेदुषीं निषण्णाम् । उपविष्टामित्यर्थः । "भाषायां सदवसश्रुवः" इति क्वसुप्रत्ययः । "उगितश्च" इति ङीप् । आसनबंधे उपवेशने धीरः स्थितः । उपविष्टः सन्नित्यर्थः । जलमाददानां पिबन्तीं जलाभिलाषी । पिबन्नित्यर्थः । इत्थं छायेवान्वगच्छदनुसृतवान् । छायाप्युक्तलक्षणा लौकिकी उपमा तेन भेदोऽपि नास्ति । यदाह ' वामनः । न लिंगवचने भेदो लौकिक्यामुपमायां–चा०] ।

(७.) न्यस्तानि परिहृतानि (त्यक्तानि) चिह्नानि छत्रचामरादीनि यस्यास्तां तथाभूतामपि तेजोविशेषेण प्रभावातिशयेनानुमिताम् ज्ञातां) । सर्वथा राजैवायं भवेदित्यूहितां राजलक्ष्मीं दधानः स राजा । अनाविष्कृतदानराजिः (अनाविष्कृता अप्रकटिता दानराजिर्मदरेखा यस्य स तथोक्तः) बहिरप्रकटितमदरेखः । अन्तर्गता मदावस्था यस्य सोऽन्तर्मदावस्थः । [उक्तं च । भद्रो मन्दो मृगश्चेति संकीर्णश्चेति जातयः । चतस्रः करिणां तासां भद्रोन्तर्मद एव यः–व०] । तथाभूतो द्विपेन्द्र इव । आसीत् ।

(८.) लतानां वल्लीनां प्रतानैः कुटिलतन्तुभिरुद्ग्रथिता उन्नमय्य ग्रथिताः (बद्धाः) ये

---

off forest flies, and by allowing her to go her own way without let or hinderance (lit. unhindered and self-willed roamings).

(6.) The lord of the earth followed her (that cow) like her own shadow, standing when she stood, moving forth when she walked, sticking fast to the tie of his seat when she sat down, desiring (to drink) water when she took (drank) water.

(7.) He holding his royal fortune though destitute of the insignia, but inferred from his superior (peculiar) splendour, appeared like a large elephant with the line of his rut not displayed, but with his state of being in rut hidden within.

(8.) With his hair tied up into a knot by means of the curling tendrils

विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ।
उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ॥ ९ ॥
मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम् ।
अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥ १० ॥

केशास्तैरुपलक्षितः । " इत्थंभूतलक्षणे " इति तृतीया । स राजा । अधिज्यमारोपितमौर्वीकं धनुर्यस्य सोऽधिज्यधन्वा सन् । " धनुषश्च " इत्यनङादेशः । मुनिहोमधेनो रक्षापदेशाद्रक्षणव्याजात् । वन्यान्वनेभवान्दुष्टसत्त्वान्दुष्टजन्तून् (सिंहव्याघ्रादीन्) । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु " इत्यमरः । विनेष्यञ्शिक्षयिष्यन्निव । दावं वनम् । " वने च वनवह्नौ च दवो दाव इहेष्यते " इति यादवः । विचचार । वने चचारेत्यर्थः । " देशकालाध्वगन्तव्यः कर्मसंज्ञा ह्यकर्मणाम् " इति दावस्य कर्मत्वम् । विसृष्टेत्यादिभिः षड्भिः श्लोकैस्तस्य महामहिमतया द्रुमादयोऽपि राजोपचारं चक्रुरित्याह—

(९.) विसृष्टाः पार्श्वानुचराः पार्श्ववर्तिनो जना येन तस्य । पाशभृता वरुणेन समस्य तुल्यस्य [असतां नियमनात्—चा०] । " प्रचेता वरुणः पाशी " इत्यमरः । अनुभावोऽनेन सूचितः । तस्य राज्ञः पार्श्वयोर्द्रुमाः (निकटवृक्षाः) । उन्मदानामुत्कटमदानां वयसां खगानाम् । " खगबाल्यादिनोर्वयः" इत्यमरः । विरावैः शब्दैः । आलोकस्य शब्द वाचकमालोकयेति शब्दम् । जयशब्दमित्यर्थः । " आलोको जयशब्दः स्यात्" इति विश्वः [आलोकस्य दर्शनस्य शब्दः आलोकशब्दस्तं जय जीवेत्यालोकशब्दः। जय जय महाराज प्रभो स्वामिन् पादमवधार्यताम् इति आलोकशब्दः—व०] । उदीरयामासुरिवावदन्निव [एतेन सेवाचाटूक्तिः—चा०] इत्युत्प्रेक्षा। (तस्य महानुभावस्य एकाकिनो वने विचरतः जयति जयति देवः इत्येवविधं बन्दिकृत्यं मदकलपटुपक्षिकूजितैरेव संपादितमित्यर्थः) ।

(१०.) मरुत्प्रयुक्ता वायुना प्रेरिता बाललता आरात्समीपेऽभिवर्तमानम् । " आराद्दूरसमीपयोः " इत्यमरः । मरुतो वायोः सखा मरुत्सखोऽग्निः । स इवाभातीति मरुत्सखाभम् [यद्वा । मरुतां देवानां सखा इन्द्रः तत्तुल्यं तेजो यस्य तं तथोक्तं—चा०] । " आतश्चोपसर्गे " इति कप्रत्ययः । अर्च्यं पूज्यं तं दिलीपं प्रसूनैः पुष्पैः । पौरकन्याः पौराश्च ताः कन्या आचारार्थैः (मंगलार्थैः) लाजैराचारलाजैरिव । अवाकिरन् (आच्छादयामासुः । अवा-

of creepers, he roamed about the forest with his bow strung, as if taming the cruel beasts of the forest under the show of protecting the sacrificial cow of the sage.

(9.) To him, who had dismissed the followers (who walked) at hissides and who was equal to Varu*n*a (the noose-bearing-god), the side trees uttered, as it were, a chorus of a panegyric with the cries of the elated birds.

(10.) On him, worthy of adoration and lustrous like Agni (the friend of Wind), the young creepers, set in motion by the wind, showered flowers as he came near, like maidens of the city showering the customary Lâjâs (the fried-grain-rice).

धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशङ्कैः ।
विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ॥ ११ ॥
स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥ १२ ॥
पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी ।
तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥ १३ ॥

किरन्वयोद्धारास्तं लाजैः पौरयोषितः इत्येवं समार्थः श्लोकांशः) । तस्योपरि निक्षिप्तवत्य इत्यर्थः । [पुरप्रवेशे हि राजा कुमारीभिः (लाजाप्रक्षेपणैः) अवकीर्यत इत्याचारः –व०] । सखा हि सखायमागतमुपचरतीति भावः । [युक्तं मरुत्सखस्य मंगलप्रेरणमितिच्छाया–चा०]।

(११.) धनुर्भृतः (धनुश्चापं बिभर्तीति तस्य तथोक्तस्य) अप्यस्य राज्ञः । एतेन भयसंभावना दर्शिता । तथापि विशङ्कैर्निर्भीकैरन्तःकरणैः (चित्तैः) । कर्तृभिः । दयया कृपारसेनार्द्रो भावोऽभिप्रायो यस्य तद्दयार्द्रभावं तदाख्यातम् । दयार्द्रभावमतदित्याख्यातामित्यर्थः । "भावः सत्वस्वभावाभिप्रायचेष्टात्मजन्मसु" इत्यमरः [चित्तमेव कथयत्यनुरागमिति–चा०] । तथाविधं वपुर्विलोकयन्त्यः (पश्यन्त्यः) हरिण्यः (मृग्यः) अक्ष्णां (नेत्राणां) प्रकामविस्तारस्यात्यन्तविशालतायाः फलमापुः [अतिसौन्दर्यात्–चा०]।"विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं च" इति न्यायेन स्वान्तःकरणवृत्तिप्रामाण्यादेव विश्रब्धं ददृशुरित्यर्थः ।

(१२.) स दिलीपो मारुतपूर्णरन्ध्रैः (मारुतेन समीरणेन पूर्णानि पूरितानि रन्ध्राणि छिद्राणि येषां ते.) अत एव कूजद्भिः स्वनद्भिः । कीचकैर्वेणुविशेषैः [सच्छिद्रवंशैः–चा०] । "वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरः । वंशः सुषिरवाद्यविशेषः । "वंशादिकं तु सुषिरम्" इत्यमरः । आपादितं संपादितं वंशस्य कृत्यं कार्यं यस्मिन्कर्मणि तत्तथा कुञ्जेषु लतागृहेषु । "निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे" इत्यमरः । वनदेवताभिरुद्गीयमानमुच्चैर्गीयमानं स्वं (स्वकीयं) यशः शुश्राव श्रुतवान् [राज्ञो महानुभावतया वनदेवता यशो गायन्ति स्म इत्यर्थः–चा०] ।

(१३.) गिरिषु निर्झराणां वारिप्रवाहाणाम् । "वारिप्रवाहो निर्झरो झरः" इत्यमरः ।

(11.) The does got the fruit of their eyes being widely open when with fearless hearts they saw his body that bespoke the disposition softened by compassion even though he wielded (bore) a bow.

(12) He heard his own fame loudly chanted (sung) by the dryads in bowers, the purpose of flutes being answered by the rattling bamboos the holes of which were filled with wind.

(13.) The wind charged with particles of water of the mountain-rivulets and scented by flowers of trees gently shaken (by itself) served (regaled) him, who

शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने ॥ १४ ॥
संचारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः ॥ १५ ॥
तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः ।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना ॥ १६ ॥

तुषारैः सीकरैः । " तुषारौ हिमसीकरौ" इति शाश्वतः । पृक्तः संपृक्तः (संमीलितः) अनोकहानां वृक्षाणामाकम्पितानीषत्कम्पितानि पुष्पाणि तेषां यो गन्धः सोऽस्यास्तीत्याकम्पितपुष्पगन्धी । ईषत्कम्पितपुष्पगन्धवान् । एवं शीतो मन्दः सुरभिः पवनो वायुरनातपत्रं व्रतार्थं परिहृतच्छत्रमत एवातपक्लान्तं (घर्मखिन्नं) आचारेण पूतं शुद्धं तं नृपं सिषेवे (सेवितवान्) । आचारपूतत्वात्स राजा जगत्पावनस्यापि सेव्य आसीदिति भावः [वृक्षादयोराजोपचारंचक्रुः-चा०] ।

(१४.) गोप्तरि (रक्षके) तस्मिन्राज्ञि वनं (काननं) गाहमाने प्रविशति सति वृष्ट्या (मेघवर्षणेन) विनापि । दावाग्निर्वनाग्निः । " दवदावौ वनानले" इति हैमः । शशाम (शान्तो बभूव) । फलानां पुष्पाणां च वृद्धिः । विशेष्यत इति विशेषा । अतिशयितासीत् । कर्मार्थे घञ्प्रत्ययः । सत्त्वेषु जन्तुषु मध्ये । "यतश्च निर्धारणम्" इति सप्तमी । अधिकः प्रबलो व्याघ्रादिरूनं दुर्बलं हरिणादिकं न बबाधे [नावधिष्ट । एतेन राज्ञो महापौरुषत्वमुक्तं-सु०] ।

(१५.) पल्लवस्य रागो वर्णः पल्लवरागः । " रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिषु " इति शाश्वतः । स इव ताम्रा पल्लवरागताम्रा पतंगस्य सूर्यस्य प्रभा कान्तिः । " पतंगः पक्षिसूर्ययोः" इति शाश्वतः । मुनेः (वशिष्ठस्य) धेनुश्च । दिगन्तराणि दिशामवकाशान् । " अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये" इत्यमरः । संचारेण (स्वैरगमनेन) पूतानि शुद्धानि कृत्वा दिनान्ते सायंकाले निलयायास्तमयाय । धेनुपक्षे आलयाय च । गन्तुं प्रचक्रमे।

(१६.) मध्यमलोकपालो भूपालः [भुवो मध्यमत्वं तु स्वर्गपातालापेक्षया । उक्तं च । वा-

---

was holy by his devotion (of unsullied character), was fatigued on account of the sun and had no umbrella.

(14.) When he, the protector, penetrated into the forest, the forest-conflagration was quenched even without rain, there was an abundant increase of fruits and flowers, and among animals the more powerful did not disturb (injure) the weaker ones.

(15.) After having by their rambles purified the spaces intervening between the cardinal points, the cow of the Muni and the light of the sun which were (both) red as the colour of a fresh sprout, began at the close of the day to go homeward.

(16.) The protector of the middle world went after (followed) her whose

स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि।
ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥१७॥
आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः।
उभावलंचक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ॥ १८ ॥

भवदत्तायां "अवततार मध्यमलोकमंशुमाली" इति चा०]। देवतापित्रतिथीनां क्रिया यागश्राद्धदानानि ता एवार्थः प्रयोजनं यस्यास्तां धेनुमन्वगनुपदं ययौ। "अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम्" इत्यमरः। सतां मतेन सद्भिर्मान्येन (पूज्येन)। "गतिबुद्धि" इत्यादिना वर्तमाने क्तः। "क्तस्य च वर्तमाने" इति षष्ठी। तेन राज्ञोपपन्ना युक्ता सा धेनुः। सतां मतेन विधिनानुष्ठानेनोपपन्ना युक्ता साक्षात्प्रत्यक्षा श्रद्धास्तिक्यबुद्धिरिव। बभौ शुशु

(१७.) स राजा। पल्वलेभ्योऽल्पजलाशयेभ्यः (कच्छप्रदेशेभ्यः) उत्तीर्णानि निर्गतानि वराहाणां (शूकराणां) यूथानि कुलानि (वृन्दानि) येषु तानि। बर्हाण्येषां सन्तीति बर्हिणा मयूराः। "मयूरो बर्हिणो बर्ही" इत्यमरः। फलबर्हाभ्यामिनच्प्रत्ययो वक्तव्यः। आवासवृक्षाणां (रात्रिस्थितितरूणां) उन्मुखाः (अभिमुखाः) बर्हिणाः (मयूराः) येषु तानि श्यामायमानानि वराहबर्हिणादिमलिनिम्नाश्यामानि श्यामानि भवन्तीति श्यामायमानानि (हरितीभूतानि)। "लोहितादिडाज्भ्यः क्यष्" इति क्यष्प्रत्ययः। "वा क्यषः" इत्यात्मनेपदे शानच्। मृगैः (हरिणैः) अध्यासिता अधिष्ठिताः शाद्वलाः (नवतृणानि) येषु तानि। शादाः शष्पाण्येषु देशेषु सन्तीति शाद्वलाः शष्पश्यामदेशाः। "शाद्वलः शादहरिते" इत्यमरः। "शादः कर्दमशष्पयोः" इति विश्वः। "नडशादाड्ड्वलच्" इति ड्वलच्प्रत्ययः। वनानि पश्यन्ययौ।

(१८.) गृष्टिः सकृत्प्रसूता गौः। "गृष्टिः सकृत्प्रसूता गौः" इति हलायुधः। नरेन्द्रश्च। उभौ यथाक्रमम्। आपीनमूधः। "ऊधस्तु क्लीबमापीनम्" इत्यमरः। आपीनस्य भारोद्वहने प्रयत्नात्प्रयासात्। वपुषो गुरुत्वादाधिक्याच्च। अञ्चिताभ्यां चारुभ्यां गताभ्यां गम-

---

presence was necessary for the rites to gods, manes, and guests (sacrifices, funeral rites, and hospitality) and in company of him who was revered (honoured) by good men, she appeared (shone) like incarnate faith accompanied by ordinances.

(17.) He went on beholding the forests which were getting dark, in which herds of wild boars were getting out of their ponds (in quest of prey), in which peacocks were turning toward the trees of their habitation (the trees in which they perched for the night) and in which the deer were sitting on the greens.

(18.) On account of the labour of bearing the burden of the udders, the cow which had only one calf and the king by reason of his bodily heaviness (weight), both decorated the way by which they returned from the sacred forest (penance grove) with their graceful gaits.

वशिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥ १९ ॥
पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या ॥ २० ॥
प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥ २१ ॥

नाभ्यां तपोवनादावृत्तः पन्थास्तं तपोवनावृत्तिपथम् (तपोवनागमनमार्गं) । " ऋक्पूः—" इत्यादिना समासान्तोऽप्रत्ययः । अलंचक्रतुर्भूषितवन्तौ ।

(१९.) वशिष्ठधेनोरनुयायिनमनुचरं वनान्तादावर्तमानं प्रत्यागतं तं दिलीपं वनिता सुदक्षिणा निमेषेषु (अक्षिस्पन्देषु) अलसा मन्दा (मन्थरा वा) पक्ष्मणां पङ्क्तिः (अक्षिरोमाली) यस्याः सा ["पक्ष्मस्यान्नेत्ररोमाणीति" हैमः कोषः—चा०] । निर्निमेषासतीत्यर्थः । लोचनाभ्याम् । करणाभ्याम् । उपोषिताभ्यां (कृतव्रताभ्यां) इव । उपवासो भोजननिवृत्तिः । तद्वद्भ्यामिव । वसतेः कर्तरि क्तः । पपौ [सादरमद्राक्षीत् । सादरमालोकनं पानमुच्यते—चा०] यथोपोषितोऽतितृष्णया जलमधिकं पिपासति तद्वदतितृष्णयाधिकं व्यलोकयदित्यर्थः ।

(२०.) वर्त्मनि (मार्गे) पार्थिवेन पृथिव्या ईश्वरेण । " तस्येश्वरः " इत्यन्प्रत्ययः । पुरस्कृताग्रतः कृता । धर्मस्य पत्नी धर्मपत्नी । धर्मार्थपत्नीत्यर्थः । अश्वघासादिवत्तादर्थ्ये षष्ठीसमासः । पार्थिवस्य धर्मपत्न्या (सुदक्षिणया) प्रत्युद्गता (संमुखं प्राप्ता) सा धेनुस्तदन्तरे तयोर्दम्पत्योर्मध्ये । दिनक्षपयोर्दिनरात्र्योर्मध्यगता (मध्ये स्थिता) संध्येव [धेनोरपि लोहितत्वात् । समासे लिङ्गभेदात्प्रतीतेर्दिनशब्दस्य नोपमादोषः । यदाह । इष्टः पुंनपुंसकयोः प्रायेणेति—चा०] । रराज शुशुभे । (तयोर्दम्पत्योर्मध्ये गता सा मुनिहोमधेनुः पल्लवस्निग्धपाटलवर्णा तया दिवसरात्र्योर्मध्यगता संध्येव रेजे) ।

(२१.) अक्षतानां पात्रेण सह वर्तेते इति साक्षतपात्रौ हस्तौ यस्याः सा सुदक्षिणा पयस्विनीं (पयो दुग्धमस्याः अस्तीति पयस्विनी तां तथोक्तां) प्रशस्तक्षीरां तां धेनुं प्रद-

---

(19.) Him, the follower of Vasishtha's cow and who was returning from the extremities of the forest, his wife, the rows of whose eye-lashes were slow in twinkling drank up with her eyes, as it were, fasting (she was intent on gazing at the king).

(20) Placed in front by the ruler of the earth on the way and met in advance by the lawful consort of the king, that cow in the intervening space between them looked like the twilight intervening between the day and the night.

(21.) Sudakshina, with a vessel (tray), containing Akshatâs, in her hand, having gone round her (on the right) who yielded milk, and having bowed to her, worshipped the broad space between her horns, the door, as it were, of the accomplishment of the object.

वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि ॥ २२ ॥
गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः ।
दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥ २३ ॥
तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ।
क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥ २४ ॥

क्षिणीकृत्य (प्रदक्षिणां दत्वा) प्रणम्य (नत्वा) च । तस्या धेन्वा विशाल (विस्तीर्णं) शृङ्गान्तरं शृङ्गमध्यम् । अर्थसिद्धेः कार्यसिद्धेर्द्वारं प्रवेशमार्गमिव [तदर्चने पुत्रलाभभावात्—चा०] । आनर्चार्चयामास । अर्चतेर्भौवादिकाल्लिट् ।

(२२.) सा धेनुर्वत्सोत्सुकापि वत्से उत्कण्ठितापि स्तिमिता निश्चला सती सपर्यां (राज्ञीकृतां) पूजां प्रत्यग्रहीत् (स्वीचकार) इति हेतोस्तौ दंपती ननन्दतुः । पूजास्वीकारस्यानन्दहेतुत्वमाह—भक्तेति । पूज्येष्वनुरागो भक्तिः । तयोपपन्नेषु युक्तेषु विषये तद्विधानाम् । तस्या धेन्वा विधा इव विधा प्रकारो येषा तेषाम् । महतामित्यर्थः प्रसादस्य (प्रसन्नतायाः) चिह्नानि लिङ्गानि पूजास्वीकारादीनि पुरः फलानि । पुरोगतानि प्रत्यासन्नानि फलानि येषां तानि हि । अविलम्बितफलसूचकलिङ्गदर्शनादानन्दो युज्यत इत्यर्थः ।

(२३.) भुजोच्छिन्नरिपुः (भुजाभ्यां बाहुभ्यां उच्छिन्नाः उन्मूलिता विनाशिता वा रिपवः शत्रवो येन स तथोक्तः) दिलीपः सदारस्य दारैररुन्धत्या सह वर्तमानस्य गुरोः । उभयोरपीत्यर्थः । " भार्या जायाथ पुंभूम्नि दाराः " इत्यमरः । पादौ (चरणौ) निपीड्याभिवन्द्य । सांध्यं सध्यायां विहितं विधिमनुष्ठानं च समाप्य (समाप्तिं नीत्वा) । दोहावसाने निषण्णामासीनां दोग्ध्रीं दोहनशीलाम् । " तृन् " इति तृन्प्रत्ययः । धेनुमेव पुनर्भेजे सेवितवान् (सभार्यस्य गुरोर्वशिष्ठस्य पादौ संगृह्य सांध्यं विधिं समाप्य चासौ नृपो भूयोपि तां दोहावसाने भूमौ निषण्णां गृष्टिं सिषेवे) । दोग्ध्रीमिति निरुपपदप्रयोगात्कामधेनुत्वं गम्यते ।

(२४.) गोप्ता रक्षको गृहिणीसहायः (गृहिणी एव सहायः यस्य सः) पत्नीद्विती-

(22.) Seeing that she, though eager for (meeting) her young one, accepted their worship standing motionless (still), both of them became glad, for signs of favour in those of her kind towards those who are full of devotion have the fruits before them (at hand).

(23) Having grasped the feet of the preceptor and of his wife, and having finished the evening ceremonial, Dilîpa who had uprooted his enemies by (the might of) his arms waited even again upon the giver of milk (the cow) who sat down after the milking was over.

(24.) The protector, who had his consort (queen) for his companion, having sat after her, near whom were placed oblations and small lamps (lights), slept after she (the cow) had gradually fallen asleep and in the morning got up after she had risen from sleep.

इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य॥ २५ ॥
अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥ २६ ॥

यः सन्। उभावपीत्यर्थः। अन्तिके (निकटे) न्यस्ताः (स्थापिताः) बलयः प्रदीपाश्च यस्यास्तां तथोक्तां तां पूर्वोक्तां निषण्णां धेनुमन्वास्य अनूपविश्य क्रमेण सुप्ताम् (निद्रागतां) अनु अनन्तरं संविवेश सुष्वाप। प्रातः सुप्तोत्थिताम् (आदौ सुप्ता पश्चादुत्थिता तां तथोक्तां) अनूदतिष्ठदुत्थितवान्। अत्रानुशब्देन धेनुराजव्यापारयोः पौर्वापर्यमुच्यते। क्रमशब्देन धेनुव्यापाराणामेव। इत्यपौनरुक्त्यम्। " कर्मप्रवचनीययुक्ते–" इति द्वितीया।

(२५.) इत्थमनेन प्रकारेण प्रजार्थं संतानाय महिष्या सममभिषिक्तपत्न्या सह। " कृताभिषेका महिषी" इत्यमरः। व्रतं (नियमं) धारयतः (पालयतः)। महनीया पूज्या कीर्तिः (यशः) यस्य तस्य [क्लेशसहिष्णुत्वात्–चा०] दीनानामुद्धरणं दैन्यविमोचनम्। तत्रोचितस्य परिचितस्य तस्य नृपस्य। त्रयो गुणा आवृत्तयो येषां तानि त्रिगुणानि त्रिरावृत्तानि सप्त दिनानि (वासराणि) एकविंशतिदिनानि व्यतीयुः।

(२६.) अन्येद्युरन्यस्मिन्दिने द्वाविंशे दिने। " सद्यः परुत्परारि–" इत्यादिना निपातनादव्ययम्। " अद्यात्राह्नाय पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात्। तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः " इत्यमरः। मुनिहोमधेनुः। आत्मानुचरस्य भावमभिप्रायं दृढभक्तित्वम्। " भावोऽभिप्राय आशयः " इति यादवः। जिज्ञासमाना ज्ञातुमिच्छन्ती (परीक्षितुकामा)। " ज्ञाश्रुस्मृदृशां सनः " इत्यात्मनेपदे शानच्। प्रपतत्यस्मिन्निति प्रपातः पतनप्रदेशः (तटं। " प्रपातस्तु तटो भृगुः" इत्यमरः)। गङ्गायाः प्रपातस्तस्यान्ते समीपे विरूढानि जातानि शष्पाणि बालतृणानि यस्मिंस्तत् [विरूढशष्पं तत्र गमनहेतुः–चा०]। " शष्पं बालतृणं घासः " इत्यमरः। गौरीगुरोः (गौर्याः पार्वत्याः गुरुः हिमाद्रिस्तस्य) पार्वतीपितुर्गह्वरं गुहामाविवेश (हिमालयस्य गुहान्तःप्रदेशं प्रविवेश)।

(25.) While he whose fame was adorable, and who was accustomed to relieve the poor, thus observed the vow with the queen for (the sake of) offspring, three-fold-seven (twenty-one) days passed.

(26.) On the following day (i. e. on the 22nd day) the sacred cow of the sage (which was required for sacrificial purpose), wishing to test (try) the devotion of her follower, entered a thicket of the father of Gaurî (the Himâlaya) in which was grown young grass (tender shoots or blades of grass) near the water-fall of the Gangâ.

सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥ २७ ॥
तदीयमाक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम् ।
रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम् ॥ २८ ॥
स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥ २९ ॥

(२७.) सा धेनुर्हिंस्रैर्व्याघ्रादिभिर्मनसापि दुष्प्रधर्षा (धर्षितुमशक्या अनभिभाव्या) दुर्धर्षेति हेतोरद्रिशोभायां प्रहितेक्षणेनदत्तदृष्टिना ।("ईक्षणं दर्शने दृष्टौ" इति विश्वः)। नृपेणालक्षितम् (अज्ञातं) अभ्युत्पतनमाभिमुख्येनोत्पतनं यस्य स सिंहः [हिनस्ति मारयतीति सिंहः । तृहिहिंसि-हिंसायामित्यस्य प्रयोगः । हिंसर्वर्णविपर्ययः—चा०] तां धेनुं प्रसह्य हठात् (बलात्कारेण) "प्रसह्य तु हठार्थकम्" इत्यमरः । चकर्ष । किलेत्यलीके ।

(२८.) गुहानिबद्धेन (कन्दराप्रसृतेन) प्रतिशब्देन प्रतिध्वनिना दीर्घम् [इत्यन्यचि-त्तस्यापि आकर्षणहेतुः—चा०] तस्या इदं तदीयम् । आक्रन्दितमार्तघोषणम् । आर्तेष्वाप-न्नेषु (दुःखितेषु) साधोर्हितकारिणो नृपस्य नगेन्द्रसक्तां (हिमाचललग्नां) दृष्टिम् । रश्मि-षु प्रग्रहेषु । [करणस्यैवाधिकरणविवक्षायां सप्तमी । यथोक्तं । व्याददाने चतुर्थी स्यात् । दर्शने कथनेपिच । आदाय करणे योगे । सप्तमी कैश्चिदुच्यते—सु०] "किरणप्रग्रहौ रश्मी" इत्यमरः । आदायेव गृहीत्वेव । निवर्तयामास । [यथा प्रग्रहैः कश्चित्पुरुषः घोटकादि अ-न्यतो यातमाकृष्य निवारयति तथा गोक्रान्दितं राज्ञो दृष्टिं निवारितवदिति भावः-चा०] ।

(२९) धनुर्धरः स नृपः पाटलायां रक्तवर्णायां गवि (धेनौ) तस्थिवांसं स्थितम् । "क्वसुश्च" इति क्वसुप्रत्ययः । केसरिणं सिंहम् । सानुमतोऽद्रेः । धातोर्गैरिकस्य विकारो धातुमयी । (प्राचुर्यार्थे मयट्) तस्यां (गैरिकादिधातुप्रचुरायां) अधित्यकायामूर्ध्वभूमौ । "उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका" इत्यमरः । "उपाधिभ्यां त्यकन्नासन्नारूढयोः" इति त्यकन्प्रत्ययः । प्रफुल्लो विकसितस्तम् । 'फुल्ल विकसने' इति धातोः पचाद्यच् । [सा-नुमतो ग्रहणेन पौनरुक्त्यं तथाच भट्टिकाव्ये " समुद्रोपत्यकां हैमीं पर्वताधित्यकापुरी "—चा०] लोध्राख्यं द्रुममिव [केसरिपदेन प्रफुल्लत्वात्साम्यं—चा०] ददर्श ।

(27.) Alas ! a lion forcibly seized her without his spring being observed by the king, who had fixed his eyes on the beauty of the mountain, thinking that she was too difficult to be assailed, even in fancy, by the beasts of prey.

(28) Her lowing (cries) swollen (lit : loud) by the echo arising from the caves, drew back the sight, rivetted on the king of mountains, of the king kind to the distressed, as if drawing it by means of reins (catching, as it were, in a noose of ropes).

(29.) That bow-man beheld the lion seated on the rosy cow like the full blown (flourishing) Lodhra tree on the high-land of a mountain full of red metallic substance (or chalk).

ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥ ३० ॥
वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे ।
सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ॥ ३१ ॥
बाहुप्रतिष्टम्भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः ।
राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः ॥ ३२ ॥

(३०.) ततः सिंहदर्शनानन्तरं मृगेन्द्रगामी (मृगेन्द्रवत् गन्तुं शीलमस्य सः) सिंहगामी । शरणं रक्षणम् "शरणं गृहरक्षित्रोः" इत्यमरः । "शरणं रक्षणे गृहे" इति यादवः । शरणे साधुः शरण्यः । (शरणागतवत्सलः) "तत्र साधुः" इति यत्प्रत्ययः । प्रसभेन बलात्कारेणोद्धृताः (उन्मूलिताः) अरयो (वैरिणः) येन स नृपती राजा [एतेन सामर्थ्योक्तिः--चा०] जाताभिषङ्गो जातपराभवः सन् । [अर्थाज्जाताभिमाननिकृतिः सन् उत्पन्नकोपः--सु०] "अभिषङ्गः पराभवः" इत्यमरः । वध्यस्य वधार्हस्य । "दण्डादिभ्यो यः" इति यप्रत्ययः । मृगेन्द्रस्य (सिंहस्य) वधाय (नाशाय) निषङ्गात्तूणीरात् । "तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः" इत्यमरः । शरमुद्धर्तुं (निष्कासितुं) ऐच्छत् ।

(३१.) प्रहर्तुस्तस्य वामेतरो दक्षिणःकरः । नखप्रभाभिः (करजप्रभाभिः) भूषितानि विच्छुरितानि कङ्कस्य पक्षिविशेषस्य पत्राणि (पक्षाणि) यस्य तस्मिन् । "कङ्कः पक्षिविशेषे स्याद्गुप्ताकारे युधिष्ठिरे" इति विश्वः । "कङ्कस्तु कर्कटः" इति यादवः । सायकस्य (बाणस्य) पुङ्खे (मूले) एव कर्तर्याख्ये मूलप्रदेशे । "कर्तरी पुङ्खे" इति यादवः । सक्ताङ्गुलिः (लग्नांगुलिः) सन् । चित्रार्पितारम्भश्चित्रलिखितशरोद्धरणोद्योग इव । (चित्रगतशरोत्कर्षणतत्परः इव दृष्टः इत्यर्थः) अवतस्थे ।

(३२.) बाह्वोः प्रतिष्टम्भेन प्रतिबन्धेन । "प्रतिबन्धः प्रतिष्टम्भः" इत्यमरः । विवृद्धमन्युः प्रवृद्धरोषो राजा । मन्त्रौषधिभ्यां रुद्धवीर्यः प्रतिबद्धशक्तिर्भोगी सर्प इव । "भोगी राजभु-

---

(30) Then the king who had the gait of a lion, who was the refuge (to the distressed) and who rooted up his enemies by force, being thus foiled (in his pride) wished to take out of his quiver an arrow for killing the king of beasts who deserved death.

(31.) The right (lit : other than the left) hand of the striker, whose fingers were stuck to the root of the arrow (feathered part of the arrow) whose Kanka feathers were decorated by the lustre of his nails, stood like one drawn in a picture (lit : an act put in a picture).

(32) The King with increased rage at his arm being stuck (to the end of the arrows) burnt within himself by his own (fiery) energy which could not touch the offender though so close, like a cobra whose power has been checked (or destroyed) by incantations and medicinal drugs (plants.)

तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम्।
विस्माययन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ॥ ३३ ॥
अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ॥ ३४ ॥
कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम्।
अवेहि मां किंकरमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ॥ ३५ ॥

जगयोः " इति शाश्वतः । अभ्यर्णमन्तिकम् (निकटवर्तिनं) " उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम्" इत्यमरः आगस्कृतमपराधकारिणमस्पृशद्भिः स्वतेजोभिरन्तरदह्यत । "अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि " इति यादवः । [अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् । प्राणत्यागेऽप्यसहनं तत्तेजः समुदाहृतमिति भरतः--चा०] ।

(३३.) निगृहीता पीडिता धेनुर्येन स सिंहः । आर्याणां (कुलशीलाद्युपेतानां) सतां गृह्यं पक्ष्यम् । "पदास्वैरिबाह्यापक्ष्येषु च " इति क्यप् । मनुवंशस्य केतुं चिह्नं केतुवद्व्यावर्तकम् । सिंह इवोरुसत्त्वो महाबलस्तम् । आत्मनो वृत्तौ बाहुस्तम्भरूपे [क्षात्रकर्मणि--चा०] व्यापारेऽभूतपूर्वत्वाद्विस्मितम् (साश्चर्यं) कर्तरि क्तः । तं दिलीपं मनुष्यवाचा । करणेन । पुनर्विस्माययन्विस्मयमाश्चर्यं प्रापयन्निजगाद । ' स्मिङ्ईषद्धसने ' इति धातोर्णिचि वृद्धावायादेशे शतृप्रत्यये च सति विस्माययन्निति रूपं सिद्धम् [आर्यगृह्यत्वं सिंहसमानबलत्वं च संभाषणहेतुः--चा०] ।

(३४.) हे महीपाल तव श्रमेणालम् (कृतम्) । साध्याभावाच्छ्रमो न कर्तव्य इत्यर्थः । अत्र गम्यमानसाधनक्रियापेक्षया श्रमस्य करणत्वात्तृतीया । उक्तं च न्यासोद्योते-" न केवलं श्रूयमाणैव क्रिया निमित्तं करणभावस्य । अपि तर्हि गम्यमानापि " इति । अलं भूषणपर्याप्तिशक्तिवारणवाचकम् " इत्यमरः । इतोऽस्मिन्मयि । सार्वविभक्तिकस्तसिः । प्रयुक्तम् (मुक्त) अप्यस्त्र (शस्त्र । देवशक्तित्वात्) वृथा स्यात् । तथाहि । पादपोन्मूलने (तरूणामुत्पाटने) शक्तिः (सामर्थ्यं) यस्य तत्तथोक्तं मारुतस्य (वायोः) रंहो वेगः शिलोच्चये पर्वते न मूर्च्छति न प्रसरति (प्रगल्भते) ।

(३५.) कैलास इव गौरः शुभ्रस्तम् । " चामीकरं च शुभ्रं च गौरमाहुर्मनीषिणः "

(33.) The lion, who had seized the cow, spoke to him, who was acceptable to the noble, the standard of Manu's race, and of a valour mighty like that of a lion, in human accents thus astonishing him (the more) who was (already) surprised at his own state.

(34.) Enough, O King, with your labours ; here your missile though levelled would be ineffectual ; for the velocity of the wind which has the power to eradicate a tree will take no effect upon (or will not prevail against) a mountain.

(35.) Know me, Kumbhodara by name, and the friend of Nikumbha, to be

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥ ३६ ॥
कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥ ३७ ॥

इति शाश्वतः । वृषं वृषभमारुरुक्षोरारोढुमिच्छोः । स्वस्योपरि पदं निक्षिप्य वृषमारोहतीत्यर्थः । अष्टौ मूर्तयो यस्य स तस्याष्टमूर्तेः शिवस्य पादार्पणं पादन्यासस्तदेवानुग्रहः प्रसादस्तेन पूतं (शुद्धं) पृष्ठ यस्य तं तथोक्तं निकुम्भमित्रं [निकुंभो गणभेदः कुम्भकर्णपुत्रो वा-चा० । पार्वतीवाहनः सिंहः–व०] कुम्भोदरं नाम किंकरं मामवेहि (इत्यत्र पररूपं न वृद्धिः) विद्धि । " पृथिवी सलिलं तेजो वायुराकाशमेव च । सूर्याचन्द्रमसौ सोमयाजी चेत्यष्ट मूर्तयः " इति यादवः ।

(३६.) पुरोऽग्रतोऽमुं देवदारुं पश्यसि । इति काकुः । असौ देवदारुः । वृषभो ध्वजे यस्य स तेन शिवेन पुत्रीकृतः पुत्रत्वेन स्वीकृतः । अभूततद्भावे च्विः । यो देवदारुः स्कन्दस्य मातुर्गौर्या हेम्नः कुम्भ एव स्तनः । तस्मान्निःसृतानां (निर्गतानां) पयसामम्बूनां रसज्ञः स्वादज्ञ । स्कन्दपक्षे हेमकुम्भ इव स्तन इति विग्रहः । पयसां क्षीराणाम् । "पयः क्षीरं पयोऽम्बु च " इत्यमरः । स्कन्दसमानप्रेमास्पदमिति भावः ।

(३७.) कदाचित् (कस्मिंश्चित्प्रस्तावे) कटं कपोलं (गण्डस्थलं) कण्डूयमानेन (खर्जू खनता) कषता । " कण्ड्वादिभ्यो यक् " इति यक् । ततः शानच् । वन्यद्विपेन (वन्यगजेन) अस्य देवदारोस्त्वक् (वल्कलं) उन्मथिता (उन्मूलिता) । अथाद्रेस्तनया गौरी । असुरास्त्रैः (दैत्यप्रहरणैः) आलीढं क्षतम् [व्याप्तमिति–चा०] । सेनां नयतीति सेनानीः स्कन्दः । " पार्वतीनन्दनः स्कन्दः सेनानीः " इत्यमरः । " सत्सूद्विष– " इत्यादिना क्विप् । तमिव । एनं देवदारुं शुशोच ।

(३८.) तदा तत्कालः प्रभृतिरादिर्यस्मिन्कर्मणि तत्तथा तदाप्रभृत्येव वनद्विपानां (व-

the servant of the eight-formed God (S'iva), whose back has been sanctified by the favour of placing his foot, [by S'iva] when wishing to mount the bull white as the mount Kailása.

(36.) This pine tree, that you see before, is adopted (made into a son) as a son by the bull-bannered God and has become conversant with the taste of Skanda's mother's milk, flowing out of her breasts resembling golden jars.

(37.) Of this (tree) the bark was once peeled off by a wild elephant, while scratching his temples (against it) and then (on that account) the mountain-daughter bemoaned it as she would do Skanda (the leader of the Devas' army), wounded by the missiles of demons.

तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति ॥ ३८ ॥
तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥ ३९ ॥
स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥ ४० ॥
इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥ ४१ ॥

नवासिनां गजानां) त्रासार्थं भयार्थं शूलभृता शिवेन । अङ्कं समीपमागताः प्राप्ताः सत्त्वाः प्राणिनो वृत्तिः (आजीविका) यस्मिंस्तत् । "अङ्कः समीप उत्सङ्गे चिह्ने स्थानापराधयोः" इति केशवः । सिंहत्वं (सिंहरूपं) विधाय (कृत्वा) । अस्मिन्नद्रिकुक्षौ गुहायामहं व्यापारितो नियुक्तः [मम समीपे ये जीवाः आगच्छन्ति तान् भक्षित्वा जीवामीति भावः—सु०] ।

(३९.) परमेश्वरेण प्रदिष्टो निर्दिष्टः कालो भोजनवेला [मृत्युर्वेति—चा०] यस्याः सोपस्थिता प्राप्तैषा गोरूपा शोणितपारणा रुधिरस्य व्रतान्तभोजनम् । सुरद्विषो राहोः । चन्द्रमस इयं चान्द्रमसी सुधा (अमृतं) इव । क्षुधितस्य बुभुक्षितस्य तस्याङ्कागतसत्त्ववृत्तेर्मे मम सिंहस्य तृप्त्यै (संतोषाय) अलं पर्याप्ता । " नमःस्वस्ति–" इत्यादिना चतुर्थी [भोजनहेतुत्वाद्गौरेव पारणादिष्टमृत्युरिति केचित्—चा०] ।

(४०.) स एवमुपायशून्यस्त्वं लज्जां (त्रपां) विहाय (त्यक्त्वा) निवर्तस्व । भवांस्त्वं गुरोर्दर्शिता प्रकाशिता शिष्यस्य कर्तव्या भक्तिर्येन स तथोक्तोऽस्ति । ननु गुरुधनं विनाश्य कथं तत्समीपं गच्छेयमत आह—शस्त्रेणेति । यद्रक्ष्यं (रक्षायोग्यं) धनं शस्त्रेणायुधेन । " शस्त्रमायुधलोहयोः " इत्यमरः । अशक्या रक्षा यस्य तदशक्यरक्षम् । रक्षितुमशक्यमित्यर्थः । तद्रक्ष्यं नष्टमपि शस्त्रभृतां यशो न क्षिणोति न हिनस्ति । अशक्यार्थेष्वप्रवृत्तिविघातं न दोषायेति भावः ।

(४१.) पुरुषाणामधिराजो नृप इति प्रगल्भं (चतुरं) मृगाधिराजस्य वचो निशम्य

(38.) From that time I have been appointed by the S'úla-bearing God (S'iva) in this mountain cave for frightening away wild elephants, after he turned me into a lion whose maintenance is the animals come within his grasp (living on animals found at hand).

(39.) For the gratification of me, grown hungry, this meal of blood (after my fast i. e. the cow) whose time is fixed by the mighty lord and which has presented itself before me is sufficient, as the lunar nectar is to the enemy of the Gods.

(40.) Do thou, therefore, abandoning shame, return home; thou art one who has exhibited the devotion of a disciple towards his preceptor; that charge whose protection is impossible by means of arms does not (if lost) damage the honor of those who wield weapons (i. e. warriors).

(41.) Having thus heard the bold speech of the lord of beasts, the lord of

प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वसंगे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥ ४२ ॥
संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोऽभिधास्ये ॥ ४३ ॥

श्रुत्वा गिरिशस्येश्वरस्य प्रभावात्प्रत्याहतास्त्रः कुण्ठितास्त्रः सन्नात्मनि विषयेऽवज्ञामपमानं शिथिलीचकार । तत्याजेत्यर्थः । अवज्ञातोऽहमिति निर्वेदं न प्रापेत्यर्थः । समानेषु हि क्षत्रियाणामभिमानः । न सर्वेश्वरं प्रतीति भावः ।

(४२.) स एव पूर्वः प्रथमः सङ्गः प्रतिबन्धो यस्य तस्मिंस्तत्पूर्वसङ्गे इषुप्रयोगे (बाणसंधाने) वितथप्रयत्नो विफलप्रयासः । अत एव वज्रं कुलिशं मुमुक्षन्मोक्तुमिच्छन् । अम्बकं लोचनम् । " दृग्दृष्टिनेत्रलोचनचक्षुर्नयनाम्बकेक्षणाक्षीणि " इति हलायुधः । त्रीण्यम्बकानि यस्य स त्र्यम्बको हरः । तस्य वीक्षणेन जडीकृतो निष्पन्दीकृतः । वज्रं पाणौ यस्य स वज्रपाणिरिन्द्रः । " प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यम् " इति पाणेः सप्तम्यन्तस्योत्तरनिपातः । स इव स्थितो नृप एनं सिंहं प्रत्यब्रवीच्च । " बाहुं सवज्रं शक्रस्य क्रुद्धस्यास्तम्भयत्प्रभुः " इति महाभारते ।

(४३.) हे मृगेन्द्र संरुद्धचेष्टस्य प्रतिबद्धव्यापारस्य मम तद्वचो वाक्यं कामं हास्यं परिहसनीयम् । यद्वचः " स त्वं मदीयेन " इत्यादिकमहं विवक्षुर्वक्तुमिच्छुरस्मि । तर्हि तूष्णीं स्थीयतामित्याशङ्क्येश्वरकिंकरत्वात्सर्वज्ञं त्वां प्रति न हास्यमित्याह – अन्तरिति । हि यतो भवान्प्राणभृताम् (प्राणिनां) अन्तर्गतं हृद्गतं वाग्वृत्त्या बहिरप्रकाशितमेव सर्वं भावं (चित्ताभिप्रायं) वेद वेत्ति । " विदो लटो वा " इति णलादेशः । अतोऽहमभिधास्ये वक्ष्यामि । वाचं इति प्रकृतं कर्म संबध्यते । अन्ये त्वीदृग्वचनमाकर्ण्यासंभावितार्थमेतादित्युपहसन्ति । अतस्तु मौनमेव भूषणम् । त्वं तु वाङ्मनसयोरेकविध एवायमिति जानासि । अतोऽभिधास्ये यद्वचोऽहं विवक्षुरित्यर्थः ।

(४४.) प्रत्यवहारः प्रलयः । स्थावराणां तरुशैलादीनां जंगमानां मनुष्यादीनां सर्ग-

men, whose missile was made helpless (impeded in its course) through the power of the mountain-resident S'iva, lessened his feeling of contempt towards himself.

(42.) Like Indra (lit. one in whose hand there is the thunder-bolt) desirous to discharge the thunder-bolt and made motionless at the sight of the three-eyed God (S'iva), he, baffled in his attempt to discharge an arrow to which that hinderance was the first, spoke to him thus.

(43.) What I, whose movements (efforts) are impeded, am about to speak, O lord of beasts, is forsooth laughable; but because you know all the inward sentiments of living beings, I will give it vent.

मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ॥ ४४ ॥
स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥ ४५ ॥
अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ॥ ४६ ॥
एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम् ॥ ४७ ॥

स्थितिप्रत्यवहारेषु हेतुः स ईश्वरो मे मम मान्यः पूज्यः । अलङ्घ्यशासन इत्यर्थः (जङ्गमानां उत्पत्तिस्थितिप्रलयादिषु आदिकारणं स ईश्वरो मम तु अलङ्घ्यशासन एव किंतु समक्षमेव व्यापाद्यमानं गुरोर्मे गोरूपधनं सर्वथैव अनुपेक्षणीयं तस्मात्सा मुनिहोमधेनुर्मुच्यतामिति भावः)। शासनं च "सिंहत्वमङ्कागतसत्त्ववृत्ति" इत्युक्तरूपम्। तर्हि विसृज्य गम्यताम् । नेत्याह–गुरोरपीति । पुरस्तादग्रे नश्यत् (व्यापाद्यमानं) इदमाहिताग्नेर्गुरोर्धनमपि गोरूपमनुपेक्षणीयम् (अत्याज्यं) । आहिताग्नेरिति विशेषणेनानुपेक्षाकारणं हविःसाधनत्वं सूचयति ।

(४५.) सोऽङ्कागतसत्त्ववृत्तिस्त्वं मदीयेन (मत्सम्बन्धिना) देहेन शरीरस्य वृत्तिं (पारणारूपं) जीवनं निर्वर्तयितुं संपादयितुं प्रसीद । दिनावसाने (दिवसान्ते) उत्सुकः (सोत्कण्ठ) माता समागमिष्यतीत्युत्कण्ठितो बालवत्सो यस्याः सा महर्षेरियं धेनुर्विसृज्यताम् [विमुच्यतां । उत्सुकबालवत्सत्वेन द्वयोरपि नाशः सूचितः–चा०] ।

(४६.) अथ भूतेश्वरस्य पार्श्ववर्त्यनुचरः स सिंहो गिरेर्गह्वराणां गुहानाम् । " देवखातबिले गुहा गह्वरम् " इत्यमरः । अन्धकारं ध्वान्तं दंष्ट्रामयूखैः (दंष्ट्राप्रभाभिः) शकलानि खण्डानि कुर्वन् । निरस्यन्नित्यर्थः । किंचिद्विहस्य (ईषद्धास कृत्वा) अर्थपतिं नृपं भूयः (पुनः) बभाषे (जगाद) । हासकारणम् "अल्पस्य हेतोर्बहु हातुमिच्छन् " इति वक्ष्यमाणं द्रष्टव्यम् ।

(४७.) एकातपत्रमेकच्छत्रं जगतः (लोकस्य) प्रभुत्वं स्वामित्वम् [भूपान्तराभावात्–

(44.) That God, who is the cause of the creation, continuance, and destruction of the inanimate and the animated is revered by me, but this treasure (the cow) of my preceptor who maintains the sacred fire, is not to be neglected thus perishing before me.

(45.) Such a one as thou, therefore, be pleased to make the sustenance of thy body by (devouring) my body. Let this cow of the great sage, whose young one is (longing for her) eager to see her at the close of day, be set at liberty.

(46.) At this, that attendant of the lord of all beings, having smiled a little, again spoke to the lord of wealth, dissipating (lit. dividing into pieces) the darkness of the mountain-caves with the rays of his tusks.

(47.) " You, who wish to give up so much as the sovereignty of the

भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥ ४८ ॥
अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद्बिभेषि ।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः ॥४९
तद्रक्ष कल्याणपरंपराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥ ५० ॥

–चा०] । नवं वयो यौवनम् । इदं कान्तं रम्यं वपुश्च । इत्येवं बहु (प्रभूतं) । अल्पस्य हेतोरल्पेन कारणेन । अल्पफलायेत्यर्थः । "षष्ठी हेतुप्रयोगे" इति षष्ठी । हातुं त्यक्तुमिच्छंस्त्वं विचारे कार्याकार्यविमर्शे मूढो मूर्खो मे मम प्रतिभासि ।

(४८.) तव भूतेषु (प्राणिषु) अनुकम्पा कृपा चेत् । "कृपा दयानुकम्पा स्यात्" इत्यमरः । कृपैव वर्तते चेदित्यर्थः । तर्हि त्वदन्ते तव नाशे सति इयमेका गौः । स्वस्ति क्षेममस्या अस्तीति स्वस्तिमती (कल्याणिनी) भवेत् । जीवेदित्यर्थः । "स्वस्त्याशीः क्षेमपुण्यादौ" इत्यमरः । हे प्रजानाथ (लोकपते) जीवन्पुनः पितेव प्रजा उपप्लवेभ्यो विघ्नेभ्यः शश्वत्सदा । "पुनः सदार्थयोः शश्वत्" इत्यमरः । पासि रक्षसि । स्वप्राणव्ययेनैकधेनुरक्षणाद्वरं जीवितेनैव शश्वदखिलजगत्त्राणमित्यर्थः ।न धर्मलोपाद्भियं प्रवृत्तिः किंतु गुरुभयादित्यत आह–

(४९.) अथेति पक्षान्तरे । अथवा । एकैव धेनुर्यस्य तस्मात् । अयं कोपकारणोपन्यास इति ज्ञेयम् । अत एवापराधे गवोपेक्षालक्षणे सति चण्डादतिकोपनात् । "चण्डस्त्वत्यन्तकोपनः" इत्यमरः । अत एव कृशानुः (अग्निः) प्रतिमोपमा यस्य तस्मादग्निकल्पाद्गुरोर्बिभेषि । इति काकुः । "भीत्रार्थानां भयहेतुः" इत्यपादानात्पञ्चमी । अल्पवित्तस्य धनहानिरतिदुःसहेति भावः । अस्य गुरोर्मन्युः क्रोधः । "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः । घटा इवोधांसि यासां ता घटोध्नीः । "ऊधसोऽनङ्" इत्यनङादेशः । "बहुव्रीहेरूधसो ङीष्" इति ङीष् । कोटिशः (कोटिप्रमाणाः) गाः (धेनूः) स्पर्शयता प्रतिपादयता (ददता) । "विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्" इत्यमरः । भवता विनेतुमपनेतुं शक्यः ।

(५०) तत्तस्मात्कारणात्कल्याणपरंपराणां (मंगलसंततीनां भोक्तारम् । कर्मणि ष-

---

world with only one imperial umbrella, your youthful life and this lovely form, for the sake of a trifle, appear to me to be stupid in discretion (wanting in sense)."

(48.) "If you feel compassion for beings, this cow alone will be safe on your death (lit. end); but if you live, you will, O lord of people, ever protect your subjects from calamities like a father."

(49.) "Or, if you are afraid of your one-cowed preceptor, enraged at your default and who is the very image of fire (furious), his anger is possible to be appeased by you giving him crores of cows, having udders as big as pitchers (of full udders)."

(50.) "Therefore, save your own body which is endowed with strength, and

एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥ ५१ ॥
निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥५२॥
क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥ ५३ ॥

ष्ठी। ऊर्जो बलमस्यास्तीत्यूर्जस्वलम् (तेजस्विनं)। "ज्योत्स्नातमिस्रा-" इत्यादिना वलच्प्रत्ययान्तो निपातः। आत्मदेहं रक्ष। ननु गामुपेक्ष्यात्मदेहरक्षणे स्वर्गहानिः स्यात्। नेत्याह-महीतलेति। ऋद्धं समृद्धं राज्यं महीतलस्पर्शनमात्रेण भूतलसंबन्धमात्रेण भिन्नमैन्द्रमिन्द्रसंबन्धि पदं स्थानमाहुः। स्वर्गान्न भिद्यत इत्यर्थः।

(५१.) मृगेन्द्रे एतावदुक्त्वा विरते (मौनीभूते) सति गुहागतेन (कन्दरास्थितेन) अस्य सिंहस्य प्रतिस्वनेन (प्रतिशब्देन) शिलोच्चयः शैलोऽपि प्रीत्या तमेवार्थं क्षितिपालमुच्चैरभाषतेव। इत्युत्प्रेक्षा। भाषिरयं ब्रुविसमानार्थत्वाद्द्विकर्मकः। ब्रुविस्तु द्विकर्मकेषु पठितः। तदुक्तम्-" दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना " इति।

(५२.) देवानुचरस्येश्वरकिंकरस्य सिंहस्य वाचं (वाणीं) निशम्य (श्रुत्वा) मनुष्यदेवो राजा पुनरप्युवाच (जगाद)। किंभूतः सन्। तेन सिंहेन यदध्यासितं व्याक्रमणम्। नपुंसके भावे क्तः। तेन कातरे अक्षिणी (नेत्रे) यस्यास्तया। " बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् " इति षच्। " षिद्गौरादिभ्यश्च " इति ङीष्। किं वा वक्ष्यतीति भीत्यैवं स्थितयेत्यर्थः। धेन्वा निरीक्ष्यमाणः। अत एव सुतरां दयालुः सन्। सुतरामित्यत्र " द्विवचनविभज्य-" इत्यादिना सुशब्दात्तरप्। " किमेत्तिङव्यय-" इत्यादिनाम्प्रत्ययः। " तद्धितश्चासर्वविभक्तिः " इत्यव्ययसंज्ञा। किमुवाचेत्याह—

(५३.) " क्षणु हिंसायाम् " इति धातोः संपदादित्वात्क्विप्। " गमादीनाम् " इति

---

which is the enjoyer of series of blessings; for the prosperous kingdom is said to be the position of Indra, only different from it because of its contact with the earth's surface."

(51.) When the lord of beasts ceased after having said this, even the mountain with pleasure expressed, as it were, in a loud voice the same purport to the protector of the earth with his echo issuing from the caves.

(52.) Having heard the speech of the attendant of the god (S'iva), the king of men, even much more compassionate (than before) because of his being looked at by the cow whose eyes were rolling under his (lion's) grasp, also spoke again.

(53.) "No doubt that the high (noble) word Kshatra passed current in

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम्।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्याम् ॥ ५४ ॥
सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥ ५५ ॥

वक्तव्यादनुनासिकलोपे तुगागमे च क्षदिति रूपं सिद्धम् । क्षतो नाशात् [आयुधात्–चा०] त्रायते (रक्षति) इति क्षत्त्रः । सुपीति योगविभागात्कः । तामेतां व्युत्पत्तिं कविरर्थतोऽनुक्रामति–क्षतादित्यादिना । उदग्र उन्नतः क्षत्रस्य क्षत्रवर्णस्य शब्दो वाचकः । क्षत्रशब्द इत्यर्थः । क्षतात्त्रायत इति व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु । नाश्वकर्णादिवत्केवलरूढः किंतु पङ्कजादिवद्योगरूढ इत्यर्थः । ततः किमित्यत आह–तस्य क्षत्रशब्दस्य विपरीतवृत्तेर्विरुद्धव्यापारस्य क्षतत्त्राणमकुर्वतः पुंसो राज्येन किम् । उपक्रोशमलीमसैर्निन्दामलिनैः । " उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे " इत्यमरः । ज्योत्स्नातमिस्रा–" इत्यादिना मलीमसशब्दो निपातित । " मलीमसं तु मलिनं कच्चर मलदूषितम् " इत्यमरः । तैः प्राणैर्वा किम् । निन्दितस्य सर्वं व्यर्थमित्यर्थः । एतेन " एकातपत्रम् " इत्यादिना श्लोकद्वयेनोक्तं प्रत्युक्तमिति वेदितव्यम् । अथ " एकधेनोः " इत्यत्रोत्तरमाह––

(५४.) अनुनयः क्रोधापनयः (प्रसादः) चकारो वाकारार्थः । महर्षेरनुनयो वान्यासां पयस्विनीनां दोग्ध्रीणां गवां विश्राणनाद्दानात् । " त्यागो वितरणं दानमुत्सर्जनविसर्जने । विश्राणनं वितरणम् " इत्यमरः । कथं नु शक्यः । न शक्य इत्यर्थः । अत्र हेतुमाह–इमां गां सुरभेः कामधेनोः । "पञ्चमी विभक्ते" इति पञ्चमी। अनूनामन्यूनामवेहि जानीहि । तर्हि कथमस्याः परिभवोऽभूदित्याह–रुद्रौजसेति । अस्यां गवि त्वया । कर्त्रा । प्रहृतं तु प्रहारस्तु। नपुंसके भावे क्तः । रुद्रौजसेश्वरसामर्थ्येन । न तु स्वयमित्यर्थः । " सप्तम्यधिकरणे च " इति सप्तमी । तर्हि किं चिकीर्षितमित्यत्राह–

(५५.) सेयं गौर्मया । निष्क्रीयते प्रत्याह्रियतेऽनेन परगृहीतमिति निष्क्रयः प्रतिशीर्षकम् । " एरच् " इत्यच्प्रत्ययः । स्वदेहार्पणमेव निष्क्रयः (मूल्यं) तेन भवत्तस्त्वत्तः । पञ्चम्यास्तसिल् । मोचयितुं न्याय्या न्यायादनपेता । युक्तेत्यर्थः । "धर्मपथ्यर्थ–" इत्यादिना

the worlds for one that saves from wounds ; to one whose conduct is contrary to this (duty) of what use is either kingdom or life soiled with censures ?"

(54.) " How, by the gifts of other cows, is the appeasing (of the anger) of the great sage possible ? Know that this (cow) is no way inferior to Surabhi (her mother) ; your striking her is only through the power of Rudra."

(55.) "She is justly entitled to be rescued by me from you by the offering of my own body as ransom ; this being agreed to, your dinner after fast will not be lost and the means of the sage's (necessary) rites will be preserved. "

भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥ ५६ ॥
किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु॥५७॥

यत्प्रत्ययः । एवं सति तव पारणा भोजनं विहता (नष्टा) न स्यात् । मुनेः क्रिया होमादिः । स एवार्थः प्रयोजनम् । स चालुप्तो (अप्रतिहतः) भवेत् । स्वप्राणव्ययेनापि स्वामिगुरुधनं संरक्ष्यमिति भावः । अत्र भवानेव प्रमाणमित्याह—

(५६.) परवान्स्वामिपरतन्त्रो भवानपि । " परतन्त्रः पराधीनः परवान्नाथवानपि " इत्यमरः । इदं वक्ष्यमाणमवैति । भवतानुभूयत एवेत्यर्थः । " शेषे प्रथमः" इति प्रथमपुरुषः । किमित्यत आह–हि यस्माद्धेतोः । " हि हेतावरवधारणे " इत्यमरः । तव देवदारौ विषये महान्यत्नः । महता यत्नेन रक्ष्यत इत्यर्थः । इदं शब्दोक्तमर्थं दर्शयति–स्थातुमिति । रक्ष्यं वस्तु विनाश्य विनाशं गमयित्वा स्वयमक्षतेनाव्रणेन । नियुक्तेनेति शेषः । नियोक्तुः स्वामिनोऽग्रे स्थातुं शक्यं न हि । सर्वथा चैतदप्रतिहार्यमित्याह–

(५७.) किमपि किंवाहं तवाहिंस्योऽवध्यो (अमारणीयः) मतश्चेत्तर्हि मे यशः एव शरीरं तस्मिन्दयालुः कारुणिको भव । " स्याद्दयालुः कारुणिकः " इत्यमरः । ननु मुख्यमुपेक्ष्यामुख्यशरीरे कोऽभिनिवेशः । अत आह–एकान्तेति । मद्विधानां मादृशानां विवेकिनामेकान्तविध्वंसिष्ववश्यविनाशिषु भौतिकेषु पृथिव्यादिभूतविकारेषु (पञ्चभूतसंबंधिषु) पिण्डेषु शरीरेष्वनास्था खल्वनपेक्षैव । " आस्थात्वालम्बनास्थानयत्नापेक्षासु कथ्यते " इतिविश्वः [अतो देहभक्षणेन यशो रक्षणीयं ममेति तात्पर्य–सु०] । सौहार्दादहमनुसरणीयोऽस्मीत्याह–

(५८.) संबन्धं सख्यम् । आभाषणमालापः पूर्वं कारणं यस्य तमाहुः (विद्वांसः इति शेषः) । " स्यादाभाषणमालापः " इत्यमरः । स तादृक्संबन्धो वनान्ते (अत्रारण्यमध्ये) संगतयोः (मिलितयोः) नावावयोर्वृत्तो जातः । तत्ततो हेतोर्हे भूतनाथानुग शिवानुचर ।

(56.) " Since there is a great effort of yours towards (protecting) the pine tree, you too, dependent as you are, know this (well), that it is not possible to stand unwounded before the employer after having allowed the charge to be destroyed. "

(57.) " Or, if you think that I should be uninjured, be kind (then) to my body consisting in my glory. Truly in persons like myself there is little regard for material lumps (the body) framed out of elements and destined to decay. "

संबन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते।
तद्भूतनाथानुग नार्हसि त्वं संबन्धिनो मे प्रणयं विहन्तुम् ॥ ५८ ॥
तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः।
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य ॥५९ ॥
तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम्।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥ ६० ॥

एतेन तस्य महत्त्वं सूचयति । अत एव संबन्धिनो मित्रस्य मे प्रणयं याच्ञाम् [स्नेहं–चा०]। " प्रणयास्त्वमी । विश्रम्भयाच्ञाप्रेमाणः " इत्यमरः । विहन्तुं (नाशयितुं) नार्हसि (न योग्यो भवसि) ।

(५९.) तथेति (अंगीकृत्य) गाम् [धेनुं–चा० वाणीं–सु०] उक्तवते हरये सिंहाय । "कपौ सिंहे सुवर्णे च वर्णे विष्णौ हरिं विदुः" इति शाश्वतः । सद्यस्तत्क्षणे प्रतिष्टम्भात्प्रतिबन्धाद्विमुक्तो बाहुर्यस्य स दिलीपः । न्यस्तशस्त्रस्त्यक्तायुधः सन् । स्वदेहम् (निजशरीरं)। आमिषस्य मांसस्य । " पललं क्रव्यमामिषम्" इत्यमरः । पिण्डं कवलमिव । उपानयत्समर्पितवान् (उपाढौकयत्) । एतेन निर्ममत्वमुक्तम् ।

(६०.) तस्मिन्क्षणे (तत्रपतनावसरे) उग्रं (उत्कटं) सिंहनिपातमुत्पश्यतः उत्प्रेक्षमाणस्य तर्कयतोऽवाङ्मुखस्याधोमुखस्य । " स्यादवाङप्यधोमुखः " इत्यमरः । प्रजानां पालयितू राज्ञ उपर्युपरिष्टात् । "उपर्युपरिष्टात्" इति निपातः । विद्याधराणां देवयोनिविशेषाणां हस्तैर्मुक्ता पुष्पवृष्टिः (कुसुमवृष्टिः) पपात [उग्रे सिंहनिपाते शंकितस्योपरि कोमला पुष्पवृष्टिः पपातेति वैचित्र्यं–चा०] ।

(६१.) राजा । अमृतमिवाचरतीत्यमृतायमानं (सुधातुल्यं) तत् । "उपमानादाचारे" इति-क्यच् । ततः शानच् । उत्थितमुत्पन्नं हे वत्स (पुत्र) उत्तिष्ठेति वचो निशम्य श्रुत्वा । उत्थितः सन् । अस्तेः शतृप्रत्ययः । अग्रतोऽग्रे प्रस्रवः क्षीरस्रावोऽस्ति यस्याः सा तां प्रस्रविणीं

(58.) " They call relation as proceeding from conversation; and that is (now) formed between us two having met in the midst of the forest; therefore, O follower of the lord of living beings, you don't deserve to refuse (to grant) this request of me, your relation. "

(59.) Dilípa, who threw down his weapon, with his arm instantly released from restraint, offered his body like a lump of flesh to the lion who had said the words ' be it so. '

(60.) At that moment, a shower of flowers discharged by the hands of Vidyádharas fell over the protector of his subjects, who was looking downward and expecting a fierce spring (leap) of the lion.

उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥ ६१ ॥
तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः॥ ६२॥
भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ॥ ६३ ॥

गां स्वां जननीं (मातरं) इव ददर्श [प्रस्रवस्तु स्नेहवशाज्जनन्याः अपि स्यात्–चा०] । सिंहं न ददर्श ।

(६२.) विस्मितमाश्चर्यं गतम् [विस्मयस्तु केसरिणोऽदर्शनात्–चा०] । कर्तरि क्तः । तं दिलीपं धेनुरुवाच । किमित्यत्राह–हे साधो मया मायां (कपटं) उद्भाव्य कल्पयित्वा (उत्पाद्य) परीक्षितोऽसि । ऋषिप्रभावात् (सामर्थ्यात्) मयि अन्तको यमोऽपि प्रहर्तुं न प्रभुर्न समर्थः । अन्ये हिंस्रा घातुकाः [सिंहादयः–चा०] । " शरारुर्घातुको हिंस्रः " इत्यमरः । "नमिकम्पि–" इत्यादिना रप्रत्ययः । किमुत सुष्ठु । न प्रभव इति योज्यम् [सम्मुखं विलोकयितुमपि न समर्थाः किमुत प्रहर्तुं पुरे आसतामिति भावः–सु०] । " बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरः " इत्यमरः ।

(६३.) हे पुत्र गुरौ भक्त्या । मय्यनुकम्पया (दयया) च । ते तुभ्यं प्रीतास्मि (तुष्टास्मि) । "क्रियाग्रहणमपि कर्तव्यम्" इति चतुर्थी । वरं [पुत्ररूपं वरं वा–चा०] देवेभ्यो वरणीयमर्थम् । "देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक्प्रिये" इत्यमरः । वृणीष्व स्वीकुरु [गोः पयोदाने सामर्थ्यं न तु वरदाने इत्याह–चा०] । तथाहि । मां केवलानां पयसां (दुग्धानां) प्रसूतिं कारणं नावेहि न विद्धि । किंतु प्रसन्नां (संतुष्टां) माम् । कामान्दोग्धीति कामदुघा । तामवेहि । " दुहः कब्घश्च " इति कप्प्रत्ययः ।

(६४.) ततः (अनंतरं) मानितार्थी (मानिताः पूजिताः अर्थिनो याचकाः येन सः) । स्वहस्तार्जितो वीर इति शब्दो येन सः (स्वपराक्रमाल्लब्धः वीर इति शब्दो येन अर्थादेक-

---

(61.) Having heard the nectar-like word issued, " O child get up ! " the king, having got up, saw before him the cow discharging milk like his own mother, and not the lion (but the lion was no more to be seen) !

(62.) To him, thus astonished, the cow said, " O good man, a delusive phantom having been set up, thou hast been (merely) tried by me ; through the power of the sage even the god of death is not able to strike a blow at me, what then of other carnivorous animals " (i. e. much less other hurtful creatures).

(63.) By your devotion to your preceptor and your compassion for me, I am pleased with you, my son, choose a boon ; know me, when pleased, to be not only the producer of milk but one who fulfils (lit. milks) desires.

ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ।
वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे ॥ ६४ ॥
संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥ ६५ ॥
वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः ।
औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ॥ ६६ ॥
इत्थं क्षितीशेन वशिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव ।
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ॥ ६७ ॥

वीरः) एतेनास्य दातृत्वं दैन्यराहित्यं चोक्तम् । स राजा हस्तौ समानीय संधाय । अञ्जलिं बद्ध्वेत्यर्थः । वंशस्य कर्तारं प्रवर्तयितारम् । अत एव रघुकुलमिति प्रसिद्धिः । अनन्तकीर्तिं स्थिरयशसं तनयं सुदक्षिणायां ययाचे ।

(६५.) सा पयस्विनी गौः । संतानं (संततिं) कामयते (अभिलषति) इति संतानकामः । "कर्मण्यण्" । तस्मै राज्ञे तथेति । काम्यत इति कामो वरः । कमर्थे घञ्प्रत्ययः । तं प्रतिश्रुत्य प्रतिज्ञाय हे पुत्र मदीयं पयः (दुग्धं) पत्त्रपुटे पत्त्रनिर्मिते पात्रे दुग्ध्वोपभुङ्क्ष्व पिबेति तमादिदेशाज्ञापितवती ।

(६६.) हे मातः वत्सस्य वत्सपीतस्य शेषम् (उद्गरितं दुग्धं) वत्सपीतावशिष्टमित्यर्थः । होम एवार्थः । तस्य विधिरनुष्ठानम् । तस्य च शेषम् । होमावशिष्टमित्यर्थः । तव । ऊधसि भवमौधस्यं क्षीरम् (दुग्धं) । " शरीरावयवाच्च " इति यत्प्रत्ययः । रक्षिताया उर्व्याः षष्ठांशं षष्ठभागमिव [राजा हि फलमाप्नोति रक्षितायाः क्षितेरपीति मनुः—चा०] ऋषेरनुज्ञाम् (आदेशं) अधिगम्य (प्राप्य) । उपभोक्तुं (आहारयितुं) इच्छामि (वाञ्छामि) ।

(६७.) इत्थं (अमुना प्रकारेण) क्षितीशेन (राज्ञा) विज्ञापिता वशिष्ठस्य धेनुः

(64.) Then he, who respected the mendicants (guests) and who by his own hands (by dint of his arms) had won the name of hero, having folded his hands, begged (of her) a son by Sudakshiná, the propagator of his race and of endless glory.

(65.) " Even so" with these words she, who yielded much milk, having granted the desire of the king, who longed for progeny, commanded him thus, "O my son, having extracted my milk in a leaf-cup drink it up."

(66.) " O mother, (said he) having obtained permission of the preceptor I wish to drink (lit. enjoy) the remaining milk of your udder after the young has had his drink and after the sacrificial rite has done with it (milk), like the sixth part of (the produce of) the earth protected by me."

(67.) Thus implored by the lord of the earth Vas'ishtha's cow became still more pleased and returned without lassitude (joyously) to the hermitage followed by him from the cave of the mountain Himavat.

तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव॥ ६८॥
स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम्।
पपौ वशिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः॥ ६९॥
प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य।
तौ दंपती स्वां प्रति राजधानीं प्रस्थापयामास वशी वशिष्ठः॥ ७०॥

प्रीततरा। पूर्वं शुश्रूषया प्रीता। संप्रत्यनया विज्ञापनया प्रीततरातिसंतुष्टा बभूव। तदन्विता तेन दिलीपेनान्विता (युक्ता) हैमवताद्धिमवत्संबन्धिनः कुक्षेर्गुहायाः सकाशादश्रमेणानायासेनाश्रमं प्रत्यायययावागता च।

(६८.) प्रसन्नेन्दुरिव मुखं यस्य स नृपाणां गुरुर्दिलीपः प्रहर्षचिह्नैर्मुखरागादिभिरनुमितमूहितं (ज्ञातं) तस्या धेनोः प्रसादमनुग्रहं प्रहर्षचिह्नैरेव ज्ञातत्वात्पुनरुक्तयेव। वाचा (वाण्या गुरवे निवेद्य विज्ञाप्य पश्चात्प्रियायै (सुदक्षिणायै) शशंस (कथयामास)। कथितस्यैव कथनं पुनरुक्तिः। न चेह तदस्ति। किंतु चिह्नैः कथितप्रायत्वात्पुनरुक्तयेव स्थितयेत्युत्प्रेक्षा

(६९.) अनिन्दितात्मागर्हितस्वभावः। सत्सु वत्सलः प्रेमवान्सद्वत्सलः। "वत्सांसाभ्यां कामबले" इति लच्प्रत्ययः। वशिष्ठेन कृताभ्यनुज्ञः कृतानुमतिः स राजा वत्सस्य हुतस्य चावशेषं पीतहुतावशिष्टं नन्दिन्याः स्तन्यं क्षीरम् (पयः)। शुभ्रं मूर्तं परिच्छिन्नं (देहबद्धं) यश इव। अतितृष्णः सन्पपौ।

(७०.) वशी (जितेन्द्रियः) वशिष्ठः प्रातः (प्रभाते। इति यात्राकालयोग्यात्)। यथोक्तस्य पूर्वोक्तस्य व्रतस्य गोसेवारूपस्याङ्गभूता या पारणा तस्य अन्ते (अवसाने) प्रास्थानिकं प्रस्थानकाले भवम्। तत्कालोचितमित्यर्थः। "कालाट्ठञ्" इति ठञ्प्रत्ययः। "यथाकथंचिद्गुणवृत्त्यापि काले वर्तमानात्तत्तत्प्रत्यय इष्यते" इति वृत्तिकारः। ईयते प्राप्यतेऽनेनेत्ययनं स्वस्त्ययनं शुभावहमाशीर्वादं (मंगलाशिषं) प्रयुज्य। तौ दंपती स्वां राजधानीं पुरीं प्रति प्रस्थापयामास (प्रेषयामास)।

(68.) The king of kings with his face like the bright moon, having acquainted the preceptor with her (cow's) favour, which could be inferred by his signs of delight, in words which were therefore a repitition (of the same communication) then told (the same) to his beloved.

(69.) He who was of an unblemished soul and kind to the virtuous, being permitted by Vas'ishtha, drank with great eagerness, the milk of Nandinî, that remained after the calf's sucking and the offerings of the sacrifice, as if it were, (his) white (pure) renown in the material form.

(70.) In the morning after the repast at the conclusion of the aforesaid vow, having conferred auspicious blessings proper at the time of departure, Vas'ishtha, who had restrained his self, sent that couple to their own capital.

प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुररुंधती च ।
धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः ॥ ७१ ॥
श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः ।
ययावनुद्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ॥ ७२ ॥
तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गम् ।
नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम् ॥ ७३ ॥

(७१.) नृपो हुतं तर्पितम् (प्रणीतं वा) । हुतमश्नातीति हुताशोऽग्निः । "कर्मण्यण्" । तं भर्तुर्मुनेरनन्तरम् । प्रदक्षिणानन्तरमित्यर्थः । अरुंधतीं च सवत्सां (वत्सयुक्तां) धेनुं च प्रदक्षिणीकृत्य । प्रगतो दक्षिणं प्रदक्षिणम् । "तिष्ठद्गुप्रभृतीनि च" इत्यव्ययीभावः । ततश्च्विः । अप्रदक्षिणं प्रदक्षिणं संपद्यमानं कृत्वा प्रदक्षिणीकृत्य । सद्भिर्मङ्गलैः [सतां मङ्गलैः प्रीतवह्निगोब्राह्मणप्रदक्षिणीकरणैः—सु०] प्रदक्षिणादिभिः मङ्गलाचारैः [मंगलद्रव्यैर्वा—चा०] उदग्रतरप्रभावः [उदग्रतरः महीयान्प्रभावः पौरुषं यस्येति—चा०] सन् । प्रतस्थे (चचाल) ।

(७२.) धर्मपत्नीसहितः (सुदक्षिणया युक्तः) सहिष्णुर्व्रतादिदुःखसहनशीलः स नृपः श्रोत्राभिरामध्वनिना कर्णाह्लादकरस्वनेनानुद्घातः पाषाणादिप्रतिघातरहितः । अत एव सुखयतीति सुखः । तेन रथेन (स्यन्दनेन) । स्वेन पूर्णेन सफलेन मनोरथेनेव । मार्गमध्वानं ययौ । मनोरथपक्षे ध्वनिः श्रुतिः । अनुद्घातः प्रतिबन्धनिवृत्तिः ।

(७३.) अदर्शनेन (बहुकालावलोकनाभावेन) प्रवासनिमित्तेनाहितौत्सुक्यं जनितदर्शनोत्कण्ठम् । प्रजार्थेन संतानार्थेन व्रतेन नियमेन कर्शितं कृशीकृतमङ्गं यस्य तम् । नवोदयं नवाभ्युदयं प्रजास्तृप्तिम् (संतोषं) अनाप्नुवद्भिरतिगृध्नुभिर्नेत्रैः । ओषधीनां नाथं सोममिव । तं राजानं पपुः [सादरमवलोकनं पानं—चा०] अत्यास्थया ददृशुरित्यर्थः । चन्द्रपक्षे । अदर्शनं कलाक्षयनिमित्तम् । प्रजार्थं लोकहितार्थम् । व्रतं देवताभ्यः कलादाननियमः । "तं च सोमं पपुर्देवाः पर्यायेणानुपूर्वशः" इति व्यासः । उदय आविर्भावः । अन्यत्समानम् ।

(71.) Having gone round the satiated holy fire, the sage, afterwards Arundhatî and then the sacred cow with her calf, (of course, keeping them on his right side) the king whose power was (now) made more formidable by the auspicious rites, set out (from the hermitage).

(72.) By the car whose sound was agreeable to the ear and which afforded ease on account of its being free from joltings, he patient as he was took the the way in company with his lawful wife (queen) as if he had been conveyed [not by a heavy car of wood, but] by his desire itself which had now been fulfilled.

(73.) Him, who, by his absence, had made the people eager (to have his sight), and whose body had become emaciated by his vow for progeny, his subjects drank up with their eyes not getting satiety, as they do the newly rising lord of herbs (the moon).

पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः।
भुजे भुजंगेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ॥ ७४ ॥
अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥ ७५ ॥

(७४.) पुरः पुरीरसुराणां दारयतीति पुरंदरः शक्रः। "पूःसर्वयोर्दारिसहोः" इति खच्प्रत्ययः। "वाचंयमपुरंदरौ च" इति मुमागमो निपातितः। तस्य श्रीरिव श्रीर्यस्य स (शक्रतुल्यवैभवः) नृपः पौरैः (पुरनिवासिभिर्लोकैः) अभिनन्द्यमानः (स्तूयमानः)। उत्पताकमुच्छ्रितध्वजम्। "पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम्" इत्यमरः। पुरं प्रविश्य भुजंगेन्द्रेण (शेषेण) समानसारे तुल्यबले। "सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु" इत्यमरः। भुजे (बाहौ) भूयः (पुनरपि) भूमेर्धुरम् (भारं) आससञ्ज स्थापितवान्। [शेषेण हि ध्रियते इति साम्यमुचितं—चा०]।

(७५.) अथ द्यौः सुरवर्त्म। "द्योः स्वर्गसुरवर्त्मनोः" इति विश्वः। अत्रेर्महर्षेर्नयनयोः समुत्थमुत्पन्नं नयनसमुत्थम्। "आतश्चोपसर्गे" इति कप्रत्ययः। ज्योतिरिव। चन्द्रमिवेत्यर्थः। "ऋक्षेशः स्यादत्रिनेत्रप्रसूतः" इति हलायुधः। चन्द्रस्यात्रिनेत्रोद्भूतत्वमुक्तं हरिवंशे—"नेत्राभ्यां वारि सुस्राव दशधा द्योतयद्दिशः। तद्गर्भविधिना हृष्टा दिशो देव्यो दधुस्तदा। समेत्य धारयामासुर्न च ताः समशक्नुवन्। स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः। पपात भासयँल्लोकाञ्छीतांशुः सर्वभावनः" इति। सुरसरिद्गङ्गा वह्निना निष्ठ्यूतं विक्षिप्तम्। "च्छ्वोः शूडनुनासिके च" इत्यनेन निपूर्वात्ष्ठीवतेर्वकारस्य ऊठ्। "नुन्ननुत्तास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः" इत्यमरः। ऐशं तेजः स्कन्दमिव। अत्र रामायणम्—"ते गत्वा पर्वतं राम कैलासं धातुमण्डितम्। अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः। देवकार्यमिदं देव समाधत्स्व हुताशन। शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज। देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः। गर्भं धारय वै देवि देवतानामिदं प्रियम्। इत्येतद्वचनं श्रुत्वा दिव्यं रूपम-

---

(74.) The king enjoying the splendour of the town-destroying Indra, having entered his city in which were raised the flags, being congratulated by the citizens once more placed the yoke of the earth on his arms, equal in strength to the lord of cobras.

(75.) As the heavens, the luminary born from Atris' eyes; as the river of the Gods (the Gangà), the lustre of S'iva vomitted (dropped in) by Agni; so the queen bore the fœtus made up by the heavy essences of the Lokapálas (or endowed with the great splendour of the Lokapàlas) for the propagation of the King's race.

। तृतीयः सर्गः ।

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखम् ।
निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौर्हृदलक्षणं दधौ ॥ १ ॥

उपाधिगम्योऽप्यनुपाधिगम्यः समावलोक्योऽप्यसमावलोक्यः ।
भवोऽपि योऽभूदभवः शिवोऽयं जगत्यपायादपि नः स पायात् ॥

धारयत् । स तस्या महिमां दृष्ट्वा समन्तादवकीर्य च । समन्ततस्तु तां देवीमभ्यसिञ्चत पावकः । सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन" इति । राज्ञी सुदक्षिणा नरपतेर्दिलीपस्य कुलभूत्यै संततिलक्षणायै (वैभवाय) गुरुभिर्महद्भिर्लोकपालानामनुभावैस्तेजोभिः (मात्राभिरंशैर्वा) अभिनिविष्टमनुप्रविष्टं गर्भमाधत्त दधावित्यर्थः [इन्द्रात्प्रभुत्वं तपनात्प्रतापं क्रोधं यमाद्वैश्रवणाच्च वित्तं । आह्लादकत्वं च निशाधिनाथादादाय राज्ञः क्रियते शरीरम्–हे०] । अत्र मनुः—"अष्टानां लोकपालानां वपुर्धारयते नृप" इति । अत्र 'आधत्त' इत्यनेन स्त्रीकर्तृकधारणमात्रमुच्यते । तथा मन्त्रे च दृश्यते—"यथेयं पृथिवी मह्युत्ताना गर्भमादधे । एवं त्वं गर्भमाधेहि दशमे मासि सूतवे" इत्याश्वलायनानां सीमन्तमन्त्रे स्त्रीव्यापारधारण आधानशब्दप्रयोगदर्शनादिति । मालिनीवृत्तमेतत् । तदुक्तम्—"ननमयययुतेयं मालिनी भोगिलोकैः" इतिलक्षणात् ।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये नन्दिनीवरप्रदानो नाम द्वितीयः सर्गः।

(१.) राज्ञी गर्भमाधत्तेत्युक्तम् । संप्रति गर्भलक्षणानि वर्णयितुं प्रस्तौति—अथ गर्भधारणानन्तरं सुदक्षिणा । उपस्थितोदयं [उपस्थितः प्राप्तः उदयः पुत्रोत्पत्तिलक्षणो यस्य यस्माद्वा–चा०] प्राप्तकालं भर्तुर्दिलीपस्येप्सितं मनोरथम् [कान्ताभिमतं–व०] । भावे क्तः । पुनः सखीजनस्योद्वीक्षणानां दृष्टीनां कौमुदीमुखं चन्द्रिकाप्रादुर्भावम् । यद्वा कौमुदी नाम दीपोत्सवतिथिः [दीपावल्युत्सवतुल्यमिति कश्चित्–चा०] । तदुक्तं भविष्योत्तरे–"कौ मोदन्ते जना यस्यां तेनासौ कौमुदी मता" इति । तस्या मुखं प्रारम्भम् । इक्ष्वाकुकुलस्य संततेरविच्छेदस्य निदानं मूलकारणं "निदानं त्वादिकारणम्" इत्यमरः । एवंविधं दौर्हृदलक्षणं गर्भचिह्नं [मुखे पाण्डुरतादि–चा०] वक्ष्यमाणं दधौ (धारयामास) । स्वहृदयेन गर्भहृदयेन

---

(1) Then Sudakshiná betrayed the signs of pregnancy (that were beginning to manifest themselves), that were the desire of her husband, with its fulfilment approaching, that were the prime cause of the continuation of the family of the

शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना ।
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ॥ २ ॥
तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ ।
करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ॥ ३ ॥

द्विहृदया गर्भिणी । यथाह वाग्भटः–" मातृजन्यस्य हृदयं मातुश्च हृदयं च तत् । संबद्धं न गर्भिण्याः श्रेष्ठं श्रद्धाभिमाननम् " इति । तत्संबन्धित्वाद्गर्भो दौर्हृदमित्युच्यते । सा च योगाद्दौर्हृदिनीति । तदुक्तं संग्रहे–" द्विहृदयां नारीं दौर्हृदिनीमाचक्षते " इति । अत्र दौहृदलक्षणस्येप्सितत्वेन कौमुदीमुखत्वेन च निरूपणाद्रूपकालंकारः । अस्मिन्सर्गे वंशस्थं वृत्तम्–" जतौ तु वंशस्थमुदीरितं जरौ " इति लक्षणात् । संप्रति क्षामताख्यं गर्भलक्षणं वर्णयति–

(२.) शरीरस्य सादात्कार्श्यादसमग्रभूषणा परिमिताभरणा लोध्रपुष्पेणेव पाण्डुना मुखेनोपलक्षिता सा सुदक्षिणा । विचेयाः (विरलाः) मृग्यास्तारका (नक्षत्राणि) यस्यां सा तारका । विरलनक्षत्रेत्यर्थः । तनुप्रकाशेनाल्पकान्तिना शशिनोपलक्षितेषदसमाप्तप्रभाता प्रभातकल्पा । प्रभातादीषदूनेत्यर्थः । " तसिलादिष्वा कृत्वसुचः " इति प्रभातशब्दस्य पुंवद्भावः । शर्वरी रात्रिरिव । अलक्ष्यत । शरीरसादादिगर्भलक्षणमाह वाग्भटः–" क्षामता गरिमा कुक्षेर्मूर्छा छर्दिररोचकम् । जृम्भा प्रसेकः सदनं रोमराज्याः प्रकाशनम् " इति ।

(३.) क्षितीश्वरः (दिलीपः) रहसि (एकान्ते) मृत्सुरभि मृदा (मृत्तिकया) सुगन्धि तस्या आननं तदाननं सुदक्षिणामुखमुपाघ्राय (सिंघित्वा) तृप्तिं (संतोषं) नाययौ । कः कमिव । शुचिव्यपाये ग्रीष्मावसाने । " शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते । ग्रीष्मे हुतवहेऽपि यादुपधाशुद्धमन्त्रिणि " इति विश्वः । पयोमुचां मेघानां पृषतैर्बिन्दुभिः । " पृषन्ति बिन्दुपृषताः" इत्यमरः । सिक्तमुक्षितं वनराज्याः (अरण्यपंक्त्याः) पल्वलम् (अल्पसरः) उपाघ्राय (सिंघित्वा) करी (करः शुण्डादण्डोऽस्यास्तीति करी) गज इव । अत्र करिवनराजिपल्वलानां कान्तकामिनीवदनसमाधिरनुसंधेयः [सरसि जलपाते सौरभ्यमिति पल्वलोक्तिः–चा०] ग-

---

Ikshvâkus, and which were the setting in of the moonlight to the sight (eyes) of her female friends (or which were the beginnings of the Kaumudi-festivals to the sight of her female friends).

(2.) Wearing a few (limited) ornaments on account of the leannes of her body and with face pale as the Lodhra-flower, Sudakshinâ appeared like the night bordering on morn (just approaching to morning) in which the stars require a search (they are not easily seen), and when the moon retains slender light.

(3.) The lord of the earth, when alone, was not (in the least) contented (entertained an insatiable desire to smell her mouth over and over again), while smelling her mouth fragrant with earth, like an elephant smelling a pond in forest-rows (made fragrant) being sprinkled with drops (water) from the clouds (lit. dischargers of water) at the close (end) of the hot season (summer).

। तृतीयः सर्गः ।

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखम् ।
निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौहृदलक्षणं दधौ ॥ १ ॥

उपाधिगम्योऽप्यनुपाधिगम्यः समावलोक्योऽप्यसमावलोक्यः ।
भवोऽपि योऽभूदभवः शिवोऽयं जगत्यपायादपि नः स पायात् ॥

धारयत् । स तस्या महिमां दृष्ट्वा समन्तादवकीर्य च । समन्ततस्तु तां देवीमभ्यसिञ्चत पावकः । सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन " इति । राज्ञी सुदक्षिणा नरपतेर्दिलीपस्य कुलभूत्यै संततिलक्षणायै (वैभवाय) गुरुभिर्महद्भिर्लोकपालानामनुभावैस्तेजोभिः (मात्राभिरंशैर्वा) अभिनिविष्टमनुप्रविष्टं गर्भमाधत्त दधावित्यर्थः [इन्द्रात्प्रभुत्वं तपनात्प्रतापं क्रोधं यमाद्वैश्रवणाच्च वित्तं । आह्लादकत्वं च निशाधिनाथादादाय राज्ञः क्रियते शरीरम्–हे०] । अत्र मनुः—" अष्टानां लोकपालानां वपुर्धारयते नृप " इति । अत्र 'आधत्त ' इत्यनेन स्त्रीकर्तृकधारणमात्रमुच्यते । तथा मन्त्रे च दृश्यते—" यथेयं पृथिवी मह्युत्ताना गर्भमादधे । एवं त्वं गर्भमाधेहि दशमे मासि सूतवे " इत्याश्वलायनानां सीमन्तमन्त्रे स्त्रीव्यापारधारण आधानशब्दप्रयोगदर्शनादिति । मालिनीवृत्तमेतत् । तदुक्तम्—" ननमयययुतेयं मालिनी भोगिलोकैः " इतिलक्षणात् ।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये नन्दिनीवरप्रदानो नाम द्वितीयः सर्गः।

(१.) राज्ञी गर्भमाधत्तेत्युक्तम् । संप्रति गर्भलक्षणानि वर्णयितुं प्रस्तौति— अथ गर्भधारणानन्तरं सुदक्षिणा । उपस्थितोदयं [उपस्थितः प्राप्तः उदयः पुत्रोत्पत्तिलक्षणो यस्य यस्माद्वा–चा०] प्राप्तकालं भर्तुर्दिलीपस्येप्सितं मनोरथम् [कान्ताभिमतं–व०] । भावे क्तः । पुनः सखीजनस्योद्वीक्षणानां दृष्टीनां कौमुदीमुखं चन्द्रिकाप्रादुर्भावम् । यद्वा कौमुदी नाम दीपोत्सवतिथिः [दीपावल्युत्सवतुल्यमिति कश्चित्–चा०] । तदुक्तं भविष्योत्तरे–"कौ मोदन्ते जना यस्यां तेनासौ कौमुदी मता" इति । तस्या मुखं प्रारम्भम् । इक्ष्वाकुकुलस्य संततेरविच्छेदस्य निदानं मूलकारणं "निदानं त्वादिकारणम्" इत्यमरः । एवंविधं दौहृदलक्षणं गर्भचिह्नं [मुखे पाण्डुरतादि–चा०] वक्ष्यमाणं दधौ (धारयामास) । स्वहृदयेन गर्भहृदयेन

---

(1) Then Sudakshiná betrayed the signs of pregnancy (that were beginning to manifest themselves), that were the desire of her husband, with its fulfilment approaching, that were the prime cause of the continuation of the family of the

शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना ।
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ॥ २ ॥
तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ ।
करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ॥ ३ ॥

च द्विहृदया गर्भिणी । यथाह वाग्भटः-" मातृजन्यस्य हृदयं मातुश्च हृदयं च तत् । संबद्धं तेन गर्भिण्याः श्रेष्ठं श्रद्धाभिमाननम् " इति । तत्संबन्धित्वाद्गर्भो दौर्हृदमित्युच्यते । सा च तद्योगाद्दौर्हृदिनीति । तदुक्तं संग्रहे-" द्विहृदयां नारीं दौर्हृदिनीमाचक्षते " इति । अत्र दौर्हृदलक्षणस्येप्सितत्वेन कौमुदीमुखत्वेन च निरूपणाद्रूपकालंकारः । अस्मिन्सर्गे वंशस्थं वृत्तम्-" जतौ तु वंशस्थमुदीरितं जरौ " इति लक्षणात् । संप्रति क्षामताख्यं गर्भलक्षणं वर्णयति-

(२.) शरीरस्य सादात्कार्श्यादसमग्रभूषणा परिमिताभरणा लोध्रपुष्पेणेव पाण्डुना मुखेनोपलक्षिता सा सुदक्षिणा । विचेयाः (विरलाः) मृग्यास्तारका (नक्षत्राणि) यस्यां सा तथोक्ता । विरलनक्षत्रेत्यर्थः । तनुप्रकाशेनाल्पकान्तिना शशिनोपलक्षितेषदसमाप्तप्रभाता प्रभातकल्पा । प्रभातादीषदूनेत्यर्थः । " तसिलादिष्वा कृत्वसुचः " इति प्रभातशब्दस्य पुंवद्भावः । शर्वरी रात्रिरिव । अलक्ष्यत । शरीरसादादिगर्भलक्षणमाह वाग्भटः-" क्षामता गरिमा कुक्षेर्मूर्च्छा छर्दिररोचकम् । जृम्भा प्रसेकः सदनं रोमराज्याः प्रकाशनम् " इति ।

(३.) क्षितीश्वरः (दिलीपः) रहसि (एकान्ते) मृत्सुरभि मृदा (मृत्तिकया) सुगन्धि तस्या आननं तदाननं सुदक्षिणामुखमुपाघ्राय (सिंघित्वा) तृप्तिं (संतोषं) नाययौ । कः कमिव । शुचिव्यपाये ग्रीष्मावसाने । " शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते । ग्रीष्मे हुतवहेऽपि स्यादुपधाशुद्धमन्त्रिणि " इति विश्वः । पयोमुचां मेघानां पृषतैर्बिन्दुभिः । " पृषन्ति बिन्दुपृषताः" इत्यमरः । सिक्तमुक्षितं वनराज्याः (अरण्यपंक्त्याः) पल्वलम् (अल्पसरः) उपाघ्राय (सिंघित्वा) करी (करः शुण्डादण्डोऽस्यास्तीति करी) गज इव । अत्र करिवनराजिपल्वलानां कान्तकामिनीवदनसमाधिरनुसंधेयः [सरसि जलपाते सौरभ्यमिति पल्वलोक्तिः-चा०] ग-

---

Ikshvâkus, and which were the setting in of the moonlight to the sight (eyes) of her female friends (or which were the beginnings of the Kaumudi-festivals to the sight of her female friends).

(2.) Wearing a few (limited) ornaments on account of the leannes of her body and with face pale as the Lodhra-flower, Sudakshinâ appeared like the night bordering on morn (just approaching to morning) in which the stars require a search (they are not easily seen), and when the moon retains slender light.

(3.) The lord of the earth, when alone, was not (in the least) contented (entertained an insatiable desire to smell her mouth over and over again), while smelling her mouth fragrant with earth, like an elephant smelling a pond in forest-rows (made fragrant) being sprinkled with drops (water) from the clouds (lit. dischargers of water) at the close (end) of the hot season (summer).

दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि तत्सुतः ।
अतोऽभिलाष प्रथमं तथाविधे मनो बबन्धान्यरसान्विलङ्घ्य सा ॥४॥
न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी ।
इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ॥ ५ ॥

र्भिणीनां मृद्भक्षणं लोकप्रसिद्धमेव । एतेन दोहदाख्यं गर्भलक्षणमुच्यते । दोहदलक्षणे मृद्भक्षणे हेत्वन्तरमुत्प्रेक्षते—

(४.) हि यस्माद्दिगन्तविश्रान्तरथः (दिगन्ते दिशां प्रान्ते विश्रांतः रथः स्यन्दनो यस्य सः) चक्रवर्ती तस्याः सुतस्तत्सुतः । मरुत्वानिन्द्रः । " इन्द्रो मरुत्वान्मघवा " इत्यमरः । दिवं स्वर्गमिव । भुवं (महीं) भोक्ष्यते । " भुजोऽनवने " इत्यात्मनेपदम् । अतः प्रथमं (पूर्वं) सा सुदक्षिणा तथाविधे भूविकारे मृद्रूपे । अभिलष्यत इत्यभिलाषो भोग्यवस्तु । तस्मिन् । कर्मणि घञ्प्रत्यय. । रस्यन्ते स्वाद्यन्त इति रसा भोग्यार्थाः । अन्ये च ते रसाश्च तान् (मधुरतिक्ताम्लान्) विलङ्घ्य विहाय मनो बबन्ध (भावं चक्रे) विदधावित्यर्थः । दोहदहेतुकस्य मृद्भक्षणस्य पुत्रभूभोगसूचनार्थत्वमुत्प्रेक्षते ।

(५.) मगधस्य राज्ञोऽपत्यं स्त्री मागधी सुदक्षिणा । " द्व्यञ्मगधकलिङ्गसूरमसादण् " इत्यण्प्रत्ययः । ह्रिया (लज्जया) किंचित्किमपीप्सितमिष्टं मे मह्यं न शंसति नाचष्टे । केषु वस्तुषु स्पृहावती (साभिलाषा) इत्यनुवेलमनुक्षणमादृत आदृतवान् । कर्तरि क्तः । " आदृतौ सादरार्चितौ " इत्यमरः । प्रियायाः सखीः सहचरीरुत्तरकोशलेश्वरो दिलीपः पृच्छति स्म पप्रच्छ । " लट् स्मे " इत्यनेन भूतार्थे लट् । सखीनां विश्रम्भभूमित्वादिति भावः ।

(६.) दोहदं गर्भिणीमनोरथः । " दोहदं दौहृदं श्रद्धा लालसं च समं स्मृतम् " इति हलायुधः । सा सुदक्षिणा दोहदेन गर्भिणीमनोरथेन दुःखशीलतां दुःखस्वभावतामुपेत्य प्राप्य यद्वस्तु वत्र आचकाङ्क्ष तदाहृतमानीतम् । भर्त्रेति शेषः । अपश्यदेव । अलभतेत्यर्थः । कुतः हि यस्मादस्य भूपतेस्त्रिदिवेऽपि स्वर्गेऽपीष्टं वस्त्वनासाद्यमनवाप्यं नाभूत् । किं याच्ञया ।

(4.) As if with an idea (desire) that her son should enjoy (rule over) the earth (or as if with a presentiment that her son will enjoy the earth) as Indra does the heavens, his car resting on (transcending or passing beyond or over) the extremities of (all) quarters, she setting aside (all) other objects of taste first set her mind on that sort of desire (earth).

(5.) " The daughter of the king of the Magadhas does not out of bashfulness acquaint me in the least with her desired objects", so saying the lord of the Uttara (North) Kos'alas used, every now and then, politely to enquire of her favourite female friends (dear attendants or companions) as to what were those objects of her desire.

उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतम् ।
न हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ॥ ६ ॥
क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा रराज सा ।
पुराणपत्त्रापगमादनन्तरं लतेव संनद्धमनोज्ञपल्लवा ॥ ७ ॥
दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम् ।
तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियम् ॥ ८ ॥

नेत्याह—अधिज्यधन्वनः (अधिज्यकार्मुकस्य) इति । न हि वीरपत्नीनामलभ्यं नाम किंचिदस्तीति भावः । अत्र वाग्भटः—" यादृशो भाविदाहोऽन्ते श्रद्धा च विविधात्मिका " इति । एतच्च पत्नीमनोरथपूरणाकरणे दृष्टदोषसंभवात् । न तु राज्ञः प्रीतिलौल्यात् । तदुक्तम्—"देयमप्यहितं तस्यै हिताय हितमल्पकम् । श्रद्धाविघाते गर्भस्य विकृतिश्च्युतिरेव वा " । अन्यत्र च—" दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात् " इति ।

(७.) सा सुदक्षिणा क्रमेण दोहदव्यथा (गर्भपीडां) च निस्तीर्य (अतिक्रम्य) प्रचीयमानावयवा पुष्यमाणावयवा सती । पुराणपत्त्राणामपगमात् (जीर्णपर्णपरित्यागादर्थात्) नाशादनन्तरं संनद्धाः संजाताः प्रत्यग्रत्वान्मनोज्ञाः पल्लवा यस्याः सा लतेव (वल्लीव) रराज (शुशुभे) । लक्षणान्तरं वर्णयति—

(८.) दिनेषु दोहददिवसेषु गच्छत्सु सत्सु नितान्तपीवरमतिस्थूलम् (अत्यर्थमांसलं) । आ समन्तान्नीले मुखे चूचुके यस्य तत् । तदीयं स्तनद्वयम् (कुचयुग) । भ्रमरैरभिलीनयोरभिव्याप्तयोः सुजातयोः सुंदरयोः ["सुजातं सुन्दरं प्रोक्तं सत्यजातं च वस्तुनीति " विक्रमः—चा०] पङ्कजकोशयोः पद्ममुकुलयोः श्रियं (शोभां) तिरश्चकार । अत्र वाग्भटः—" अश्लेष्टता स्तनौ पीनौ श्वेतान्तौ कृष्णचूचुकौ " इति ।

(९.) नृपः ससत्त्वामापन्नसत्त्वाम् (सगर्भां) गर्भिणीमित्यर्थः । " आपन्नसत्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी " इत्यमरः । महिषीम् (पट्टराज्ञीं) । निधानं निधिर्गर्भे यस्यास्तां सागराम्बरां समुद्रवसनाम् । भूमिमिवेत्यर्थः । " भूतधात्री रत्नगर्भा विपुला सागराम्बरा " इति

(6.) Having got to the painful temperament through the qualms of pregnancy (having come to the languor consequent upon the troubles of pregnancy), she saw, brought to her, whatever she desired, because nothing that was desired was unobtainable to that lord of the earth with his bow strung, even in heaven.

(7.) Gradually getting over the pains of pregnancy she looked charming with her limbs fattening (in proper development), like a creeper which after the disappearance of old leaves, shoots forth beautiful sprouts (appears to have been clad in a charming foliage).

(8.) As days rolled on, her full plumpy breasts, with dark nipples, despised (eclipsed) the beauty of (two) charming lotus-buds with black-bees attached to them.

निधानगर्भामिव सागराम्बरां शमीमिवाभ्यन्तरलीनपावकाम् ।
नदीमिवान्तःसलिलां सरस्वतीं नृपः ससत्त्वां महिषीममन्यत ॥ ९ ॥
प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जितानां च दिगन्तसंपदाम् ।
यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥१०॥
सुरेन्द्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः ।
तयोपचाराञ्जलिखिन्नहस्तया ननन्द पारिप्लवनेत्रया नृपः ॥ ११ ॥

कोशः । अभ्यन्तरे (मध्ये) लीनः (लग्नः) पावकः (अग्निः) यस्यास्तां शमीमिव । शमीतरौ वह्निरस्तीत्यत्र लिङ्गं शमीगर्भादग्निं जनयतीति । अन्तःसलिलामन्तर्गतजलां सरस्वतीं [म्लेच्छदेशेषु सा ह्यन्तर्धाय भूयः पुण्यप्रदेशेषूद्भवतीति पुराणवार्त्तेति–व० सरस्वत्याः ऊर्ध्वं वालुकाः पातालान्तर्गतंजलमितिवार्त्तामात्रं–चा०] नदीमिव [एतेनपीनत्वोक्तिः -चा०] । अमन्यत । एतेन गर्भस्य भाग्यवत्त्वतेजस्वित्वपावनत्वानि विवक्षितानि [मालोपमा–चा०]

(१०) धीरः स राजा प्रियायामनुरागस्य स्नेहस्य । मनसः समुन्नतेरौदार्यस्य । भुजेन भुजबलेन करेण वार्जितानाम् । न तु वाणिज्यादिना । दिगन्तेषु संपदाम् । धृतेः पुत्रो मे भविष्यतीति संतोषस्य च । "धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु" इति विश्वः । सदृशीरनुरूपाः । पुमान्सूयतेऽनेनेति पुंसवनम् ("व्यक्ते गर्भे तृतीये तु मासे पुंसवनं भवेत्। गर्भेऽव्यक्ते तृतीये चेच्चतुर्थे मासिवा भवेदिति शौनकः । कुर्यात्पुंसवनं प्रसिद्धविषये गर्भे तृतीयेऽथवा । मासि स्फीततनौ तुषारकिरणे पुष्येऽथवा वैष्णवे" इति वशिष्ठः) । तदादिर्यासां ताः क्रिया यथाक्रमं क्रममनतिक्रम्य व्यधत्त कृतवान् । आदिशब्देनानवलोभनसीमन्तोन्नयनं गृह्यते । अत्र मासि द्वितीये तृतीये वा पुंसवनं यदाह—"पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्" इति पारस्करः । "चतुर्थेऽनवलोभनम्" इत्याश्वलायनः । "षष्ठेऽष्टमे वा सीमन्तोन्नयनम्" इति याज्ञवल्क्यः ।

(११.) गृहागतो नृपः सुरेन्द्राणां लोकपालानां मात्राभिरंशैराश्रितस्यानुप्रविष्टस्य गर्भस्य गौरवाद्भारात्प्रयत्नेन मुक्तासनया । आसनादुत्थितयेत्यर्थः । उपचारस्याञ्जलावञ्जलि-

---

(9) The king considered his queen big with child as the ocean-clothed (earth) with treasures in the interior (under ground), as the S'amî-tree with fire lurking within, as the river Sarasvatî with her water under ground.

(10.) The wise monarch performed in due order the Punsavana (the ceremony proper on pregnancy for the birth of a male-child) and other ceremonies in a manner becoming his love for his wife, his own magnanimity, his great joy (at the prospect of having a son) and the wealth spreading as far as the end of the quarters acquired by his arms.

(11.) On his coming to her apartment, the king was delighted to see her, with swimming eyes, with her hands fatigued by holding them together to bid the cus-

कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव ॥१२॥
ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदम्।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम् ॥ १३ ॥

करणे खिन्नहस्तया (उपचारार्थं योऽञ्जलिस्तेन खिन्नौ हस्तौ यस्याः तया तथोक्तया) पारिप्लवनेत्रया तरलाक्ष्या। "चञ्चलं तरलं चैव पारिप्लवपरिप्लवे" इत्यमरः। तया सुदक्षिणया ननन्द। "सुरेन्द्रमात्राश्रित–" इत्यत्र मनुः—"अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः" इति।

(१२.) अथ। कुमारभृत्या बालचिकित्सा [शल्यं शलाकं कायचिकित्सा भूतविद्या कौमारभृत्यमगदस्तंत्रं वाजीकरणमित्यष्टावंगानीति सुश्रुते–चा०]। "संज्ञायां समजनिषद्–" इत्यादिना क्यप्। तस्यां कुशलैः कृतिभिः (प्रवीणैः)। "कृती कुशल" इत्यमरः। आप्तैः हितैः (अवंचकैः) भिषग्भिर्वैद्यैः। "भिषग्वैद्यौ चिकित्सकः" इत्यमरः। गर्भस्य भर्मणि भरणे। भरणे पोषणे भर्म" इति हैमः। "भृतिर्भर्म" इति शाश्वतः। भृञो मनिन्प्रत्ययः। अनुष्ठिते कृते सति [अजातेपि कुमारे कुमारभृत्याप्रयोगो न दोषाय कुमारभृत्या गर्भकर्मणि प्रजने च क्रियते इति कौटिल्येनोक्तत्वात्–चा०]। काले दशमे मासि। अन्यत्र ग्रीष्मावसाने। प्रसवस्य गर्भमोचनस्योन्मुखीम्। आसन्नप्रसवामित्यर्थः। "स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने" इत्यमरः। प्रियां भार्याम् अभ्राण्यस्याः संजातान्यभ्रिता ताम्। "तदस्य संजातं तारकादिभ्य इतच्" इतीतच्प्रत्ययः। दिवमिव। पतिर्भर्ता प्रतीतो हृष्टः सन्। "ख्याते हृष्टे प्रतीतः" इत्यमरः। ददर्श दृष्टवान्।

(१३.) ततः शच्येन्द्राण्या समा (तुल्या)। "पुलोमजा शचीन्द्राणी" इत्यमरः। सा सुदक्षिणा समये प्रसूतिकाले सति। दशमे मासीत्यर्थः। "दशमे मासि जायते" इति श्रुतेः। उच्चसंश्रयैः [ग्रहाणां द्विविधमुच्चत्वं राशिकृतं भागकृतं च तत्र प्रथमराशौ सूर्यस्योच्चता दशभागेषु। वृषे शीतगोस्त्रिषु भागेषु हरौ कुजस्याष्टाविंशेषु। कन्यायां बुधस्य पंचदशसु भागेषु कर्के गुरोः पंचसु भागेषु। मीनेशुक्रस्य सप्तविंशतिभागेषु तुलायां शनेर्विंशतिभागे-

---

tomary salutations, leave her seat with difficulty on account of the weight of her embryo which was made up of the portions of the Surendras (the ruling gods).

(12.) After the nourishment of the fœtus had been properly attended to by the confidential physicians expert in the art of midwifery (knowledge about children) the king was pleased to see his wife approaching the time of delivery, like the sky beclouded at the close of summer (or at the beginning of the tenth month).

(13.) At a proper time the S'achî-like queen gave birth to a son, whose prosperous fortune (lit. wealth consisting in good fortune) was presaged by five

दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम् ॥ १४

षु–चा०] उच्चसंस्थैस्तुङ्गस्थानगैरसूर्यगैरनस्तमितैः [सर्वे ग्रहा सूर्यराशिगता उच्यंते । उक्तं च । क्रूराक्रांतः क्रूरगतः क्रूरदृष्टस्तु यो ग्रहः विरश्मितां प्रपन्नश्च स विनष्टो बुधैः स्मृतः–चा०] कैश्चिद्यथासंभवं पञ्चभिर्ग्रहैः सूचिता भाग्यसंपद्यस्य तं पुत्रम् [एकेन ग्रहेण सुखी द्वाभ्यां श्रेष्ठस्त्रिभिर्नृपतुल्यश्चतुर्भिर्नृपः पञ्चभिर्देवः इति भाग्यसंपद्–चा०]। त्रीणि प्रभावमन्त्रोत्साहात्मकानि साधनान्युत्पादकानि यस्याः सा त्रिसाधना शक्तिः । " शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः " इत्यमरः । अक्षयमर्थमिव । असूत (प्रासोष्ट) । " षूङ् प्राणिगर्भविमोचने " इत्यात्मनेपदिषु पठ्यते । तस्माद्धातोः कर्तरि लङ् । अत्रेदमनुसंधेयम्––" अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः " इति । सूर्यादीना सप्तानां ग्रहाणां मेषवृषभादयो राशयः श्लोकोक्तक्रमविशिष्टा उच्चस्थानानि । स्वस्वतुङ्गापेक्षया सप्तमस्थानानि च नीचानि । तत्रोच्चेष्वपि दशमादयो राशित्रिंशांशा यथाक्रममुच्चेषु परमोच्चा नीचेषु परमनीचा इति जातकश्लोकार्थः । अत्रांशस्त्रिंशो भागः । यथाह नारदः––" त्रिंशद्भागात्मकं लग्नम् " इति । सूर्यप्रत्यासत्तिर्ग्रहाणामस्तमयो नाम । तदुक्तं लघुजातके––" रविणास्तमयो योगो वियोगस्तूदयो भवेत् " इति । ते च स्वोच्चस्थाः फलन्ति नास्तगा नापि नीचगाः । तदुक्तं राजमृगाङ्के––"स्वोच्चे पूर्णं स्वर्क्षकेऽर्धं सुहृद्भे पादं द्विड्भेऽल्पं शुभं खेचरेन्द्रः । नीचस्थायी चास्तगो वा न किंचित्पादं नूनं स्वत्रिकोणे ददाति " इति । तदिदमाह कविरुच्चसंस्थैरसूर्यगैरिति च । एवं सति यस्य जन्मकाले पञ्चप्रभृतयो ग्रहाः स्वोच्चस्थाः स एव तुङ्गी भवति । तदुक्तं कूटस्थीये––"सुखिनः प्रकृष्टकार्या राजप्रतिरूपकाश्च राजानः । एकद्वित्रिचतुर्भिर्जायन्तेऽतः परं दिव्याः " इति । तदिदमाह पञ्चभिरिति ।

(१४.) तत्क्षणं तस्मिन्क्षणे (जन्मसमये) । कालाध्वनोरत्यन्तसंयोगे द्वितीया । दिशः प्रसेदुः प्रसन्ना बभूवुः । मरुतो वाताः सुखा मनोहरा ववुः । अग्निः प्रदक्षिणार्चिः सन्हविराददे स्वीचकार । इत्थं सर्वं शुभशंसि शुभसूचकं बभूव । तथाहि । तादृशां रघुप्रकाराणां भवो जन्म लोकाभ्युदयाय (परोन्नतये अर्थादुपकाराय) भवतीति शेषः । ततो देवा अपि संतुष्टा इत्यर्थः ।

---

planets who were completely visible (in the sky) and who were in the ascendant (occupied the highest apexes of their orbits) as the royal power that arises from three things [dignity (प्रभाव), counsel (मंत्र) and energy (उत्साह)] produces an undecaying (store of) wealth.

(14.) (Instantly) the quarters of the earth became fair, breezes blew pleasant, the (holy) fires accepted the oblations with their flames on the right, and in fact every thing at that moment presaged good, for the birth of such persons is for the welfare of the world (for the rise of the people).

अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव ॥ १५ ॥
जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसंमिताक्षरम् ।
अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ॥ १६ ॥
निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनाद्गुरुः प्रहर्षः प्रबभूव नात्मनि ॥ १७ ॥

(१५.) " अरिष्टं सूतिकागृहम् " इत्यमरः । अरिष्टे सूतिकागृहे शय्यां तल्पं परितोऽभितः । " अभितः परितः समयानिकषाहाप्रतियोगेषु दृश्यते " इति द्वितीया । विसारिणा सुजन्मनः शोभनोत्पत्तेः । " जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः" इत्यमरः । तस्य शिशोः (कुमारस्य) निजेन नैसर्गिकेण तेजसा सहसा हतत्विषः क्षीणकान्तयः (निरस्तदीप्तयः) निशीथदीपा अर्धरात्रप्रदीपाः । " अर्धरात्रनिशीथौ द्वौ " इत्यमरः । आलेख्यसमर्पिताश्चित्रार्पिता इव बभूवुः । निशीथशब्दो दीपानां प्रभाधिक्यसंभावनार्थः ।

(१६.) भूपतेर्दिलीपस्यामृतसंमिताक्षरममृतसमानाक्षरम् । " सरूपसमसंमिताः " इत्याह दण्डी । कुमारजन्म पुत्रोत्पत्तिं शंसते कथयते शुद्धान्तचरायान्तःपुरचारिणे जनाय ["शुद्धान्तःस्यादन्तःपुरम् " इत्यभिधानचिन्तामणिः चा०] त्रयमेवादेयमासीत् (दातुमशक्यमभूत्) । किं तत् । शशिप्रभमुज्ज्वलं छत्त्रम् । उभे चामरे च । छत्त्रादीनां राज्ञः प्रधानाङ्गत्वादिति भावः ।

(१७.) निवातो [वातस्याभावः निवातं – चा०] निवातप्रदेशः । " निवातावाश्रयावातौ " इत्यमरः । तत्र यत्पद्मं तद्वत्स्तिमितेन निष्पन्देन (निश्चलेन) चक्षुषा नेत्रेण कान्तं सुन्दरं सुताननं पुत्रमुखं पिबतः तृष्णया पश्यतो नृपस्य गुरुरुत्कटः प्रहर्षः (आनन्दः)। कर्ता । इन्दुदर्शनात् (चन्द्रविलोकनात्) गुरुर्महोदधेः (समुद्रस्य) पूरो जलौघ इव । आत्मनि शरीरे न प्रबभूव स्थातुं न शशाक । अन्तर्न माति स्मेति यावत् । नह्यल्पाधारेऽधिकं मीयत इति भावः । यद्वा हर्ष आत्मनि स्वस्मिन्विषये न प्रबभूव । आत्मानं नियन्तुं न शशाक । किंतु बहिर्निर्जगामेत्यर्थः ।

(15.) The midnight-lamps suddenly lost their splendour and appeared as if transferred to pictures on account of the well-born infant's own lustre, spreading around the bed in the lying-in-chamber.

(16.) There were only three things, with which the lord of the earth could not favour the attendant from the harem, when he announced him of the birth of his son in words which sounded to him sweet as nectar,—the Royal Umbrella lustrous like the moon and the two Chauries.

(17.) Drinking up with his eyes steady like a lotus in a calm place (lit. a place free from wind) the beautiful face of his son, the king could not contain his great joy within himself, as the great ocean his flood at the sight of the moon.

स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते ।
दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ॥ १८ ॥
सुखश्रवा मङ्गलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि ॥१९॥
न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः ।
ऋणाभिधानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् ॥२०॥

(१८.) स दिलीपसूनुः । तपस्विना पुरोधसा पुरोहितेन । " पुरोधास्तु पुरोहितः " इत्यमरः । वशिष्ठेन । तपस्वित्वात्तदनुष्ठितं कर्म सवीर्यं स्यादिति भावः । तपोवनादेत्यागत्य । अखिले समग्रे जातकर्मणि जातस्य कर्तव्यसंस्कारविशेषे कृते सति । प्रयुक्तः संस्कारः शाणोल्लेखनादिर्यस्य स तथोक्तः । आकरोद्भवः खनिप्रभवः । " खनिः स्त्रियामाकरः स्यात् " इत्यमरः । मणिरिव । अधिकं बभौ (रेजे) । वशिष्ठमन्त्रप्रभावात्तेजिष्ठोऽभूदित्यर्थः । अत्र मनुः—" प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते " इति ।

(१९.) सुखः सुखकरः श्रवः श्रवणं येषां ते सुखश्रवाः । श्रुतिसुखा इत्यर्थः । मङ्गलतूर्यनिस्वना मङ्गलवाद्यध्वनयो वारयोषितां वेश्यानाम् । " वारस्त्री गणिका वेश्या रूपाजीवा " इत्यमरः । प्रमोदनृत्यैर्हर्षनर्तनैः सह (सार्धं) मागधीपतेर्दिलीपस्य सद्मनि केवलं गृह एव न व्यजृम्भन्त (वादयामासुः) किंतु । द्यौरोको येषां ते दिवौकसो देवाः । पृषोदरादित्वात्साधुः । तेषां पथ्याकाशेऽपि व्यजृम्भन्त । तस्य देवांशत्वाद्देवोपकारित्वाच्च देवदुन्दुभयोऽपि नेदुरिति भावः ।

(२०.) रक्षितुः सम्यक्पालनशीलस्य तस्य दिलीपस्य । अत एव चौराद्यभावात् । (कारागृहे) संयतो बद्धो न बभूव नाभूत् [युवराजाभिषेके च परचक्रावमर्दने । पुत्रजन्मनि वा मोक्षो बद्धस्य हि विधीयते—हे०] । किं तेनात आह—विसर्जयेदिति । सुतजन्मना हर्षितस्तोषितः सन् । स यं बद्धं विसर्जयेद्विमोचयेत् । किंतु स राजा तदा पितॄणामृणाभिधानाद्बन्धनात्केवलमेकं यथा तथा । स्वयमेव । एक एवेत्यर्थः । " केवलः कृत्स्न एकश्च केव-

---

(18.) When the family priest Vas'ishtha, the observer of asceticism, came from the penance-forest and performed the whole ceremony of Jâta-karma (a sacrifice to be performed after the birth of a baby), the son of Dilipa shone with additional lustre, like a jewel produced in a mine when it undergoes polish.

(19.) The sounds, pleasing to the ear, of auspicious musical instruments (drums) accompanied by the delightful dancing of the courtezans, could be heard not only in the palace of the king—the husband of the Magadha—princess but also in the path [sky] of the gods (lit. those whose abode is heaven).

(20.) The protector, finding no prisoners whom, delighted at the birth of a son, he might release, only freed himself from the bond of his ancestors that went under the name of a debt.

तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि।
उपान्तसंमीलितलोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ ॥ २६ ॥
अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमन्तमन्वयम्।
स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः ॥ २७ ॥
स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः।
लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥ २८ ॥

(२६.) शरीरयोगजैः (देहसंगमजातैरर्थात्पुत्रालिंगनसमुत्थितैः)सुखैस्त्वचि त्वगिन्द्रियेऽमृतं (सुधां) निषिञ्चन्तं वर्षन्तमिव तं पुत्रमङ्कम् (उत्संगं) आरोप्य (गृहीत्वा) मुदाविर्भावादुपान्तयोः प्रान्तयोः संमीलितलोचनः (प्रान्तमुद्रितनयनः) सन्। नृपश्चिरात्सुतस्पर्शरसज्ञतां (पुत्रस्पर्शरसाभिज्ञत्वं) ययौ (असौ नृपतिश्चिरेण पुत्रस्पर्शसुखास्वादनरसमुपलेभे)। रसः स्वादः।

(२७.) स्थितेरभेत्ता मर्यादापालकः [एतेन स्वाचारनिष्ठत्वोक्तिः—चा०] स नृपः परार्ध्यजन्मनोत्कृष्टजन्मनानेन रघुणान्वयं वशम्। प्रजानां पतिर्ब्रह्मा गुणाः सत्त्वादयः। तेष्वग्र्येण मुख्येन सत्त्वेन वर्तते व्याप्रियत इति गुणाग्र्यवर्ती। तेन स्वस्य मूर्तिभेदेनावतारविशेषेण विष्णुनात्मनः सर्गं सृष्टिमिव [ब्रह्मत्वे सृजते लोकान्विष्णुत्वे पालयत्यपि रुद्रत्वे संहरत्येव तिस्रोवस्थाः स्वयंभुवः। इत्युक्तत्वान्मूर्तिभेदत्वम्—व०]। स्थितिमन्तं प्रतिष्ठावन्तममस्त मन्यते स्म। मन्यतेरनुदात्तत्वादिट्प्रतिषेधः। अत्रोपमानोपमेययोरितरेतरविशेषणानीतरतरत्र योज्यानि। तत्र रघुपक्षे गुणा विद्याविनयादयः। "गुणोऽप्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे। शुभेर्मने सत्त्वादिसंध्यादिविद्यादिहरितादिषु" इति विश्वः। शेषं सुगमम्।

(२८.) "चूडा कार्या द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्या श्रुतिचोदनात्" इति मनुस्मरणात्तृतीये वर्षे वृत्तचूलो निष्पन्नचूडाकर्मा सन् (वृत्तं जातं काकश्य वर्धते—वर्न यस्य सः)। डलयोरभेदः। स रघुः। "प्राप्ते तु पञ्चमे वर्षे विद्यारम्भं च [अमावाहृ" इति वचनात्पञ्चमे वर्षे चलकाकपक्षकैश्चलशिखण्डकैः। "बालानां तु शिखा

(26.) Infusing, as it were, nectar in his skin and feeling happiness arising from his contact with the body of his son, the king, placing his son on his lap, with eyes closed towards their angles, went to the state of enjoying for a long time the happiness derived from the touch of a son.

(27.) The preserver of the traditions and customs thought his family standing firm by means of this prince of noble descent, as the lord of all creatures considered his own creation to be preserved by a modification of his form (Vishṇu) possessing the principle quality (i. e. सत्त्व).

(28.) After the tonsure had been performed (when the Chaula ceremony was over) Raghu, attended by the sons of his father's ministers of the same age with him, and wearing flowing locks, entered upon the ocean of literature by the proper understanding of the Alphabets as if by the mouth of a river.

अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥ २९ ॥
धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ।
ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ॥ ३० ॥

प्रोक्ता काकपक्षः शिखण्डकः" इति हलायुधः । सवयोभिः स्निग्धैः [समानवयस्कचलकाकपक्षैः–चा०] । "स्निग्धो वयस्यः सवयाः" इत्यमरः । अमात्यपुत्रैरन्वितः (युक्तः) सन् । लिपेः पञ्चाशद्वर्णात्मिकाया मातृकाया यथावद्ग्रहणेन सम्यग्बोधेनोपायभूतेन वाङ्मयं शब्दजातम् । नद्या मुख द्वारम् । "मुख तु वदने मुख्यारम्भे द्वाराभ्युपाययोः" इति यादवः । तेन (सरिद्वारेण) कश्चिन्मकरादिः समुद्रमिव । आविशत्प्राविष्टः । ज्ञातवानित्यर्थः ["वृत्तचूडकमालिपिसख्यानां चायुञ्जीत" इति चाणक्यः–चा०] ।

(२९.) "गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः" इति मनुस्मरणादथ गर्भैकादशेऽब्दे विधिवदुपनीतं गुरुप्रियमेनं रघुं विपश्चितो विद्वांसो गुरवो विनिन्युः शिक्षितवन्त । ते गुरवोऽत्रास्मिन्रघाववन्ध्ययत्नाः (सफलप्रयत्नाः) च बभूवुः । तथाहि । क्रिया शिक्षा । "क्रिया तु निष्कृतौ शिक्षाचिकित्सोपायकर्मसु" इति यादवः । वस्तुनि पात्रभूते (श्रेष्ठे) उपहिता प्रयुक्ता । प्रसीदति फलति (पात्रविशेषन्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः जलमिवसमुद्रशुक्तौ मुक्ताफलतां पयोदस्येत्येवं समार्थः श्लोकांशः) । "क्रिया हि द्रव्य विनयति नाद्रव्यम्" इति कौटिल्यः ।

(३०.) अत्र कामन्दकः—"शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः" इति । "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः" इति च । उदारधीरुत्कृष्टबुद्धिः [शुश्रूषा श्रवणं चैव ग्रहणं चिंतन तथा कथन स्थितिहेतवः इति कामंदकः–चा०] स रघुः समग्रैर्धियः (बुद्धेः) गुणैः । चत्वारोऽर्णवा उपमा यासां ताश्चतुरर्णवोपमाः [एतेन विद्यानां महत्त्वं–चा०] । "तद्धितार्थोत्तरपदसमाहारे च" इत्युत्तरपदसमासः । (आन्वीक्षिक्यादि) चतस्रो विद्याः । हरितां दिशामीश्वरः सूर्यः पवनातिपातिभिः (वायुमतिक्रमितुं शीलं येषां तैः वातादपि वेगवत्तरैः) हरिद्भिः (नीलतुरगैः) निजाश्वैः । "हरित्ककुभि वर्णे च तृणवाजिविशेष-

(29.) Subsequently to the thread-ceremony, performed in accordance with the precepts, the learned preceptors who liked him much imparted education to him and found their attempts not unsuccessful here. For efforts bear fruit if made with respect to a proper object

(30.) Raghu, of sublime genius, by dint of all his intellectual faculties gradually got across the four lores resembling the four oceans, as the Lord of the quarters (the sun) passes over the (four) directions by means of his bay horses, surpassing the Wind (in speed).

त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मन्त्रवत्।
न केवलं तद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोऽपि सः ॥ ३१ ॥
महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव।
रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गाम्भीर्यमनोहरं वपुः ॥ ३२ ॥
अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयद्गुरुः।
नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ॥ ३३ ॥

योः" इति विश्वः। चतस्रो दिश इव। क्रमात्ततार (पारं ययौ)। चतुरर्णवोपमत्वं दि-शामपि द्रष्टव्यम्।

(३१.) स रघुः। "कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः। वसीरन्नानुपूर्व्येण शाणक्षौमादिकानि च" इति मनुस्मरणान्मेध्यां शुद्धां रौरवीं रुरुमृगसंबन्धिनीम् (रुरुश्चित्रमृगस्तत्संबंधिनीं) "रुरुर्महाकृष्णसारः" इति यादवः। त्वचं चर्म परिधाय वसित्वा (आच्छाद्य) मन्त्रवत्समन्त्रकमस्त्रमाग्नेयादिकं पितुरेवोपाध्यायादशिक्षताभ्यस्तवान्। "आख्यातोपयोगे" इत्यपादानसंज्ञा। पितुरेवेत्यवधारणमुपपादयति—नेति। तद्गुरुरेकोऽद्वितीयः पार्थिवः केवलं पृथिवीश्वर एव नाभूत्। किंतु क्षितौ स दिलीप एको धनुर्धरोऽप्यभूत् (धत्ते त्वचं रौरवीमित्येवं समार्थः श्लोकांशः)।

(३२.) रघुः क्रमाद्यौवनेन भिन्नशैशवो निरस्तशिशुभावः सन्। महानुक्षा महोक्षो महर्षभः। "अचतुर–" आदिसूत्रेण निपातनादकारान्तत्वम्। तस्य भावस्तत्ता। तां स्पृशन्गच्छन्वत्सतरो दम्य इव। "दम्यवत्सतरौ समौ" इत्यमरः। द्विपेन्द्रभावं महागजत्वं श्रयन्व्रजन्कलभः ["कलभास्त्रिशदब्दकः" इतिहैमः कोषः–चा०] करिपोत इव। गाम्भीर्येणाचापलेन मनोहरं (रम्यं) वपुः (शरीरं) पुपोष।

(३३.) "गौर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः। स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि। पुंस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु" इति केशवः। गावो लोमानि केशा

(31.) Having put on the holy skin of an antelope (killed at sacrifice) he learnt (the art of) missiles charged with incantations from his father himself, for Dilîpa was not only the sole sovereign of the earth but also the sole warrior on it.

(32.) As the young calf attains the state of a great bull, as a cub of an elephant reaches the state of a full-grown elephant, so Raghu, who had broken up from his boyhood by means of his youth, maintained a body charming on account of his gravity.

(33.) Then after completing the ceremony of his Godâna, the father caused the marriage ceremony to be performed by him, and the princesses obtaining him for their virtuous husband shone like the daughters of Daksha, wedded to the moon (the destroyer of darkness.)

युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः ।
वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ॥ ३४ ॥
ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरम् ।
निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ॥ ३५ ॥

दीयन्ते खण्ड्यन्तेऽस्मिन्निति व्युत्पत्त्या गोदानं नाम ब्राह्मणादीनां षोडशादिषु वर्षेषु कर्तव्यं केशान्ताख्यं कर्मोच्यते [गोप्रशंसापूर्वकं तद्दानप्रकारः इति–हे०] तदुक्तं मनुना —" केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः " इति । अथ गुरुः पिता । " गुरुर्गीष्पतिपित्राद्यौ " इत्यमरः । अस्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयत् (गृहस्थाश्रममश्राययत्) कृतवानित्यर्थः । अथ नरेन्द्रकन्यास्तं रघुम् । दक्षस्य सुता रोहिण्यादयस्तमोनुदं चन्द्रमिव । " तमोनुदोऽग्निचन्द्रार्काः " इति विश्वः । सत्पतिमवाप्याबभुः (शुशुभिरे) । रघुरपि तमोनुत् । अत्र मनुः—" वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत् " इति [ब्रह्मचर्यमाषोडशात्तु ततो गोदानानंतरं दारकर्मेति चाणक्यः–चा०] संप्रति यौवराज्ययोग्यतामाह—

(३४.) युवा (तरुणः) युगो नाम धुर्यस्कन्धगः सच्छिद्रप्रान्तो यानाङ्गभूतो दारुविशेषः । " यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु " इत्यमरः । युगवद्व्यायतौ दीर्घौ बाहू यस्य सः । अंसावस्य स्त इत्यंसलो बलवान् । मांसलश्चेति इत्तिकारः [मनोज्ञस्कन्धः–सु०] " बलवान्मांसलोऽसलः " इत्यमरः । " वत्सांसाभ्यां कामबले " इति लच्प्रत्ययः । कपाटवक्षाः (कपाटवद्विशालं विस्तीर्णं वक्षो हृदयं यस्य सः) परिणद्धकन्धरः (परिणद्धा दृढा कन्धरा ग्रीवा यस्य सः) विशालग्रीवः । " परिणाहो विशालता " इत्यमरः । रघुर्वपुषः प्रकर्षादाधिक्याद्यौवनकृताद्गुरुं पितरमजयत् । तथापि विनयान्नम्रत्वेन नीचैरल्पकोऽदृश्यत । अनौद्धत्यं च विवक्षितम् । संप्रति तस्य यौवराज्यमाह—

(३५.) तत आत्मना (स्वेन) चिरं (चिरकालं) धृतां (गृहीतां) नितान्तगुर्वीम् (अत्यन्तगरिष्ठां) " वोतो गुणवचनात् " इति ङीष् । प्रजानां धुरं पालनप्रयासं (भारं) लघयिष्यता लघुं करिष्यता । " तत्करोति तदाचष्टे " इति लघुशब्दाण्णिच् । ततो " लटः सद्वा " इति शतृप्रत्ययः । नृपेण दिलीपेनासौ रघुर्निसर्गेण स्वभावेन संस्कारेण शास्त्राभ्या-

(34.) The youthful prince Raghu, possessed of arms long as a pole, with strong shoulders, with a chest broad as a board and of a large neck, outdid his father by reason of the pre-eminence of his body (in the graces of his body), yet through his modesty he looked small before him.

(35.) Then intending to lighten the very heavy yoke, long sustained by himself, of (governing) his subjects, the king made his son Raghu, seeing him modest by nature and education, the holder of the title of young king.

नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितम्।
अगच्छदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्पलम् ॥३६॥
विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव ।
बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ॥ ३७ ॥
नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतम् ।
अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ॥ ३८ ॥

सजनितवासनया च विनीतो नम्र इति हेतोः । युवराज इति शब्द भजतीति तथोक्तम् । भजो ण्विः ” इति ण्विप्रत्ययः । चक्रे कृतः । “ द्विविधो विनयः स्वाभाविक कृत्रिमश्च ” इति कौटिल्यः । तदुभयसंपन्नत्वात्पुत्रं युवराजं चकारेत्यर्थः (यौवराज्ये स्थापित) । अत्र कामन्दकः– “ विनयोपग्रहान्भूत्यै कुर्वीत नृपतिः सुतान् । अविनीतकुमारं हि कुलमाशु विशीर्यते । विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेत् ” इति ।

(३६.) गुणान्विनयादीन्सौरभ्यादींश्चाभिलषतीति गुणाभिलाषिणी श्री राज्यलक्ष्मीः पद्माश्रया च नरेन्द्रो दिलीप एव मूलायतनं प्रधानस्थान तस्मात् । अपादानात् । अनन्तरं संनिहितम् । युवराज इति संज्ञास्य संजाता युवराजसंज्ञितम् । तारकादित्वादितच्प्रत्ययः । आत्मनः पदं स्थानमास्पदम् । “ आस्पदं प्रतिष्ठायाम् ” इति निपात. । स रघुरित्यास्पद तदास्पदम् । कमलाच्चिरोत्पन्नान्नवावतारमचिरोत्पन्नमुत्पलमिव । अंशेन (भागेन) अगच्छत् [“ प्रभावः शुचिता मैत्री त्याग सत्यं क्षमार्जवं कुलं शील दमश्चेति गुणा. संपत्तिहेतवः ” इति कामन्दकः-चा०] स्त्रियो हि यूनि रज्यन्त इति भाव ।

३७.) सारथिना सहायभूतेन। एतद्विशेषणमुत्तरवाक्येष्वप्यनुषञ्जनीयम् । वायुना विभावसुर्वह्निरिव । “ सूर्यवह्नी विभावसू ” इत्यमरः । घनव्यपायेन (घनानां मेघानां व्यपायो नाशो यत्र तेन) शरत्समयेन सारथिना गभस्तिमान्सूर्य इव । कटो गण्ड । “ गण्डः कटो मदो दानम् ” इत्यमरः । तस्य प्रभेदः स्फुटनम् (गण्डस्थलमदक्षरणः) मदोदय इत्यर्थः । तेन करीव । पार्थिवो दिलीपस्तेन रघुणातितरामत्यन्तं सुदुःसहः (सोढुमशक्यः) सुष्ठुसह्यो बभूव ।

(३८.) शतक्रतुरिन्द्र उपमा यस्य स शतक्रतूपमः (इन्द्रतुल्यः) स दिलीप । “ शत

(36.) The goddess of fortune attached to virtues, next went by a portion into the seat known by the title of young king, from her original seat, the king, as to a fresh-grown lotus flower from an old lotus

(37.) As the fire by its charioteer, the wind, as by the dispersion of clouds the sun, so the king became the more insuperable by him (his son), like an elephant by the opening of his temples.

(38.) Having appointed him who was a great warrior (lit. a great bowman) to the protection of the sacrificial steed, followed by other princes, Dilipa who was like Him of one hundred sacrifices completed ninety-nine sacrifices without any hinderance.

ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः।
धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ॥ ३९ ॥
विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत्।
वशिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेऽथ नन्दिनी ॥ ४० ॥
तदङ्गनिस्यन्दजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सताम्।
अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः ॥ ४१ ॥

वै तुल्या राजपुत्रा देवा आशापालाः" इत्यादिश्रुत्या। राजसुतैः (सामान्यराजपुत्रैः) अनुद्रुतमनुगतं धनुर्धरं (धानुष्क) तं रघुं होमतुरंगाणां रक्षणे नियुज्य (व्यापार्य) । एकेन क्रतुनापूर्णमेकोन क्रतूनामश्वमेधानां शतमपविघ्नमपगतविघ्नं (प्रत्यूहरहितं) यथा तथाप।

(३९.) ततः परमेकोनशतक्रतुप्राप्त्यनन्तरं यज्वना विधिनेष्टवता तेन दिलीपेन पुनः पुनरपि मखाय मख (याग) कर्तुम्। "क्रियार्थोपपदस्य–" इत्यादिना चतुर्थी। उत्सृष्टं मुक्तमनर्गलमप्रतिबन्धम्। अव्याहतस्वैरगतिमित्यर्थः। "अपर्यावर्तयन्तोऽश्वमनुचरन्ति" इत्यापस्तम्बस्मरणात्। तुरंगं धनुर्भृतां (अनादरे षष्ठी) रक्षिणां रक्षकाणामग्रत. (पुरस्तात्) एव शक्रः (इन्द्रः) गूढविग्रहः (गुप्तकायः) सन् (अन्तर्हितशरीरः सन्। अथवात्मानं निगुह्य)। जहार किल। किलेत्यैतिह्ये।

(४०.) तत्कुमारस्य सैन्यं सेना (रघुकटकं) सपदि (सद्यः)। विषाद इष्टनाशकृतो मनोभङ्गः। तदुक्तम्—"विषादश्चेतसो भङ्ग उपायाभावनाशयोः" इति। तेन लुप्ता (नष्टा) प्रतिपत्तिः कर्तव्यज्ञानं यस्य तत्तथोक्तम्। विस्मितमश्वनाशस्याकस्मिकत्वादाश्चर्याविष्टं सत् (निश्चल) स्थितं तस्थौ। अथ श्रुतप्रभावा [श्रुतः प्रभावो रघूत्पत्तिवरप्रदानलक्षणो यस्याः सा आकर्णितमाहात्म्या–चा०] यदृच्छया स्वेच्छयागता। रघोः स्वप्रसादलब्धत्वादनुजिघृक्षयेति भावः। नन्दिनी नाम वशिष्ठधेनुश्च ददृशे। द्वौ चकारावविलम्बसूचकौ [द्वौ चकारौ तुल्यकालापेक्षां गमयते–चा० व०]।

(४१.) सतां (भव्यजनानां मध्ये) पुरस्कृतः पूजितो दिलीपनन्दनो रघुः पुण्येन (पवित्रेण) तस्या नन्दिन्या यदङ्गं तस्य निस्यन्दो द्रवः स एव जलम्। मूत्रमित्यर्थः। तेन [स्वेदेनेति–चा०] लोचने (नेत्रे) प्रमृज्य शोधयित्वा। अतीन्द्रियेष्विन्द्रियाण्यतिक्रान्तेषु।

(39.) After this S'akra with his person invisible carried away even in the presence of the archers, his guards, the steed which was let loose unrestrained again by him the sacrificer with a view to perform a sacrifice (lit for sacrifice).

(40) Scarcely the prince's army remained astounded, being instantly deprived of (all) action on account of disappointment (in the loss of the steed), when it beheld Vas'ishtha's cow—Nandini by name—of celebrated power, come accidently (accidently passing by the way).

(41.) The son of Dilipa, esteemed by the learned, cleansed his eyes with the sacred water trickling down from her body (her urine) and thus he became endued with the power of seeing objects that were beyond the reach of his senses (mortal sight).

स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसंभवः ।
पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतम् ॥ ४२ ॥
शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः ।
अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ॥ ४३ ॥
मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे ।
अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे ॥ ४४ ॥

" अत्यादयः क्रान्ताद्यर्थे द्वितीयया " इति समासः । द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु । परवल्लिङ्गताप्रतिषेधाद्विशेष्यनिघ्नत्वम् । भावेष्वपि वस्तुषूपपन्नदर्शनः सपन्नसाक्षात्कारशक्तिर्बभूव।

(४२.) नरदेवसंभवः (नरदेवाद्दिलीपात्संभवः उत्पत्तिर्यस्य) स रघुः पुनः पुनः (मुहुर्मुहुः) सूतेन (सारथिना) निषिद्धचापलं निवारितौद्धत्यं (चाञ्चल्यं) रथस्य रश्मिभिः प्रग्रहैः । " किरणप्रग्रहौ रश्मी " इत्यमरः । संयतं बद्धमश्वं हरन्तं पर्वतपक्षाणां (गिरिपक्षाणाम्) शातनं छेदकं देवमिन्द्रं पूर्वतः पूर्वस्या दिशि ददर्श (अद्राक्षीत्) ।

(४३.) रघुस्तमश्वहर्तारमनिमेषवृत्तिभिर्निमेषव्यापारशून्यैरक्ष्णां (नेत्राणां) शतैर्हरिभिर्हरिद्वर्णैः (नीलवर्णैः–सु०) । " हरिर्वाच्यवदाख्यातो हरित्कपिलवर्णयोः" इति विश्वः । वाजिभिरश्वैश्च हरिमिन्द्रं विदित्वा (ज्ञात्वा) । " हरिर्वाताकंचन्द्रेन्द्रयमोपेन्द्रमरीचिषु " इति विश्वः । एनमिन्द्रं गगनस्पृशा व्योमव्यापिना धीरेण गभीरेण स्वरेण ध्वनिनैव निवर्तयन्निव (व्यावर्तयन्निव). अवोचत् [गगनस्पृशा धीरेण च भीत्यभावोक्तिः–चा०] :

(४४.) हे देवेन्द्र (सुरनायक) मनीषिभिः (विद्वद्भिः) त्वमेव मखांशभाजां यज्ञभागभुजां प्रथमः (आद्यः । " आदौ प्रधाने प्रथम " इति शाश्वतः) सदा निगद्यसे कथ्यसे । तथाप्यजस्रदीक्षायां नित्यदीक्षायां प्रयतस्य (सावधानस्य) मद्गुरोः (मम पितुः) क्रियाविघाताय क्रतुविघाताय । क्रियां विहन्तुमित्यर्थः । " तुमर्थाच्च भाववचनात् " इति चतुर्थी । कथं प्रवर्तसे (ईदृशस्त्वं मम पितुर्मखनाशाय कथं प्रवृत्तः इति भावः) ।

(42.) He, sprung from the lord of men, then descried in the orient a certain god, the destroyer of the wings of the mountains, carrying away the steed which was tethered to the reins of his chariot, and whose restiveness was ever and anon checked by the charioteer.

(43.) Recognizing him to be Hari (Indra) by his hundreds of eyes that were in an untwinkling condition and by his bay horses, Raghu addressed him in a deep voice which touched the sky as though dissuading him.

(44.) Ever art thou, O lord of the gods, called by the sages the first of those that enjoy the sacrificial share ; how is it then that thou comest forward for the interruption of the sacrificial work of my superior (sire) purified by his constant sacrificial vows ?

त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा।
स चेत्स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ॥४५॥
तदङ्गमग्र्यं मघवन्महाक्रतोरमुं तुरंगं प्रतिमोक्तुमर्हसि।
पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिम् ॥ ४६ ॥
इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसाम्।
निवर्तयामास रथं सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरम् ॥ ४७ ॥
यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः।
जगत्प्रकाशं तदशेषमिज्यया भवद्गुरुर्लङ्घयितुं ममोद्यतः ॥ ४८ ॥

(४५.) त्रयाणां लोकानां (समाहारस्त्रिलोकं तस्य) नाथस्त्रिलोकनाथः। "तद्धितार्थ—" इत्यादिनोत्तरपदसमासः। तेन त्रैलोक्यनियामकेन दिव्यचक्षुषातीन्द्रियार्थदर्शिना (सर्वज्ञेन) त्वया मखद्विषः क्रतुविघातकाः (दैत्याः) सदा नियम्या ननु शिक्ष्याः खलु। स त्वं धर्मचारिणां (धर्मात्मनां) कर्मसु क्रतुषु स्वयमन्तरायो विघ्नो भवसि चेत्। विधिरनुष्ठानं च्युतः क्षतः (नष्टः)। लोके सत्कर्मकथैवास्तमियादित्यर्थः।

(४६.) हे मघवन् (इन्द्र) तत्तस्मात्कारणान्महाक्रतोरश्वमेधस्याग्र्यं श्रेष्ठमङ्गं साधनममुं तुरंगं प्रतिमोक्तुं प्रतिदातुमर्हसि (योग्यो भवसि)। तथाहि। श्रुतेः पथो दर्शयितारः सन्मार्गप्रदर्शका ईश्वरा (भवादृशाः) महान्तो मलीमसां मलिनां पद्धतिं (मार्गं) नाददते न स्वीकुर्वते। असन्मार्गं नावलम्बन्त इत्यर्थः। "मलीमसं तु मलिनं कच्चरं मलदूषितम्" इत्यमरः।

(४७.) इति रघुणा समीरितं (उद्घुष्टं) प्रगल्भं (प्रौढं) वचो निशम्याकर्ण्य। दिवौकसः स्वर्गौकसः। "दिवं स्वर्गेऽन्तरिक्षे च" इति विश्वः। तेषामधिपतिर्देवेन्द्रो रघुप्रभावात्सविस्मयः (साश्चर्यः) सन्। रथं निवर्तयामास। उत्तरं प्रतिवक्तुं प्रचक्रमे (आरेभे) च।

(४८.) हे राजन्यकुमार क्षत्रियकुमार। "मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो

---

(45) You, possessed of all-seeing eyes, the lord of the worlds, ought indeed always to check the haters of the sacrifices ; if then you yourself prove an obstacle to the deeds of the righteous, all rites must perish !

(46) Be pleased, therefore, O Indra, to set free this steed which is the most essential part of the great sacrifice Great persons who are the directors of the paths of the Veda do not themselves take a vile path.

(47) The lord of the gods, having heard the bold speech thus delivered by Raghu, turned back his car with astonishment and began to return an answer.

(48.) " O you son of a Kshatriya, what you say is quite true ; but those, to whom fame is wealth, ought to protect it from an enemy, and now your superior (father) by sacrifice is bent on obscuring the whole of my world-wide renown,"

हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यंबक एव नापरः ।
तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ॥ ४९ ॥
अतोऽयमश्वः कपिलानुकारिणा पितुस्त्वदीयस्य मयापहारितः ।
अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संततेः॥ ५० ॥

विराट् " इत्यमरः । यद्वाक्यमात्थ ब्रवीषि । " ब्रुवः पञ्चानाम्–" इत्यादिनाहादेशः । तत्तथा सत्यम् । किंतु यशोधनैः (यशः कीर्तिरेव धनं द्रव्यं येषां तैः) अस्मादृशैः परतः शत्रुतो यशो रक्ष्यम् (रक्षणीयं) । ततः किमत आह—भवद्गुरुस्त्वत्पिता जगत्प्रकाशं लोकप्रसिद्धमशेषं सर्वं मम तद्यशः (सांप्रतं) इज्यया यागेन लङ्घयितुं तिरस्कर्तुमुद्यत उद्युक्तः [क्रमितुमुद्युक्तः व्रजयजोर्भावे क्यप्–चा०] । किं तद्यश इत्याह–

(४९.) पुरुषेषूत्तम इति सप्तमीसमासः । " न निर्धारणे " इति षष्ठीसमासनिषेधात् । कर्मधारये तु " सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः " इत्युत्तमपुरुष इति स्यात् । यथा हरिर्विष्णुरेक एव पुरुषोत्तमः स्मृतः (कथितः) । यथा च त्र्यम्बकः शिव एव महेश्वरः स्मृतः । नापरोऽपरः पुमान्न । तथा मां मुनयः शतक्रतुं विदुर्विदन्ति । " विदो लटो वा " इति झेर्जुसादेशः । नोऽस्माकम् । हरिहरयोर्मम चेत्यर्थः । एष त्रितयोऽपि शब्दो द्वितीयगामी (द्वितीयपुरुषगमनशीलः) न हि । द्वितीयाप्रकरणे गमिगम्यादीनामुपसंख्यानात्समासः ।

(५०.) यतोऽहमेव शतक्रतुरतस्त्वदीयस्य पितुरयं शततमोऽश्वः कपिलानुकारिणा कपिलमुनितुल्येन मयापहारितोऽपहृतः । अपहारित इति स्वार्थे णिच् । तवात्राश्वे प्रयत्नेनालम् (कृतं मम समीपात् अश्वस्यापहरणप्रयत्नेन) प्रयत्नो माकारीत्यर्थः । निषेध्यस्य निषेधं प्रति करणत्वात्तृतीया । सगरस्य राज्ञः संततेः संतानस्य पदव्यां (सगरचक्रवर्तिपुत्रमार्गे) पदं मा निधा न निधेहि । निपूर्वाद्धाञ्धातोर्लुङ् । " न माङ्योगे " इत्यडागमप्रतिषेधः । महद्भास्कन्दनं ते विनाशमूलं भवेदिति भावः [पुरा यज्ञाश्वमन्वेषयमाणास्तुरगापहार्ययमिति वदन्तः कपिलमुनिना व्यापादिताः तथा त्वमपि इति कपिलानुकृत्या सूचयति–चा०] ।

(५१.) ततस्तुरगस्य रक्षिता (रक्षकः) रघुः प्रहस्य प्रहासं कृत्वा । अभयो निर्भीकः सन् । पुनः पुरंदरं बभाषे । किमिति—हे देवेन्द्र यद्येषोऽश्वामोचनरूपस्ते तव सर्गो [सग-

(49.) As Hari alone is celebrated as Purushottama (the best of men), as the three-eyed S'iva and no other is called Mahes'vara (the great Lord), so sages know me to be S'atakratu ; for these epithets of ours will not extend to (or apply to) any body else.

(50.) Therefore this sacrificial steed of your father has been carried away by myself in imitation of Kapila; away with your endeavours in this case ; you shall not set your foot in the footsteps (in the path) of the progeny of Sagara.

ततः प्रहस्यापभयः पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता ।
गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ॥५१॥
स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनम् ।
अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः ॥ ५२ ॥
रघोरवष्टम्भमयेन पत्त्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः ।
नवाम्बुदानीकमुहूर्तलाञ्छने धनुष्यमोघं समधत्त सायकम् ॥ ५३ ॥

रसुतपदवीं नेष्यामीत्येवं रूपः सर्गः—चा०] निश्चयः। "सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु" इत्यमरः । तर्हि शस्त्रं गृहाण । भवान्रघुं मामनिर्जित्य । कृतमनेनेति कृती । कृतकृत्यो न खलु । "इष्टादिभ्यश्च" इतीनिप्रत्ययः । रघुमित्यनेनात्मनो दुर्जयत्वं सूचितम् ।

(५२.) स रघुरुन्मुखः (ऊर्ध्वाननः) सन् । मघवन्तमिन्द्रमेवमुक्त्वा (गदित्वा) शरासनं (शराः अस्यन्ते क्षिप्यन्तेऽनेनेति) चापं सशरं (बाणयुक्तं)करिष्यमाणः । आलीढेनालीढाख्येन स्थानकभेदेन [पुरा किल भगवान् त्रिपुरदिदृक्षया दिव्यं वर्षशतमालीढविशेषेण स्थानाविक्रयेन ऊर्ध्वमुखोऽध्यतिष्ठादिति– व० । कुमारसंभवे । सदक्षिणापाङ्गनिविष्टमुष्टि नतां समाकुञ्चितसव्यपादमिति । नामिता पूर्वजंघा च पश्चिमा प्रगुणा भवेत् असमो मध्यकायः स्यादालीढस्य तु लक्षणम्–चा०] विशेषशोभिनातिशयशोभिना वपुःप्रकर्षेण देहौन्नत्येन विडम्बितेश्वरोऽनुसृतपिनाकी (विडम्बितोऽनुकृतस्त्रिपुरदाहोद्युक्तः शंभुर्येन स तादृशः) सन् । अतिष्ठत् । आलीढलक्षणमाह यादवः—"स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् । त्रिवितस्त्यन्तरौ पादौ मण्डलं तोरणाकृति । अन्वर्थं स्यात्समपदमालीढं तु ततोऽग्रतः । दक्षिणे वाममाकुञ्च्य प्रत्यालीढविपर्ययः" इति ।

(५३.) रघोरवष्टम्भमयेन स्तम्भरूपेण [स्थैर्यरूपेण कांचनमयेन वा–चा०] । "अवष्टम्भः सुवर्णे च स्तम्भप्रारम्भयोरपि" इति विश्वः । पत्त्रिणा बाणेन हृदि हृदये क्षतो विद्धः । अत एवामर्षणोऽसहनः । क्रुद्ध इत्यर्थः । गोत्रभिदिन्द्रोऽपि । "संभावनीये चौरेऽपि

(51.) Then the (dauntless) protector of the steed again (addressed) Indra with a smile " take up your weapon if this be your resolution; without having conquered Raghu you are not successful. "

(52) With these words facing Indra, Raghu, who was about to make his bow fitted with arrows (going to equip his bow with an arrow), stood as if imitating S'iva in the excellence of his body which appeared more graceful by the Âlîdha.

(53.) Indra, the breaker of mountains, too, being wounded in the breast by an arrow consisting of a post (as large as a post) of Raghu became enraged and fixed a never-failing arrow on his bow which became for a short time the standard of new clouds.

दिलीपसूनोः स बृहद्भुजान्तरं प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितम् ॥ ५४ ॥
हरेः कुमारोऽपि कुमारविक्रमः सुरद्विपास्फालनकर्कशाङ्गुलौ ।
भुजे शचीपत्त्रविशेषकाङ्किते स्वनामचिह्नं निचखान सायकम् ॥ ५५॥
जहार चान्येन मयूरपत्त्रिणा शरेण शक्रस्य महाशनिध्वजम् ।
चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ॥ ५६ ॥

गोत्रः क्षौणीधरे मतः" इति विश्वः । नवाम्बुदानां (नूतनमेघानां) अनीकस्य वृन्दस्य मुहूर्तं क्षणमात्रं लाञ्छने चिह्नभूते धनुषि । दिव्ये धनुषीत्यर्थः । अमोघमवन्ध्यं सायकं बाणं समधत्त संहितवान् (योजितवान्) ।

(५४.) भीमानां भयंकराणामसुराणां (रक्षसां) शोणिते रुधिरे उचितः परिचितः स इन्द्रमुक्त आशुगः सायको दिलीपसूनो रघोर्बृहद्विशालं भजान्तरं वक्षः प्रविश्य । अनास्वादितपूर्वं पूर्वमनास्वादितम् । सुप्सुपेति समासः । मनुष्यशोणितं कुतूहलेनेव (कौतुकेनेव) पपौ ।

(५५.) कुमारस्य स्कन्दस्य विक्रम इव विक्रमो यस्य स तथोक्तः । " सप्तम्युपमानपूर्वस्य–" इत्यादिना समासः । कुमारोऽपि रघुरपि सुरद्विपस्यैरावतस्यास्फालनेन [प्रोत्सहनेन ताडनेन वा–चा०] कर्कशाः (कठिनाः) अङ्गुलयो यस्य सः (तथाकुमारसंभवे । ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः । इत्येवंरूपः श्लोकांशः)। तस्मिन् । शच्याः पत्त्रविशेषकैरङ्किते शचीपत्त्रविशेषकाङ्किते हरेरिन्द्रस्य भुजे स्वनामचिह्नं स्वनामाङ्कितं सायकं निचखान निखातवान् । निष्कण्टकराज्ये तस्यायं महानाभिभव इति भावः ।

(५६.) अन्येन मयूरपत्त्रिणा मयूरपत्त्रवता शरेण शक्रस्येन्द्रस्य महाशनिध्वजं महान्तमशनिरूपं ध्वजं (दंभोलिरूपां पताकां) जहार चिच्छेद च । स शक्रः । सुरश्रियः प्रसह्य बलात्कृत्य केशानां व्यपरोपणादवतारणाच्छेदनादिव । तस्मै रघवे भृशमत्यर्थं चुकोप । तं हन्तुमियेषेत्यर्थः । " क्रुधद्रुह– " इत्यादिना संप्रदानाच्चतुर्थी ।

(54.) That (swift-going) arrow, familiar with (or accustomed to) the blood of terrible Râkshasâs having entered the broad space between the two arms of Dilipa's son, drank the human blood which it had never tasted before as if from curiosity.

(55.) The prince too, brave like Kumâra, planted an arrow, marked by his own name, in Indra's arm, whose fingers were hardened by goading the celestial elephant and which was conspicuous (ornamented) with the leaf-like-marks of painting drawn by S'achí.

(56.) And by anotner arrow to which the feathers of peacock were set, he took away the great thunderbolt-banner of Indra ; whereupon Indra was greatly enraged at him (Raghu) as if he had forcibly plucked the hair of the Goddess presiding over the fortunes of the celestials.

तयोरुपान्तस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः।
बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ॥ ५७ ॥
अतिप्रबन्धप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुष्प्रसहस्य तेजसः।
शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः ॥ ५८
ततः प्रकोष्ठे हरिचन्दनाङ्किते प्रमथ्यमानार्णवधीरनादिनीम्।
रघुः शशाङ्कार्धमुखेन पत्त्रिणा शरासनज्यामलुनाद्बिडौजसः ॥ ५९ ॥

(५७.) जयैषिणोरन्योन्यजयाकाङ्क्षिणोस्तयोरिन्द्ररघ्वोः। गरुत्मन्तः पक्षवन्तः। "गरुत्पक्षच्छदाः पत्त्रम्" इत्यमरः। आशीविषाः। आशिषि दंष्ट्रायां विषं येषां ते आशीविषाः सर्पाः। पृषोदरादित्वात्साधुः। "स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः" इत्यमरः। त इव भीमदर्शनाः सपक्षाः सर्पा इव। द्रष्टॄणां भयावहा इत्यर्थः। तैरधोमुखैरूर्ध्वमुखैश्च। धन्विनोरुपर्यधोदेशावस्थितत्वादिति भावः। पत्त्रिभिर्बाणैरुपान्तस्थितास्तटस्थाः सिद्धा देवा इन्द्रस्य सैनिकाश्च रघोर्यस्मिंस्तत्तथोक्तं तुमुलं संकुलं (रौद्रं) युद्धं बभूव।

(५८.) वासवः (इन्द्रः) अतिप्रबन्धेनातिसातत्येन (प्रवाहेण वा) प्रहिताभिः प्रयुक्ताभिरस्त्रवृष्टिभिर्दुष्प्रसहस्य दुःखेन प्रसह्यत इति दुष्प्रसहं तस्य। दुःखेनाप्यसह्यस्येत्यर्थः। तेजसः प्रतापस्याश्रयं (आस्थानं) तं रघुम्। अम्बुदोऽद्भिः (पानीयैः) स्वतश्च्युतं निर्गतं वह्निमिव। निर्वापयितुं न शशाक। रघोरपि लोकपालात्मकस्येन्द्रांशसंभवत्वादिति भावः।

(५९.) ततो रघुर्हरिचन्दनाङ्किते (कुंकुमांकिते) प्रकोष्ठे मणिबन्धे प्रमथ्यमानार्णवधीरनादिनीं प्रमथ्यमानार्णवः (विलोड्यमानसमुद्रः) इव धीरं गम्भीरं नदतीति तां तथोक्ताम्। वेवेष्टि व्याप्नोतीति विट् व्यापकं [भेदकं -चा०] ओजो यस्य स तस्य बिडौजस इन्द्रस्य। पृषोदरादित्वात्साधुः। शरासनज्याम् धनुर्मौर्वीम्। शशाङ्कस्यार्धः खण्ड इव मुखं फलं यस्य तेन पत्त्रिणा (बाणेन) अलुनादच्छिनत् ["गोशीर्षं कुंकुमे देववक्षःश्रीहरिचंदने" इत्यर्द्धनारीश्वरः—चा०]

(57) Then ensued a fierce combat between them (two) desirous of victory (each anxious to overcome the other) in which the Siddhâs and the princely army stood mute (in which the Siddhâs on one side and the royal army on the other stood aloof), by means of arrows, fierce-looking like the winged serpents and having points (of some) turned downwards and (of some) upwards.

(58) Vâsava could not by means of his continually discharged showers of missiles extinguish (kill) him, the receptacle of unbearable energy (light), as a cloud cannot put out by its water the fire (lightning) emitted by itself.

(59) Raghu, then, with an arrow whose barb was like the crescent moon, cut down the bow-string of Indra which was sounding deep like the ocean which was being churned, upon his fore-arm besmeared with yellow sandle.

स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः।
महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ॥ ६० ॥
रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः।
निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिस्वनैः ॥ ६१ ॥
तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः।
तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ॥ ६२ ॥
असङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम्।
अवेहि मां प्रीतमृते तुरंगमात्किमिच्छसीति स्फुटमाह वासवः ॥ ६३॥

(६०.) विवृद्धमत्सरः (विवृद्धः अत्यन्तभूत. मत्सर· वैरभाव यस्य स तथोक्तः / प्रवृद्धवैर. स इन्द्रश्चापमुत्सृज्य प्रबलस्य विद्विष. शत्रो· प्रणाशनाय वधाय । महीं धारयन्तीति महीध्राः पर्वताः । मूलविभुजादित्वात्कप्रत्ययः । तेषा पक्षव्यपरोपणे पक्षच्छेदे उचित स्फुरत्प्रभामण्डलमस्त्रं वज्रायुधमाददे जग्राह ।

(६१.) रघुस्तेन वज्रेण भृशमत्यर्थं वक्षसि (हृदये) ताडितो हतः सन् । सैनिकानामश्रुभि (बाष्पैः सह भूमौ (मह्यां) पपात । तस्मिन्पतिते ते रुरुदुरित्यर्थः । निमेषमात्रात् (क्षणमात्रात्) तद्व्यथां दुःखमवधूय तिरस्कृत्य सैनिकानां हर्षेण (आनन्देन) ये निस्वनाः क्ष्वेडाः (शब्दाः) तैः सहोत्थितश्च । तस्मिन्नुत्थिते हर्षातिसहनाद्वांश्चक्रुरित्यर्थः ।

(६२.) तथापि वज्रपातेऽपि शस्त्राणामायुधानां व्यवहारेण व्यापारेण निष्ठुरे क्रूरे विपक्षभावे शात्रवे चिरं तस्थुषः स्थितवतोऽस्य रघोर्वीर्यातिशयेन (पौरुषाधिक्येन) । वृत्रं हतवानिति वृत्रहा । " ब्रह्मभ्रूणवृत्रेषु क्विप् " तुतोष । स्वयं वीर एव वीरं जानातीति भावः । कथं शत्रोः संतोषोऽत आह—गुणैः सर्वत्र शत्रुमित्रोदासीनेषु पदमङ्घ्रिर्निधीयते । गुणैः सर्वत्र संक्रम्यत इत्यर्थः । गुणाः शत्रूनप्यावर्जयन्तीति भाव ।

(६३) सारवत्तया (सारः स्थिरांशः तस्य भावः तया) अद्रिष्वप्यसङ्गमप्रतिबन्धं (अ-

(60.) He (Indra , having given up the bow with increased hostility, took up a missile, accustomed to pluck the wings of mountains and surrounded by a tremulous orb of brightness, for the destruction of his powerful enemy.

(61.) Considerably wounded by it in his breast Raghu fell down on the ground together with the tears of his soldiers. But in the space of a moment, shaking off its pain, he got up (together) with the joyous shouts of his soldiers.

(62.) However Indra, the killer of Vritra, was secretly pleased with the superiority in heroism of him who was standing long in the state of hostility, fierce on account of the use of weapons ; for virtues place their foot everywhere (good qualities command proper position everywhere).

(63.) ' No one except you has endured my weapon, which by its strength was unimpeded even in mountains (when the reading is असङ्गमद्रिष्वपिसारवत्तया &c.; but when it is " असह्यमद्रिष्वपिसारवत्तया " &c , the sense is :—by its strength, unbearable

ततो निषङ्गादसमग्रमुद्धृतं सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ।
नरेन्द्रसूनुः प्रतिसंहरन्निषुं प्रियंवदं प्रत्यवदत्सुरेश्वरम् ॥ ६४ ॥
अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यताम् ॥ ६५॥
यथा च वृत्तान्तमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः ।
तवैव संदेशहराद्विशांपतिः शृणोति लोकेश तथा विधीयताम् ॥ ६६ ॥

कुण्ठं) मे आयुधं वज्रं त्वदन्येन (त्वत्तोऽपरेण) न विसोढम् । अतो मां प्रीत संतुष्टमवेहि । तुरंगमादृते तुरंगं (वाजिनं) वर्जयित्वा । " अन्याराादितरर्ते-- " इति पञ्चमी । किमिच्छसीति स्फुटं वासव आह । तुरंगमादन्यद्देयं नास्तीति भावः ।

(६४.) ततो नरेन्द्रसूनू रघुः निषङ्गात्तूणीरादसमग्रं यथा तथोद्धृतं सुवर्णपुङ्खद्युतिभिः (सुवर्णस्य पुंखः शरमूलं तस्य द्युतिभिः दीप्तिभिः रञ्जिता अङ्गुल्या येन तमिषुं (बाणं) प्रतिसंहरन्निवर्तयन् । नाप्रहरन्तं प्रहरेदिति निषेधादिति भावः । प्रियं वदतीति प्रियंवदः (मधुरवाक्) । " प्रियवशे वदः खच् " इति खच्प्रत्ययः । " अरुर्द्विष–" इत्यादिना मुमागमः तं सुरेश्वरं प्रत्यवदत् । न तु प्राहरदिति भावः ।

(६५.) हे प्रभो इन्द्र अश्वममोच्यं मन्यसे यदि ततस्तह्यजस्रदीक्षायां (अनवरतयज्ञदीक्षायां) प्रयतः (निरतः) स मद्गुरुर्मम पिता विधिनैव (वेदोक्तप्रकारेण कर्तव्यतयैव) कर्मणि समाप्ते (पूर्णे) सति क्रतोः (यज्ञस्य) यत्फलं तेन फलेनाशेषेण कृत्स्नेन युज्यतां युक्तोऽस्तु । अश्वमेधफललाभे किमश्वेनेति भावः ।

(६६.) सदोगतः सदोगृहं गतस्त्रिलोचनस्येश्वरस्यैकांशतयाष्टानामन्यतममूर्तित्वात् । दुरासदोऽस्माद्दृशैर्दुष्प्राप्यः [दीक्षितत्वात्त्रिलोचनस्यैकांशत्वेन दुरधिगमः—चा०] अष्टमूर्तित्वा-

---

even for mountains) Know me therefore to be pleased with you ; with the exception of the sacrificial steed what do you wish of me ?" Thus Indra openly said to Raghu.

(64) Immediately the son of the king withdrawing (replacing) the arrow which was not entirely drawn out from the quiver and with the lustre of whose golden feathers his fingers had been brightened, returned an answer to the sweet-speaking king of the gods.

(65.) " O lord, if you think that the steed can not be released, then let that sire of mine purified by constant sacrificial vows be united with (have) the entire fruit of the sacrifice, as if the whole rite was completed in conformity with the prescribed rules."

(66.) "Moreover, O lord of the world, do so manage that the Lord of the people, my father, while seated in the assembly may hear of these tidings from your messenger only, for he is inaccessible by reason of his having one portion of the three-eyed God (S'iva)."

तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्ययौ।
नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ॥ ६७ ॥
तमभ्यनन्दत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः।
परामृशन्हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितम् ॥ ६८॥
इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः।
समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरंपरामिव ॥ ६९ ॥

त् यजमानलक्षणांशभावात् दुरभिभवः दुराकलनीयः—व०] विशांपतिः (नरपतिः) यथेमं वृत्तान्तं (वार्त्तां) तव संदेशहराद्वार्ताहरादेव शृणोति च हे लोकेशेन्द्र तथा विधीयताम्।

(६७.) मातलिसारथिरिन्द्रो रघोः संबन्धिनं कामं मनोरथं तथेति तथास्त्विति प्रतिशुश्रुवान्। " भाषायां सदवसश्रुवः " इति क्वसुप्रत्ययः। यथागतं [न तु रघुं विजित्येति भावः-चा०] ययौ [येन मार्गेणायातस्तेनैव गत इत्यर्थः—व०]। सुदक्षिणासूनू रघुरपि नातिप्रमना विजयलाभेऽप्यश्वनाशान्नातितुष्टः सन्। नञर्थस्य नशब्दस्य सुप्सुपेति समासः। नृपस्य सदोगृहं (दीक्षामण्डपं) प्रति न्यवर्तत।

(६८.) हरेरिन्द्रस्य शासनहारिणा (आज्ञापालकेन) पुरुषेण प्रथमं प्रबोधितो ज्ञापितः। वृत्तान्तमिति शेषः। प्रजेश्वरो दिलीपो हर्षजडेन हर्षशिशिरेण पाणिना कुलिशव्रणाङ्कितम् (कुलिशस्य वज्रस्य व्रणैः प्रहारैः अंकितं चिह्नितं) । तस्य रघोरिदं तदीयम्। अङ्गं शरीरं परामृशंस्तं रघुमभ्यनन्दत्।

(६९.) महनीयशासनः पूजनीयाज्ञः क्षितीशः (भूपतिः) इत्यनेन प्रकारेण। " इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु " इत्यमरः। महाक्रतूनामश्वमेधानां नवभिरधिकां नवतिमेकोनशतमायुषः क्षये (जीवितपूर्णे) सति दिवं स्वर्गं समारुरुक्षुरारोढुमिच्छुः सोपानानां परंपरां पङ्क्तिमिव ततान।

(७०.) अथ विषयेभ्यः (रूपगन्धस्पर्शादिभ्यः) व्यावृत्तात्मा निवृत्तचित्तः स दिलीपो यथाविधि यथाशास्त्रं यूने (युवराजाय) सूनवे (पुत्राय) नृपतिककुदं राजचिह्नम्।

(67.) Indra, whose charioteer was Mátali, promised to fulfil the desire of Raghu saying " Be it so " and went away as he had come. The son of Sudakshiná too, not over (much) pleased in his mind, returned to the meeting-house of the king.

(68.) The king of men already (lit. first) informed of this affair by the messenger (lit. message-bearer) of Hari, congratulated him by touching (stroking) his body, marked with the wounds of the thunderbolt, with his hand benumbed with excessive joy.

(69.) Thus the Lord of the earth whose orders were deserving of respect, wishing to ascend to heaven at the expiration of his life, performed ninety-nine great sacrifices as if he constructed (set forth) a series of steps (to ascend to heaven).

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥ ७० ॥

" ककुद्वत्ककुदं श्रेष्ठे वृषाङ्के राजलक्ष्मणि " इति विश्वः । सितातपवारणं श्वेतच्छत्रं दत्त्वा तया देव्या सुदक्षिणया सह मुनिवनतरोश्छायां शिश्रिये श्रितवान् । वानप्रस्थाश्रमं स्वीकृतवानित्यर्थः । तथाहि । गलितवयसां वृद्धानामिक्ष्वाकूणामिक्ष्वाकोर्गोत्रापत्यानाम् । तद्राजसंज्ञकत्वादणो लुक् । इदं वनगमनं कुलव्रतम् (कुलाचारः) । देव्या सहेत्यनेन सपत्नीकवानप्रस्थाश्रमपक्ष उक्तः । तथा च याज्ञवल्क्यः—" सुतविन्यस्तपत्नीकस्तया वानुगतो वनम् । वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् " इति । हरिणीवृत्तमेतत् । तदुक्तम्—" रसयुगहयैन्सौ म्रौ स्लौ गो यदा हरिणी तदा " इति ।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये रघुराज्याभिषेको नाम तृतीयः सर्गः ।

चतुर्थः सर्गः ।

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥ १ ॥

शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधिं संनिधिं क्रियात् ॥

(१.) स रघुर्गुरुणा पित्रा दत्तं राज्यं राज्ञः कर्म प्रजापरिपालनात्मकम् । पुरोहितादित्वाद्यक् । प्रतिपद्य प्राप्य । दिनान्ते सायंकाले सवित्रा सूर्येण निहितं (निक्षिप्तं स्थापितं वा) तेजः प्रतिपद्य हुताशनोऽग्निरिव । अधिकं (अत्यन्त) बभौ रेजे । "सौरं तेजः सायमग्निं संक्रमते । आदित्यो वा अस्तं यन्नग्निमनुप्रविशति । अग्निं वा आदित्यः सायं प्रविशति " इत्यादिश्रुतिः प्रमाणम् ।

(70) And now he with his mind (soul) turned away from worldly pleasures (sensuous objects), having entrusted to his youthful son the royal insignia consisting of the white umbrella, betook himself in company with his queen to the shade of the trees of the forest suitable for a Muni (sage) ; for this was the family-vow of the race of the " Ik-hvákús " in their declining age.

(1) Having obtained the kingdom made over to him by his Sire he shone still more like the fire, the eater of the offerings, on receiving the lustrous heat imparted in the evening by the sun

दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥ २ ॥
पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः ।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ॥ ३ ॥
सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ॥ ४ ॥

(२.) दिलीपानन्तरं राज्ये प्रतिष्ठितमवस्थितं (कृतास्पदं) तं रघुं निशम्याकर्ण्य पूर्वं दिलीपकाले राज्ञां हृदये प्रकर्षेण धूमोऽस्य संजातः प्रधूमितोऽग्निः संतापाग्निरुत्थित इव प्रज्वलित इव । पूर्वेभ्योऽधिकसंतापोऽभूदित्यर्थः । राजकर्तृकस्यापि निशमनस्याग्नावुपचारान्न समानकर्तृकत्वविरोधः ।

(३.) पुरुहूतध्वज इन्द्रध्वजः। स किल राजभिर्वृष्ट्यर्थं पूज्यते इत्युक्तं भविष्योत्तरे—"एवं यः कुरुते यात्रामिन्द्रकेतोर्युधिष्ठिर । पर्जन्यः कामवर्षी स्यात्तस्य राज्ये न संशयः" इति । "चतुरस्रं ध्वजाकारं राजद्वारे प्रतिष्ठितम् । आहुः शक्रध्वजं नाम पौरलोके सुखावहम्" । पुरुहूतध्वजस्येव [इन्द्रमहोत्सवस्येव । तथाहि। गजाकारं चतुःस्तम्भं पुरद्वारेप्रतिष्ठितं पौराः कुर्वन्ति शरदि पुरुहूतमहोत्सवं—व०] तस्य रघोर्नवमभ्युत्थानं [गजारोहणादिकं । अभिषिक्तो हि राजा गजेन्द्रमारुह्य पुरं प्रदक्षिणीकुर्यादित्याचारः—चा०] अभ्युन्नतिमभ्युदयं च पश्यन्तीति नवाभ्युत्थानदर्शिन्यः (नूतनाभ्युदयदर्शिन्यः) । उदूर्ध्वं प्रस्थिता उल्लसिताश्च नयनपङ्क्तयो (नेत्रमालाः) यासां ताः सप्रजाः ससंतानाः प्रजा जनाः । "प्रजा स्यात्संततौ जने" इत्युभयत्राप्यमरः । ननन्दुः ।

(४.) द्विरद इव द्विरदैश्च गच्छतीति द्विरदगामिना [हस्तिनमारुह्य पुरं प्रदक्षिणीकृतवता—व०]" कर्तर्युपमाने" इति "सुप्यजातौ—" इति च णिनिः । तेन रघुणा समं युगपदेव द्वयं समाक्रान्तमधिष्ठितम् । किं तद्द्वयम् । पितुरागतं पित्र्यम् (जनकसंबंधि) । "पितुर्यत्" इति यत्प्रत्ययः । सिंहासनम् । अखिलम् (समस्तं) अरीणां (वैरिणां) मण्डलं राष्ट्रं (वृन्दं) च । अथ सिंहासनारोहणानन्तरं तस्य लक्ष्मीसंनिधानमाह—

(2.) Having heard him established on the throne after Dilîpa, the fire (of anger) already smoking in the hearts of inimical princes rose, as it were, into a blaze.

(3.) The subjects together with their children, whose rows of eyes glowed as they saw the new elevation (prosperity) of the king, were rejoiced as when seeing the new manifestation of the rain-bow (lit. of the standard of Indra) with the range of their eyes cast upwards.

(4.) By him riding on an elephant (lit. the two-tusked animal) two things were taken possession of simultaneously, viz. the throne inherited from his father and the whole territory of his enemies.

छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥ ५ ॥
परिकल्पितसांनिध्या काले काले च बन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ६ ॥
मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुंधरा ॥ ७ ॥

(५.) अत्र रघोस्तेजोविशेषेण स्वयं संनिहितया लक्ष्म्या छत्रधारणं कृतमित्युत्प्रेक्षते । पद्मा लक्ष्मीः । "लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया" इत्यमरः । सा स्वयमदृश्या (द्रष्टुमशक्या) किल । किलेति संभावनायाम् । सती छायामण्डललक्ष्येण कान्तिपुञ्जानुमेयेन । न तु स्वरूपतो दृश्येन । छायामण्डलमित्यनेनानातपज्ञानं लक्ष्यते । "छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः" इत्युभयत्राप्यमरः । पद्मातपत्रेण पद्ममेवातपत्रं (छत्रं) तेन कारणभूतेन साम्राज्यदीक्षितं साम्राज्ये साम्राज्यकर्मणि मण्डलाधिपत्ये दीक्षितमभिषिक्तं तं भेजे [सिषेवे। लक्ष्मीर्हि पद्मातपत्रेण सम्राजं सेवेत इत्यागमः–चा०] अन्यथा कथमेतादृशी कान्तिसंपत्तिरिति भावः । संप्रति सरस्वतीसांनिध्यमाह–

(६.) सरस्वती च काले काले सर्वेष्वपि योग्यकालेषु । "नित्यवीप्सयोः" इति वीप्सायां द्विर्वचनम् । बन्दिषु (भट्टेषु वैतालिकेषु) परिकल्पितसांनिध्या कृतसंनिधाना सती स्तुत्यं स्तोत्रार्हं तं रघुम् । अर्थ्याभिरर्थादनपेताभिः (सत्याभिः) । "धर्मपथ्यर्थन्यायादनपेते" इति यत्प्रत्ययः । स्तुतिभिः स्तोत्रैरुपतस्थे (भेजे) देवताबुद्ध्या पूजितवतीत्यर्थः । देवतात्वं च "ना विष्णुः पृथिवीपतिः" इति वा लोकपालात्मकत्वाद्वेत्यनुसंधेयम् । एवं च सति "उपाद्देवपूजासंगतिकरणमित्रकरणपथिषु" इति वक्तव्यादात्मनेपदं सिद्ध्यति ।

(७.) वसुधरा (मेदिनी) मनुप्रभृतिभिर्मन्वादिभिर्मान्यैः पूज्यै राजभिर्भुक्ता यद्यपि । भुक्तैवेत्यर्थः । यद्यपीत्यवधारणे । "अप्यर्थे यदिवार्थे स्यात्" इति केशवः । तथापि तस्मिन्राज्ञि । अन्यः पूर्वो यस्याः सान्यपूर्वा । अन्यपूर्वा न भवतीत्यनन्यपूर्वा । अनन्योपभुक्तेवासीत् । तत्प्रथमपतिकेवानुरक्तवतीत्यर्थः । अत्र कारणमाह–

(5.) Him, who was coronated universal sovereign, served Lakshmi, as it seemed, herself invisible, by a Lotus-umbrella indicated by the halo of brightness (that surrounded him).

(6.) Sarasvati (the Goddess of learning), who was present in the vicinity of the panegyrists on proper occasions, attended on him, who deserved to be praised, with significant praises.

(7.) With him the earth, though enjoyed by respectable kings beginning with Manu, was, as if, unenjoyed before by any body else.

स हि सर्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥ ८॥
मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः॥ ९॥
नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम्।
पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः॥ १०॥
पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः।
नवे तस्मिन्महीपाले सर्वं नवमिवाभवत्॥ ११॥

(८.) हि यस्मात्कारणात्स रघुर्युक्तदण्डतया यथापराधदण्डतया सर्वस्य लोकस्य मनः आददे जहार। क इव। अतिशीतोऽत्युष्णो वा न भवतीति नातिशीतोष्णः। नञर्थस्य न-शब्दस्य सुप्सुपेति समासः। दक्षिणो दक्षिणदिग्भवो नभस्वान्वायुरिव। मलयानिल इवेत्यर्थः। युक्तदण्डतयेत्यत्र कामन्दकः–"उद्वेजयति तीक्ष्णेन मृदुना परिभूयते। दण्डेन नृपतिस्तस्माद्युक्तदण्डः प्रशस्यते" इति।

(९.) तेन रघुणा प्रजाः (लोकाः) गुरौ दिलीपविषये। सहकारोऽतिसौरभश्चूतः। "आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः। तस्य फलेन पुष्पोद्गमे पुष्पोदये इव ततोऽपि गुणाधिकतया (औदार्यस्थैर्यप्रभावादयो गुणास्तेषामाधिक्येन) हेतुना मन्दोत्कण्ठा अल्पौत्सुक्याः कृताः। गुणोत्तरश्चोत्तरो विषयः पूर्वं विस्मारयतीति भावः (यथा लोका नवीनं-चूतफलं प्राप्य प्रसूतपुष्पोद्गमं न स्मरन्ति तथा तं लब्ध्वा दिलीपो न स्मृतः)।

(१०.) नयविद्भिर्नीतिशास्त्रज्ञैर्नवे (नूतने) तस्मिन्राज्ञि विषये। तमधिकृत्येत्यर्थः। सद्धर्मयुद्धादिकमसत्कूटयुद्धादिकं चोपदर्शितम्। तस्मिन्राज्ञि पूर्वः पक्षः (पुण्यपक्षः) एवाभवत्। संक्रान्त इत्यर्थः। उत्तरः पक्षः (पापपक्षः) नाभवत्। न संक्रान्त इत्यर्थः। तत्र सदसतोः (न्यायान्याययोः) मध्ये सदेवाभिमतं नासत्। तदुद्भावनं तु ज्ञानार्थमेवेत्यर्थः। पक्षः साधन-योग्यार्थः। "पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु" इति केशवः।

(११.) पृथिव्यादीनां पञ्चानां भूतानामपि गुणाः [पृथ्वी पञ्चगुणा तोयं चतुर्गुणमथानलः। त्रिगुणो द्विगुणो वायुर्वियदेकगुणं भवेत्–व०]। गन्धाद्य उत्कर्षमतिशयं पुपुषुः (पुष्टिं प्रापुः)।

(8.) By inflicting proper punishment on the delinquents he won the minds of all people, like the southern breeze, neither too hot nor too chill.

(9.) By him, with his transcending virtues, the fondness for his father felt by the subjects was lessened, as that at the bursting forth of the blossoms of the mango-tree is lessened by its fruit.

(10.) The adepts in politics pointed out to the new king both the fair and the foul ways, but he accepted the former alone as his choice and not the latter one.

(11.) The qualities of the five primary elements attained excellence; on that new king becoming ruler (of the earth) every thing became, as it were, new.

यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२ ॥
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥ १३ ॥
लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा ॥ १४ ॥

अत्रोत्प्रेक्षते—तस्मिन्रघौ नाम नवे महीपाले (जाते) सति सर्वं वस्तुजातं नवमिवाभवत् । तदेव भूतजातमिदानीमपूर्वगुणयोगादपूर्वमिवाभवदिति भावः ।

(१२.) यथा चन्दयतीत्याह्लादयतीति चन्द्र इन्दुः । चदिधातोरौणादिको रप्रत्ययः । प्रह्लादनादाह्लादकरणादन्वर्थोऽनुगतार्थनामकः अभूत् [अर्थमनुगतोन्वर्थ इति कैयटाः–चा०] । यथा च तपतीति तपनः सूर्यः । नन्द्यादित्वाल्ल्युप्रत्ययः । प्रतापात्संतापजननादन्वर्थः । तथैव स राजा प्रकृतिरञ्जनात् (प्रजानुरागकरणात्) अन्वर्थः सार्थकराजशब्दोऽभूत्। यद्यपि राजशब्दो राजतेर्दीप्त्यर्थात्कानिन्प्रत्ययान्तो न तु रञ्जेस्तथापि धातूनामनेकार्थत्वाद्रञ्जनाद्राजेत्युक्तं कविना ।

(१३.) विशाले तस्य रघोर्लोचने कामं [अकामानुमतौकामं–चा०] कर्णान्तयोर्विश्रान्ते कर्णप्रान्तगते । (चक्षुर्विद्यते यस्यासौ चक्षुष्मान् तस्य भावः) चक्षुष्मत्ता तु (नेत्रत्वं तु) चक्षुः फलं त्वित्यर्थः । सूक्ष्मान् (दुर्विज्ञेयान्) कार्यार्थान्कर्तव्यार्थान् (निर्णयान्) दर्शयति प्रकाशयतीति सूक्ष्मकार्यार्थदर्शिना शास्त्रेणैव । शास्त्रं दृष्टिर्विवेकिनामिति भावः ।

(१४.) अथ (अनंतरं) लब्धस्य राज्यस्य प्रशमनेन परिपन्थिनामनुरञ्जनप्रतीकाराभ्यां स्थिरीकरणेन स्वस्थं समाहितचित्तमेनं रघुं पङ्कजलक्षणा पद्मचिह्ना । श्रियोऽपि विशेषणमेतत् । शरत् । द्वितीया पार्थिवश्री राजलक्ष्मीरिव । समुपस्थिता प्राप्ता । " रक्षा पौरजनस्य देशनगरग्रामेषु गुप्तिस्तथा योधानामपि संग्रहोऽपि तुलया मानव्यवस्थापनम् । साम्यं लिङ्गिषु दानवृत्तिकरणं त्यागः समानेऽर्चनं कार्याण्येव महीभुजां प्रशमनान्येतानि राज्ये नवे " ।

(12.) He became king in the real sense of the word on account of his pleasing the subjects as the moon (verifies the signification of her name) by infusing delight and the sun by his blazing brightness.

(13.) Granted that his large eyes extended up to the extremities of his ears (lit. rested at the borders of his ears); nevertheless the function of his eyes was performed by the S'ástra which penetrated into the minute objects of duty.

(14.) The Autumn whose token is a lotus then waited on him, whose heart had become tranquil by firmly establishing his rule over the kingdom, as if it was a second Goddess of Royal Fortune.

निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः।
प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः॥ १५॥
वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ॥ १६॥
पुण्डरीकातपत्रस्तं विकसत्काशचामरः।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम्॥ १७॥
प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे।
तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः॥ १८॥

(१५.) निःशेषं वृष्टा निर्वृष्टाः। कर्तरि क्तः। अत एव लघवः। तैर्मेघैर्मुक्तवर्त्मा त्यक्तमार्गः। अत एव सुदुःसहः। तस्य रघोर्भानोश्च प्रतापः पौरुषमातपश्च। "प्रतापौ पौरुषातपौ" इति यादवः। युगपत् (समकालं) दिशः (आशाः) व्यानशे व्याप।

(१६.) इन्द्रः। वर्षासु भवं वार्षिकम्। वर्षानिमित्तमित्यर्थः। "वर्षाभ्यष्ठक्" इति ठक्प्रत्ययः। धनुः संजहार। रघुर्जैत्रं जयशीलम्। जेतृशब्दात्तृन्नन्तात् "प्रज्ञादिभ्यश्च" इति स्वार्थेऽण्प्रत्ययः। धनुर्दधौ। हि यस्मात्ताविन्द्ररघू प्रजानामर्थस्य प्रयोजनस्य वृष्टिविजयलक्षणस्य साधनविषये पर्यायेण (क्रमेण) उद्यते कार्मुके याभ्यां तौ पर्यायोद्यत-

(१७.) पुण्डरीकं ["पुण्डरीकं सितांभोजमिति" हैमःकोषः–चा०] सिताम्भोजमेवातपत्रं (छत्रं) यस्य स तथोक्तः। विकसन्ति काशानि काशाख्यतृणकुसुमान्येव चामराणि यस्य स तथोक्तः। ऋतुः शरदृतुः पुण्डरीकनिभातपत्रं काशनिभचामरं तं रघुं विडम्बयामासानुचकार। तस्य रघोः श्रियं पुनः शोभां तु न प्राप (रघोरतिरमणीयत्वात्)। "शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते" इति शाश्वतः।

(१८.) प्रसादेन सुमुखे (मनोहरमुखे) तस्मिन्रघौ विशदप्रभे निर्मलकान्तौ चन्द्रे च

(15.) The valour of the king and the scorching heat of the sun, intolerable on account of his way having been cleared by the clouds, light by reason of emptying themselves, pervaded all the quarters at one and the same time.

(16.) Indra withdrew the rain-bow and Raghu took up the victorious bow; for both had their bows ready alternately for the accomplishment of the welfare of their subjects.

(17.) The Season with its umbrella of the white lotuses, and with its Chámaras (chowries) of the Kás'a-grass flowing, imitated Raghu, but did not obtain his splendour.

(18.) In him who had a gracious good face, and in the moon whose light was clear, the love of those who had eyes was of equal flavour (i. e. all beholders

हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥ १९ ॥
इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥ २० ॥
प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ॥ २१ ॥

द्वयोर्विषये तदा चक्षुष्मतां प्रीतिरनुरागः समरसा समस्वादा (समानप्रतिपत्तिर्जातेत्यर्थः) । तुल्यभोगेति यावत् । " रसो गन्धे रसः स्वादे " इति विश्वः । आसीत् ।

(१९.) हंसानां (राजहंसानां) श्रेणीषु पङ्क्तिषु । तारासु नक्षत्रेषु । कुमुदानि येषु सन्तीति कुमुद्वन्ति । " कुमुद्वान्कुमुदप्रायः " इत्यमरः । " कुमुदनडवेतसेभ्यो ड्मतुप् " तेषु । कुमुदप्रायेष्वित्यर्थः । वारिषु (पानीयेषु) च तदीयानां रघुसंबन्धिनां यशसां विभूतयः संपदः पर्यस्ता इव प्रसारिताः किम् । इत्युत्प्रेक्षा । अन्यथा कथमेषां धवलिमेति भावः ।

(२०.) इक्षूणां छायेक्षुच्छायम् । " छाया बाहुल्ये " इति नपुंसकत्वम् । तत्र निषण्णा इक्षुच्छायानिषादिन्यः । शालीन्गोपायन्ति रक्षन्तीति शालिगोप्यः शस्यपालिकाः स्त्रियः । " कर्मण्यण् " " टिड्ढाणञ्–" इत्यादिना ङीप् । गोप्तू रक्षकस्य तस्य रघोः । गुणेभ्यः [सौन्दर्यादिभ्यः–चा॰] उदयः (प्रकाशः) यस्य तद्गुणोदयं गुणोत्पन्नमाकुमारं कुमारादारभ्य कथोद्घातः कथारम्भो यस्य तत् । कुमारैरपि स्तूयमानमित्यर्थः । यशो जगुर्गायन्ति स्म । अथवा कुमारस्य सतो रघोर्याः कथा इन्द्रविजयादयस्तत आरभ्याकुमारकथम् । तत्राप्यभिविधावव्ययीभावः । आकुमारकथमुद्घातो यस्मिन्कर्मणि । गानक्रियाविशेषणमेतत् । " स्यादभ्यादानमुद्घात आरम्भः " इत्यमरः ।

(२१.) महौजसः कुम्भयोनेरगस्त्यस्य । " अगस्त्यः कुम्भसंभवः " इत्यमरः । उदयादम्भः प्रससाद प्रसन्नं बभूव । महौजसो रघोरुदयादभिभवाशङ्कि द्विषतां (शत्रूणां) मनश्चुक्षुभे कालुष्यं प्राप (कश्मलीजातं) । " अगस्त्योदये जलानि प्रसीदन्ति " इत्यागमः ।

---

entertained equal feelings of love toward them both, to the king for his sweet smiling face and to the moon for her bright lustre).

(19.) Might it be that the excellences of his glory were scattered in the rows of flamingoes, in stars, and in waters abounding in white lotuses ?

(20.) Of him, the protector of the world, the women who sat in the deep shade of sugar-cane plants and protected the crops of the S'áli-rice sang the glory, arising from his virtues, the description of which commenced from the heroic deeds of his boyhood.

(21.) At the rise of the Pitcher-born sage (a star known by the name Agastya) of great might, the water became serene, while at the rise of Raghu the enemies' mind apprehending defeat became agitated.

मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥ २२ ॥
प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥ २३ ॥

सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ॥ २४ ॥

(२२.) मदोदग्रा मदोद्धताः । ककुदेषामस्तीति ककुद्मन्तः । महाककुद इत्यर्थः । यवादित्वान्मकारस्य वत्वाभावः । सरितां कूलान्युद्रुजन्तीति कूलमुद्रुजाः । " उदि कूले रुजिवहोः " इति खश्प्रत्ययः । " अरुर्द्विष–" इत्यादिना मुमागमः । महान्त उक्षाणो महोक्षाः (दर्पिष्टा बलीवर्दाः) । " अचतुर–" इत्यादिना निपातनादकारान्तः । लीलाखेलं (लीलया निरायासेन खेलं विसृत्वरं–चा०] विलाससुभगं तस्य रघोरुत्साहवतो वपुष्मतः परभञ्जकस्य विक्रमं शौर्यमनुप्रापुरनुचक्रुः [रघोर्विक्रममनुगताः । वृषपक्षे तु विक्रमं गतिविशेषः । रघुविक्रमोऽपि महोदयः ककुद्राजचिह्नं तद्युक्तो यात्रायां करितुरगादि खुराद्यभिघातेन सरितां कूलभेदको भवति–चा०] ।

(२३.) मदस्येव गन्धो येषां तैर्मदगन्धिभिः । " उपमानाच्च " इतीकारः समासान्तः । सप्तपर्णानां वृक्षविशेषाणाम् । " सप्तपर्णो विशालत्वक्शारदो विषमच्छदः" इत्यमरः । प्रसवैः पुष्पैराहताः (ताडिताः) तस्य रघोर्नागा गजाः । "गजेऽपि नागमातङ्गौ " इत्यमरः । असूययेवाहतिनिमित्तया स्पर्धयेव सप्तधैव प्रसुस्रुवुर्मदं ववृषुः [शरदि मदकालः–व०] प्रतिगजगन्धाभिमानादिति भावः । " करात्कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिः " इति पालकाव्ये [तालुवक्षःकपोलेभ्यः शंखकुम्भकरे तथा । रोमकुंभकटिभ्यश्च दानंप्रक्षरति द्विपः–सु०] कराग्रनासारन्ध्राभ्यामित्यर्थः ।

(२४.) सरितः (नदीः) गाधाः (स्वल्पजलाः अतएव) सुप्रतराः कुर्वती । पथो मार्गांश्चाश्यानकर्दमाञ्शुष्कपङ्कान्कुर्वती । " संयोगादेरातो धातोर्यण्वतः " इति श्यतेर्निष्ठातस्य नत्वम् । शरच्छरदृतुस्तं रघुं शक्तेरुत्साहशक्तेः प्रथमं प्राग्यात्रायै दण्डयात्रायै चोदयामास प्रेरयामास । प्रभावमन्त्रशक्तिसंपन्नस्य शरत्स्वयमुत्साहमुत्पादयामासेत्यर्थः ।

(22.) Great bulls, with (large) humps, raging with fury and undermining the banks of rivers, imitated his playfully sportive valour.

(23) The elephants of Raghu, being struck by the rut-smelling flowers of Sapta-parna trees, rained their rut even in seven ways as if through jealousy.

(24.) The S'arad-season which made the rivers fordable (shallow) and the roads mud-dried urged him on to an expedition of conquest, prior to his own enterprising energy (before his energy inspired him to do so.)

तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ॥ २५ ॥
स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ २६ ॥
अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥ २७ ॥

(२५.) वाजिनामश्वानां नीराजनाविधौ [उक्तंच । द्वादश्यामष्टम्यां कार्तिकशुक्लस्य पंचदश्यां वा अश्वगजस्य हि कुर्यान्नीराजमसंज्ञितां शांति–चा०] नीराजनाख्ये शान्तिकर्मणि सम्यग्विधिवद्धुतो होमसमिद्धो वह्निः (अग्निः) प्रगता दक्षिणं प्रदक्षिणम् । तिष्ठद्गुप्रभृतित्वादव्ययीभावः । प्रदक्षिणं यार्चिर्ज्वाला तस्या व्याजेन (प्रदक्षिणावर्तिज्वालामुखेन अतएव) हस्तेनेव तस्मै जयं ददौ । उक्तमाहवयात्रायाम्—" इद्धः प्रदक्षिणगतो हुतभुङ्नृपस्य धात्रीं समुद्ररशनां वशगां करोति " इति । वाजिग्रहणं गजादीनामप्युपलक्षणं तेषामपि नीराजनाविधानात् [नारस्य शांत्युदकस्य अंजनं क्षेपः अत्र नीराजं आरात्रिकामित्यर्थः । गजाश्वमंगलाय राजानः प्रयाणसमये नीराजनां विधिं कुर्वन्तीत्यागमः–सु०] ।

(२६.) गुप्तौ मूलं स्वनिवासस्थानं प्रत्यन्तः प्रान्तदुर्गं च येन स गुप्तमूलप्रत्यन्तः । शुद्धपार्ष्णिरुद्धृतपृष्ठशत्रुः सेनया रक्षितपृष्ठदेशो वा । अयान्वितः (अयेन शुभावहविधिना अन्वितो युक्तः) शुभदैवान्वितः । " अयः शुभावहो विधिः " इत्यमरः । स रघुः षड्विधं मौलभृत्यादिरूपं बलं सैन्यम् । " मौलं भृत्यः सुहृच्छ्रेणी द्विषदाटविकं बलम् " इति कोशः। [हस्त्यश्वरथपादातिना विकाटविकाश्च ये इति कश्चित्(?) । तथाचोक्तं । देवानभ्यर्च्य विप्रांश्च गुरूंश्च शुभवासरे षड्विधं तु बलं व्यूह्यद्विषतोभिमुखं व्रजेत्–चा०] आदाय (गृहीत्वा) दिशां जिगीषया जेतुमिच्छया प्रतस्थे (चचाल) ।

(२७.) वयोवृद्धाः (जरठाः) पौरयोषितस्तं रघुं प्रयान्तं लाजैराचारलाजैः । मन्दरोद्धूतैः (मन्दराचलभ्रमणोत्थितैः) पृषतैर्बिन्दुभिः क्षीरोर्मयः क्षीरसमुद्रोर्मयः (तरंगाः) अच्युतं विष्णुमिव । अवाकिरन्पर्यक्षिपन् [इति यात्राकालस्याचारः–चा०] ।

(25.) The sacrificial fire, in which oblations were offered according to the rite, in the military ceremony of horses named Nîrâjanâ, granted him triumph as if by its own hand under the pretext of its flame being to the right side.

(26.) Thus followed by good fortune he, having his metropolis and the frontier fortresses guarded (by garrisons) and having taken (with him) an army consisting of six kinds, with the rear cleared of his foes, set out with the ambition of conquering the quarters.

(27.) The women of the city, advanced in years, showered on him the Lâjâs (fried grains), as the waves of the milk-ocean sprinke Vishnu with drops of milk tossed up by the Mandâra mountain.

स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ॥ २८ ॥
रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसंनिभैः।
भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलम् ॥ २९ ॥
प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ॥ ३० ॥

(२८.) प्राचीनबर्हिर्नाम कश्चिन्महाराज इति केचित्। प्राचीनबर्हिरिन्द्रः। "पर्जन्यो मघवा वृषा हरिहयः प्राचीनबर्हिस्तथा" इतीन्द्रपर्यायेषु हलायुधाभिधानात्। तेन तुल्यः (समानः) स रघुः। अनिलेनानुकूलवातेनोद्धूतैः (कंपितैः) केतुभिर्ध्वजैरहितानिर्पूंस्तर्जयान्निव भर्त्सयान्निव [अन्योऽपिअङ्गुल्यादिनातर्जयति–चा०] तर्जिभर्त्स्योरनुदात्तत्वेऽपि चक्षिङो ङित्करणेनानुदात्तेत्त्वानिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्परस्मैपदमिति वामनः। प्रथमं प्राचीं दिशं (पूर्वदिशं) ययौ [इति युग्मं। द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकं। कलापकं चतुर्भिः स्यात् तदूर्ध्वं कुलकं स्मृतं–चा०]।

(२९.) किं कुर्वन्। स्यन्दनोद्धूतैः (रथोत्थापितैः) रजोभिः (धूलिभिः) घनसंनिभैर्वर्णतः क्रियातः परिमाणतश्च मेघतुल्यैर्गजै (हस्तिभिः) च यथाक्रमं व्योमाकाशं भुवस्तलमिव भूतलं च व्योमेव कुर्वन्। ययाविति पूर्वेण संबन्धः।

(३०.) अग्रे प्रतापस्तेजोविशेषः [शत्रूणां भयजननवार्ताप्रतापः–व०]। "स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्" इत्यमरः। ततः शब्दः सेनाकलकलः। तदनन्तरं परागो धूलिः। "परागः पुष्परजसि धूलिस्नानीययोरपि" इति विश्वः। पश्चाद्रथादि रथाश्वादिकं चतुरङ्गबलम्। इतीत्थं चतुःस्कन्धेव चतुर्व्यूहेव। "स्कन्धः प्रकाण्डे कायांशे विज्ञानादिषु पञ्चसु। नृपे समूहे व्यूहे च" इति हैमः। सा चमूः (सैन्यं) ययौ (जगाम)।

(३१.) स रघुः शक्तिमत्त्वात्समर्थत्वात् [अतिखननव्यापारेण–चा० प्रभूतकटकसैन्यसामग्रीतः– सु०] मरुपृष्ठानि निर्जलस्थानानि। "समानौ मरुधन्वानौ" इत्यमरः। उदम्भांस्युद्धृतजलानि चकार। नाव्या नौभिस्तार्या नदीः। "नाव्यं त्रिलिङ्गं नौतार्ये" इत्यमरः।

(28-29.) He who was equal to Pràchìnabarhi (Indra) first went to the east, as if terrifying his enemies by means of his banners shaken by the wind ; making the surface of the earth like sky and the sky like the earth's surface, by the dust raised by his chariots and by the elephants resembling clouds.

(30.) First went his glory, then the noise (of the army), then the dust and lastly the chariots and others. Thus the army had, as it were, four divisions (or thus the army proceeded in the Chatus-skandha form of resembling array).

मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ॥ ३१ ॥
स सेनां महती कर्षन्पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥ ३२ ॥
त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्वणो मार्गः पादपैरिव दन्तिनः ॥ ३३ ॥
पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥ ३४ ॥

“ नौवयोधर्मविषमूल–” इत्यादिना यत्प्रत्ययः । (सेतुबन्धादिना) सुप्रतराः सुखेन तार्याश्चकार (चरणतार्याः कृताः इत्यर्थः) । विपिनान्यरण्यानि । “अटव्यरण्यं विपिनम्” इत्यमरः। (छेदादिना) प्रकाशानि निर्वृक्षाणि चकार। शक्त्युत्कर्षात्तस्यागम्यं किमपि नासीदिति भावः ।

(३२.) महती (संख्यातीतामर्थाद्विशालां बृहतींवा) सेनां (चमूं) पूर्वसागरगामिनीं (पूर्वसमुद्रगमनशीलां) कर्षन् (धारयन्) स रघुः । हरस्य (रुद्रस्य) जटाभ्यो भ्रष्टां (अधःपतितां) गङ्गां कर्षन् । सापि पूर्वसागरगामिनी । भगीरथ इव । बभौ । भगीरथो नाम कश्चित्कपिलदग्धानां सागराणां नप्ता तत्पावनाय ‘हरकिरीटाद्गङ्गां प्रवर्तयिता राजा । यत्संबन्धाद्गङ्गा च भागीरथीति गीयते ।

(३३.) “ फलं फले धने बीजे निष्पत्तौ भोगलाभयोः ” इति केशवः । फलं लाभम् । वृक्षपक्षे प्रसवं च । त्याजितैः । त्यजेर्ण्यन्ताद्द्विकर्मकादप्रधाने कर्मणिक्तः । उत्खातैः स्वपदाच्च्याविततैः । अन्यत्रोत्पाटितैः । बहुधा भग्नै रणे जितैः । अन्यत्र छिन्नैः । नृपैः पादपैर्दन्तिनो गजस्येव । तस्य रघोर्मार्ग उल्वणः प्रकाश आसीत् । “ प्रकाशं प्रकटं स्पष्टमुल्वणं विशदं स्फुटम् ” इति यादवः ।

(३४.) जयी जयनशीलः । “ जिदृक्षिविश्री–” इत्यादिनेनिप्रत्ययः । स

(31.) By means of his supernatural power he made the surfaces of sandy deserts abound with water, the navigable rivers easily fordable and the deep woods clear (bereft of their trees).

(32.) He (Raghu), drawing (taking with him) his great army going toward the eastern sea, shone (appeared) like Bhagîratha who led the Gangà fallen from the matted hair of Hara.

(33.) His way was free from obstacles at the hands of kings who were compelled to surrender their wealth, extirpated and conquered in manifold ways, like that of an elephant cleared of trees which are bereft of their fruits, up-rooted and cut down in various ways

(34.) Traversing all the eastern countries in this manner, the conqueror treached the coast of the great ocean verdant with the forests of Táli-trees (palmrees).

अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥ ३५ ॥
वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान्गङ्गास्रोतोन्तरेषु सः ॥ ३६ ॥
आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥ ३७ ॥

पुरो भवान्पौरस्त्यान्प्राच्यान् । " दक्षिणापश्चात्पुरसस्त्यक् " इति त्यक्प्रत्ययः । तांस्तान् । सर्वानित्यर्थः । वीप्सायां द्विरुक्तिः जनपदान्देशानाक्रामन् (आददानः) तालीवनैः श्यामं (कृष्णं हरितं वा) महोदधेरुपकण्ठं (तटं) अन्तिकं प्राप ।

(३५.) अनम्राणाम् । कर्मणि षष्ठी । समुद्धर्तुरुन्मूलयितुस्तस्माद्रघोः सकाशात् । " भीत्रार्थानां भयहेतुः" इत्यपादानत्वात्पञ्चमी । सिन्धुरयान्नदीवेगादिव सुह्मैः [ब्रह्मदेशीयैराजभिः –व०सु०] सुह्मदेशीयैः । सुह्मादयः शब्दा जनपदवचनाः क्षत्रियमाचक्षते । वैतसीं वेतसः संबन्धिनीं (नम्रतारूपां) वृत्तिम् । प्रणतिमित्यर्थः । आश्रित्य (अधिष्ठाय) । आत्मा संरक्षितः । अत्र कौटिल्यः—" बलीयसाभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेतसधर्ममातिष्ठेत् " इति [यथानदीवेगात् वेतसाः वृक्षाः नम्रवृत्तिं कृत्वात्मानं रक्षयन्ति तद्वत्तैः सुह्मैरात्मा रक्षितः–सु०]।

(३६.) नेता नायकः स रघुर्नौभिः (पोतैः) साधनैरुद्यतान्संनद्धान्वङ्गान् (वंगदेशीयान्) राज्ञस्तरसा बलेन । " तरसी बलरंहसी " इति यादवः । उत्खायोन्मूल्य गङ्गाया स्रोतसां प्रवाहाणामन्तरेषु द्वीपेषु जयस्तम्भान् (जयसूचकान् स्तंभान्) निचखान । स्थापितवानित्यर्थः [नगराणि जित्वा तत्र स्तंभाः क्रियन्ते इत्यागमः–सु०] ।

(३७.) आपादपद्ममङ्घ्रिपद्मपर्यन्तं प्रणताः । अत एवोत्खाताः पूर्वमुद्धृता अपि प्रतिरोपिताः पश्चात्स्थापितास्ते वङ्गाः । कलमा इव शालिविशेषा इव । " शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी " इत्यमरः । तेऽप्यापादपद्मं पादपद्ममूलपर्यन्तं प्रणताः [अन्यत्र मञ्जरीभारेण नम्राः कलमाः बहु फलन्ति–चा०] । "पादा बुध्नतुरीयांशशैलप्रत्यन्तपर्वताः" इति विश्वः । उत्खातप्रतिरोपिताश्च । रघुं फलैर्धनैः । अन्यत्र सस्यैः । संवर्धयामासुः । "फ-

(35.) From him, the extirpator of the proud, the Suhmas saved their lives by adopting the course of the Vetas (reed), as if from the torrent of a river.

(36) Having rooted out the Vangas with great force who were haughty on account of their fleet of ships, he—the leader—erected triumphal columns in the intervals between the streams of the Gangá.

(37.) They, who lowly bowed down to his lotus-like feet and who (therefore) were reinstated after having first been dethroned, honored Raghu by presenting him with their wealth like Kalama plants which are bent down to their roots and which present fruit (corn) when they are replanted after having been first uprooted.

स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ ३८ ॥
स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥ ३९ ॥
प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४० ॥

लं फले धने बीजे निष्पत्तौ भोगलाभयोः । सस्ये " इति केशवः [तदुक्तं भारविणा । तुतोष पश्यन् कलमस्य सोधिकं सवारिजे वारिणि रामणीयकमिति -चा०] ।

(३८.) स रघुर्बद्धा द्विरदा एव सेतवो यैस्तैः (कारणभूतैः) सैन्यैः कपिशां नाम नदीं तीर्त्वा । उत्कलै राजभिरादर्शितपथः संदर्शितमार्गः सन् [उत्कलदेशीयास्तु संग्रामदिने एव रघुचरणयोन्यपतन्नित्यर्थः—चा०] कलिङ्गाभिमुखो ययौ (जगाम) ।

(३९.) स रघुर्महेन्द्रस्य कुलपर्वतविशेषस्य । " महेन्द्रो मलयः सह्यः शक्तिमानृक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः " इति विष्णुपुराणात् । मूर्ध्नि तीक्ष्णं दुःसहं प्रतापम् । यन्ता सारथिः (आधोरणः) गम्भीरवेदिनः [शृणिमगणयतः। त्वग्भेदाद्रुधिरस्रावान्मांसस्यागलनादपि । संज्ञां न लभते यस्तु विद्याद्गम्भीरवेदिनमिति पालकाव्ये -चा०] द्विरदस्य गजविशेषस्य मूर्ध्नि तीक्ष्णं निशितमङ्कुशमिव । न्यवेशयन्निक्षिप्तवान् । " त्वग्भेदाच्छोणितस्रावान्मांसस्य क्रथनादपि । आत्मानं यो न जानाति स स्याद्गम्भीरवेदिता " इति राजपुत्रीये । " चिरकालेन यो वेत्ति शिक्षां परिचितामपि । गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः " इति मृगचर्मीये ।

(४०.) गजसाधनः सन् (गजाः साधनं सेनाङ्गं यस्य सोऽसंख्यहस्तिश्रेणीयुक्तः) । कालिङ्गः कलिङ्गानां राजा । " द्व्यञ्मगधकलिङ्ग–" इत्यादिनाण्प्रत्ययः । अस्त्रैरायुधैस्तं रघुम् । पक्षाणां छेदे (खंडने) उद्यतमुद्युक्तं शक्रं (इन्द्रं) शिलावर्षी (पाषाणान्मुञ्चन्) पर्वत इव । प्रतिजग्राह प्रत्यभियुक्तवान् ।

(38.) Having got across the river Kapis'á with his troops who had built bridges of their elephants, he to whom the way was pointed out by the Utkalas proceeded toward Kalinga.

(39.) He planted his unbearable valour on the summit of the Mahendra mountain, as the elephant-driver pierces his sharp goad on the temples of an unwieldy elephant, that does not mind the pricking of the goad.

(40.) The king of the Kalingas, who had great resources in his elephants, received him with missiles as a mountain received Indra, prepared to cut off its wings, with showers of stones.

द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥ ४१ ॥
ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवं च पपुर्यशः ॥ ४२ ॥
गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ ४३ ॥

(४१.) काकुत्स्थो रघुस्तत्र (कलिंगदेशे) महेन्द्राद्रौ द्विषां नाराचदुर्दिनं नाराचानां बाणविशेषाणां [लोहशराणां–चा०] दुर्दिनम् । लक्षणया वर्षमुच्यते । विषह्य सहित्वा सद्यथाशास्त्रं मङ्गलस्नात इव विजयमङ्गलार्थमभिषिक्त इव । जयश्रियं प्रतिपेदे प्राप [वैरिबाणवारवर्षणसहनानंतरं रघुररीन् व्यजेष्टेत्यर्थः–चा०] । " यत्तु सर्वौषधिस्नानं तन्माङ्गल्यमरोचकम् " इति यादवः ।

(४२.) तत्र महेन्द्राद्रौ । युध्यन्त इति योधाः (सुभटाः) । पचाद्यच् । रचिताः कल्पिता आपानभूमयः पानयोग्यप्रदेशा यैस्ते तथोक्ताः सन्तो नारिकेलासवं नारिकेलमद्यं ताम्बूलीनां नागवल्लीनां दलैः पपुः । तत्र विजह्रुरित्यर्थः । शात्रवं यशश्च पपुः । जह्रुरित्यर्थः ।

(४३.) धर्मविजयी धर्मार्थं विजयशीलः [धर्मविजयी लोभविजयी असुरविजयी चेति त्रिविधो राजा । यः शत्रुं निर्जित्य तदीयां नृपश्रियं नीत्वा शत्रुं तस्मिन्नेव स्थाने स्थापयति स धर्मविजयी । यः शत्रुं निर्जित्य तदीयां श्रियं मेदिनींच गृहीत्वा प्राणैर्न विकुरुते स लोभविजयी । यः शत्रुं हत्वा तदीयां श्रियं मेदिनीं च गृह्णाति स असुरविजयीति – व०] स नृपो रघुः । गृहीतश्चासौ प्रतिमुक्तश्च गृहीतप्रतिमुक्तः । तस्य महेन्द्रनाथस्य कालिङ्गस्य श्रियं (लक्ष्मीं) जहार (हृतवान्) । धर्मार्थमिति भावः । मेदिनीं (भुवं) तु न जहार । शरणागतवात्सल्यादिति भावः ।

(४४.) ततः (अनन्तरं) प्राचीविजयानन्तरं फलवत्पूगमालिना फलितक्रमुकश्रेणीमता। व्रीह्यादित्वादिनिप्रत्ययः । वेलायाः समुद्रकूलस्य तटेनोपान्तेनैवागस्त्येनाचरितां (सेवितां) आशां

(41.) There the descendant of Kakutstha, having endured the shower of darts of (from) his foes, and (thus) auspiciously bathed, as it were, according to the precepts, obtained the fortune of victory.

(42.) There the warriors having constructed their drinking grounds by means of the leaves of the betel-creepers drank up the ale produced from the cocoanut trees with the glory of their enemies.

(43.) The righteous conquerer took away the wealth and not the territory of the lord of Mahendra (who was) first captured and then released.

ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशामनाशास्यजयो ययौ ॥ ४४ ॥
स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥ ४५ ॥
बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः ॥ ४६ ॥

दक्षिणां दिशमनाशास्यजयः (नान्यैः पुरुषैः आशास्यते प्राप्यते जयो विजयश्रीर्यस्य सः) अयत्नसिद्धत्वादप्रार्थनीयजयः सन् ययौ (जगाम) । " अगस्त्यो दक्षिणामाशामाश्रित्य नभसि स्थितः । वरुणस्यात्मजो योगी विन्ध्यवातापिमर्दनः " इति ब्रह्मपुराणे ।

(४९.) स रघुः । गजानां दानेन मदेन सुगन्धिना सुरभिगन्धिना । " गन्धस्य–" इत्यादिनेकारादेशः समासान्तः । यद्यपि गन्धस्येत्वे तदेकान्तग्रहणं कर्तव्यमिति नैसर्गिकगन्धविवक्षायामेवेकारादेशः । तथापि निरङ्कुशाः कवयः । तथा माघकाव्ये– " ववुरयुक्छदगुच्छसुगन्धयः सततगास्ततगानगिरोऽलिभिः" नैषधे च–" अयं हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा " इति । न कर्मधारयान्मत्वर्थीय इति निषेधादिनिप्रत्ययपक्षोऽपि जघन्य एव । सेनायां समवेताः सैन्याः । "सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते" इत्यमरः । "सेनाया वा" इति ण्यप्रत्ययः । तेषां परिभोगेन [जलक्रीडादिना–चा० स्नानादिक्रियया–ध०] कावेरीं नाम सरितं सरितां पत्युः समुद्रस्य शङ्कनीयां न विश्वसनीयां (कुलटां) इवाकरोत् । संभोगलिङ्गदर्शनाद्भर्तुरविश्वासो भवतीति भावः ।

(४६.) विजिगीषोर्विजेतुमिच्छोर्गताध्वनः (प्रोल्लंघितमार्गस्य) तस्य रघोर्बलैः सैन्यैः । "बलं शक्तिर्बलं सैन्यम् इति यादवः । मारीचेषु मरीचवनेषूद्भ्रान्ताः परिभ्रान्ता हारीताः पक्षिविशेषा यासु ताः [मारीचानां गन्धेन भक्षणेन वा उद्भ्रान्तास्त्रस्ताः इतस्ततश्चलिता हारीताः पक्षिविशेषाः अर्थात् शुकाः यासु ताः–ध०] "तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः" इत्यमरः । मलयाद्रेः (मलयाचलस्य) उपत्यका आसन्नभूमयः [अधोभूमयः–सु० तटभुवः

(44.) Thence he passed, not desiring any conquest, only by the side of the sea-coast full of rows of the betel-trees laden with fruits to the direction presided over by Agastya.

(45.) By the enjoyment (in the water) of the army, bearing the sweet smell of the elephantine juice in it, he made the Káverí, to be suspected, as it were, by the lord of rivers.

(46.) The army of him who was desirous of conquest and who had travelled a long way, encamped in the valleys of the Malaya mountain, in the pepper-groves of which the green pigeons were wandering about.

ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४७ ॥
भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत्करिणां ग्रैवं त्रिपदीच्छेदिनामपि ॥ ४८ ॥
दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ४९ ॥

-म०] "उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका" इत्यमरः । "उपाधिभ्यां त्यकन्" इत्यादिना त्यकन्प्रत्ययः । अध्युषिताः (अधिष्ठिताः) उपत्यकासूषितामित्यर्थः । " उपान्वध्याङ्वसः " इति कर्मत्वम् ।

(४७.) अश्वैः क्षुण्णानाम् (चूर्णानां) एलानामेलालतानामुत्पतिष्णव उत्पतनशीलाः (वायुवशादिति शेषः) । "अलङ्कृञ्" इत्यादिनेष्णुच्प्रत्ययः । फलरेणवः फलरजांसि तुल्यगन्धिषु समानगन्धिषु। सर्वधनीतिवदिन्नन्तो बहुव्रीहिः । मत्तेभानां (मत्तगजानां मदोत्कटहस्तिनां वा) कटेषु (कुंभस्थलेषु) ससञ्जुः सक्ताः । "गजगण्डे कटौकटौ" इति कोषः ।

(४८.) चन्दनानां चन्दनद्रुमाणां भोगिवेष्टनमार्गेषु सर्पवेष्टनान्निम्नेषु समर्पितं सज्जितं त्रिपदीच्छेदिनां [त्रिपदीं छिन्दन्तीति त्रिपदीच्छेदिनः तेषां सुखावस्थात्यागिनामपि । सुखावस्थितस्य गजस्य पदत्रयावस्था त्रिपदीत्युच्यते–व०] पादशृङ्खलच्छेदकानामपि । " त्रिपदी पादबन्धनम् " इति यादवः । करिणाम् (गजानां) ग्रीवासु भवं ग्रैवं कण्ठबन्धनम् । " ग्रीवाभ्योऽण्च " इत्यण्प्रत्ययः । नास्रसन्न स्रस्तमभूत् । " द्युद्भ्यो लुङि " इति परस्मैपदे पुषादित्वादङ् । " अनिदिताम्–" इति नकारलोपः ।

(४९.) दक्षिणस्यां दिशि रवेरपि (सूर्यस्यापि) तेजः (प्रकाशः) मन्दायते मन्दं भवति । लोहितादित्वात्क्यष्प्रत्ययः । " वा क्यषः " इत्यात्मनेपदम् । दक्षिणायने तेजोमान्द्यादिति भावः । तस्यामेव । दिशि पाण्ड्याः । पाण्डूनां जनपदानां राजानः पाण्ड्याः । पाण्ड्योडड्यण्वक्तव्यः । रघोः प्रतापं न विषेहिरे न सोढवन्तः । सूर्यविजयिनोऽपि विजितवानिति नायकस्य महानुत्कर्षो गम्यते ।

(47.) The dust of the fruits of the Elà-creepers (cardamom-plants) trodden by the horses, rose up and clung to the temples of intoxicated elephants, like in scent to it.

(48.) The neck-rope of the elephants, powerful enough to break down even the girth, tied round in the groves cut into the bark of the sandle trees by the constant coiling of the snakes, did not give way (did not become loose or break off).

(49.) In the southern quarter the lustre even of the sun becomes dim ; in that same quarter the Pàndyas could not bear the valour of Raghu.

ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव संचितम् ॥ ५० ॥
स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥ ५१ ॥
असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता ।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ॥ ५२ ॥

(५०.) ते पाण्ड्यास्ताम्रपर्ण्या नद्या समेतस्य संगतस्य महोदधेः संबन्धि संचितं मुक्तासारं मौक्तिकवरम् । "सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु" इत्यमरः । स्वं स्वकीयं संचितं यश इव । तस्मै रघवे निपत्य प्रणिपत्य ददुः । यशसः शुभ्रत्वादौपम्यम् । ताम्रपर्णीसंगमे मौक्तिकोत्पत्तिरिति प्रसिद्धम् ।

(५१-५२.) युग्ममेतत् । असह्यविक्रमः (सोढुमशक्यः असह्यः विक्रमः पौरुषातिरेकः यस्य) स रघुस्तटेषु सानुष्वालीनचन्दनौ व्याप्तचन्दनद्रुमौ । " गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्" इत्यमरः । स्तनपक्षे प्रान्तेषु व्याप्तचन्दनानुलेपौ । तस्या दक्षिणस्या दिशः स्तनाविव (कुचाविव) स्थितौ मलयदर्दुरौ नाम शैलौ यथाकामं यथेच्छं निर्विश्योपभुज्य । "निर्वेशो भृतिभोगयोः" इत्यमरः । उदकान्यस्य सन्तीत्युदन्वानुदधिः । "उदन्वानुधौ च" इति निपातः उदन्वता दूरान्मुक्तं दूरतस्त्यक्तम् । "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इति समासः । " पञ्चम्याः स्तोकादिभ्यः" इत्यलुक् । स्रस्तांशुकं (विगलितवसनं) मेदिन्याः (भूमेः) नितम्बमिव (श्रोणितटमिव) स्थितं सह्यं सह्याद्रिमलङ्घयत्प्राप्तोऽतिक्रान्तो वा । संप्रति प्रतीचीं दिशमभिययावित्याह ।

(५३.) अपरान्तानां [कौङ्कणानां—व०] पाश्चात्यानां जय उद्यतैरुद्युक्तैः । "अपरान्तास्तु पाश्चात्यास्ते च सूर्पारिकादयः" इति यादवः । विसर्पद्भिर्गच्छद्भिः [प्रसरणशीलैः—चा०] तस्य रघोरनीकैः सैन्यैः । "अनीकं तु रणे सैन्ये" इति विश्वः । अर्णवो रामस्य जामदग्न्य-

(50.) They bowing down to him gave him the best of pearls taken out of the great ocean joined with the river Tâmraparṇî (at its mouth), (thus giving him), as it were, their (accumulated) glory.

(51-52.) Having enjoyed at his pleasure, the mountains Malaya and Dardura, which were covered with sandle trees on the margin, as if they were the two breasts of that quarter, with their surface beasmeared with yellow sandle, he whose prowess was unbearable, got over the mountain Sahya, left afar by the ocean (far away from the ocean) as if it were the hip of the earth, the woven garment on which is fallen down.

तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः ।
रामास्त्रोत्सारितोऽप्यासीत्सह्यलग्न इवार्णवः ॥

भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ५४ ॥

मुरलामारुतोद्धूतमगमत्कैतकं रजः ।
तद्योधवारबाणानामयत्नपटवासताम् ॥ ५५ ॥

अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः ।
वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥ ५६ ॥

स्यास्त्रैरुत्सारितः परिसारितोऽपि सह्यलग्न इवासीत् । सैन्यं द्वितीयोऽर्णव इवादृश्यतेति भावः ।

(५४.) तेन रघुणा भयेनोत्सृष्टविभूषाणां परिहृतभूषणानां केरलयोषितां केरलाङ्गनानामलकेषु (कुंतलेषु) चमूरेणुः सेनारजश्चूर्णस्य कुङ्कुमादिरजसः ["वासयोगस्तु चूर्णं स्यादिति" हैमःकोषः—चा०] प्रतिनिधीकृतः (स्थानीयः कृतः) । एतेन योषितां पलायनं चमूनां च तदनुधावनं ध्वन्यते ।

(५५.) मुरला नाम केरलदेशेषु काचिन्नदी । तस्या मारुतेन (वायुना) उद्धूतमुत्थापितं कैतकं केतकीसंबन्धि रजः (परागः) तद्योधवारबाणानां रघुभटकञ्चुकानाम् । " कञ्चुको वारबाणोऽस्त्री " इत्यमरः । अयत्नपटवासतामयत्नसिद्धवस्त्रवासनाद्रव्यत्वमगमत् । "पिष्टातः पटवासकः " इत्यमरः ।

(५६.) चरतां गच्छतां वाहानां वाजिनाम् । "वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः" इत्यमरः । गात्रशिञ्जितैर्गात्रेषु (गमनवशाद् ग्रैवेयादिभूषणयोगेन) शब्दायमानैः । कर्तरि क्तः । वर्मभिः कवचैः पवनेनोद्धूतानां कम्पितानां राजतालीवनानां ध्वनिरभ्यभूयत तिरस्कृतः ।

(53.) The sea, though pushed afar by the missiles of Paraśurāma, appeared (lit. was) as if touching the mountain Sahya on account of his extensive army (or moving troops), prepared to conquer the western people (the Kaunkaṇas).

(54.) By him, the dust raised by the army was made a substitute for the saffron powder in the hair of the women of Kerala who had, through fear, rejected their decorations.

(55.) The pollen of the Ketakī-flower raised up by the wind from the river Muralā served easily (lit. without any efforts) as the dress-perfume of the armours of his warriors.

(56.) The sound of the betel-nut groves shaken by the wind was drowned (lit defeated) by the (clash of) armours that resounded on the limbs of his horses in motion.

खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥ ५७ ॥
अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥ ५८ ॥
मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ ५९ ॥

(५७.) खर्जूरीणां तृणद्रुमाविशेषाणाम् । "खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः" इत्यमरः । स्कन्धेषु प्रकाण्डेषु । "अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरोः" इत्यमरः । नद्धानां बद्धानां करिणां (गजानां) मदोद्गारेण मदस्रावेण सुगन्धिषु । "गन्धस्य" इत्यादिनेकारः । कटेषु गण्डेषु पुन्नागेभ्यो नागकेशरेभ्यः ["पुन्नागः केशरोऽशोकः" इत्यभिधानाचिन्तामणिः—चा०] पुन्नागपुष्पाणि विहाय । ल्यब्लोपे पञ्चमी । शिलीमुखा अलयः पेतुः । "अलिबाणौ शिलीमुखौ" इत्यमरः । ततोऽपि सौगन्ध्यातिशयादिति भावः ।

(५८.) उदन्वानुदधी रामाय जामदग्न्याय । अभ्यर्थितो याचितः सन् । अवकाशं स्थानं ददौ किल । किलेति प्रसिद्धौ [पुराणे श्रूयते इति—चा०] । रघवे त्वपरान्तमहीपालव्याजेन (पाश्चात्यानां भूपानां छद्मना) करं बलिं ददौ । " बलिहस्तांशवः कराः " इत्यमरः । अपरान्तानां समुद्रमध्यदेशवर्तित्वात्तैर्दत्ते करे समुद्रदत्तत्वोपचारः । करदानं च भीत्या न तु याच्ञयेति रामाद्रघोरुत्कर्षः ।

(५९.) तत्र स रघुर्मत्तानामिभानां (हस्तिनां) रदनोत्कीर्णानि दन्तक्षतान्येव । भावे क्तः । व्यक्तानि स्फुटानि विक्रमलक्षणानि पराक्रमचिह्नानि विजयवर्णावलिस्थानानि यस्मिंस्तं तथोक्तं त्रिकूटमेवोच्चैर्जयस्तम्भं (उच्छ्रितं जयसूचकं स्तम्भं) चकार । गाढप्रकाशस्त्रिकूटोऽद्रिरेवोत्कीर्णवर्णस्तम्भ इव रघोर्जयस्तम्भोऽभूदित्यर्थः ।

(६०.) ततः (त्रिकूटपर्वतजयस्तम्भस्थापनानन्तरं) स रघुः । संयमी योगी तत्त्वज्ञानेन (परमतत्त्वावबोधेन) इन्द्रियाख्यानिन्द्रियनामकान्रिपूनिव । पारसीकान्राज्ञः [सिं·

(57) Leaving the Punnága-trees, the sting-mouthed (black bees) alighted on the temples, fragrant on account of the emission of rut, of the elephants that were tied to the trunks of the Kharjura-trees (date trees.)

(58.) Verily to Parasuráma, the ocean, on being requested, gave space ; but to Raghu he gave tribute under the pretext of the western kings.

(59.) There he made the mountain Trikúṭa itself a lofty column of triumph in which distinct marks of prowess had been engraved by the tusks of his intoxicated elephants.

पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ६० ॥
यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥ ६१ ॥
सङ्ग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२ ॥

न्धुतटवासिनो म्लेच्छराजान्–सु०] जेतुं (वशीकर्तुं) स्थलवर्त्मना (स्थलमार्गेण) प्रतस्थे । न तु निर्दिष्टेनापि जलपथेन । समुद्रयानस्य निषिद्धत्वादिति भावः ।

(६१.) स रघुर्यवनीनां यवनस्त्रीणाम् [यवनदेशीय क्षत्रियस्त्रीणामर्थात्तुरष्किणीस्त्रीणाम्–ध०] । "जातेरस्त्रीविषयादयोपधात्" इति ङीप् । मुखानि पद्मानीव मुखपद्मानि । उपमितसमासः । तेषां मधुना मद्येन यो मदो मदरागः । कार्यकारणभावयोरभेदेन निर्देशः । तं (मदिरापानजनितां क्षीवतां) न सेहे (न चक्षमे) । कमिव । अकाले प्रावृड्व्यतिरिक्ते काले जलदोदयः प्रायेण प्रावृषि पद्मविकाशस्याप्रसक्तत्वादब्जानां संबन्धिनं बालातपम् (घर्मम्) इव । अब्जहितत्वादब्जसंबन्धित्वं सौरातपस्य [तासां यवनीनां पतयो बन्दिग्राहं गृहीताः अथवा प्राणैर्वियोजिताः येन तन्मुखपद्मरागो विनश्येदिति भावः–सु०] ।

(६२.) तस्य रघोरश्वसाधनैर्वाजिसैन्यैः । "साधनं सिद्धिसैन्ययोः" इति हैमः । पश्चाद्भवैः पाश्चात्त्यैर्यवनैः सह । "दक्षिणापश्चात्पुरसस्त्यक्" सहार्थे तृतीया । शृङ्गाणां विकाराः शार्ङ्गाणि धनूंषि । तेषां कूजितैः (टङ्कार-) शब्दैः । "शार्ङ्गं पुनर्धनुषि शार्ङ्गिणः । जये च शृङ्गविहिते चापेऽप्याह विशेषतः" इति केशवः । अथ वा शार्ङ्गैः शृङ्गसबन्धिभिः कूजितैर्विज्ञेया अनुमेयाः प्रतियोधाः प्रतिभटाः (प्रतिपक्षभटाः) यस्मिंस्तस्मिन्रजसि (धूलौ) तुमुलः सङ्ग्रामः संकुलं युद्धमभूत् (बभूव) । "तुमुलं रणसंकुले" इत्यमरः ।

(६३.) स रघुर्भल्लापवर्जितैः [अर्धचन्द्राकृतिभिः–चा०] बाणविशेषकृत्तैः । "स्नुहीदलफलो भल्लः" इति यादवः । श्मश्रुलैः प्रवृद्धमुखरोमवद्भिः । "सिध्मादिभ्यश्च" इति

(60.) Thence he set out by an inland route to conquer the Persians, as an ascetic proceeds to conquer, by the knowledge of truth, the enemies called Senses.

(61.) He could not bear the colour (produce) by wine on the lotus-like faces of the Yavana-women (the females of the Ionians), as the gathering (lit. rise) of unseasonable clouds does not bear (is jealous of) the young sun (the friend) of the water-lotuses.

(62.) There a tumultuous battle took place between him and the westerns, having their cavalry for an army, in the midst of dust in which the combatants on both sides could know each other only by the twang of their bows.

भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३ ॥
अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ६४ ॥
विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥ ६५ ॥

लच्प्रत्ययः । तेषां पाश्चात्त्यानां शिरोभिः (मस्तकैः) सरघाभिर्मधुमक्षिकाभिर्व्याप्तैः (वेष्टितैः) "सरघा मधुमक्षिका" इत्यमरः । क्षुद्राः सरघाः । "क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका" इत्यमरः । क्षुद्राभिः कृतानि क्षौद्राणि मधूनि । "मधु क्षौद्रं माक्षिकादि" इत्यमरः । "क्षुद्राभ्रमरवटरपादपादञ्" इति संज्ञायामञ्प्रत्ययः । तेषां पटलैः संचयैरिव । "पटलं तिलके नेत्ररोगे छन्दसि संचये । पटिके परिवारे च" इति हैमः । महीं तस्ताराच्छादयामास [पाश्चात्त्याः श्मश्रूणि स्थापयित्वा केशान् वपन्तीति तद्देशाचारोक्तिः–चा०] ।

(६४.) शेषा हतावशिष्टा अपनीतशिरस्त्राणा अपसारितशीर्षण्याः सन्तः । "शीर्षकम् । शीर्षण्यं च शिरस्त्रे" इत्यमरः । शरणागतलक्षणमेतत् । तं रघुं शरणं ययुः । तथाहि । महात्मनां (महापुरुषाणां) संरम्भः कोपः । "संरम्भः संभ्रमे कोपे" इति विश्वः । प्रणिपातः प्रणतिरेव प्रतीकारः (शान्तिः) यस्य स हि । महतां परकीयमौद्धत्यमेवासह्यं न तु जीवितमिति भावः ।

(६५.) तस्य रघोर्योधा भटा आस्तीर्णानि (प्रसारितानि) अजिनरत्नानि चर्मश्रेष्ठानि यासु तासु द्राक्षावलयानां (मधुरसावेष्टनानां) भूमिषु [मण्डपेषु–सु०] । "मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च" इत्यमरः । मधुभिर्द्राक्षाफलप्रकृतिकैर्मद्यैर्विजयश्रमं युद्धखेदं विनयन्ते स्म अपनीतवन्तः । "कर्तृस्थे चाशरीरे कर्मणि" इत्यात्मनेपदम् । "लट् स्मे" इति भूतार्थे लट् ।

(63.) He covered (lit: spread) the earth with the bearded heads of the Yavanas, severed by his Bhalla-arrows, as if with so many collections of honey-combs surrounded by black bees.

(64.) The remnants, putting off their helmets, sought his protection (yielded to Raghu); for submission is the (only) remedy to assuage the wrath of the magnanimous.

(65.) His warriors relieved the toils of victory by wines, sitting on grounds surrounded by vines and covered over by the excellent hides of antelopes.

ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ॥ ६६ ॥
विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धांल्लग्नकुङ्कुमकेसरान् ॥ ६७ ॥
तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ६८ ॥

(६६.) ततो रघुर्भास्वान्सूर्य इव शरैर्बाणैरुस्रैः किरणैरिव । "किरणोस्रमयूखांशुगभस्तिघृणिधृष्णयः" इत्यमरः । उदीच्यानुदग्भवान्नृपान्रसानुदकानीवोद्धरिष्यन् (उन्मूलयिष्यन् पक्षे संशोषयिष्यन्)। कौबेरीं कुबेरसंबन्धिनीं दिशमुदीचीं प्रतस्थे (प्रयाणं चकार)। अनेकेनेवशब्देनेयमुपमा । यथाह दण्डी—"एकानेकेवशब्दत्वात्सा वाक्यार्थोपमा द्विधा" इति ।

(६७.) सिन्धुर्नाम काश्मीरदेशेषु कश्चिन्नदविशेषः । "देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः । सिन्धोस्तीरे विचेष्टनैरङ्गपरिवर्तनैर्विनीताध्वश्रमाः (विनीताः स्फोटिताः अध्वनः मार्गस्य श्रमाः खेदाः यैस्ते) तस्य रघोर्वाजिनोऽश्वा लग्नाः कुङ्कुमकेसराः कुङ्कुमकुसुमकिञ्जल्का येषां तान्। यद्वा लग्नकुङ्कुमाः केसराः सटा येषां तान् । "अथ कुङ्कुमम्। काश्मीरजन्म" इत्यमरः । "केसरो नागकेसरे । तुरंगसिंहयोः स्कन्धकेशेषु बकुलद्रुमे । पुन्नागवृक्षे किञ्जल्के स्यात्" इति हैमः । स्कन्धान्कायान् । "स्कन्धः प्रकाण्डे कायेंऽसे विज्ञानादिषु पञ्चसु । नृपे समूहे व्यूहे च" इति हैमः । दुधुवुः कम्पयन्ति स्म ।

(६८.) तत्रोदीच्यां दिशि भर्तृषु व्यक्तविक्रमम् । भर्तृवधेन स्फुटपराक्रमामित्यर्थः । रघुचेष्टितं रघुव्यापारः । हूणा जनपदाख्याः क्षत्रियाः [तुरुष्कभेदाः—चा०] । तेषामवरोधा अन्तःपुरस्त्रियः । तासां कपोलेषु पाटलस्य पाटलिम्नस्ताडनादिकृतारुण्यस्यादेश्युपदेशकं बभूव। अथ वा पाटल आदेश्यादेष्टा यस्य तद्बभूव [हूणयोषितः कुचकपोलविदारणपूर्वं रुदन्तीति तद्देशाचारः—चा० —सु०] । स्वयं लेख्यायत इत्यर्थः ।

(66.) Thence Raghu proceeded in the direction of Kubera (the Northern direction) extirpating the northern kings by means of his arrows, like the sun taking up the water with his rays.

(67.) His horses, who had relieved their fatigues of the way by rolling on the banks of the river Sindhu, shook their shoulders to which were clung the filaments of saffron.

(68.) There the actions of Raghu, that had been manifested in their might against the husbands of the women in the harem of the Hûna-kings (the kings of the white Huns), became the cause of the red marks on their cheeks (marks inflicted by themselves in their ecstacy of grief.)

काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥ ६९ ॥
तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वन्नोत्सेकाः कोशलेश्वरम् ॥ ७० ॥
ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥ ७१ ॥
शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमम् ।
गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥ ७२ ॥

(६९.) काम्बोजा राजानः समरे तस्य रघोर्वीर्यं प्रभावम् । " वीर्यं तेजः प्रभावयोः " इति हैमः । सोढुमनीश्वरा अशक्ताः सन्तः । गजानामालानं बन्धनम् । भावे ल्युटि " विभाषा लीयतेः " इत्यात्वम् । तेन परिक्लिष्टैः परिक्षतैरक्षोटैर्वृक्षविशेषैः सार्धमानताः [नम्राजाताः । सहोक्तिरलंकारः—चा०] ।

(७०.) तेषां काम्बोजानां सद्भिरश्वैर्भूयिष्ठा बहुलास्तुङ्गाः (उच्चाः) द्रविणानां हिरण्यानाम् । " हिरण्यं द्रविणं द्युम्नम् " इत्यमरः । राशय एवोपदा उपायनानि । " उपायनमुपग्राह्यमुपहारस्तथोपदा " इत्यमरः । कोशलेश्वरं कोशलदेशाधिपतिं तं रघुं शश्वदसकृद्विविशुः । " मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत्समाः " इत्यमरः । तथाप्युत्सेका गर्वास्तु न विविशुः । सत्यपि गर्वकारणे न जगर्वेत्यर्थः ।

(७१.) ततोऽनन्तरमश्वसाधनः (अश्वाः साधनं सैन्याङ्गं यस्य स तादृशः) सन्गौर्या गुरुं पितरं शैलं हिमवन्तम् । उद्धूतैरश्वखुरोद्धूतैः (उत्थापितैः) धातूनां गैरिकादीनां रेणुभिः (धूलिभिः) तत्कूटांस्तस्य शृङ्गाणि । " कूटोऽस्त्री शिखरं शृङ्गम् " इत्यमरः । वर्धयन्निव आरुरोह (अरुक्षत्) । उत्पतद्धूलिदर्शनाद्गिरिशिखरवृद्धिभ्रमोऽजायत इति भावः ।

(७२.) तुल्यसत्त्वानां सैन्यैः समानबलानाम् । गुहासु शेरत इति गुहाशयास्तेषाम् ।

(69.) The Kámbojas who were unable to endure his valour in battle bowed down together with his Akshota-trees injured by the fastening chains of elephants (disabled on account of the elephants being tied to them).

(70.) Their presents mostly consisting of heaps of gold, augmented by the addition of excellent horses, constantly got to the lord of the Kos'alas, but not pride.

(71.) Then he, having an army of horses, ascended the mountain (Himavat), the father of Gaurí, augmenting, as it were, (the bulk of) its peaks with the dust of minerals raised up (by the hoofs of the horses.)

(72.) The lions of equal might (with Raghu and his warriors), lying in their caves, merely turned back their heads and looked on them and this showed their dauntlessness even in the face of the cries of his host.

भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ७३ ॥
विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥ ७४ ॥
सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥ ७५ ॥

"अधिकरणे शेतेः" इत्यच्प्रत्ययः । "दरी तु कन्दरो वास्त्री देवखातबिले गुहा" इत्यमरः । सिंहानां हरीणाम् । "सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः" इत्यमरः । सबन्धि परिवृत्य परावृत्यावलोकितं शायित्वैव ग्रीवाभङ्गेनावलोकनम् । कर्तृ । सैन्यघोषे सेनाकलकले संभ्रमकारणे सत्यप्यसंभ्रममन्तःक्षोभविरहित्वम् । नञः प्रसज्यप्रतिषेधेऽपि समास इष्यते । शशास कथयामास । सैन्येभ्य इत्यर्थाल्लभ्यते । बाह्यचेष्टितमेव मनोवृत्तेरनुमापकमिति भावः । असंभ्रान्तत्वे हेतुस्तुल्यसत्त्वानामिति । न हि समबलः समबलाद्बिभेतीति भावः ।

(७३.) भूर्जेषु भूर्जपत्त्रेषु । "भूर्जपत्त्रो भुजो भूर्जो मृदुत्वक्चर्मिका मता" इति यादवः । मर्मरः शुष्कपर्णध्वनिः । "मर्मरः शुष्कपर्णानाम्" इति यादवः । अयं च शुक्लादिशब्दवद्गुणिन्यपि वर्तते प्रयुज्यते च । मर्मरैर्गुरुधूपगन्धिभिरिति । अतो मर्मरीभूताः मर्मरशब्दवन्तो भूता इत्यर्थः । कीचकानां वेणुविशेषाणां ध्वनिहेतवः । श्रोत्रसुखाश्चेति भावः । गङ्गाशीकरिणः (गङ्गाम्बुकणवाहिनः) शीतला इत्यर्थः । मरुतो वाता मार्गे (पथि) तं सिषेविरे ।

(७४.) सैनिकाः । सेनायां समवेताः । प्राग्वहतीयष्ठक्प्रत्ययः । नमेरूणां सुरपुन्नागानां छायासु निषण्णानां दृषदुपविष्टानां मृगाणां कस्तूरीमृगाणां नाभिभिर्वासितोत्सङ्गाः सुरभिततला दृषदः शिला अध्यास्याधिष्ठाय । "अधिशीङ्स्थासां कर्म" इति कर्म । दृषत्स्वधिरुह्येत्यर्थः । विशश्रमुर्विश्रान्ताः ।

(७५.) सरलेषु देवदारुविशेषेष्वासक्तानि यानि मातङ्गानां गजानाम् । ग्रीवासु भवानि ग्रैवेयाणि । कण्ठशृङ्खलानि । "ग्रीवाभ्योऽण्च" इति चकाराड्ढञ्प्रत्ययः । तेषु स्फुरितत्विषः

(73.) The winds, sounding "mar mar" in the birch trees, the cause of the sound of the bamboos, and charged with the particles of waters of the river Gangá, served him on the way.

(74.) Having reposed on rocks, whose surfaces were made fragrant by the musk in the navel of deer sitting in the shades of Nameru-trees, his soldiers took some rest.

(75.) The herbs that were near and the lustre of which was reflected on the neck-tie-chains (and which hence shone with increased light) of elephants tied to the Sarala-trees, served in the night for lamps without oil (requiring no oil) to the leader of the army.

तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः ।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥ ७६ ॥
तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७ ॥
शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान् ।
जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ॥ ७८ ॥
परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥ ७९ ॥

प्रतिफलितभास ओषधयो ज्वलन्तो ज्योतिर्लताविशेषा नक्तं रात्रौ नेतुर्नायकस्य रघोरस्नेहदीपिकास्तैलनिरपेक्षाः प्रदीपा आसन् ।

(७६.) तस्य रघोरुत्सृष्टेषूज्झितेषु निवासेषु सेनानिवेशेषु कण्ठरज्जुभिर्गजग्रैवैः क्षता निष्पिष्टास्त्वचो येषां ते देवदारवः (सरलवृक्षाः) किरातेभ्यः वनचरेभ्यः [भिल्लेभ्यः–ध०] गजानां वर्ष्म प्रमाणम् । " वर्ष्म देहप्रमाणयोः " इत्यमरः । शशंसुः कथितवन्तः । देवदारुस्कन्धत्वक्क्षतैर्गजानामौन्नत्यमनुमीयत इत्यर्थः ।

(७७.) तत्र हिमाद्रौ रघोः । पर्वते भवैः पर्वतीयैः । " पर्वताच्च" इति छप्रत्ययः । गणैरुत्सवसंकेताख्यैः सप्तभिः सह । " गणानुत्सवसंकेतानजयत्सप्त पाण्डवः " इति महाभारते । नाराचानां बाणविशेषाणां [लोहबाणानां–चा०] क्षेपणीयानां भिन्दिपालानामश्मनां च निष्पेषेण (परस्परं) संघर्षेणोत्पातिताः (उत्थिताः) अनलाः (अग्नयः) यस्मिस्तत्तथोक्तम् । " क्षेपणीयो भिन्दिपालः खड्गो दीर्घो महाफलः " इति यादवः । घोरं भीमं जन्यं युद्धमभूत् (बभूव) । " युद्धमायोधनं जन्यम् " इत्यमरः ।

(७८.) स रघुः शरैर्बाणैरुत्सवसंकेतान्नाम (सप्त) गणान्विरतोत्सवान् (नष्टयुद्धोत्साहान्) कृत्वा । जित्वेत्यर्थः [गणानुत्सवसंकेतानजयत्सप्त पाण्डवः इति महाभारते–चा०] । किन्नरान्बाह्वोः स्वभुजयोर्जयोदाहरणं जयख्यापकं प्रबन्धविशेषं [यशः। " यशोजयोदाहरणम् " इति हैमः–चा०] गापयामास । "गतिबुद्धि–" इत्यादिना किन्नराणां कर्मत्वम् ।

(७९.) तेषु गणेषूपायनयुक्ताः (ढौकनिकायुक्ताः) पाणयः (हस्ताः) येषां तेषु स-

---

(76.) In the halting-places left by him, the bark of the Devadâru-trees, the barks of which were hurt by the neck-tie-ropes (of elephants), declared to the Kiràtas the stature of the elephants.

(77.) There a fierce battle ensued between Raghu and the mountain-tribes, in which fire flashed up by the concussion of Nárácha darts, and the stones flung by means of slings.

(78.) Having made the Utsava-sankatas devoid of their energy by his arrows, he made the Kinnaras sing the description of his triumph.

(79.) When they came with presents in their hands (to Raghu), the king understood the strength (or wealth) of the Himavat and the mountain Himavat knew the valour of the king mutually.

तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥ ८० ॥
चकम्पे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥ ८१ ॥
न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥ ८२ ॥
तमीशः कामरूपाणामत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥ ८३ ॥

त्सु परस्परेणान्योन्यं राज्ञा हिमवतः सारो धनरूपो विज्ञातः । हिमाद्रिणापि राज्ञः सारो बलरूपो विज्ञातः । एतेन तत्रत्यवस्तूनामनर्घ्यत्वं गणानामभूतपूर्वश्च पराजय इति ध्वन्यते ।

(८०.) स रघुस्तत्र हिमाद्रावक्षोभ्यमधृष्यं यशोराशिं (कीर्तिसमूहं) निवेश्य निधाय । पौलस्त्येन रावणेन तुलितस्य चालितस्याद्रेः कैलासस्य ह्रियमादधानो जनयन्निव । अवरुरोहावततार । कैलासमगत्वैव प्रतिनिवृत्त इत्यर्थः । न हि शूराः परेण पराजितमभियुज्यन्त इति भावः ।

(८१.) तस्मिन्रघौ । तीर्णा लौहित्या नाम नदी येन तस्मिंस्तीर्णलौहित्ये सति । प्राग्ज्योतिषाणां (कामरूपाणां) जनपदानामीश्वरस्तस्य रघोर्गजानामालानतां (बन्धनस्तंभतां) प्राप्तैः (आपन्नैः) कालागुरुद्रुमैः कृष्णागुरुवृक्षैः सह चकम्पे कम्पितवान् [कालागुरवो हि तत्रोद्यन्ते—चा०] ।

(८२.) स प्राग्ज्योतिषेश्वरो रुद्धार्कमावृतसूर्यम् । अधारावर्षं च तद्दुर्दिनं च धारावृष्टिं विना दुर्दिनीभूतम् (धूलिनैव मेघान्धकारतुल्यं) अस्य रघो रथवर्त्मरजोऽपि न प्रसेहे (नासहिष्ट) । पताकिनीं सेनां तु कुत एव प्रसेहे । न कुतोऽपीत्यर्थः ।

(८३.) कामरूपाणां नाम देशानामीशोऽत्याखण्डलविक्रमं (अतिक्रान्तः आखण्डलस्ये-

---

(80.) Having planted there his imperturbable pile of glory he descended it exciting, as it were, the shame of that mountain (Kailâsa) which had been moved (lit. weighed) by Pulastya.

(81.) When he crossed the river Lohityâ, the lord of the Prâgjyotishas (or the land of the Eastern stars) trembled (together) with the black sandle-trees that became the instruments of tying his elephants.

(82.) He could not endure even the dust of Raghu's chariot-way, which obscured the sun and by which the day became inclement without showers of rain; how could he then (endure) his army?

(83.) Him who excelled Indra in prowess, served the lord of the Kâmarû-

कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेण च्छायामानर्च पादयोः ॥ ८४ ॥
इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु ॥ ८५ ॥
स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥८६ ॥

न्द्रस्य विक्रमः पराक्रमो येन तं तथोक्तं) अतीन्द्रपराक्रमं तं रघुम् । भिन्नाः स्रवन्मदाः कटा गण्डा येषां तैर्नागैर्गजैः । साधनैः । भेजे । नागान्दत्वा शरणं गत इत्यर्थः । कीदृशैर्नागैः । यैरन्यान्रघुव्यतिरिक्तान्नृपानुपरुरोध । शूराणामपि शूरो रघुरिति भावः ।

(८४.) कामरूपेश्वरो हेमपीठस्य (सुवर्णपीठस्य) अधिदेवतां (अधिष्ठात्रीं देवतां) तस्य रघोः पादयोश्छायां कनकमयपादपीठव्यापिनीं कान्तिं रत्नान्येव पुष्पाणि तेषामुपहारेण समर्पणेनानर्चार्चयामास ।

(८५.) जिष्णुर्जयशीलः । "ग्लाजिस्थश्च ग्स्नुः" इति ग्स्नुप्रत्ययः । स रघुरितीत्थं दिशो जित्वा रथैरुद्धतं रजश्छत्त्रशून्येषु । रघोरेकच्छत्त्रकत्वादिति भावः । राज्ञां मौलिषु किरीटेषु । "मौलिः किरीटे धम्मिल्ले चूडाकंकेलिमूर्धजे" इति हैमः । विश्रामयन् । संक्रामयन्नित्यर्थः । न्यवर्तत निवृत्तः ।

(८६.) स रघुः सर्वस्वं (समस्तं धनं) दक्षिणा यस्य तं सर्वस्वदक्षिणम् ।"विश्वजित्सर्वस्वदक्षिणः" इति श्रुतेः । विश्वजितं नाम यज्ञमाजह्रे। कृतवानित्यर्थः। युक्तं चैतदित्याह–सतां साधूनाम्। वारिमुचां मेघानामिव । आदानमर्जनं विसर्गाय त्यागाय हि (तुमर्थे चतुर्थी) । पात्रविनियोगायेत्यर्थः [यथा जलदानां समुद्राज्जलग्रहणं विसर्गाय वृष्टये भवति तथा सज्जनानामपीति–सु०]।

(८७.) काकुत्स्थो रघुः सत्रान्ते यज्ञान्ते । "सत्रमाच्छादने यज्ञे सदादाने धनेऽपि च" इत्यमरः । सचिवानाममात्यानां सखेति सचिवसखः सन् । "सचिवो भृतकेऽमात्ये"

---

pas with (i. e. by presenting) elephants of rutting temples and by means of which he had obstructed (subdued) other kings (than Raghu).

(84.) The lord of the Kâmarûpas worshipped the shadow (refulgence) of his (Raghu's) feet, the presiding deity of the golden footstool, with presents consisting of the flowers of jewels.

(85.) Thus having conquered (all) the quarters, the victorious one returned causing the dust raised by his chariots to settle on the crowns of kings bereft of their umbrellas.

(86.) He commenced the sacrifice Vis'vajit, (lit. the conqueror of the world) in which all things (one's all) were to be given as Dakshinâ ; for of the good (or the great) the taking of (money or substances) is for bestowing (or giving away) like the clouds.

सत्रान्ते सचिवसखः पुरस्क्रियाभि-
गुर्वीभिः शमितपराजयव्यलीकान्।
काकुत्स्थश्चिरविरहोत्सुकावरोधा-
न्राजन्यान्स्वपुरनिवृत्तयेऽनुमेने ॥ ८७ ॥
ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम्।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ८८ ॥

इति हैमः। तेषामत्यन्तानुसरणद्योतनार्थं राज्ञः सखित्वव्यपदेशः। "राजाहःसखिभ्यष्टच्" गुर्वीभिर्महतीभिः। "गुरुर्महत्याङ्गिरसे पित्रादौ धर्मदेशके" इति हैमः। पुरस्क्रियाभिः पूजाभिः शमितं (दूरीकृतं) पराजयेन (जनितं) व्यलीकं दुःखं वैलक्ष्यं वा येषां तान्। "दुःखे वैलक्ष्ये व्यलीकम्" इति यादवः। चिरविरहेण (चिरंतनवियोगेन) उत्सुका उत्कण्ठिता अवरोधा अन्तःपुराङ्गना येषां तान्। राज्ञोऽपत्यानि राजन्याः क्षत्रियाः। तान्। "राजश्वशुराद्यत्" इत्यपत्यार्थे यत्प्रत्ययः। "मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्" इत्यमरः। स्वपुरं प्रति निवृत्तये प्रतिगमनायानुमेनेऽनुज्ञातवान्। प्रहर्षणीवृत्तमेतत्। तदुक्तम्–"म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयम्" इति।

(८८.) ते राजानः। रेखा एव ध्वजाश्च कुलिशानि चातपत्राणि च। ध्वजाद्याकाररेखा इत्यर्थः। तानि चिह्नानि यस्य तत्तथोक्तम्। प्रसादेनैव लभ्यम् प्रसादलभ्यम्। सम्राजः सार्वभौमस्य रघोश्चरणयुगं (पादयुग्मं) प्रस्थाने प्रयाणसमये याः प्रणतयो नमस्कारास्ताभिः। करणैः। अङ्गुलीषु मौलिषु केशबन्धनेषु याः स्रजो माल्यानि ताभ्यश्च्युतैः (गलितैः) मकरन्दैः पुष्परसैः। "मकरन्दः पुष्परसः" इत्यमरः। रेणुभिः परागैश्च। "परागः सुमनोरजः" इत्यमरः। गौरं गौरवर्णं चक्रुः।

इतिश्री महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये रघुदिग्विजयो नाम चतुर्थः सर्गः।

(87.) At the end of the sacrifice, the descendant of Kakutstha, the friend of his ministers, permitted the Kshatriya princes to return to their capitals, whose grief on their defeat had been relieved by great honors (conferred by him), and whose ladies of the harem were anxious owing to long separation from them.

(88.) They made, by their prostrations at the time of departure, the two feet of the Universal Emperor (Raghu)—the feet on which were the marks of banners, thunderbolts and umbrellas in lines, and which were attainable only by favour—white in the toes, with flower-juice and pollen which dropped from the garlands on their heads.

पंचमः सर्गः ।

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ १ ॥
स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥ २ ॥

इन्दीवरदलश्याममिन्दिरानन्दकन्दलम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥

(१.) विश्वजिति विश्वजिन्नाम्न्यध्वरे यज्ञे । " यज्ञः सवोऽध्वरो यागः " इत्यमरः । निःशेषं विश्राणितं दत्तम् । श्रण दाने चुरादिः । कोषाणामर्थराशीनां जातं [जातं शब्देन वस्त्राद्यपि दत्तं भवति–हे०] समूहो येन तं तथोक्तम् । " कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः " इत्यमरः । " जातं जनिसमूहयोः " इति शाश्वतः । एतेन कौत्सस्यानवसरप्राप्तिं सूचयति । तं क्षितीशं रघुमुपात्तविद्यः (उपात्ताः अधिगताः चतुर्दश विद्याः येन स तथोक्तः) लब्धविद्यः [पुराणन्यायमीमांसाधर्मशास्त्राण्यंगमिश्रिताः वेदाः । " शिक्षाकल्पो व्याकरणं निरुक्तं छन्दज्योतिषम् " इति षडंगानि । एवं चतुर्दश विद्याः–हे०] वरतन्तोः शिष्यः कौत्सः । " ऋष्यन्धक–" इत्यण् । इञोऽपवादः । गुरुदक्षिणार्थी (गुरवे दक्षिणा चतुर्दश कोटिरूपा तस्याः अर्थः प्रयोजनं यस्य स तथोक्तः) । " पुष्करादिभ्यो देशे " इत्यत्रार्थाच्चासंनिहित तदन्ताच्चेतीनिः । अप्रत्याख्येय इति भावः । प्रपेदे प्राप । अस्मिन्सर्गे वृत्तमुपजातिः । तल्लक्षणं तु–" स्यादिन्द्रवज्रा यदि तौ जगौ गः । उपेन्द्रवज्रा जतजास्ततो गौ । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः " इति ।

(२.) अनर्घशीलोऽमूल्यस्वभावः (निरुपमशीलः) । असाधारणस्वभावः इत्यर्थः । " मूल्ये पूजाविधावर्घः " इति । " शीलं स्वभावे सद्वृत्ते " इति चामरशाश्वतौ । यशसा कीर्त्या । प्रकाशत इति प्रकाशः । पचाद्यच् । अतिथिषु साधुरातिथेयः । "पथ्यतिथिवसतिस्वपतेर्ढञ्" इति ढञ् । स रघुः । हिरण्यस्य (सुवर्णस्य) विकारो हिरण्मयम् । "दाण्डिनायन–" आदिसूत्रेण निपातः । वीतहिरण्मयत्वादपगतसुवर्णपात्रत्वात् । यज्ञस्य सर्वस्वदक्षिणाकत्वादि-

---

(1.) Kautsa, the disciple of Varatantu, who had by this time completed the course of study and who was (now) seeking means to reward his tutor, got to (came to) the lord of the earth, who had already given away in charity his whole lot of treasure during the Vis'vajit sacrifice.

(2.) Lacking gold-vessels he, the hospitable one, of an invaluable character and bright by his renown, having put in an earthen-pot the provisions of worship went forth to receive the guest shining by (his knowledge of) the Vedas.

तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी ।
विशांपतिर्विष्टरभाजमारात्कृताञ्जलिः कृत्यविदित्युवाच ॥ ३ ॥
अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥ ४ ॥

ति भावः । मृण्मये मृद्विकारे पात्रे । अर्घार्थमिदमर्घ्यम् । " पादार्घाभ्यां च " इति यत् । पूजार्थं द्रव्यं निधाय (निक्षिप्य) श्रुतेन शास्त्रेण प्रकाशं प्रसिद्धम् । श्रूयते इति श्रुतं वेदशास्त्रम् । "श्रुतं शास्त्रावधृतयोः " इत्यमरः । अतिथिमभ्यागतं कौत्सम् । " अतिथिर्ना गृहागते " इत्यमरः । प्रत्युज्जगाम अभिमुखं ययौ (आसनादुत्थाय कानिचित्पदानि गत्वा तं तपोधनं स्वागतं व्याजहारेति भावः) ।

(३.) विधिज्ञः शास्त्रज्ञः । अकरणे प्रत्यवायभीरुरित्यर्थः (एतदेवहेमाद्रिः) । मानधनानामग्रयाय्यग्रेसरः। अपयशोभीरुरित्यर्थः । कृत्यवित्कार्यज्ञः । आगमनप्रयोजनमवश्यं प्रष्टव्यमिति कृत्यवित् । विशांपतिर्मनुजेश्वरः । "द्वौ विशौ वैश्यमनुजौ" इत्यमरः । विष्टरभाजमासनगतम् । उपविष्टमित्यर्थः । " विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् " इत्यमरः । " वृक्षासनयोर्विष्टरः " इति निपातः । तं तपोधनं विधिवद्विध्यर्हम् । यथाशास्त्रमित्यर्थः । "तदर्हम् " इति वतिप्रत्ययः । अर्चयित्वारात्समीपे । " आराद्दूरसमीपयोः " इत्यमरः । कृताञ्जलिः (कृतः बद्धः अञ्जलिर्हस्तसंपुटं येन तादृशः) सन्निति वक्ष्यमाणप्रकारेणोवाच ।

(४.) हे कुशाग्रबुद्धे (कुशस्याग्रं तद्वत्तीक्ष्णा बुद्धिर्यस्य तत्संबुद्धिः) सूक्ष्मबुद्धे । " कुशाग्रीयमतिः प्रोक्तः सूक्ष्मदर्शी च यः पुमान् " इति हलायुधः । मन्त्रकृतां मन्त्रस्रष्टृणाम् [वेदसंहिताकारिणां–चा०] । " सुकर्मपापमन्त्र–" इत्यादिना क्विप् । ऋषीणामग्रणीः श्रेष्ठस्ते तव गुरुः कुशल्यपि । क्षेमवान्किम् । अपि प्रश्ने । " गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि " इत्यमरः । यतो यस्माद्गुरोः सकाशात्त्वयाशेषं (समग्रं आत्मनिष्ठं) ज्ञानम् । लोकेनोष्णरश्मेः सूर्याच्चैतन्यं प्रबोध इव । आप्तं स्वीकृतम् ।

(५.) कायेनोपवासादिकृच्छ्रचान्द्रायणादिना वाचा वेदपाठेन मनसा गायत्रीजपादिना कायेन वाचा मनसापि । करणेन । वासवस्येन्द्रस्य धैर्यं लुम्पतीति वासवधैर्यलोपि । स्वपदापहारशङ्काजनकमित्यर्थः । यत्तपः शश्वदसकृत् । " मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत्स-

---

(3.) Having properly (lit. according to rule) honoured him, the treasure of penance, the lord of men who knew the rules of propriety and who was the foremost of those to whom respect is wealth and who knew his duty, with hands folded, thus addressed him who had now taken his seat by his side.

(4.) " Oh you of an acute intellect ! is it well with your preceptor who is the foremost of those sages, the authors of hymns, and from whom you have obtained infinite knowledge, as the world obtains sensibility from the hot-rayed one (sun)".

कायेन वाचा मनसापि शश्वद्यत्संभृतं वासवधैर्यलोपि ।
आपाद्यते न व्ययमन्तरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥ ५ ॥
आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम् ।
कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम् ॥ ६ ॥
क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु ।
तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ॥ ७ ॥

माः " इत्यमरः । संभृतं संचितं महर्षेर्वरतन्तोस्त्रिविधं (तिस्रो विधा यस्य तत्) वाङ्मनःकायजं तत्तपोऽन्तरायैर्विघ्नैरिन्द्रप्रेरिताप्सरःशापैर्व्ययं नाशं नापाद्यते [त्राणाभावे हि शापास्त्राः कुर्वन्ति तपसो व्ययं इत्यत्रोक्तत्वात्–हे०] कच्चित् [" कच्चिदिष्टाप्रियप्रश्ने " इत्यभिधानचिंतामणिः–चा० कोमलामंत्रणे–सु०] । न नीयते किम् । "कच्चित्कामप्रवेदने" इत्यमरः ।

(६.) आधारबन्धप्रमुखैः [" मुखं तु वदने मुख्ये आदौ द्वाराभिपालयोः" इति यादवः–चा०] आलवालनिर्माणादिभिः प्रयत्नैरुपायैः । "आधार आलवालेऽम्बुबन्धेऽधिकरणेऽपि च" इति विश्वः । सुतेभ्यो निर्गतो विशेषोऽतिशयो यस्मिन्कर्माणि तत्तथा (पुत्रसदृशं) संवर्धितानां श्रमच्छिदां (मार्गखेदापहारिणां) वः (युष्माकं) आश्रमपादपानां (आश्रमतरूणां) वाय्वादिः । आदिशब्दाद्दावानलादिः । उपप्लवो बाधकः (उपद्रवः) न कच्चिन्नास्ति किम् ।

(७.) क्रियानिमित्तेष्वप्यनुष्ठानसाधनेष्वपि कुशेषु मुनिभिर्वत्सलत्वान्मृगस्नेहादभग्नकामाप्रतिहतेच्छा । तेषां मुनीनामङ्का एव शय्यास्तासु च्युतानि नाभिनालानि यस्याः सा तथोक्ता मृगीणां प्रसूतिः संततिरनघाव्यसना कच्चित् । अनपायिनी किमित्यर्थः । " दुःखेनोव्यसनेष्वघम् " इति यादवः । [ते हि व्यालभयाद्दशरात्रमङ्क एव धारयन्ति इति शान्तिदयोक्तेः–हे०] ।

(८.) यैस्तीर्थजलैर्नियमाभिषेको नित्यस्नानादिर्निर्वर्त्यते निष्पाद्यते । येभ्यो जलेभ्यः । उद्धृत्येति शेषः । पितॄणामग्निष्वात्तादीनां निवापाञ्जलयस्तर्पणाञ्जलयः । " पितृदानं नि-

---

(5.) " I hope no temptations (lit. obstructions) are able to diminish the three-fold penance of the great sage, which has been accumulated by constant exercises of the body, speech and mind, and which damps the courage even of Indra. "

(6.) " I hope the storm and other calamities have not done any injury to the trees round your hermitage, which beguile fatigue and which have been brought up by you with a care not different from that bestowed upon a son with the labour of digging watering-cavities (reservoirs) and doing other like things. "

(7.) " I hope that it is well with the fawns of female-deer which are allowed by the sages through extreme fondness for them to satisfy their hunger by eating even the Kusa-grass, that was used in their sacred rites, and which drop down the umbilical cords on their laps, their (of the fawns) beds."

निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितॄणाम्।
तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित्॥ ८॥
नीवारपाकादि कडंगरीयैरामृश्यते जानपदैर्न कच्चित्।
कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसाधनं वः॥ ९॥
अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय।
कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते॥ १०॥

वापः स्यात्" इत्यमरः। निर्वर्त्यन्ते। उञ्छानां प्रकीर्णोद्धृतधान्यानां षष्ठैः षष्ठभागैः [मुनयो हि नृपोद्देशेन षष्ठं भागं तीरे क्षिपन्ति। यदुक्तं।"यस्मादारण्यका अपि उञ्छषड्भागं निर्वापयन्ति" इति श्रुतेः। योस्मान्पालयतीति। "कुशूलकुंभी धान्योवा आह्निको श्वस्तनोपि वा। जीवेद्वापि शिलोञ्छेन श्रेयानेषां परःपर" इति याज्ञवल्क्यः-हे०] पालकत्वाद्राजग्राह्यैरंकितानि (चिह्नितानि) सैकतानि पुलिनानि येषां तानि तथोक्तानि वो युष्माकं तानि तीर्थजलानि शिवानि भद्राणि कच्चित्। अनुपप्लवानि किमित्यर्थः। "उञ्छो धान्यांशकादानं कणिशाद्यर्जनं शिलम्" इति यादवः। "षष्ठाष्टमाभ्यां ञ च" इति षष्ठशब्दाद्भागार्थेऽन्प्रत्ययः। अतएवापूरणार्थत्वात् "पूरणगुण–" इत्यादिना न षष्ठीसमासप्रतिषेधः। सिकता येषु सन्ति सैकतानि। "सिकताशर्कराभ्यां च" इत्यण्प्रत्ययः।

(९.) कालेषु (वैश्वदेवावसानेषु) योग्यकालेषूपपन्नानामागतानामतिथीनां कल्प्या भागा यस्य तत्तथोक्तम्। वने भवं वन्यम्। शरीरस्थितेर्जीवितस्य साधनं [उपायं प्राणयात्रानिदानं–चा० सु०] वो युष्माकम्। पच्यत इति पाकः फलम्। धान्यमिति यावत्। नीवारपाकादि। आदिशब्दाच्छ्यामाकादिधान्यसंग्रहः। जनपदेभ्य आगतैर्जानपदैः। "तत आगतः" इत्यण्। कडंगरीयैः। कडंगरं बुसमर्हन्तीति कडंगरीयाः। "कडंगरो बुसं क्लीबे धान्यत्वचि तुषः पुमान्" इत्यमरः। "कडंगरदक्षिणाच्छ च" इति छप्रत्ययः। तैर्गोमहिषादिभिर्नामृश्यते कच्चित्। न भक्ष्यते किमित्यर्थः। [पाकशब्दोऽल्पार्थः प्रशंसार्थश्च तथा त्रयः पाकयज्ञाः इत्यत्राश्वलायनगृह्यनारायणीयवृत्तौ।पाकयज्ञाः अल्पयज्ञाः प्रशस्तयज्ञाश्च अल्पप्रशंसयोरुभयत्रपाकशब्दः योस्मात्पाकतर इत्यत्राल्पत्वे पाकशब्दः। तं पाकेन मनसापश्यम्। यो मापाकेन मनसेति अत्र प्रशंसायामिति–हे०]

(१०.) किंच त्वं प्रसन्नेन (संतुष्टेन) सता महर्षिणा सम्यग्विनीय शिक्षयित्वा। विद्या-

---

(8.) "I hope it is all right with your holy waters by means of which the daily ablutions enjoined by duty are performed and from which handfuls of watery offerings are given to the dead-ancestors and whose sandy shores are marked by the sixths of gathered corn."

(9.) "I hope your ripe Nivâra corn, fruits &c., the sylvan source of the sustenance of your bodies, out of which you give portions to guests coming in time, is never eaten up by country cattle that feed upon straw (the chaff alone)"?

(10.) "Has not the great sage, being satisfied with you now after properly

तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि संभावयितुं वनान्माम् ॥ ११ ॥
इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ।
स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ॥ १२ ॥

मुपदिश्येत्यर्थः । गृहाय गृहस्थाश्रमं प्रवेष्टुम् । "क्रियार्थोपपद–" इत्यादिना चतुर्थी । अनुमतोऽप्यनुज्ञातः किम् । हि यस्मात्ते तव सर्वेषामाश्रमाणां ब्रह्मचर्यवानप्रस्थयतीनामुपकारे क्षमं शक्तम् । "क्षमं शक्ते हिते त्रिषु" इत्यमरः । द्वितीयमाश्रमं गार्हस्थ्यं संक्रमितुं प्राप्तुमयं कालः । विद्याग्रहणानन्तर्यात्तस्येति भावः । "कालसमयवेलासु तुमुन्" इति तुमुन् । सर्वोपकारक्षममित्यत्र मनुः—"यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः । वर्तन्ते गृहिणस्तद्वदाश्रित्येतर आश्रमाः" इति । कुशलप्रश्नं विधायागमनप्रयोजनप्रश्नं चिकीर्षुराह-

(११.) अर्हतः पूज्यस्य प्रशस्तस्य । "अर्हः प्रशंसायाम्" इति शतृप्रत्ययः । तवाभिगमनेनागमनमात्रेण मे मनो न तृप्तं न तुष्टम् । किंतु नियोगक्रिययाज्ञाकरणेनोत्सुकं सोत्कण्ठम् । "इष्टार्थोद्युक्त उत्सुकः" इत्यमरः । "प्रसितोत्सुकाभ्यां तृतीया च" इति सप्तम्यर्थे तृतीया । शासितुर्गुरोराज्ञयाप्यात्मना स्वतो वा । "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया । मां संभावयितुं (सनाथं कर्तुं अनुगृहीतुं वा) वनात् (तपोवनात्) प्राप्तोऽसि । गुर्वर्थं स्वार्थं वागमनमित्यर्थः [धातूनामनेकार्थत्वात्प्रयोजनामालंकारः । तथाकाव्यादर्शे । "प्रियः प्रियतराख्यातं"-हे॰]

(१२.) अर्घ्यपात्रेण (पूजाभाजनेन अर्थात्) मृण्मयेनानुमितः (ज्ञातः) व्ययः सर्वस्वत्यागो यस्य तस्य रघोरित्युक्तप्रकारामुदारामौदार्ययुक्तामपि गां वाचम् । "मनो नियोगक्रिययोत्सुकं मे" इत्येवंरूपाम् । "स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः" इत्यमरः । निशम्य श्रुत्वा वरतन्तुशिष्यः कौत्सः स्वार्थोपपत्तिं स्वकार्यसिद्धिं प्रति दुर्बलाशः सन्मृण्मयपात्रदर्शनाच्छिथिलमनोरथः संस्तं रघुमिति वक्ष्यमाणप्रकारेणावोचत् ।

instructing you, given you his permission to enter on the life of a householder? For it is now time (proper) for you to enter on the second stage of life that enables one to confer obligations on all "

(11.) "By the mere arrival of your meritorious self my heart is not fully satisfied ; it longs to execute your commands. Is it by your preceptor's order or of your own accord that you have come to do me the honour of a visit from the forest?"

(12.) On hearing these words, though noble, of Raghu, whose liberality could be clearly inferred from the earthen pot in which he carried the provisions of worship, Vartantu's disciple despairing of gaining his object, addressed him thus.

सर्वत्र नो वार्त्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥ १३ ॥
भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग तयातिशेषे ।
व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ॥ १४ ॥
शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः ॥ १५ ॥

(१३.) हे राजंस्त्वं सर्वत्र [गुर्वाश्रमतरुप्रभृतिषु–चा०] नोऽस्माकं वार्त्तं स्वास्थ्यमवेहि जानीहि । "वार्त्तं वल्गुन्यरोगे च" इत्यमरः । "वार्त्तं पाटवमारोग्यं भव्यं स्वास्थ्यमनामयम्" इति यादवः । न चैतदाश्चर्यमित्याह–नाथ इति । त्वयि नाथे ईश्वरे सति प्रजानामशुभं दुःखं कुतः । तथाहि । अर्थान्तरं न्यस्यति—सूर्य इत्यादिना । सूर्ये तपति प्रकाशमाने सति तमिस्रा तमस्ततिः । "तमिस्रं तिमिरं रोगे तमिस्रा तु तमस्ततौ । कृष्णपक्षनिशायां च" इति विश्वः । लोकस्य जनस्य । "लोकस्तु भुवने जने" इत्यमरः । दृष्टेरावरणाय (आच्छादनाय) कथं कल्पेत । दृष्टिमावरितुं नालमित्यर्थः । क्लृपेरलमर्थत्वात्तद्योगे "नमःस्वस्ति–" इत्यादिना चतुर्थी । "अलमिति पर्याप्त्यर्थग्रहणम्" इति भगवान्भाष्यकारः । कल्पेत संपद्येतेत्यर्थः । क्लृपि संपद्यमाने चतुर्थीति वक्तव्यात् [यथा किराते । "उद्गातिशुचमिवाप्यतमिस्रामान्तिकं व्रजति तारकराजे दिक्प्रसादगुणमण्डनमूहे रश्मिहासविशदं मुखमैन्द्री"–हे०] । "तवार्हतः"–इत्यादिनोक्तं यत्तन्न चित्रमित्याह–

(१४.) प्रतीक्ष्येषु पूज्येषु । "पूज्यः प्रतीक्ष्यः" इत्यमरः । भक्तिरनुरागविशेषस्ते तव कुलोचिता कुलाभ्यस्ता । "अभ्यस्तेऽप्युचितं न्याय्यम्" इति यादवः । हे महाभाग सार्वभौम तया भक्त्या पूर्वान् (पूर्वजान्) अतिशेषेऽतिवर्तसे । किंतु सर्वत्र वार्त्तं चेत्तर्हि कथं खेदखिन्न इव दृश्यसेऽत आह–व्यतीतेति । अहं व्यतीतकालोऽतिक्रान्तकालः सन्नर्थिभावात् (याचकभावात्) त्वामभ्युपेतः (समागतः) इति मे मम विषादः (खेदः) ।

(१५.) हे नरेन्द्र तीर्थे [यज्ञे–सु०] सत्पात्रे (गुरवे) प्रतिपादिता दत्तार्द्धिः (संपत्तिः)

(13.) "Know, Oh king, it is well with us, in every particular. How can evil happen to subjects when you are their protector? How may night be able to obscure the sight of men the sun shining?"

(14.) "Reverence for the worthy is hereditary in your family and Oh fortunate king! you excel your ancestors in that. It pains me to see that I have come to you as a begger when it is too late."

(15.) "Oh lord of people, now that you have given your wealth to worthy recipients and appear to be without every thing but your body, like a Nivāra-plant which has been stripped of its grains by foresters and has nothing left to it but its culm".

**स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति ।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥ १६ ॥
तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये ।
स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ॥ १७ ॥**

येन स तथोक्तः । "योनौ जलावतारे च मन्वाद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद्दर्शनेष्वपि" इति हलायुधः । शरीरमात्रेण (शरीरमेव शरीरमात्रं तेन केवलेन वपुषा) तिष्ठन् (वर्तमानः) आरण्यका अरण्ये भवा मनुष्या मुनिप्रमुखाः । "अरण्यान्मनुष्ये" इति वुञ्प्रत्ययः । तैरुपात्ता (गृहीता) फलमेव प्र' तेयस्य स स्तम्बेन काण्डेनावशिष्टः । प्रकृत्यादित्वात्तृतीया । नीवार इव । आभासि शोभसे [उपमालंकारः—सु०] ।

(१६.) भवानेकनराधिपः सार्वभौमः सन् । मखजं मखजन्यम् । न विद्यते किंचन यस्येत्यकिंचनः । मयूरव्यंसकादित्वात्तत्पुरुषः । तस्य भावस्तत्त्वं निर्धनत्वं व्यनक्ति प्रकटयति (तत्) स्थाने युक्तम् । "युक्ते द्वे सांप्रतं स्थाने" इत्यमरः । तथाहि । सुरैर्देवैः पर्यायेण क्रमेण पीतस्य हिमांशोः कलाक्षयः (कृशत्वं) वृद्धेरुपचयाच्छ्लाघ्यतरो हि वरः खलु [प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः । विश्वेदेवास्तृतीयां तु चतुर्थीं सलिलाधिपः । पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः । सप्तमीमृषयो दिव्या अष्टमीमज एकपात् । नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलां । दशमीं पिबते वायुः पिबत्येकादशीमुमा । द्वादशीं पितरः सर्वे समं प्राश्नंति भागशः । त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम् । चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिरिति—हे०] । "मणिः शाणालीढः समरविजयी हेतिनिहतो मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः" इति भावः । अत्र कामन्दकः—"धर्मार्थं क्षीणकोशस्य क्षीणत्वमपि शोभते । सुरैः पीतावशेषस्य कृष्णपक्षे विधोरिव" इति [शुक्लप्रतिपदि सर्वे क्षीणमपि चन्द्रं नमस्कुर्वन्ति । यदुक्तं किराते । "प्रणमन्त्यनुपायमुत्थितं । प्रतिपच्चन्द्रमिव प्रजा नृपम्"—सु०]

(१७.) तत्तस्मात्तावदनन्यकार्यः (नास्ति गुरुदक्षिणामन्तरेण अन्यत्कार्यं यस्य सः। "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इति विश्वः । प्रयोजनान्तररहितोऽहमन्यतो व-

---

(16.) "It is a matter of satisfaction that being the sole sovereign, your majesty manifests your poverty as resulting from the sacrifice : for the wane of the moon drunk (absorbed) gradually by the gods speaks more highly (of her) than her waxing."

(17.) "Therefore having got nothing else to do I will try to procure, from some other source, money to be given to my preceptor. Hail to you! even the Cháṭaka bird does not implore the autumnal cloud that has lost all the water inside (lit. the watery contents of whose interior have flowed out)".

एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुङ्क्त ॥ १८ ॥
ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥ १९ ॥
समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ॥ २० ॥

दान्यान्तराद्गुर्वर्थं गुरुधनमाहर्तुमर्जयितुं यतिष्ये उद्योक्ष्ये । ते तुभ्यं स्वस्ति शुभमस्तु । "नमःस्वस्ति–" इत्यादिना चतुर्थी । तथाहि । चातकोऽपि [अपि शब्दः चातकस्य जलदैकशरणत्वसूचनार्थः–हे० चा०] "धरणीपतितं तोयं चातकानां रुजाकरम्" इति हेतोरनन्यगतिकोऽपीत्यर्थः । निर्गलितोऽम्ब्वेव (जलमेव) गर्भो यस्य तं शरद्धनं नार्दति न याचते [किं पुनः विद्यमानोपायोऽहं त्वामित्यर्थः–हे०] । "अर्द गतौ याचने च" इति धातुः । याचनार्थे रणेऽर्दनम्" इति यादवः [अर्थान्तरन्यासालंकारः–सु०] ।

(१८.) एतावद्वाक्यमुक्त्वा (एतावन्मात्रं वाक्यमाख्याय) प्रतियातुं कामो यस्य तं प्रतियातुकामं गन्तुकामम् । "तुम्काममनसोरपि" इति मकारलोपः । महर्षेर्वरतन्तोः शिष्यं कौत्सं नृपती रघुर्निषिध्य निवार्य हे विद्वन् (पण्डित) त्वया गुरवे प्रदेयं वस्तु किं [किंजातीय वा हे०–चा०] किमात्मकं कियत्किंपरिमाणं वा । इत्येवं तं कौत्समन्वयुङ्क्तापृच्छत् अनूपसर्गेण सहितो युजिः पृच्छार्थः–हे० चा०] । "प्रश्नोऽनुयोगः पृच्छा च" इत्यमरः ।

(१९.) ततः (तदनंतरं) यथावद्यथार्हम् । अर्हार्थे वतिः । विहिताध्वराय विधिवदनुष्ठितयज्ञाय । सदाचारायेत्यर्थः । स्मयावेशविवर्जिताय (स्मयस्य गर्वस्य संरंभस्य च आवेशः तेन विवर्जितः तस्मै) गर्वाभिनिवेशशून्याय । अनुद्धतायेत्यर्थः । वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्यादीनां च गुरवे [क्रियाग्रहणमपि कर्तव्यमिति चतुर्थी–हे०] नियामकाय [तद्धर्मप्रतिष्ठापकत्वात्–हे० चा०] । "वर्णाः स्युर्ब्राह्मणादयः" इति । "ब्रह्मचारी गृही वानप्रस्थो भिक्षुचतुष्टये । आश्रमोऽस्त्री" इति चामरः । सर्वकार्यनिर्वाहकायेत्यर्थः । तस्मै रघवे विचक्षणः [कुशलः–हे०] विद्वान्वर्णी ब्रह्मचारी । "वर्णिनो ब्रह्मचारिणः" इत्यमरः । "वर्णाद्ब्रह्मचारिणि" इतीनिप्रत्ययः। सः कौत्सः प्रस्तुतं प्रकृतम् (गुरुदक्षिणारूपं) आचचक्षे।

(२०.) समाप्तविद्येन (समाप्ता परिपूर्णा चतुर्दश विद्या येन तेन तथोक्तेन) मया

(18.) Having prevented the great sage's disciple, who after saying this was about to depart (lit. who had the desire to return), the king asked him " Learned Sir ! what thing do you mean to give to your preceptor and how much of it ? "

(19.) Whereupon the learned ascetic (the bachelor) explained his object in view to the ruler of (the several) castes and states of life, who had performed the sacrifice as enjoined by the rite, and who was free from the influence of pride.

(20.) When I completed my course of study I humbly asked the great

निर्बन्धसंजातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्तः ।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ॥ २१ ॥
सोऽहं सपर्याविधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ॥ २२ ॥
इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण ।
एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ॥ २३ ॥

महर्षिर्गुरुदक्षिणायै गुरुदक्षिणास्वीकारार्थं विज्ञापितोऽभूत् । स च गुरुश्चिरायास्खलितोपचारां [पादप्रक्षालनादिरुपचारः परिचर्या यस्यां सा तां तथोक्तां–हे० चा०] तां दुष्करां मे भक्तिमेव पुरस्तात्प्रथममगणयत्संख्यातवान् । भक्त्यैव संतुष्टः किं दक्षिणयेत्युक्तवानित्यर्थः । अथवा भक्तिमेव तां दक्षिणामगणयदिति योज्यम् ।

(२१.) निर्बन्धेन प्रार्थनातिशयेन संजातरुषा संजातक्रोधेन गुरुणा । अर्थकार्श्यं दारिद्र्यमचिन्तयित्वाविचार्याहम् । वित्तस्य धनस्य चतस्रो दश च कोटीश्चतुर्दशकोटीर्मे मह्यमाहरानयेति विद्यापरिसंख्यया विद्यापरिसंख्यानुसारेणैवोक्तः । अत्र मनुः–" अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश " इति ।

(२२.) सोऽहं सपर्याविधिभाजनेनार्घ्यपात्रेण भवन्तं प्रभुशब्द एव शेषो यस्य तं मत्वा । निःस्वं निश्चित्येत्यर्थः । श्रुतनिष्क्रयस्य विद्यामूल्यस्याल्पेतरत्वादतिमहत्त्वात्संप्रति (अधुना)उपरोद्धुं निर्बन्धुं नाभ्युत्सहे ।

(२३.) द्विजराजकान्तिश्चन्द्रकान्तिः । "द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः" इत्यमरः "तस्मात्सोमो राजा नो ब्राह्मणानाम्" इति श्रुतेः । द्विजराजकान्तित्वेनार्थावाप्तिवैराग्य वारयति । एनसः पापान्निवृत्तेन्द्रियवृत्तिर्यस्य स [एतेन धार्मिकत्वं–हे० चा०] जगदेकनाथं

---

sage as to the remuneration to be made to him. And he considered that long de votion of mine without any default (in the acts) of service to be the best (li foremost) remuneration.

(21.) Enraged at my importunities the preceptor heedless to the smallne of my wealth said, " get me fourteen crores of money in accordance with tl number of several lores " (bring me as many crores of money as there are kinds learning).

(22.) Concluding from the earthen pot containing the provisions of wo ship that Your Highess has had only the title of lord remaining to you I do not da press my Sire (any more), at this moment, on account of the largeness of t price set on my learning.

(23.) Thus informed by the Brâhman, foremost among the adepts in t Vedas, the sole lord of the world, fair as the moon and the propensities of whc senses were averse to sin, again spoke to him,

गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम्।
गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतारः ॥ २४ ॥
स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यगारे।
द्वित्राण्यहान्यर्हसि सोढुमर्हन्यावद्यते साधयितुं त्वदर्थम् ॥ २५ ॥

रघुर्वेदविदां वरेण श्रेष्ठेन द्विजेन कौत्सेनेत्थमावेदितो निवेदितः सन्। एनं कौत्सं भूयः पुनर्जगाद [ऊचे। अनुप्रासोऽलंकारः–हे० चा०]।

(२४.) श्रुतस्य (शास्त्रस्य) पारं दृष्टवाञ्छ्रुतपारदृश्वा। "दृशेः क्वनिप्" इति क्वनिप्। गुर्वर्थं गुरुदक्षिणार्थं यथा तथार्थी याचकः। विशेषणद्वयेनाप्यस्याप्रत्याख्येयत्वमाह। रघोः सकाशात्कामं मनोरथमनवाप्याप्राप्य वदान्यान्तरं [अन्योवदान्योवदान्यान्तरं इति। "मयूरव्यंसकादि"। "वदान्यो दानशौण्डेस्यात् चारुवादिनिवाच्यवत्" इति मेदिनी–हे०] दात्रन्तरं गतः। "स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे" इत्यमरः। इत्येवंरूपोऽयं परीवादस्यापवादस्य नवो नूतनः प्रथमोऽवतारः [अवतारावतरयोर्दीर्घह्रस्वव्यत्यासो बालिशानामिति वामनः–हे०] आविर्भावो मे मा भून्मास्तु। रघोरिति स्वनामग्रहणं संभावितत्वद्योतनार्थम्। तथा च—"संभावितस्य चाकीर्तिर्मरणादतिरिच्यते" इति भावः [निःस्वेभ्योदानं विद्यानुरूपमितिमनूक्त्या अप्रत्याक्षेपप्रीतिनिन्दाप्रतिषेधाद्रघोरात्मस्तुतिनिर्दोषः। तदाह। "गुरोरर्थमर्थयते" इति –हे०]।

(२५.) स त्वं महिते पूजिते प्रशस्ते प्रसिद्धे [मनोहरे–चा०] मदीयेऽग्न्यागारे त्रेताग्निशालायां चतुर्थोऽग्निरिव वसन्द्वित्राणि द्वे त्रीणि वाहानि दिनानि। "संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये" इति बहुव्रीहिः। "बहुव्रीहौ संख्येये डजबहुगणात्" इति डच्प्रत्ययः समासान्तः [तथा च भाष्यकारः। शेषपञ्चाधिष्ठानां (वाक्तत्र) वस्तुतोत्युक्तं बहुवचनमिति–हे० चा०]। सोढुं (स्थातुं) अर्हसि। हे अर्हन्मान्य ["अर्हतौ जिनसन्मान्यौ" इति यादवः चा०] त्वदर्थं तव प्रयोजनं साधयितुं यावद्यते यतिष्ये। "यावत्पुरानिपातयोर्लट्" इति भविष्यदर्थे लट्।

(२६.) अग्रजन्मा ब्राह्मणः (कौत्सः) प्रतीतः प्रीतः संस्तस्य रघोरवितथममोघं संगरं प्रतिज्ञाम्। "अथ प्रतिज्ञाजिसंविदापत्सु संगरः" इत्यमरः। तथेति प्रत्यग्रहीत्

(24.) "Asking wealth for his preceptor, a certain mendicant who had seen the other ends of the Vedas (who had mastered the Vedas) went to another donor, not obtaining his object of wish from Raghu. Let there not be this new (first) rise of scandal (about me)"!

(25.) "Therefore, O revered Sir, it behoves you to sojourn like a fourth Agni in my well-known and honoured temple of fire and wait there for two or three da[ys] while I try to accomplish your purpose".

तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा ।
गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ॥ २६ ॥
वसिष्ठमन्त्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु ।
मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य ॥ २७ ॥
अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भम् ।
सामन्तसंभावनयैव धीरः कैलासनाथं तरसा जिगीषुः ॥ २८ ॥

(अंगीचक्रे) । रघुरपि गां भूमिं (दिग्विजयेन) आत्तसारां गृहीतधनामवेक्ष्य (ज्ञात्वा) कुबेरात् (धनदात्) अर्थं निष्क्रष्टुमाहर्तुं चकमे इयेष ।

(२७.) वशिष्ठस्य यन्मन्त्रेणोक्षणमभिमन्त्र्य प्रोक्षणं तज्जात्प्रभावात्सामर्थ्याद्धेतोः । उदन्वदाकाशमहीधरेषूदन्वत्युदधावाकाशे महीधरेषु वा । मरुत्सखस्य [बलाहकेन गत्यर्थं वायोरपेक्षितत्वात् मरुत्सखा यस्येति अभिमतः समासः । एवं सति राजाहःसखिभ्यष्टजिति टच्प्रत्ययो न स्यात् तस्य तत्पुरुषेऽभिधानात् । अतश्चित्यमेतदिति -हे० चा०] मरुतः सखेति तत्पुरुषो बहुव्रीहौ समासान्ताभावात् । ततो वायुसहायस्येति लभ्यते । वारीणां वाहको बलाहकः । पृषोदरादित्वात्साधुः । तस्येव मेघस्येव । तद्रथस्य गतिः संचारो न विजघ्ने न विहता हि [यथा मेघस्य गतिः क्वापि न हन्यते तथास्य रथस्यापि–सु०] ।

(२८.) अथ प्रदोषे रजनीमुखे । तत्काले यानाधिरोहणविधानात् । प्रयतो धीरो रघुः । समन्ताद्भवः सामन्तः [कतिपयग्रामपतिः–हे०] राजमात्रमिति संभावनयैव (बुध्द्यैव अनुमत्या वा) कैलासनाथं कुबेरं तरसा बलेन जिगीषुर्जेतुमिच्छुः सन् । कल्पितं सज्जितं शस्त्रं गर्भे (मध्ये) यस्य तं रथमधिशिश्ये (अधिष्ठितः) रथे शयितवानित्यर्थः । " अधिशीङ्स्थासां कर्म " इति कर्मत्वम् ।

(२९.) प्रातः प्रयाणाभिमुखाय (प्रस्थानसन्मुखाय) तस्मै (जिगमिषवे) रघवे कोशगृहे (भाण्डारागारे) नियुक्ता अधिकृताः (स्थापिताः) भाण्डागारिकाः सविस्मयाः

(26.) With the words " very well " the satisfied Brâhman (lit. the first born) accepted his unfailing promise ; Raghu too finding the earth stripped of all its treasure determined to extort money from Kubera.

(27.) By virtue of the influence produced by Vasistha's holy sprinkling accompanied by the Mantras (of course at the time of coronation), the course of his chariot like that of a cloud assisted by the wind was unimpeded whether in the sea or in the sky or over the mountain.

(28.) And towards nightfall the valiant and devout Raghu who longed to subdue, by force of arms, the Lord of Kailâsa regarding him as no more than a mere feudatory of his, lay down in his chariot in the interior of which weapons were arranged.

प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोषगृहे नियुक्ताः।
हिरण्मयीं कोषगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः॥ २९॥
तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात्।
दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम्॥ ३०॥
जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ।
गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च॥ ३१॥
अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः।
स्पृशन्करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः॥ ३२॥

साश्चर्याः) सन्तः कोशगृहस्य मध्ये नभस्तो नभसः। पञ्चम्यास्तसिल्प्रत्ययः। पतितां हिरण्मयीं सुवर्णमयीम्। "दाण्डिनायन–" इत्यादिना निपातनात्साधुः। वृष्टिं (वर्षणं) शशंसुः कथयामासुः।

(३०.) भूपती रघुः। अभियास्यमानादभिगमिष्यमाणात्कुबेराल्लब्धम्। वज्रेण कुलिशेन भिन्नं सुमेरोः पादं प्रत्यन्तपर्वतमिव स्थितम्। "पादाः प्रत्यन्तपर्वताः" इत्यमरः। तं भासुरं भास्वरम् (देदीप्यमानं)। "भञ्जभासमिदो घुरच्" इति घुरच्। हेमराशिं (सुवर्णसमूहं) समस्तं कृत्स्नमेव कौत्साय दिदेश ददौ। न तु चतुर्दशकोटिमात्रमित्येवकारार्थः।

(३१.) तावर्थिदातारौ द्वावपि साकेतनिवासिनोऽयोध्यावासिनः। "साकेतः स्यादयोध्यायां कोशला नन्दिनी च सा" इति यादवः। जनस्याभिनन्द्यसत्त्वौ स्तुत्यव्यवसायावभूताम्। "द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः। कौ द्वौ। गुरुप्रदेयादधिकेऽतिरिक्तद्रव्ये निःस्पृहोऽर्थी। अर्थिकामादर्थिमनोरथादधिकं प्रददातीति तथोक्तः। "प्रे दाज्ञः" इति कप्रत्ययः। नृपश्च।

(३२.) अथ प्रीतमना महर्षिः कौत्सः संप्रस्थितः प्रस्थास्यमानः सन्। "आशंसायां

(29.) In the morning when he was about to start, his treasury officers struck with astonishment reported to him the shower of gold that had fallen from heaven down into the interior of his treasury-house.

(30.) The heaps of burnished gold, which resembled a skirt-hill of the Sumeru struck down by Indra's thunderbolt, obtained from Kubera who was about to be marched against, the king gave Kautsa without any reserve.

(31.) To the people living in Sāketa the conduct of either of them was a matter of congratulation; of the mendicant because he was unwilling to take more than was due to his preceptor; of the king because he gave more than the mendicant asked for.

(32.) Now at his departure the great sage Kautsa, delighted in mind, touched with his hand the king who had bent the fore part of his body and who had made hundreds of camels and mares convey the treasure and said the following words.

किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ॥ ३३ ॥
आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥ ३४ ॥

भूतवच्च ” इति भविष्यदर्थे क्तः । उष्ट्राणां क्रमेलकानां वामीनां वडवानां च शतैर्वाहितार्थं प्रापितधनमानतपूर्वकायम् । विनयनम्रमित्यर्थः । प्रजेश्वरं रघुं करेण स्पृशन्वाचमुवाच [विशेषणं विना वाक्शब्दप्रयोगाश्रित्यः । यद्वामनः । विशेषणस्य च विशेष्यप्रतिपत्त्यर्थमुक्तार्थस्य प्रयोगः। यद्वा। काव्येषु संक्षेपानादरः । तथा काव्यादर्शे ।“अलंकृतमसंक्षिप्तं काव्यम्” इति वक्ष्यमाणेन संबंधः। काशिकावृत्तौ च। समुच्चये सामान्यवचनस्येत्यत्र लौकिकशब्दव्यवहारे लाघवं नाद्रियते इति । “येनांगविकार” इत्यत्र पाणिनीयमतदर्पणे च। “ अक्षादिशब्देन विनापि देहःस्यादेव करणादिगुणप्रतीतेः । तथापि लोके गुरुलाघवं प्रत्यनादराच्छब्दमपि प्रयुंक्ते” इति-हे० “शुचिस्मितां वाचमवोचदच्युतः” इत्यादौ यथा शुचिस्मितामिति विशेषणं तथात्र वाचो विशेषणायोगाद्वाचमुवाचेति चिन्त्यम्-चा०] ।

(३३.) वृत्ते स्थितस्य । “ न्यायेनार्जनमर्थस्य वर्धनं पालनं तथा । सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ” इति कामन्दकः [मन्दकोक्ते । यद्वा । “ गुरोः पूजाघृणाशौचं सत्यमिन्द्रियनिग्रहः। प्रवर्तनं हितानां च तत्सर्वं वृत्तमुच्यते” इति-हे०]।तस्मिन्वृत्ते स्थितस्य प्रजानामधिपतेर्नृपस्य भूः कामान्सूत इति कामसूर्यदि । “ सत्सूद्विषद्रुह-” इत्यादिना क्विप् । अत्र कामप्रसवने किं चित्रम् । न चित्रमित्यर्थः । किंतु तव प्रभावो महिमा [“ प्रभावो बाहुलकादिति ” क्षीरतरंगिण्यां-हे०] त्वाचिन्तनीयः । येन त्वया द्यौरपि (स्वर्गोपि) मनीषितमभिलाषितं दुग्धा । दुहेर्द्विकर्मकत्वादप्रधाने कर्मणि क्तः । “ प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ” इति स्मरणात् ।

(३४.) सर्वाणि श्रेयांसि शुभान्यधिजग्मुषः प्राप्तवतस्ते तवान्यत्पुत्रातिरिक्तमाशास्यमाशीःसाध्यमाशंसनीयं वा पुनरुक्तभूतम् [पुनरुक्तमिव । इवार्थे भूतशब्दः मातृभूतः पितृभूतः इत्यत्र भूतशब्दस्यैवोपमानार्थत्वमिति कैयटकारेण प्रत्यपादि-चा०] । सर्वं सिद्धमित्यर्थः । किंत्वीड्यं स्तुत्यं भवन्तं भवतः पितेवात्मगुणानुरूपम् [आत्मशब्देन राजा विवक्षितः अन्तरा-

(33.) “ It is no wonder if the earth yields all things desired by a king who abides by his duty towards his subjects. Your prowess is on the other hand inconceivable, for it has made even the heavens yield objects of desire !

(34.) Other blessings would be a mere repetition (superfluous) in the case of you who enjoy happiness of every kind. May you obtain a son befitting your own excellences as your father obtained in you an adorable son !

इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम् ।
राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ॥ ३५ ॥
ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् ।
अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ॥ ३६ ॥

'त्मा वा । श्रुतशौर्योदयोऽग्रात्मगुणा इति । अनुरूपमिति अव्ययं । विभक्तिरित्यादिना अव्ययीभावे क्लीबता स्यात् । अथ-"कुगतिप्रादयः" इति । अनुगतः रूपमित्यनुरूपः इति तत्पुरुषे कृतेऽपि परवल्लिंगं द्वन्द्वतत्पुरुषयोरिति स एव दोष इति चेन्न । "द्विगुप्राप्तापन्नालं पूर्वगतिसमासेषु निषेधो वक्तव्यः" इति परवल्लिंगता निषेधात् निष्कौशाम्बिरिव पुंल्लिंगता भवति। तथाहि कुमारसंभवे । " आत्मानुरूपा विधिनापयेम " । अथ वा । " मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं" । "रूपं स्वभावे सौन्दर्ये" इति विश्वः–हे०] । त्वया तुल्यगुणमित्यर्थः । पुत्रं लभस्व प्राप्नुहि ।

(३५.) अग्रजन्मा (अग्रे मुखे जन्म यस्य सः) ब्राह्मणः । " अग्रजन्मा द्विजे श्रेष्ठे भ्रातरि ब्रह्मणि स्मृतः " इति विश्वः । इत्थं (अमुना प्रकारेण) राज्ञ आशिषं प्रयुज्य (उदीर्य) दत्वा गुरोः सकाशं समीपं प्रतीयाय प्राप । राजापि । जीवलोको जीवसमूहः । " जीवः प्राणिनि गीष्पतौ " इति विश्वः । अर्कादालोकं प्रकाशमिव । तस्मादृषेः आशिषः प्रयोगात् । न तु मुनेः ग्राम्योक्तिप्रसंगात्–हे० केचन तस्माद्द्विजादिति व्याचक्षते तन्न ग्राम्यत्वात्–चा०] आशु सुतं लेभे प्राप ।

(३६.) तस्य रघोर्देवी महिषी [पट्टराज्ञी प्रभावती–हे०] ब्राह्मे । " तस्येदम् " इत्यण् । ब्रह्मदेवताकेऽभिजिन्नामके मुहूर्ते किलेषदसमाप्त कुमारं कुमारकल्पं स्कन्दसदृशम् । " ईषदसमाप्तौ–" इत्यादिना कल्पप्प्रत्ययः । कुमारं पुत्रं सुषुवे । " कुमारो बालके स्कंदे " इति विश्वः । अतो ब्राह्ममुहूर्तोत्पन्नत्वात्पिता रघुर्ब्रह्मणो विधेरेव नाम्ना तमात्मजन्मानं पुत्रमजमजनामकं चकार । " अजो हरौ हरे कामे विधौ छागे रघोः सुते " इति विश्वः । [अष्टमो मुहूर्तो ब्राह्मः । ननु । "ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनोहितं" इति । रात्रेः पश्चिमयामे रूढिः । " पूर्वरात्रे महारात्रस्ततश्चापररात्रकः । ब्राह्मोप्येते क्रमाद्यामाः" इति यादवप्रकाशः । तत्रहि ब्रह्मणोदेवस्याध्ययनप्रवृत्तिं निमित्तीकृत्य ब्रह्मशब्दः प्रयुक्तः ।

(35.) Having thus pronounced a blessing on the king, the Brâhmana (lit. the first born) returned to his preceptor The king too soon after obtained a son from him (through the potency of his blessing) as the world of the living receives light from the sun.

(36.) At a time presided over by Brahmâ, his queen (Prabhâvatî by name) gave birth to a son who very nearly resembled Kârtikeya. Hence the father named that son Aja, after Brahmâ.

रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ॥ ३७ ॥
उपात्तविद्यं विधिवद्गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तम् ।
श्रीः साभिलाषापि गुरोरनुज्ञां धीरेव कन्या पितुराचकाङ्क्ष ॥ ३८ ॥

नाडिकाद्वयवाचिनोहि मुहूर्तस्य यामवाचकत्वे दोषः । स च मुहूर्तो ब्रह्माधिदेवतावाचकश्च न भवतीति तन्न । ते च मुहूर्ताः ज्योतिषरत्नमालायां । "रुद्राहिमित्रपितरो वसुवारिविश्वे । वेधा विधिः शतमखः पुरुहूतवन्ही । नक्तंचरश्च वरुणार्यमयोनयश्च । प्रोक्तादिने दश च पञ्च तथामुहूर्ताः " । "निशामुहूर्ता गिरिशाजपादाहिर्बुध्न्यपूषाश्वियमाग्नयश्च । विधातृचन्द्रादिति-जीवाविष्णुस्तिग्मद्युतित्वाष्ट्रसमीरणाश्च" इति दैवज्ञवल्लभोपि ।" ब्राह्मो मुहूर्ताभिजिदष्टमो यस्त-स्मिन्नपाचं ककुभं विहाय । प्रशस्यते यानमशेषदिक्षु सर्वाणि कार्याणि च यांति सिद्धिं " । यद्यपि दिवा निशि च ब्राह्ममुहूर्तसद्भावः तथाप्यत्र दिवैव प्रासोष्टेति मंतव्यं । "नक्तंबुधो-भौमशशांकमंदागुर्वर्कशुक्रादिनशक्तयः स्युः"इति श्रीपतिपद्धत्युक्तेः । प्रकाशकग्रहसूर्यस्य शुभ-ग्रहगुरुशुक्रयोश्च दिवा बलीयस्त्वात् । बलिषु श्रेष्ठग्रहेषु महाभाग्यता स्यात् । नारदीयसंहि-तायां च । " मध्यंदिनगते भानौ मुहूर्तोऽभिजिदाह्वयः । नाशयत्यखिलान् दोषान् पिनाकी त्रिपुरं यथा"–हे० उत्तरघटिकाचतुष्टये–चा० पश्चिमरात्रघटिकाद्वये–मु०]।

(३७.) ओजस्वि तेजस्वि बलिष्ठं वा । " ओजस्तेजसि धातूनामवष्टम्भप्रकाशयोः । ओजो बले च दीप्तौ च " इति विश्वः । रूपं वपुः । " अथ रूपं नपुंसकम् । स्वभावाकृ-तिसौन्दर्यवपुषि श्लोकशब्दयोः " इति विश्वः । तदेव पैतृकमेव । वीर्यं शौर्यं (दीपार्थे दाहकशक्तित्वं) तदेव । नैसर्गिकं (" सर्गस्तुसर्जनाध्याय स्वभावोत्साहनिश्चयाः " इति वैज-यन्ती) । स्वाभाविकमुन्नतत्वं (उच्चैस्तरत्वं दीपपक्षे तु गुणैरधिकत्वं) तदेव । तादृशमेवेत्यर्थः। कुमारो बालकः । प्रवर्तित उत्पादितो दीपः प्रदीपात्स्वोत्पादकदीपादिव । स्वात्स्वकीयात् । " पूर्वादिभ्यो नवभ्यो वा " इति स्माद्भावो वैकल्पिकः । कारणाज्जनकान्न बिभिदे भिन्नो नाभूत् । सर्वात्मना तादृश एवाभूदित्यर्थः ।

(३८.) गुरुभ्यः [इति बहूक्त्या नानाविद्यावाप्तिः–हे०] विधिवद्यथाशास्त्रमुपात्तविद्यं लब्धविद्यम् । यौवनस्य (तारुण्यस्य) उद्भेदादाविर्भावाद्धेतोर्विशेषेण कान्तं सौम्यं (मनोज्ञं)

(37.) The majestic form was the same, the valour was the same, the nobleness of nature was also the same ; the son did not differ from his generating cause (the father) as a light lighted by means of a lamp (does not differ from it).

(38.) Royalty though deeply in love with the prince who had received education in a due course from his tutors, and who (now) appeared more handsome by reason of his budding youth, did but wait for (lit. wished for) his father's consent like a discreet daughter waiting for that of her father.

अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः ।
आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ॥ ३९ ॥
तं श्लाघ्यसंबन्धमसौ विचिन्त्य दारक्रियायोग्यदशं च पुत्रम् ।
प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीम् ॥ ४० ॥
तस्योपकार्यारचितोपचारा वन्येतरा जानपदोपदाभिः ।
मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ॥ ४१ ॥

तमजं प्रति साभिलाषापि श्रीः । धीरा स्थिरोन्नतचित्ता । "स्थिरा चित्तोन्नतिर्या तु तद्धैर्यमिति संज्ञितम्" इति भूपालः । कन्या पितुरिव । गुरोरनुज्ञामाचकाङ्क्षेव । यौवराज्यार्होऽभूदित्यर्थः । अनुज्ञाशब्दात्पितृपारतन्त्र्यमुपमासामर्थ्यात्पाणिग्रहणयोग्यता च ध्वन्यते ।

(३९) अथ स्वसुर्भगिन्या इन्दुमत्याः स्वयंवरार्थं कुमारस्य [शीलवान् गुणसंपन्नो राजपुत्रः कुमारकः—हे०] अजस्यानयन उत्सुकेन (उत्कण्ठितेन) क्रथकैशिकानां विदर्भदेशानामीश्वरेण स्वामिना भोजेन राज्ञाप्तो हितः [स्वकीयः—हे०] दूतो रघवे विसृष्टः प्रेषितः । क्रियामात्रयोगेऽपि चतुर्थी ।

(४०) असौ रघुस्तं भोजं (शुद्धवंशोत्पन्नत्वेन) श्लाघ्यसंबन्धमनूचानत्वादिगुणयोगात्स्पृहणीयसंबन्धं विचिन्त्य विचार्य पुत्रं च दारक्रियायोग्यदशं (दारक्रियायाः विवाहक्रियायाः योग्या उचिता दशा यस्य तं तथोक्तं) विवाहयोग्यवयसं विचिन्त्य ससैन्यं (चमूसहितं) एनं पुत्रमृद्धां विदर्भाधिपस्य भोजस्य राजधानीं पुरीं प्रति प्रस्थापयामास । धीयतेऽस्यामिति धानी । "करणाधिकरणयोश्च" इत्यधिकरणे ल्युट्प्रत्ययः । राज्ञां धानीति विग्रहः ।

(४१.) उपकार्यासु राजयोग्येषु पटभवनादिषु । "सौधोऽस्त्री राजसदनमुपकार्योपकारिका" इत्यमरवचनव्याख्याने क्षीरस्वामी । उपक्रियत उपकरोति वा पटमण्डपादि राजसदनामिति । रचिता उपचाराः शयनादयः [स्रक्चंदनादिसामग्री—हे०] येषु ते तथोक्ताः । जानपदानां जनपदेभ्य आगतानामुपदाभिरुपायनैः । वन्या वने भवा इतरे येषां ते वन्येतराः । अवन्या इत्यर्थः । "न बहुव्रीहौ" इति सर्वनामसंज्ञानिषेधः । तत्पुरुषे

(39.) Soon after Bhoja, the lord of the country of the Krathakais'ikas, being anxious to fetch the prince Aja, for the ceremony of self-electing-marriage of his sister Indumati, sent a friendly messenger to Raghu.

(40.) Thinking him to be one with whom an alliance was desirable and considering his son in a proper state of marrying a wife, he sent him with an escort to the flourishing metropolis of the king of the country of the Vidarbhas.

(41.) The prince's halts on the way, during which comforts of all kinds were provided in tents of Royal state and which by the help of the presents by the villagers appeared the reverse of sylvan, resembled rambles in a ...

स नर्मदारोधसि सीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले ।
निवेशयामास विलङ्घिताध्वा क्लान्तं रजोधूसरकेतु सैन्यम् ॥ ४२ ॥
अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्तिर्वन्यः सरित्तो गज उन्ममज्ज ॥ ४३ ॥
निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु ।
नीलोर्ध्वरेखाशबलेन शंसन्दन्तद्वयेनाश्मविकुण्ठितेन ॥ ४४ ॥

सर्वनामसंज्ञा दुर्वारैव । तस्य मनुजेन्द्रसूनोरजस्य मार्गे निवासा वासनिका उद्यानान्याक्रीडाः । "पुमानाक्रीड उद्यानम्" इत्यमरः । तान्येव विहारा विहारस्थानानि तत्कल्पाः । तत्सदृशा इत्यर्थः । "ईषदसमाप्तौ–" इति कल्पप्प्रत्ययः । बभूवुः ।

(४२.) विलङ्घिताध्वातिक्रान्तमार्गः सोऽजः सीकरार्द्रैः (जलकणभिन्नैः) । शीतलैरित्यर्थः । मरुद्भिर्वातैरानर्तिताः कम्पिता नक्तमालाश्चिरबिल्वाख्यवृक्षभेदाः । "चिरबिल्वो नक्तमालः करजश्च करञ्जके" इत्यमरः । यस्मिंतस्मिन् । निवेशार्ह इत्यर्थः। नर्मदाया रोधसि रेवायास्तीरे क्लान्तं श्रान्तं [इति निवेशहेतुः -हे०] । रजोभिर्धूसराः केतवो ध्वजा यस्य तत्सैन्यं निवेशयामास [स्थापयामास । रजोधूसरकेतुना सैन्यबाहुल्यं सूचितं--हे०] ।

(४३.) अथोपरिष्टादूर्ध्वम् । "उपर्युपरिष्टात्" इति निपातः । भ्रमद्भिः (भ्रमणशीलैः) । मदलोभादिति भावः । भ्रमरैः (द्विरेफैः) प्रागुन्मज्जनात्पूर्वं सूचितो ज्ञापितोऽन्तःसलिले प्रवेशो यस्य स तथोक्तः [एतेन मदजलाधिक्यमुक्तं–चा०सु०] । निर्धौतदाने क्षालितमदे अत एवामले गण्डभित्ती यस्य स तथोक्तः । "दानं गजमदे त्यागे" इति शाश्वतः । प्रशस्तौ गण्डौ गण्डभित्ती । "प्रशंसावचनैश्च" इति समासः । भित्तिशब्दः प्रशस्तार्थः । तथा च गणरत्नमहोदधौ–"मतल्लिकोद्घमिश्राः स्युः प्रकाण्डस्थलभित्तयः" इति । भित्तिः प्रदेशो वा । "भित्तिः प्रदेशे कुड्येऽपि" इति विश्वः । निर्धौतदानेनामला गण्डभित्तिर्यस्येति वा । वन्यो गजः सरित्तो नर्मदायाः सकाशात् । पञ्चम्यास्तसिल्प्रत्ययः । उन्ममज्जोत्थितः ।

(४४.) कथंभूतो गजः । निःशेषविक्षालितधातुनापि धौतगैरिकादिनापि । नीलाभिरूर्ध्वाभी रेखाभिस्तटाभिघातजनिताभिः शबलेन कर्बुरेण । "चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे"

---

(42) After having passed over (some) way he encamped his exhausted army, with its banners soiled with dust, on the banks of the Narmadá where the Naktamàla trees were made to dance by the gales cool with drops of water.

(43.) Just then emerged from the river a wild elephant whose plunging in (lit. entrance into) the water had been indicated before by the bees that were hovering over the place and whose wall-like temples were rendered clean on account of the rut having been washed off.

(44.) Indicating his playful butting against the sides of the *Rikshavat*

संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दम्।
बभौ स भिन्दन्बृहतस्तरंगान्वार्यर्गलाभङ्ग इव प्रवृत्तः॥ ४५॥
शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चात्।
पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प॥ ४६॥
तस्यैकनागस्य कपोलभित्त्योर्जलावगाहक्षणमात्रशान्ता।
वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः॥ ४७॥

इत्यमरः। अश्मभिः पाषाणैर्विकुण्ठितेन कुण्ठीकृतेन दन्तद्वयेन। ऋक्षवान्नाम कश्चित्तत्रत्यः पर्वतः। तस्य तटेषु वप्रक्रियां वप्रक्रीडाम्। उत्खातकेलिमित्यर्थः। "उत्खातकेलिः शृङ्गाद्यैर्वप्रकीडा निगद्यते" इति शब्दार्णवः। शंसन्कथयन् (लक्षणहेतोरिति शतृ)। सूचयन्नित्यर्थः। युग्मम्।

(४५.) संहारविक्षेपयोः संकोचनप्रसारणयोर्लघुक्रियेण क्षिप्रव्यापारेण। "लघु क्षिप्रतरं द्रुतम्" इत्यमरः। हस्तेन शुण्डादण्डेन। "हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपि" इति विश्वः। सशब्दं सघोषं बृहतस्तरंगान् (जलकल्लोलान्) भिन्दन्विदारयंस्तीराभिमुखः (तटसन्मुखः) स गजः। वारी गजबन्धनस्थानम्। "वारी तु गजबन्धनी" इति यादवः। वार्या अर्गलाया विष्कम्भस्य भङ्गे भञ्जने प्रवृत्त इव [वारीगजबन्धनस्थानं तस्यां बहिर्गमनरोधार्थं दत्ता अर्गला विष्कंभः तस्याः भंगे त्रोटने प्रवृत्तः इव। यद्वा। वार्येव जलमेवार्गला-हे०]। बभौ (रेजे)।

(४६.) शैलोपमः (गिरितुल्यः) स गजः शैवलमञ्जरीणां (जललीनवल्लीनां) जालानि वृन्दान्युरसा कर्षन्पश्चात्तटमुत्ससर्प। पूर्वं तेन गजेनोत्पीडितो नुन्नो वारिराशिः (जलसमूहः) यस्य स सरित्प्रवाहः (नदीवेगः) तटमुत्ससर्प (आजगाम)।

(४७.) तस्यैकनागस्यैकाकिनो गजस्य [एकशब्दः संख्यार्थो मुख्यार्थो वा। "एके-

---

mountain by means of his two tusks which though completely cleansed of all mineral dust still appeared marked with blue lines on them and which appeared to be worsted by rocks.

(45.) And splitting with (loud) noise the large billows by means of his trunk, expert in drawing-in and protrusion, the elephant that now faced the river-side appeared as though trying to break through some chains that tied him. (Malli. as if breaking the bolts of his stable).

(46.) That mountain-like elephant drawing with him by his chest the clusters of mass reached the bank afterwards but the current of the river, whose volume of waters was repelled backwards by him, reached the bank first.

(47.) The splendour of the stream of rutting-juice flowing from the lonely elephant's wall-like temples that was stopped for a while by his plunging into the water again began to glow at the sight of other than sylvan elephants.

सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयम् ।
विलङ्घिताधोरणतीव्रयत्नाः सेनागजेन्द्रा विमुखा बभूवुः ॥ ४८ ॥
स च्छिन्नबन्धद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन ।
रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार ॥ ४९ ॥
तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान्कुमारः ।
निवर्तयिष्यन्विशिखेन कुम्भे जघान नात्यायतकृष्टशार्ङ्गः ॥५० ॥

मुख्यान्यकेवलाः" इति–हे० चा०] कपोलभित्त्योर्जलावगाहेन (नीरमज्जनेन) क्षणमात्रं (मुहूर्तं) शान्ता निवृत्ता मददुर्दिनश्रीर्मदवर्षलक्ष्मीर्वन्येतरेषां ग्राम्याणामनेकपानां द्विपानां दर्शनेन पुनर्दिदीपे ववृधे [दुर्दिनशब्देन दानवर्षणमुच्यते–हे०] ।

(४८.) सप्तच्छदस्य वृक्षविशेषस्य क्षीरवत्कटुः सुरभिः प्रवाहः प्रसारो यस्य तम् । "कटुतिक्तकषायास्तु सौरभ्येऽपि प्रकीर्तिताः" इति यादवः । असह्यं तदीयं मदमाघ्राय (सिंघित्वा) सेनागजेन्द्राः (चमूश्रेष्ठकरिणः) । विलङ्घितस्तिरस्कृतः (अगणितः) आधोरणानां हस्तिपकानां तीव्रो महान्यत्नः (अंकुशताडनरूपः) यैस्ते तथोक्ताः सन्तः । "आधोरणा हस्तिपका हस्त्यारोहा निषादिनः" इत्यमरः । विमुखाः पराङ्मुखा बभूवुः ।

(४९.) स गजः (हस्ती) छिन्नाः (त्रोटिताः) बन्धाः (रज्वादयः) यैस्ते छिन्नबन्धा द्रुताः पलायिताः । युगं वहन्तीति युग्या वाहाः (अश्वोष्ट्रवृषभाः) यस्मिन्सः । स चासौ शून्यश्च तम् । भग्ना अक्षा रथावयवदारुविशेषाः (युगकीलकाः) । " अक्षो रथस्यावयवे पाशकेऽप्यक्षमिन्द्रियम् " इति शाश्वतः । येषां ते भग्नाक्षा अत एव पर्यस्ताः पतिता रथ यस्मिंस्तम् । रामाणां स्त्रीणां परित्राणे संरक्षणे विहस्ता व्याकुलाः । " विहस्तव्याकुलौ समौ " इत्यमरः । योधाः (वीराः) यस्मिंस्तं सेनानिवेशं शिबिरं क्षणेन तुमुलं संकुलं चकार ।

(५०.) नृपतेः (लक्ष्मीकामस्य) राज्ञो वन्यः करी अवध्यः (अमारणीयः) इति श्रु-

---

(48.) On smelling his unbearable rut-juice whose flow was as ill-smelling as the milk of the Saptachchhada tree, the large elephants in the army defying the strenuous efforts of their drivers turned their faces

(49.) He in a moment threw the whole camp into confusion which became empty of the animals which broke through their reins and took to flight, in which the chariots were overturned with their navels broken and in which the warriors were unable to protect their ladies.

(50.) The prince who knew (from the Vedas) that a king should not kill a sylvan elephant, drawing his bow not very forcibly, shot an arrow at his frontal globe while trying to turn him back who was attacking.

स विद्धमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः।
स्फुरत्प्रभामण्डलमध्यवर्ति कान्तं वपुर्व्योमचरं प्रपेदे ॥ ५१ ॥
अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः।
उवाच वाग्मी दशनप्रभाभिः संवर्धितोरःस्थलतारहारः ॥ ५२ ॥
मतङ्गशापादवलेपमूलादवाप्तवानस्मि मतङ्गजत्वम्।
अवेहि गन्धर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य ॥ ५३ ॥

तवाञ्छास्त्राज्ज्ञातवान्कुमार आपतन्तमभिधावन्तं तं गजं निवर्तयिष्यन्न तु प्रहरिष्यन्। अत एव नात्यायतमनतिदीर्घं यथा स्यात् । नञर्थस्य नशब्दस्य सुप्सुपेति समासः। कृष्टशार्ङ्ग ईषदाकृष्टचापः सन्विशिखेन बाणेन कुम्भे (गण्डस्थले) जघान। अत्र चाक्षुषः—" लक्ष्मीकामो युद्धादन्यत्र करिवधं न कुर्यात्। इयं हि श्रीर्ये करिणः " इति। अत एव " युद्धादन्यत्र " इति द्योतनार्थमेव वन्यग्रहणं कृतम्।

(५१.) स गजो विद्धमात्रः [विद्ध एव विद्ध मात्रः। सुप्सुपेति समासः–हे०] ताडितमात्रः किल [इत्यागमे–हे०] न तु प्रहृतस्तथापि नागरूपं गजशरीरमुत्सृज्य (परित्यज्य)। तेन वृत्तान्तेन विस्मितैस्तद्विस्मितैः सैन्यैर्दृष्टः सन्। स्फुरतः (प्रोल्लसतः) प्रभामण्डलस्य (दीप्तिसमूहस्य) मध्यवर्ति कान्तं मनोहरं व्योमचरं (नभोविहारि) वपुः प्रपेदे प्राप।

(५२.) अथ प्रभावेनोपनतैः प्राप्तैः कल्पद्रुमोत्थैः कल्पवृक्षोत्पन्नैः पुष्पैः कुमारमजमवकीर्याभिवृष्य दशनप्रभाभिर्दन्तकान्तिभि. संवर्धिता उरःस्थले (वक्षस्तटे) ये तारहाराः [" तारस्तु मुक्ताधौतमुक्तेऽतिदीप्तौ तारः " इति विक्रमादित्योक्तिः–चा०] स्थूलमुक्ताहारास्ते येन स तथोक्तः। वाचोऽस्य सन्तीति वाग्मी (प्रशस्ता वाक् यस्य सः वाग्मी) वक्ता। " वाचो ग्मिनिः " इति ग्मिनिप्रत्ययः। स पुरुष उवाच (जगाद)।

(५३.) अवलेपमूलाद्गर्वहेतुकात्। " अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि च " इति विश्वः। मतङ्गस्य मुनेः शापान्मतङ्गजत्वम् (करिभावं) अवाप्तवानस्मि। मां प्रियदर्शनस्य

(51.) No sooner was he pierced (by the arrow) than giving up the form of an elephant, he assumed a lovely and divine form standing in the midst of a flashing circle of light, being looked at by the army who wondered at the circumstance.

(52.) Then having showered on the prince the flowers of (lit. produced from) Kalpa-druma (celestial trees) which were brought to him by his power, the eloquent one whose garland of pearls pendant on his breast was brightened by the light of his teeth spoke to the prince (thus).

(53.) " Through the curse of the sage Màtanga incurred by my own insolence I was reduced to the state of an elephant. Know me to be Priyamavad-son of Priya-dars'ana the lord of the demi-gods ".

स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् ।
उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ॥ ५४ ॥
इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुम्भमयोमुखेन ।
संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनिधिर्माम् ॥ ५५ ॥
संमोचितः सत्त्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन ।
प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे स्यात्स्वपदोपलब्धिः ॥ ५६ ॥

प्रियदर्शनाख्यस्य गन्धर्वपतेर्गन्धर्वराजस्य तनूजं पुत्रम् । "स्त्रियां मूर्तिस्तनुस्तनूः" इत्यमरः । तन्वादेर्वेत्यूङिति केचित् । प्रियंवदं प्रियंवदाख्यमवेहि जानीहि । प्रियं वदतीति प्रियंवदः । " प्रियवशे वदः खच् " इति खच्प्रत्ययः [पुरा किलेश्वरसेवागमने खर्वगर्वसंतापितेन जातमन्युना गजोभवेति शप्तः इति वार्ता—चा० सु०]

(५४.) स महर्षिश्च प्रणतेन (नम्रीभूतेन) मयानुनीतः (स्तुतः) सन्पश्चान्मृदुतां शान्तिमगच्छत् । तथाहि । जलस्योष्णत्वमग्नेरातपस्य वा संप्रयोगात्संपर्कात् । न तु प्रकृत्योष्णत्वम् । यच्छैत्यं सा प्रकृतिः स्वभावः । विधेयप्राधान्यात्सेति स्त्रीलिङ्गनिर्देशः । महर्षीणां शान्तिरेव स्वभावो न क्रोध इत्यर्थः ।

(५५.) इक्ष्वाकुवशः प्रभवः (उत्पत्तिः) यस्य सोऽजो यदा ते कुम्भमयोमुखेन लोहाग्रेण शरेण भेत्स्यति विदारयिष्यति तदा स्वेन वपुषो महिम्ना (गांधर्वेण प्रभावेण) पुनः संयोक्ष्यसे सगंस्यसे इति स तपोनिधिर्मामवोचत् (अवादीत्) ।

(५६.) चिरं प्रार्थितं दर्शनं यस्य तेन सत्त्ववता बलवता त्वयाहं शापात्संमोचितो मोक्षं प्रापितः । भवतः प्रतिप्रियं प्रत्युपकारं न कुर्यां चेन्मे स्वपदोपलब्धिः स्वस्थानप्राप्तिः । " पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु " इत्यमरः । वृथा स्याद्धि । तदुक्तम्—" प्रतिकर्तुमशक्तस्य जीवितान्मरणं वरम् " इति ।

(54.) " But the great sage, being supplicated by me prostrate, got to leniency afterwards (took compassion on me), because the heat of water is owing to the application of fire or the sun, what is coolness is but the nature of water".

(55.) That repository of penance spoke thus to me, " when Aja sprung from the family of Ikshvāku shall pierce your frontal globe by his iron-pointed arrow, then you shall unite your body with your own splendour ".

(56.) " I have been relieved from my curse by you of great might, whose sight had long been prayed for by me. If I do not confer on you any good in return, my restoration to my own position is all in vain".

संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम्।
गान्धर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ॥ ५७ ॥
अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि त्वम्।
तस्मादुपच्छन्दयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यम् ॥ ५८ ॥
तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं जग्राह तस्मान्निगृहीतशापात् ॥ ५९ ॥

(५७.) हे सखे। सखिशब्देन समप्राणतोक्ता। यथोक्तम्—" अत्यागसहनो बन्धुः सदैवानुमतः सुहृत्। एकक्रियं भवेन्मित्रं समप्राणः सखा मतः " इति। प्रयोगसंहारयोर्विभक्तमन्त्रं (प्रयोगे प्रेरणे संहारे संक्षेपे च विभक्तौ भिन्नौ मन्त्रौ यस्य तत् तथोक्तं) गान्धर्वं गंधर्वदेवताकम्। संमोह्यतेऽनेनेति संमोहनं [प्रस्वापनं वा–चा०] नाम (प्रसिद्धं) ममास्त्रमादत्स्व गृहाण। [अस्त्रान्तरेभ्यो गुणमाह–हे० चा०] यतोऽस्त्रात्प्रयोक्तुरस्त्रप्रयोगिणोऽरिहिंसा (शत्रुमारणं) न च [" न हिंस्यात्सर्वभूतानि " इति श्रुतिदर्शनात्–हे०] विजयश्च हस्ते [इति लोकोक्तिः। यथा किराते। "जटाधरः सन् जुहुधीह पावकं"। मेघदूते च। "शेषान्मासान्गमय चतुरो लोचने मीलयित्वा"–हे०]। हस्तगतो विजयो भवतीत्यर्थः। वधलज्जितः कथमस्त्रग्रहणपरः स्यामिति चेत्तत्राह—

(५८.) किं च। मां प्रति ह्रिया प्रहारनिमित्तयालम् [वारणार्थाच्चालं योगे तृतीया एव–हे० सु०] कुतः। यद्यतो हेतोस्त्वं मां प्रहरन्नपि (विध्यन्नपि) मुहूर्तं (क्षणमात्रं) दयापरः कृपालुरभूः। तस्मादुपच्छन्दयति प्रार्थयमाने मयि त्वया। प्रतिषेधः परिहारः [गन्धर्वास्त्रं न गृह्णामीति–हे०]। स एव रौक्ष्यं पारुष्यम्। तन्न प्रयोज्यं न कर्तव्यम्।

(५९.) ना सोमश्चन्द्र इव नृसोमः [आनन्दकारित्वात्–चा०]। उपमितसमासः। "सोम ओषधिचन्द्रयोः" इति शाश्वतः। पुरुषश्रेष्ठः इत्यर्थः। अस्त्रविदस्त्रज्ञः सोऽजस्तथेति (अङ्गीकृत्य) सोम उद्भवो यस्याः सा तस्याः सोमोद्भवायाः सरितो नर्मदायाः [नर्मदाशब्देन

(57.) My friend, accept this missile of mine by name Sammohana which may be discharged and drawn back by different incantations and whose presiding god is a certain Gandharva and by virtue of which victory is within the reach of the shooter without distroying his enemy.

(58.) Do not be ashamed, for though striking me for a moment, you have proved kind to me. Therefore do not use the harshness of a refusal to me who am beseeching you.

(59.) 'Be it so' saying so, the moon-like person, expert in arms, having sipped the hallowing waters of the river sprung from the moon, with his face turned to the north, accepted the Mantra (charm or spell) of the missile from him who was relieved from the curse.

एवं तयोरध्वनि दैवयोगादासेदुषोः सख्यमचिन्त्यहेतु ।
एको ययौ चैत्ररथप्रदेशान्सौराज्यरम्यानपरो विदर्भान् ॥ ६० ॥
तं तस्थिवांसं नगरोपकण्ठे तदागमारूढगुरुप्रहर्षः ।
प्रत्युज्जगाम क्रथकैशिकेन्द्रश्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली ॥ ६१ ॥
प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः ।
मेने यथा तत्र जनः समेतो वैदर्भमागन्तुमजं गृहेशम् ॥ ६२ ॥

सुखदातृत्वं व्यज्यते–हे०] । " रेवा तु नर्मदा सोमोद्भवा मेखलकन्यका " इत्यमरः । पवित्रं पयः (जलं) उपस्पृश्य पीत्वा । आचम्येत्यर्थः । उदङ्मुखः [उत्तरास्यः । "उदङ्मुखस्तु गृह्णीयात्"इति स्मृतेः । यद्वा । उदङ्मुखः उपस्पृश्य । "अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः । प्राग्वा-ब्राह्मेण तीर्थेन द्विजोनित्यमुपस्पृशेत्" इति याज्ञवल्क्यः–हे०] सन्निगृहीतशापान्निवर्तितशापात्। उपकृतादित्यर्थः । तस्मात्प्रियंवदादस्त्रमन्त्रं जग्राह ।

" (६०.) एवमध्वनि मार्गे दैवयोगाद्दैववशादचिन्त्यहेत्वनिर्धार्यहेतुकं सख्यं सखित्वम् ' सख्युर्यः " इति यप्रत्ययः । आसेदुषोः प्राप्तवतोस्तयोर्मध्य एको गन्धर्वश्चैत्ररथस्य कुबेरोद्यानस्य प्रदेशान् । "अस्योद्यानं चैत्ररथम् " इत्यमरः। अपरोऽजः सौराज्येन राजन्वत्तया रम्यान्विदर्भान्विदर्भदेशान्ययौ (जगाम) ।

(६१.) नगरस्योपकण्ठे समीपे तस्थिवांसं स्थितं तमजं तस्याजस्यागमेनागमनेनारूढ उत्पन्नो गुरुः प्रहर्षः (प्रमोदः) यस्य स क्रथकैशिकेन्द्रो विदर्भराजः । (इन्दूदये) प्रवृद्धोर्मिः (तरङ्गः) ऊर्मिमाली समुद्रश्चन्द्रमिव । प्रत्युज्जगाम [" रत्नाकरो जलनिधिरूर्मिमाली महाशयः" इति विन्ध्यवासी–हे० चा०] ।

(६२.) एनमजमग्रयायी । सेवाधर्मेण पुरो गच्छन्नित्यर्थः । नीचैर्नम्रः पुरं (नगरं) प्रवेश्य प्रवेशं कारयित्वा प्रीत्यार्पितश्रीः (अर्पिता दत्ता अजाय श्रीः छत्रचामरादिशोभा येन सः तथोक्तः) तथा तेन प्रकारेणोपाचरदुपचरितवान् । यथा येन प्रकारेण तत्र पुरे [स्वयंवरे–हे०] समेतो मिलितो जनो वैदर्भं भोजमागन्तुं प्राघूर्णिकं (अतिथिं) मेने । अजं गृहेशं गृहपतिं मेने ["स्युरावेशिक आगन्तुरतिथीनां गृहागते" इत्यमरः–हे० चा०] ।

(60.) Thus of them two contracting fortuitously on the way a friendship (originating) from an unknown cause, one went to the regions of Chitraratha and the other to the kingdom of Vidarbha, happy by reason of good government.

(61.) The lord of the Krathakais'ikas, transported with great joy at his arrival, went forth to receive him who had stopped near the precincts of the city, like the sea rising with up-heaving surges to (meet) the moon.

(62.) And having made him enter the city, he who led the way and by whom his royal fortune was offered to Aja, served him so humbly that the people assembled there thought the king of the Vidarbhas to be the guest and Aja the lord of the palace.

तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टां
प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम्।
रम्यां रघुप्रतिनिधिः स नवोपकार्यां
बाल्यात्परामिव दशां मदनोऽध्युवास ॥ ६३ ॥
तत्र स्वयंवरसमाहृतराजलोकं
कन्याललाम कमनीयमजस्य लिप्सोः।
भावावबोधकलुषा दयितेव रात्रौ
निद्रा चिरेण नयनाभिमुखी बभूव ॥ ६४ ॥

(६३.) रघुप्रतिनिधी रघुकल्पः। रघुतुल्यः इत्यर्थः। उक्तं च दण्डिना सादृश्यवाचकप्रस्तावे--" कल्पदेशीयदेश्यादि प्रख्यप्रतिनिधी अपि " इति। सोऽजः प्रणतैर्नमस्कृतवद्भिः। कर्तरि क्तः। तस्य भोजस्याधिकारो नियोगस्तस्य पुरुषैः। अधिकृतैरित्यर्थः। प्रदिष्टां निर्दिष्टां प्राग्द्वारस्य वेद्यां विनिवेशितः प्रतिष्ठापितः पूर्णकुम्भो यस्यास्ताम्। स्थापितमङ्गलकलशामित्यर्थः। रम्यां रमणीयां नवोपकार्यां नूतनं राजभवनम् [पटकुटीं--चा० सु०] " उपकार्या राजसद्मन्युपचाराचितेऽन्यवत् " इति विश्वः। मदनः (स्मरः) बाल्यात्परां शैशवादनन्तरां दशामिव। यौवनमिवेत्यर्थः। अध्युवासाधिष्ठितवान् तत्रोषितवानित्यर्थः। " उपान्वध्याङ्वसः " इति कर्मत्वम् [इतो दशश्लोकाः वसंततिलकाछंदसा। तल्लक्षणंच। "उक्तावसंततिलका तभजातगौगः"--चा०]।

(६४.) तत्रोपकार्यायाम्। स्वयंवरनिमित्तं समाहृतः संमेलितो राजलोकः (भूपसमूहः) येन तत्कमनीयं स्पृहणीयं कन्याललाम कन्यासु श्रेष्ठम् (कन्यारत्नं)। " ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे। श्रेष्ठभूषाशुण्डशृङ्गपुच्छाचिह्नाश्वालिङ्गिषु " इति यादवः। लिप्सोर्लब्धुमिच्छोः। लभेः सन्नन्तादुप्रत्ययः। अजस्य भावावबोधे पुरुषस्याभिप्रायपरिज्ञाने कलुषासमर्था दयितेव [अन्यत्रानुसक्तोयमिति अभिप्रायवेदनेन कलुषा अप्रसन्नादयितेव--हे० चा०] रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव [नेत्रसन्मुख्यभूत्। बहुषु स्थितेषु मां वृणीत नवेत्याकुलत्वाच्चिरेण निद्रामगमदित्यर्थः--हे०] " राजानं कामिनं चौरं प्रविशन्ति प्रजागराः " इति भावः [केचित्तु निद्राकथनं शृंगारपोषकं न भवतीत्याहुः--चा०]। अभिमुखीशब्दो ङीषन्तश्च्व्यन्तो वा।

(63.) He, the representative of Raghu, occupied the beautiful new palace in the porch of the front door of which were placed pitchers full of water and into which he was shown by the officers (of Bhoja) bowing down, as Madana occupies the state next to boy-hood.

(64.) There like a loved companion unable to know the feelings (of her husband), sleep came late at night before the eyes of Aja, who wished for the loveliest of maidens, whose self-electing marriage had called an assemblage of princes there.

तं कर्णभूषणनिपीडितपीवरांसं
शय्योत्तरच्छदविमर्दकृशाङ्गरागम् ।
सूतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥ ६५ ॥
रात्रिर्गता मतिमतां वर मुञ्च शय्यां
धात्रा द्विधैव ननु धूर्जगतो विभक्ता ।
तामेकतस्तव बिभर्ति गुरुर्विनिद्र-
स्तस्या भवानपरधुर्यपदावलम्बी ॥ ६६ ॥

(६५.) कर्णभूषणाभ्यां (कुण्डलाभ्यां) निपीडितौ पीवरौ पीनावंसौ यस्य तम् । शय्याया उत्तरच्छदस्योपर्यास्तरणवस्त्रस्य विमर्दैन घर्षणेन कृशो विमलोऽङ्गरागो यस्य तम् । नत्वङ्गनासङ्गादिति भावः [अनेनास्य ब्रह्मचर्यं द्योत्यते–हे० चा०] । प्रथितप्रबोधं प्रकृष्टज्ञानं तमेनमजं सवयसः समानवयस्का उदारवाचः प्रगल्भगिरः सूतात्मजा वन्दिपुत्रा वाग्भिः (ललितबन्धैः) स्तुतिपाठैरुषसि प्राबोधयन्प्रबोधयामासुः [मधुरगानेन हि प्रभूणां बोधः क्रियते । तथाहि भोजः । "मृदुभिर्मर्दनैः पादे शीतैर्व्यजनकैस्तथा श्रुतौ वा मधुरैर्गानैर्निद्रातो बोधयेत्प्रभुं"–हे०] ।

(६६.) हे मतिमतां वर (विदुषां श्रेष्ठ) । निर्धारणे षष्ठी । रात्रिर्गता (निशातिक्रान्ता) शय्यां (पर्यंकं) मुञ्च (जहिहि) विनिद्रो भवेत्यर्थः । विनिद्रत्वे फलमाह—धात्रेति । धात्रा ब्रह्मणा जगतो धूर्भारः । " धूः स्याद्यानमुखे भारे " इति यादवः । द्विधैव । द्वयोरेवेत्यर्थः । एवकारस्तृतीयनिषेधार्थः । विभक्ता ननु विभज्य स्थापिता खलु । तत्किमत आह–तां धुरमेकत एककोटौ तव गुरुः पिता विनिद्रः (वितन्द्रः अर्थान्निरालस्यः) सन्बिभर्ति । तस्या धुरः [युवराजत्वात्–हे०] भवान् । धुरं वहतीति धुर्यो भारवाही । तस्य पदं वहनस्थानम् । अपरं यद्धुर्यपदं तदवलम्बी । ततो विनिद्रो भवेत्यर्थः । नह्युभयवाह्यमेको वहतीति भावः ।

(६७.) चन्द्रारविन्दराजवदनादयो लक्ष्मीनिवासस्थानानीति प्रसिद्धिमाश्रित्योच्यते । निद्रावशेन निद्राधीनेन स्वच्चन्तरासङ्गोऽत्र ध्वन्यते । भवता पर्युत्सुकत्वमपि । त्वय्यनुरक्तत्वम-

---

(65.) At dawn the sons of bards of agreeable speech and his (Aja's) equals in age awoke him, who was of celebrated talents whose broad shoulders were pressed against his ear-rings and the yellow-pigment on whose body was almost removed on account of his rolling on the surface-sheets of his bed.

(66.) The night has passed away, O you the chief among the wise, leave your couch, the burden of the world has been divided only in two parts by the creator which on the one hand your father, ever awake, bears patiently, and you on the other hand are in the place of its other bearer.

निद्रावशेन भवताप्यनवेक्षमाणा
पर्युत्सुकत्वमबला निशि खण्डितेव ।
लक्ष्मीर्विनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥ ६७ ॥
तद्वल्गुना युगपदुन्मिषितेन ताव-
त्सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्त-
श्चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ॥ ६८ ॥

पीत्यर्थः । "प्रसितोत्सुकाभ्यां तृतीया च" इति सप्तम्यर्थे तृतीया । अपिशब्दस्तद्विषयानुरागस्यानपेक्ष्यत्वद्योतनार्थः [अपिशब्दः लक्ष्मीवालभ्यं सूचयति—हे०] । निशि खण्डिता भर्तुरन्यासङ्गज्ञानकलुषिताबलेव नायिकेव । "ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता" इति दशरूपके । [अन्यच्च । "निद्राकषायमुकुलीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रिताङ्गः । यस्याः कुतोपि गृहमेति पतिः प्रभाते सा खंडितेति कथिता कविभिः पुराणैः"—हे० "प्रयोगादुचिते यस्यावासके नागतः प्रियः । तदनागमनार्त्ता तु खंडितेत्यभिसंज्ञिता"—चा०] अनवेक्षमाणाविचारयन्ती सती । उपेक्षमाणेत्यर्थः । लक्ष्मीर्येन चन्द्रेण सह । त्वदाननसदृशत्वादिति भावः । विनोदयति विनोदं करोति । विनोदशब्दात् " तत्करोति तदाचष्टे " इति णिच्प्रत्ययः । सादृश्यदर्शनादयो हि विरहिणां विनोदस्थानानीति भावः । स चन्द्रोऽपि दिगन्तलम्बी पश्चिमाशां गतः सन् । अस्तं गच्छन्नित्यर्थः । अत एव त्वदाननरुचिं (त्वन्मुखकान्तिं) विजहाति (परित्यजति) । त्वन्मुखसादृश्यं त्यजतीत्यर्थः । अतो निद्रां विहाय तां लक्ष्मीमनन्यशरणां परिगृहाणेति भावः ।

(६८.) तत्तस्माल्लक्ष्मीपरिग्रहणाद्वल्गुना मनोज्ञेन । "वल्गु स्थाने मनोज्ञे च वल्गु भाषितमन्यवत्" इति विश्वः । युगपत्तावत् ["यावत्तावच्च साकल्येऽवधौ मानेवधारणे" -हे०] उन्मिषितेन युगपदेवोन्मीलितेन (समकालमेवविकसितेन) सद्यो द्वे अपि परस्परतुलामन्योन्यसादृश्यमधिरोहतां प्राप्नुताम् । प्रार्थनायां लोट् । के द्वे । अन्तः (मध्ये) प्रस्पन्दमाना चलन्ती (चञ्चला) परुषेतरा स्निग्धा तारा कनीनिका यस्य तत्तथोक्तम् । " तारकाक्ष्णः कनीनिका "

(67.) The moon, too, verging at the extremity of the quarters is giving up the splendour of your face, with whom Lakshmi, disregarded as she is by you, overpowered by sleep, beguiles her anxiety like a female displeased (with her husband) at night.

(68.) Let therefore the two obtain at once mutual similitude by their sweet simultaneous opening—the two, namely, your eye with the lovely pupil rolling within, and the lotus, having a black bee moving (in it).

वृन्ताच्छ्लथं हरति पुष्पमनोकहानां
संसृज्यते सरसिजैररुणांशुभिन्नैः ।
स्वाभाविकं परगुणेन विभातवायुः
सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥ ६९ ॥
ताम्रोदरेषु पतितं तरुपल्लवेषु
निर्धौतहारगुलिकाविशदं हिमाम्भः ।
आभाति लब्धपरभागतयाधरोष्ठे
लीलास्मितं सदशनार्चिरिव त्वदीयम् ॥ ७० ॥

इत्यमरः । तव चक्षुः (नेत्रं) । अन्तः प्रचलितभ्रमरं चलद्भृङ्गं पद्मं च । युगपदुन्मेषे सति संपूर्णसादृश्यलाभ इति भावः ।

(६९.) विभातवायुः प्रभातवायुः स्वाभाविकं नैसर्गिकं ते तव मुखमारुतस्य निःश्वासपवनस्य सौरभ्यम् । तादृक्सौगन्ध्यमित्यर्थः । परगुणेनान्यदीयगुणेन । सांक्रामिकगन्धेनेत्यर्थः। ईप्सुराप्तुमिच्छुरिव । " आप्ज्ञप्यृधामीत् " इतीकारादेशः । अनोकहानां वृक्षाणां श्लथं शिथिलं पुष्पं वृन्तात्पुष्पबन्धनात् । " वृन्तं प्रसवबन्धनम् " इत्यमरः । हरत्यादत्ते । अरुणांशुभिन्नैस्तरणिकिरणोद्बोधितैः (विकसितैः) सरसि जातैः सरसिजैः कमलैः सह । " तत्पुरुषे कृति बहुलम् " इति सप्तम्या अलुक् । संसृज्यते संगच्छते । सृजेर्दैवादिकात्कर्तरि लट् ।

(७०.) (भोः कुमार)ताम्रोदरेष्वरुणाभ्यन्तरेषु(रक्तगर्भेषु)तरुपल्लवेषु(द्रुमकिसलयेषु)पतितं निर्धौता (स्वच्छा) या हारगुलिका मुक्तामणयस्तद्वद्विशदं (निर्मलं) हिमाम्भः (तुषारोदकं । कर्तृ) लब्धपरभागतया लब्धोत्कर्षतया । "परभागो गुणोत्कर्षे " इति यादवः । अधरोष्ठे त्वदीयं सदशनार्चिर्दन्तकान्तिसहितं लीलास्मितं (क्रीडाहास्यं) इवाभाति शोभते ।

(७१.) प्रतापनिधिस्तेजोनिधिर्भानुः (अर्कः) यावन्नाक्रमते नोद्गच्छति (नोदयते)। " आङ उद्गमने " इत्यात्मनेपदम् । तावत् । भानावनुदित एवेत्यर्थः । अह्नाय झटिति । " द्राग्झटित्यञ्जसाह्नाय " इत्यमरः । अरुणेनानूरुणा । " सूर्यसूतोऽरुणोऽनूरुः " इत्यमरः।

(69.) The morning breeze wishing to obtain, as it were, by other's virtues, the sweet scent, that is natural to the breath of your mouth, takes away from the foot-stalk the loose flowers of the trees, and unites itself with the lotuses, opened by the rays of Aruna.

(70.) The due-drops that are fallen on the sprouts of trees, whose interior is red, white as the polished pearls af a garland, appear like your playful smile, hightened by the splendour of your teeth, on account of its having obtained a high place on your lips.

यावत्प्रतापनिधिराक्रमते न भानु-
रह्नाय तावदरुणेन तमो निरस्तम् ।
आयोधनाग्रसरतां त्वयि वीर याते
किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति ॥ ७१ ॥
शय्यां जहत्युभयपक्षविनीतनिद्राः
स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते ।
येषां विभान्ति तरुणारुणरागयोगा-
द्भिन्नाद्रिगैरिकतटा इव दन्तकोशाः ॥ ७२ ॥

तमोनिरस्तम् । तथाहि । हे वीर त्वय्यायोधनेषु युद्धेषु । "युद्धमायोधनं जन्यम्" इत्यमरः । अ-ग्रसरतां पुरःसरतां याते सति [त्वयि संग्रामाग्रणीत्वं प्राप्ते सति—हे०] तव गुरुः पिता रिपू-न्स्वयमुच्छिनत्ति किं वा । नोच्छिनत्त्येवेत्यर्थः । न खलु योग्यपुत्रन्यस्तभाराणां स्वामिनां स्वय व्यापारखेद इति भावः । [" पुरोऽग्रतोऽग्रेषुसर्तेरिति " सूत्रे न्यासकृत् । अग्रसरः इत्येतद्रूपं सप्तम्या अलुकापि सिध्यत्येव । अग्रं सरतीत्यत्र सप्तम्यन्त उपपदे अग्रसर इत्ये-तद्रूपं यथा स्यादित्येवमर्थ। अग्रेशब्दस्य एकारान्तत्वनिपातिनामिति विज्ञेयं । अतः अग्रसरता इति प्रयोगः चिंत्यः । तथा पुरोऽग्रेऽग्रसरः पृष्ठाग्रतः । पुरः पुरःसर । यथात्रैव षष्ठे सर्गे " अग्रेसरैर्वाजिभिरुद्धृतानि " । भर्तृहरिश्च । "किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी" इति । अथवा अग्रेसरन्तः गच्छन्तः अग्रसरन्तः । तेषां सुभटानां मध्ये वीर इति वा । तदा त्वयि रिपून् याते इति । सरतीति सर. । " पचाद्यजिति " विशेषणसमासे साधुत्वमिति वा । " यङोचिच्च" इति सूत्रे सर्वधातवः पचाद्यन्तःपातिनः इति न्यासकृत् । तथात्रैव नवमे सर्गे " सवरुणावरुणाग्रसरं रुचा " । " हरिहयाग्रसरेण धनुर्भृता " । " यूथं तदग्रसरगर्वित-कृष्णसारं " इति—हे० चा०] ।

(७२.) उभाभ्यां पक्षाभ्यां (वामदक्षिणाभ्यां) पार्श्वाभ्यां विनीतापगता निद्रा येषां ते उ-यभपक्षविनीतनिद्राः । अत्र समासविषय उभशब्दस्थान उभयशब्दप्रयोग एव साधुरित्यनुसंधेयं । यथाह कैयटः—" उभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषय उभशब्दस्य प्रयोगो मा भूत् । उभयशब्दस्यैव यथा स्यात् । उभयपुत्र इत्यादि भवति " इति [कैय-टविवरणेच ।"उभादुत्तरतोनित्यमित्यत्रास्वरितत्वाद्वृत्येतन्नानुवर्तते । नतन्निवृत्त्यर्थ नित्यग्रहणं"इति भावः—हे] मुखराण्युत्थानचलनाच्छब्दायमानानि शृङ्खलानि निगडानि कर्षन्तीति तथोक्ता-

---

(71.) While the sun, the receptacle of intense heat, has not yet risen darkness is at once dispelled by Aruṇa. O warrior, when you yourself have gone to the state of being the leader in battles, will your Sire now himself rout the enemies ?

(72.) Your elephants that have overcome sleep by (changing) both sides and are now dragging their clanging chains, are leaving their beds,—the elephants whose budlike tusks shine (look) as if they had broken asunder the red mineral-sides of a mountain, on account of their having come in contact with the red-coloured light of the young sun.

दीर्घेष्वमी नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्ष वनायुदेश्याः ।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः ॥ ७३ ॥
भवति विरलभक्तिर्म्लानपुष्पोपहारः
स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।
अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्ता-
मनुवदति शुकस्ते मञ्जुवाक्पञ्जरस्थः ॥ ७४ ॥

स्ते तव स्तम्बे रमन्त इति स्तम्बेरमा हस्तिनः । " स्तम्बकर्णयो रमिजपोः " इत्यच्प्रत्ययः । " हस्तिसूचकयोः " इति वक्तव्यात् । " इभः स्तम्बेरमः पद्मी " इत्यमरः । " तत्पुरुषे कृति बहुलम् " इति सप्तम्या अलुक् । शय्यां जहति त्यजन्ति । येषां स्तम्बेरमाणाम् । दन्ताः कोशा इव दन्तकोशाः (" कोशस्तुकुड्मले पात्रे दिव्यखड्गे पिधानयोः " इतिविश्वः) दन्तकुड्मलास्तरुणारुणरागयोगाद्बालार्कारुणसंपर्काद्धेतोर्भिन्नाद्रिगैरिकतटा इव विभान्ति । धातुरक्ता इव भान्तीत्यर्थः ।

(७३.) हे वनजाक्ष नीरजाक्ष (पद्मलोचन)। " वनं नीरं वनं सत्त्वम् " इति शाश्वतः । दीर्घेषु पटमण्डपेषु (वस्त्रगृहेषु) नियमिता बद्धा वनायुदेश्या वनायुदेशे भवाः। "पारसीका वनायुजाः" इति हलायुधः [वनायुजाः पारसीकाः काम्बोजा बाह्लिकादयः " इति विश्वः-हे०] । अमी वाहा अश्वा निद्रां विहाय पुरोगतानि (अग्रे क्षिप्तानि) लेह्यान्यास्वाद्यानि सैन्धवशिलाशकलानि [खडानि । श्लेष्मनिवारणार्थं आस्वाद्यानि–व०] ।" सैन्धवोऽस्त्री सितशिवं माणिमन्थं च सिन्धुजः" इत्यमरः । वक्त्रोष्मणा (मुखबाष्पेण) मलिनयन्ति मलिनानि कुर्वन्ति उक्तं च [शालिहोत्रेण—हे०] सिन्धुयोगसंग्रहे—" पूर्वाह्णकाले चाश्वानां प्रायशो लवणं हितम् । शूलमोहविबन्धघ्नं लवणं सैन्धवं वरम् " इत्यादि ।

(७४.) (मुखबाष्पेण) म्लानः पुष्पोपहारः पुष्पपूजा म्लानत्वादेव विरलभक्तिर्विरलरचनो भवति (" भक्तिर्भागेनिषेवणे " इतिवैजयन्ती) । प्रदीपाश्च स्वकिरणानां परिवेषस्य (" परिवेषस्तु परिधिरुपसूर्यकमण्डले " इत्यमरः) मण्डलस्योद्भेदेन स्फुरणेन शून्या भवन्ति । निस्तेजस्का भवन्तीत्यर्थः । अपि चायं मञ्जुवाङ्मधुरवचनः पञ्जरस्थस्ते तव शुकस्त्वत्प्रबोधनिमित्ते प्रयुक्तामुच्चारितां नोऽस्माकं गिरं वाणीमनुवदति । अनुकृत्य वदतीत्यर्थः । इत्थं प्रभातलिङ्गानि वर्तन्ते । अतः प्रबोद्धव्यमिति भावः ।

(73.) These horses of the country of the Vanāyus tied in the extensive tents, having given up sleep, are soiling, O lotus-eyed one, by the warmth of their mouths (by their warm breath) the pieces of rock-salt, put before them to lick.

(74.) The faded present of flowers has become loose in its texture; the lamps have become dim on account of the throbbing of the circle of their rays; and this your parrot too, charming in voice and confined in its cage, imitates our speech, employed to awake you.

इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः
सपदि विगतनिद्रस्तल्पमुज्झांचकार।
मदपटुनिनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं सुप्रतीकः॥ ७५॥

अथ विधिमवसाय्य शास्त्रदृष्टं
दिवसमुखोचितमञ्चिताक्षिपक्ष्मा।
कुशलविरचितानुकूलवेषः
क्षितिपसमाजमगात्स्वयंवरस्थम्॥ ७६॥

(७५.) इतीत्थं विरचितवाग्भिर्वन्दिपुत्रैर्वैतालिकैः। पुत्रग्रहणं समानवयस्कत्वद्योतनार्थम्। सपदि (शीघ्रं) विगतनिद्रः कुमारः। तल्पं शय्याम्। " तल्पं शय्याट्टदारेषु " इत्यमरः। उज्झांचकार विससर्ज। इजादेश्च गुरुमतोऽनृच्छः " इत्याम्प्रत्ययः। कथमिव। मदेन पटु मधुरं निनदद्भी राजहंसैर्बोधितः (जागरितः) सुप्रतीकाख्यः। सुरगज ईशानदिग्गजः। गङ्गाया इदं गाङ्गम्। सैकतं पुलिनमिव। " तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् " इत्यमरः। " सिकताशर्कराभ्यां च " इत्यण्प्रत्ययः। सुप्रतीकग्रहणं प्रायशः कैलासवासिनस्तस्य नित्यं गङ्गातटविहारसंभवादित्यनुसंधेयम्।

(७६.) अथोत्थानानन्तरमाञ्चितानि [अनेन सुलक्षणत्वोक्तिः। उक्तंच। "मुखमर्द्धं शरीरस्य सर्वं वा मुखमुच्यते। तत्रापि नासिका श्रेष्ठा नासिकायाश्च लोचने " –चा०] चारूण्यक्षिपक्ष्माणि (" पक्ष्म सूत्रादिसूक्ष्मांशे किंजल्के नेत्रलोमनि " इति विश्वः) यस्य सोऽजः शास्त्रे दृष्टमवगतं दिवसमुखोचितं प्रातःकालोचितं (शास्त्रदृष्टं) विधिमनुष्ठानमवसाय्य समाप्य। स्यतेर्ण्यन्ताल्ल्यप्। कुशलैः प्रसाधनदक्षैर्विरचितोऽनुकूलः स्वयंवरोचितो वेषो नेपथ्यं यस्य स तथोक्तः सन्स्वयंवरस्थं क्षितिपसमाजं राजसमूहमगादगमत्। " इणो गा लुङि " इति गादेशः। पुष्पिताग्रावृत्तमेतत्। तल्लक्षणम्—"अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये अजस्वयंवराभिगमनो नाम पञ्चमः सर्गः।

(75.) Thus the prince whose sleep was removed by the sons of bards who spoke in well-measured language, instantly left the couch, as Supratîka, the elephant of the Gods, leaves the sandy banks of the Gangâ (when) awakened by the flamingoes warbling sweetly with joy.

(76.) Then finishing the rites, enjoined by the S'âstra and proper at day-break, Aja with the beautiful eye-lashes, having put on an agreeable attire with the help of skilful attendants, went to the assembly of the princes, seated in the hall of the self-electing marriage.

षष्ठः सर्गः ।

स तत्र मञ्चेषु मनोज्ञवेषान्सिंहासनस्थानुपचारवत्सु ।
वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् ॥ १ ॥
रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वाङ्गमिवेश्वरेण ।
काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमतीनिराशम् ॥ २ ॥

जाह्नवी मूर्ध्नि पादे वा कालः कण्ठे वपुष्यथ ।
कामारिं कामतातं वा कंचिद्देवं जगामहे ॥

(१.) सोऽजस्तत्र स्थाने [समाजे–हे० चा०] उपचारवत्सु [वितानादिषु–हे०] राजोपचारवत्सु [चित्रादिरुपचारोविद्यते येषु तेषु तथोक्तेषु–सु०] मञ्चेषु पर्यङ्केषु [सिंहासनस्योपरिसिंहासनं मञ्चकं कथ्यते–सु०] सिंहासनस्थान् (सिंहासनस्योपरि स्थितान्) मनोज्ञवेषान्मनोहरनेपथ्यान्वैमानिकानां विमानैश्चरताम् । " चरति " इति ठक्प्रत्ययः । मरुताममराणाम् । " मरुतौ पवनामरौ " इत्यमरः । आकृष्टलीलान्गृहीतसौभाग्यान् । आकृष्टमरुल्लीलानित्यर्थः । सापेक्षत्वेऽपि गमकत्वात्समासः । नरलोकं पालयन्तीति नरलोकपालाः । कर्मण्यण्प्रत्ययः । तान्भूपालानपश्यत् (व्यलोकिष्ट) । सर्गेऽस्मिन्नुपजातिश्छन्दः ।

(२.) " रतिः स्मरप्रियायां च रागे च सुरते स्मृता " इति विश्वः । रतेः कामप्रियाया गृहीतानुनयेन स्वीकृतप्रार्थनेन । गृहीतरत्यनुनयेनेत्यर्थः । सापेक्षत्वेऽपि गमकत्वात्समासः । ईश्वरेण हरेण [ईश्वरपदेन दानसामर्थ्यं सूचितं–हे०] प्रत्यर्पितस्वाङ्गं (प्रत्यर्पितं पुनर्दत्तं स्वाङ्गं मन्मथशरीरं यस्मै स तं तथोक्तं) काममिव स्थितं काकुत्स्थमजमालोकयतां (पश्यतां) नृपाणां (राज्ञां) मनः (चित्तं) इन्दुमतीनिराशं वैदर्भीनिःस्पृहं बभूव । इन्दुमती सत्पतिमिमं विहाय नास्मान्वरिष्यतीति निश्चिक्युरित्यर्थः । सर्वातिशयसौन्दर्यमस्येति भावः (तस्मिंस्तत्र प्रविष्टमात्र एव राज्ञां मनः इन्दुमतीविषयके भग्नाशमभूदित्यर्थः) ।

(३.) असौ कुमारो वैदर्भेण भोजेन निर्दिष्टं प्रदर्शितं मञ्चं पर्यङ्कं क्लृप्तेन सुविहितेन सोपानपथेन (मार्गेण) । मृगराजशावः सिंहपोतः । "पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः " इत्यमरः [कुमार इत्युक्तत्वात् शावः इति पदं–हे०] । शिलानां विभङ्गैः

(1.) He (Aja) saw there the rulers of the human world of agreeable attire, seated on thrones over decorated dais, and possessing the charms of the gods who wandered in balloons.

(2) The minds of the princes looking at Kākutstha who was as it were the God of love himself, his body restored to him by S'iva, who had, as it were, accepted the importunities of Rati, became hopeless of (obtaining) Indumati.

वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन मञ्चम्।
शिलाविभङ्गैर्मृगराजशावस्तुङ्गं नगोत्सङ्गमिवारुरोह ॥ ३ ॥
परार्ध्यवर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः।
भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ॥ ४ ॥
तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदुर्निरीक्ष्यः।
सहस्रधात्मा व्यरुचद्विभक्तः पयोमुचां पङ्क्तिषु विद्युतेव ॥ ५ ॥

(शकलैः) भङ्गीभिस्तुङ्गमुन्नतं नगोत्सङ्गं शैलाग्रमिव (अद्रिक्रोडमिव)। आरुरोह (अरुक्षत्)।

(४.) परार्ध्याः श्रेष्ठा वर्णा नीलपीतादयो यस्य तेनास्तरणेन कम्बलादिनोपपन्नं सङ्गतं रत्नवद्रत्नखचितमासनं सिंहासनमासेदिवानधिष्ठितवान्सोऽजः। मयूरपृष्ठाश्रयिणा गुहेन सेनान्या सह। " सेनानीरग्निभूर्गुहः " इत्यमरः। भूयिष्ठमत्यर्थमुपमेयकान्तिः (उपमातुं योग्या कान्तिः वपुषः शोभा यस्य स तादृशः) आसीत्। मयूरस्य विचित्ररूपत्वात्तत्साम्यं रत्नासनस्य। तद्द्वारा च तदारूढयोरपीति भावः।

(५.) तासु राजपरंपरासु (नृपश्रेणिषु) श्रिया लक्ष्म्या। कर्त्र्या। पयोमुचां मेघानां पङ्क्तिषु विद्युतेव सहस्रधा (सहस्रेण प्रकारेण) विभक्तः [वाताय कपिला विद्युदातपायातिलोहिनी। पीता शस्याय विज्ञेया दुर्भिक्षाय सिता भवेत्–हे०]। तरंगेषु तरणिरिव स्वयमेक एव प्रत्येकं संक्रामित इत्यर्थः। प्रभाविशेषस्य [प्रतापोद्गमस्य विद्युत्पक्षे वर्णभेदस्य–हे०] उदयेनाविर्भावेन दुर्निरीक्ष्यो दुर्दर्शन आत्मा श्रियः स्वरूपं [विद्युत्पक्षे विद्युत्स्वरूपं–चा०] व्यरुचद्व्यद्योतिष्ट। " द्युद्भ्यो लुङि " इति परस्मैपदम्। द्युतादित्वादङ्प्रत्ययः। तस्मिन्समये प्रत्येकं संक्रान्तलक्ष्मीकतया तेषां किमपि दुरासदं तेजः प्रादुरासीदित्यर्थः [मेघोपमा राज्ञां मालिन्यार्थ–हे०]।

(६.) महार्हासनसंस्थितानां (महानर्हो मौल्यं येषां तेषु सिंहासनेषु संस्थितानां) श्रेष्ठसिंहासनस्थानाम्। उदारनेपथ्यभृतां (उदाराणि च तानि नेपथ्यानि वेषविशेषाणि तानि बिभ्र-

---

(3.) That youthful prince mounted by means of a well constructed stair to the dais, pointed out by the King of the Vidarbhas; as a young cub of the Lord of beasts (lion) mounts upon a lofty peak of a mountain by means of the fractures of rocks.

(4.) Seated on the throne of jewels furnished with coverings of excellent colours, he was greatly comparable in beauty with Guha riding on the peacock's back.

(5.) In those rows of princes, there appeared Lakshmi's own self hard to be looked at because of the appearance of peculiar effulgence; as the self of lightning is divided by itself in the rows of clouds.

तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ।
रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ॥ ६ ॥
नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः ।
मदोत्कटे रेचितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः ॥ ७ ॥
अथ स्तुते वन्दिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेवलोके ।
संचारिते चागुरुसारयोनौ धूपे समुत्सर्पति वैजयन्तीः ॥ ८ ॥

तीति उदारनेपथ्यभृतस्तेषां तथोक्तानां) उज्ज्वलवेषधारिणां (मनोज्ञालंकारवतां) तेषां राज्ञां मध्ये । कल्पद्रुमाणां [कल्पयति मनोरथमिति कल्पः स चासौ द्रुमश्च। पञ्चानां मध्ये एकस्य कल्पद्रुमस्य शब्दवाच्यत्वं यद्यपि प्रतीयते तथापि प्रवृत्तिनिमित्तस्य संकल्पार्थस्य पूरणेन पञ्चानामपि साधारण्यात् कल्पद्रुमाणामिति बहुवचनं । यथा माघकाव्ये । "कल्पद्रुमैः सह विचित्रफलैर्विरेजुः"–हे०] मध्ये पारिजात इव सुरद्रुमविशेष इव । "पञ्चैते देवतरवो मन्दारः पारिजातकः । संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्" इत्यमरः । स रघुसूनुरेव धाम्ना तेजसा रराज । अत्र कल्पद्रुमशब्दः पञ्चान्यतमविशेषवचनः । उपकल्पयन्ति मनोरथानिति व्युत्पत्त्या सुरद्रुममात्रोपलक्षकतया प्रयुक्त इत्यनुसंधेयम् । कल्पा इति द्रुमाः कल्पद्रुमा इति विग्रहः [उपमालंकारः–सु०] ।

(७.) पौरजनस्य नेत्रव्रजाः (लोचनसमूहाः) सर्वान्नृपतीन्विहाय (त्यक्त्वा) तस्मिन्नजे निपेतुः । स एव सर्वोत्कर्षेण ददृश इत्यर्थः । कथमिव । मदोत्कटे मदनोद्भिन्नगण्डे निर्भरमदे वा वन्ये गन्धद्विपे गन्धप्रधाने द्विपे गजे ["यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः । तं गन्धहस्तिनं प्राहुर्नृपतेर्विजयावहं" इति पालकाव्ये–हे० चा०] । रेचिता रिक्तीकृताः पुष्पाणां वृक्षाः यैस्ते । त्यक्तपुष्पवृक्षा इत्यर्थः । द्विरेफा भृङ्गा इव । द्विपस्य वन्यविशेषणं द्विरेफाणां पुष्पवृक्षत्यागसंभावनार्थं कृतम् । त्रिभिर्विशेषकमाह ।

(८.) अथान्वयज्ञै राजवंशाभिज्ञैर्वन्दिभिः स्तुतिपाठकैः । "वन्दिनः स्तुतिपाठकाः" इत्यमरः । सोमार्कवंश्ये सोमसूर्यवंशभवे नरदेवलोके राजसमूहे स्तुते सति । विवेशेत्युत्तरेण

(6.) Among them seated on the most excellent thrones and dressed in the most noble attires the son of Raghu alone shone by his majesty like Pàrijàta among the heavenly trees.

(7.) Leaving all (other) princes, the rows of the eyes of the citizens fell (directly) on him ; as the bees clearing the flowery trees of themselves fall upon a wild scented elephant infuriated under the influence of intoxication.

(8.) Then the assembly of princes sprung from the moon and the sun (of the lunar and solar lines) having been praised by bards versed in the histories of their families and the fume of (burning) sandle wood of excellent quality spreading around, and rising above the banners,—

पुरोपकण्ठोपवनाश्रयाणां कलापिनामुद्धतनृत्यहेतौ ।
प्रध्मातशङ्खे परितो दिगन्तांस्तूर्यस्वने मूर्छति मङ्गलार्थे ॥ ९ ॥
मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं पतिंवरा क्लृप्तविवाहवेषा ॥ १० ॥
तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये ।
निपेतुरन्तःकरणैर्नरेन्द्रा देहैः स्थिताः केवलमासनेषु ॥ ११ ॥

सम्बन्धः । एवमुत्तरत्रापि योज्यम् । संचारिते समन्तात्प्रचारिते । अगुरुसारः (कृष्णागुरुनिर्यासः) योनिः (उत्पत्तिः) कारणं यस्य तस्मिन्धूपे च वैजयन्तीः पताकाः समुत्सर्पति सति । अतिक्रम्य गच्छति सति [लहलहकायमाने सति–मु०] ।

(९.) किंच । पुरस्योपकण्ठे समीप उपवनान्याश्रयो येषां तेषां कलापिनां बर्हिणामुद्धतनृत्यहेतौ । मेघध्वनिसादृश्यात्ताण्डवकारणे । प्रध्माताः पूरिताः शङ्खाः [कंबवः। शमयन्त्यमंगलमिति शंखाः । "पायात्सवःकुमुदकुन्दमृणालगौरः । शंभोर्हरेः करतलाम्बरपूर्णचन्द्रः। नादेन यस्य सुरशत्रुविलासिनीनां नीव्यो भवन्ति शिथिला जघनस्थलीषु"–हे०] यत्र तस्मिन् मङ्गलार्थे मङ्गलप्रयोजनके । तूर्यस्वने वाद्यघोषे परितः सर्वतो दिगन्तान्मूर्छति व्याप्नुवति सति ।

(१०.) पतिं वृणोतीति पतिंवरा स्वयंवरा। "अथ स्वयंवरा। पतिंवरा च वर्या च" इत्यमरः। "संज्ञायां भृतृवृजि–" इत्यादिना खच्प्रत्ययः । क्लृप्तविवाहवेषा (क्लृप्तो रचितो विवाहसम्बंधी वेषो यस्याः सा तथोक्ता) कन्येन्दुमती मनुष्यैर्वाह्यं परिवारेण परिजनेन शोभि (रम्यं) चतुरस्रयानं चतुरस्रवाहनं [चतस्रः अस्रयः कोणाः यस्य तच्चतुरस्रम्–हे०] शिबिकामध्यास्यारुह्य मञ्चान्तरे मञ्चमध्ये यो राजमार्गस्तं [मञ्चानामन्तरमेव राजमार्गस्त तथोक्तमिति–हे०] विवेश ।

(११.) नेत्रशतानामेकलक्ष्ये एकदृश्ये कन्यामये कन्यारूपे तस्मिन्विधातुः (स्रष्टुः) विधानातिशये सृष्टिविशेषे [निर्माणकौशले–चा०] नरेन्द्रा अन्तःकरणैः (मनोभिः) निपेतुः । आसनेषु (सिंहासनेषु) देहैः केवलं देहैरेव स्थिताः । देहानपि विस्मृत्य तत्रैव दत्त-

(9.) All around, auspicious trumpet-sounds having extended to the end of the cardinal points, in which was blown the conch, the cause of the wild dance of the peacocks dwelling in the gardens on the skirts of the city,—

(10.) The maiden about to choose a husband, decked in wedding attire, entered the royal road between the several dais, having sat in the palanquin borne by men and shining by means of attendants.

(11.) The princes fell by means of their minds in that most excellent creation of a virgin of the creator, the sole mark of hundred eyes ; while they remained in their seats only by means of their bodies.

तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ॥ १२ ॥
कश्चित्कराभ्यामुपगूढनालमालोलपत्त्राभिहतद्विरेफम् ।
रजोभिरन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार ॥ १३॥

भित्ता बभूवुरित्यर्थः । अन्तःकरणकर्तृके निपतने नरेन्द्राणां कर्तृत्वव्यपदेश आदरातिशयार्थः [दर्शनमात्रेण तेषां मनः आचकर्षेति वाक्यार्थः–हे० चा०] ।

(१२.) तामिन्दुमतीं प्रति । अभिव्यक्तमनोरथानां [अभिव्यक्तः प्रकटीकृतः मनोरथः प्रणयः यैः तेषां तथोक्तानां–चा० सु०] प्ररूढाभिलाषाणां महीपतीनां राज्ञां प्रणयाग्रदूत्यः । प्रणयः प्रार्थना प्रेम वा । "प्रणयास्त्वमी । विस्रम्भयाच्ञाप्रेमाणः" इत्यमरः। प्रणयेष्वग्रदूत्यः प्रथमदूतिकाः प्रणयप्रकाशकत्वसाम्याद्दूतीत्वव्यपदेशः । विविधाः [नानाप्रकाराः–चा० सु०] शृङ्गारचेष्टाः शृङ्गारविकाराः पादपानां (तरूणाम्) प्रवालशोभाः पल्लवसम्पद इव [प्रवालोपमया शृङ्गारचेष्टानामभिनवत्वं सूचितं–हे०] । बभूवुरुत्पन्नाः [यदाह । "चेष्टा भवन्ति पुन्नार्योर्या रत्युत्था विरक्तयोः। सम्भोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः"। "ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वप्रणयसेवाभिः। उपवनगमनविहारैः शृङ्गाररसः समुद्भवति । नयनवदनप्रसादैः श्रुतिमधुरवचोधृतप्रमोदैश्च । ललितैश्चाङ्गविहारैस्तदभिनयः संप्रयोक्तव्यः " इति भरतः–हे० चा०] अत्र शृङ्गारलक्षणं रससुधाकरे— " विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः । नीता सदस्यरस्यत्वं रतिः शृङ्गार उच्यते " । रतिरिच्छाविशेषः । तच्चोक्तं तत्रैव—यूनोरन्योन्यविषयस्थायिनीच्छा रतिः स्मृता " इति । चेष्टाशब्देन तदनुभावविशेषा उच्यन्ते । तेऽपि तत्रैवोक्ताः—"भावं मनोगतं साक्षात्स्वहेतुं व्यञ्जयन्ति ये । तेऽनुभावा इति ख्याता भ्रूविक्षेपस्मितादयः । ते चतुर्धा चित्तगात्रवाग्बुद्ध्यारम्भसंभवाः " इति । तत्र गात्रारम्भसम्भवांश्चेष्टाशब्दोक्ताननुभावान् " कश्चित्–" इत्यादिभिः श्लोकैर्वक्ष्यति । शृङ्गाराभासश्चायम् । एकत्रैव प्रतिपादनात् । तदुक्तम्–" एकत्रैवानुरागश्चेत्तिर्यक्शब्दगतोऽपि वा । योषितां बहुसक्तिश्चेद्रसाभासस्त्रिधा मतः " इति । शृङ्गारचेष्टा बभूवुरित्युक्तम् । ता एव दर्शयति––

(१३.) कश्चिद्राजा कराभ्यां पाणिभ्यामुपगूढनालं गृहीतनालम् । आलोलैश्चञ्चलैः पत्त्रैरभिहतास्ताडिता द्विरेफा भ्रमरा येन तत्तथोक्तम् (चटुलदलताडितभृङ्गं) । रजोभिः परागैरन्तःपरिवेषं मण्डलं बध्नातीत्यन्तःपरिवेषबन्धि । लीलारविन्दं (क्रीडाकमलं) भ्रमयांचकार

(12.) Of the lords of the earth, who had exhibited their passion for her, various amatory gestures took place, which were the first indication of love like the beauty of shoots in trees

(13.) A certain prince was turning round a pleasure-lotus, the stem of which he held in his hands, which with its revolving petals warded off the bees and which formed a circle in its interior by means of pollens.

विस्रस्तमंसादपरो विलासी रत्नानुविद्धाङ्गदकोटिलग्नम् ।
प्रालम्बमुत्कृष्य यथावकाशं निनाय साचीकृतचारुवक्त्रः ॥ १४ ॥
आकुञ्चिताग्राङ्गुलिना ततोऽन्यः किंचित्समावर्जितनेत्रशोभः ।
तिर्यग्विसंसर्पिनखप्रभेण पादेन हैमं विलिलेख पीठम् ॥ १५ ॥

[इच्छासूचिकेयं चेष्टा । "विभक्तेऽव्यक्तमनसां यूनां सङ्गतिकांक्षिणां । आवर्जनेनमन्योन्यमभिरूपांगदर्शनं " इति रहस्यं-चा०] । करस्थलीलारविन्दवत्त्वयाहं भ्रमयितव्य इति नृपाभिप्रायः । हस्तघूर्णकोऽयमपलक्षणक इतीन्दुमत्यभिप्रायः (एतदेव हेमाद्रिः) ।

(१४.) विलसनशीलो विलासी [यद्वा । "धीरसंचारिणी दृष्टिर्गतिर्गोवृषभाञ्चिता । स्मितपूर्वय आलापो विलास इति कीर्तितः " इति भरतः । " विलासी कामुकः कामी स्त्रीपरो रतिलम्पटः" इति शब्दार्णवः-हे०] । "वौ कषलसकत्थस्रम्भः " इति घिनुण्प्रत्ययः । अपरो राजासात् (स्कन्धात्) विस्रस्तं (गलितं) रत्नानुविद्धं रत्नखचितं यदङ्गदं केयूरं [बाहुरक्षकं-सु०] तस्य कोटिलग्नं प्रालम्बमृजुलम्बिनीं स्रजम् । "प्रालम्बमृजुलम्बि स्यात्कण्ठात्" इत्यमरः । उत्कृष्योद्धृत्य साचीकृतं तिर्यक्कृतं चारु (मनोहरं) वक्त्रं (मुख) यस्य स तथोक्तः सन्यथावकाशं स्वस्थानं निनाय [मुखस्य साचीकरणं प्रालंबस्य यथा प्रदेशानयनं च शृङ्गारसूचकं । यदाह । "वदति हि संवृतिरेव कामितां"-चा०] प्रावारोत्क्षेपणच्छलेनाहं त्वामेवं परिरप्स्य इति नृपाभिप्रायः । गोपनीयं किंचिदङ्गेऽस्ति ततोऽयं प्रावृणुत इतीन्दुमत्यभिप्रायः (एतदेव हेमाद्रिः) ।

(१५.) ततः पूर्वोक्तादन्योऽपरो राजा किंचित्समावर्जितनेत्रशोभ ईषदर्वाक्पातितनेत्रशोभः सन् । आकुञ्चिता आभुग्ना अग्राङ्गुलयः [अङ्गुलीनामग्राणि अग्रांगुलयः । "आहिताग्न्यादिः" । अग्राः अंगुलयः इति वा-हे०] यस्य तेन तिर्यग्विसंसर्पिण्यः (प्रसरणशीलाः) नखप्रभा यस्य तेन च पादेन (चरणेन । हेम्नः विकारः) हैमं हिरण्मयं पीठं पादपीठं विलिलेख ["रेखानिर्माणमुर्व्यां च्छदतृणलवनं पादयोश्चाप्यपूजा । दन्तानामप्यशौचं वसनमलिनता रूक्षता मूर्द्धजानां । सन्ध्यायुग्मे च निद्रा विवसनशयनं ग्रासहास्यातिरेकः । स्वाङ्गे वाद्यं च पुंसां निधनमुपनयेत्केशवस्यापि लक्ष्मीं"-हे०] । लिखितवान् [अनेनेन्दुमतीदर्शने विभ्रमप्रकाशनं

(14.) Another voluptuary with his beatiful face obliquely turned aside having taken up, set to its proper place, the garland that had slipped from his shoulder and which was stuck to the ends of the shoulder-ornaments, set with jewels.

(15.) Then another (prince) having his beautiful eyes a little cast behind, was scratching the golden foot-stool with his foot, the tips of the toes of which were a little contracted and the lustre of whose nails had spread obliquely.

निवेश्य वामं भुजमासनार्धे तत्संनिवेशादधिकोन्नतांसः ।
कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोऽभूत् ॥ १६ ॥
विलासिनीविभ्रमदन्तपत्त्रमापाण्डुरं केतकबर्हमन्यः ।
प्रियानितम्बोचितसंनिवेशैर्विपाटयामास युवा नखाग्रैः ॥ १७ ॥

संभृतावपि विलासप्रकाशनं नागरता–चा०] । पादाङ्गुलीनामाकुञ्चनेन त्वं मत्समीपमागच्छेति नृपाभिप्रायः । भूमिविलेखकोऽयमपलक्षणक इतीन्दुमत्याशयः । भूमिविलेखनं तु लक्ष्मीविनाशहेतुः (एतदेव हेमाद्रिः) ।

(१६.) कश्चिद्राजा वामं भुजमासनार्धे सिंहासनैकदेशे निवेश्य संस्थाप्य तत्संनिवेशात्तस्य वामभुजस्य संनिवेशात्संस्थापनादधिकोन्नतोऽसौ वामांस एव यस्य स तथोक्तः (उच्चस्कन्धः) सन् । विवृत्ते परावृत्ते त्रिके (पृष्ठिकटिसन्धौ) त्रिकप्रदेशे भिन्नहारो लुण्ठितहारः (शिथिलमुक्तावलिः) सन् । "पृष्ठवंशाधरे त्रिकम्" इत्यमरः ["स्फिगस्थ्नोः पृष्ठवंशास्थ्नोर्यः सन्धिस्तत्त्रिकं स्मृतं" इति सन्धिभेदे–न०] सुहृत्समाभाषणतत्परोऽभूत् (मित्रेण समं आलापे सावधानो बभूव) । वामपार्श्ववर्तिनैव मित्रेण संभाषितुं प्रवृत्त इत्यर्थः । अत एव विवृत्तत्रिकत्वं घटते [अनेनेन्दुमत्यासक्तिं गोपितवानिति भावः –चा०] । त्वया वामाङ्के निवेशितया सहैवं वार्त्तां करिष्य इति नृपाभिप्रायः । परं दृष्ट्वा पराङ्मुखोऽयं न कार्यकर्तेतीन्दुमत्याकूतम् (एतदेव हेमाद्रिः) ।

(१७.) अन्यो युवा (नृपः) विलासिन्याः प्रियाया विभ्रमार्थं दन्तपत्रं (कर्णाभरणस्थानीयं) दन्तपत्रभूतमापाण्डुरं (पीतवर्णं) केतकबर्हं केतकदलम् । "दलेऽपि बर्हम्" इत्यमरः । प्रियानितम्ब उचितसंनिवेशैरभ्यस्तनिक्षेपणैर्नखाग्रैर्विपाटयामास विदारयामास [एतेनाप्यन्यासक्ता स्वचातुरी सूचिता–हे० एतेनात्मनः कामशास्त्रप्रावीण्यं सूचितं–चा०]अहं तव नितम्ब एवं नखव्रणादीन्दास्यामीति नृपाशयः । तृणच्छेदकवत्पत्त्रपाटकोऽयमपलक्षणक इतीन्दुमत्याशयः (एतदेव हेमाद्रिः) ।

(16.) Setting his left arm on one half of his seat and having in consequence of it his shoulder more raised up, a certain king, whose garland was loosened on account of his back-bone, having turned, became intent on discoursing with his friend (on the left side).

(17.) Another king tore with the extremities of his nails, fit to be set on the hips of a beloved, the whitish leaf of Ketaka which served as the ear-ring for the amorous gestures of coquettish woman.

कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलाञ्छनेन ।
रत्नाङ्गुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान् ॥ १८ ॥
कश्चिद्यथाभागमवस्थितेऽपि स्वसंनिवेशाद्व्यतिलङ्घिनीव ।
वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं व्यापारयामास करं किरीटे ॥ १९ ॥
ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी ।
प्राक्संनिकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत्सुनन्दा ॥ २० ॥

(१८.) कश्चिद्राजा कुशेशयं [कुशे जले शेते तत्कुशेशयं।"अधिकरणे शेते" इत्यच्। शयवासे इत्यलुक्। शरं वनं कुशं नीरं इति धनंजयः। "कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले" इति विश्वः–हे० चा०] शतपत्रमिवाताम्रं तलं यस्य तेन [इति सौन्दर्य–हे०]। "शतपत्रं कुशेशयम्" इत्यमरः। रेखारूपो ध्वजो लाञ्छनं यस्य [इति महाराजचिन्हं–हे०] तेन करेण अङ्गुलिषु भवान्यङ्गुलीयान्यूर्मिकाः [नित्यैश्वर्थे अंगुली भवं अंगुलीयकं–हे०]। "अङ्गुलीयक-मूर्मिका" इत्यमरः। "जिह्वामूलाङ्गुलेश्छः" इति छप्रत्ययः। रत्नानामङ्गुलीयानि तेषां प्रभयानुविद्धान्व्याप्तानक्षान्पाशान् । "अक्षास्तु देवनाः पाशकाश्च ते" इत्यमरः। सलीलम् (सक्रीडं) उदीरयामास उत्क्षिप ।अहं त्वया सहैवं रंस्य इति नृपाभिप्रायः। अक्षचातुर्यं कापुरुषोऽयमितीन्दुमत्यभिप्रायः। "अक्षैर्मा दीव्येत्" इति श्रुतिनिषेधात् (एतदेव हेमाद्रिः)।

(१९.)कश्चित् (विलासी)यथाभागं यथास्थानमवस्थितेऽपि स्वसंनिवेशाद्व्यतिलङ्घिनीव स्वस्थानाच्चलित इव किरीटे (मुकुटे) वज्राणां किरीटगतानां (हीरकाणां) अंशवः (किरणाः) गर्भे (मध्ये) येषां तान्यङ्गुलिरन्ध्राणि यस्य तमेकं करं व्यापारयामास [योजयामास । चपलताख्योऽलंकारः–हे०]। किरीटवन्मम शिरसि स्थितामपि त्वां भारं न मन्य इति नृपाभिप्रायः। शिरसि न्यस्तहस्तोऽयमपलक्षण इतीन्दुमत्यभिप्रायः (एतदेव हेमाद्रिः)। [आत्मप्रकाशना परचेष्टा चपलतोच्यते इति–चा०]।

(२०.) ततोऽनन्तरं नृपाणां श्रुतवृत्तवंशा (आकर्णितचरित्रान्वया) श्रुतनृपवृत्तवंशेत्य-

---

(18.) A certain king, sportively cast up the dice enveloped with the splendour of his diamond rings, with his hand, the palm of which was red like a lotus and marked with the lines of banners.

(19.) Another king kept his hand, the intervals between the fingers of which were internally illumined with the rays of the diamonds, busy with his crown, as if it had slipped off though it was in its proper place.

(20.) Then the maid-servant Sunandá, the keeper of the door of the harem, who was as bold as a male and who had heard of the pedigrees of the princes and their exploits, having first led the virgin princess to the lord of the Magadhas, said (thus).

असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः परंतपो नाम यथार्थनामा ॥ २१ ॥
कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः ॥ २२ ॥

र्थः । सापेक्षत्वेऽपि गमकत्वात्समासः । प्रगल्भा वाग्मिनी सुनन्दा सुनन्दाख्या प्रतिहारं (द्वारं) रक्षतीति प्रतिहाररक्षी द्वारपालिका । कर्मण्यण्प्रत्ययः । " टिड्ढाणञ् " इत्यादिना ङीप् । प्राक्प्रथमं कुमारीमिन्दुमतीं मगधेश्वरस्य संनिकर्षं समीपं नीत्वा पुंवत्पुंसा तुल्यम् । " तेन तुल्यं क्रिया चेद्वतिः " इति वतिप्रत्ययः । अवदत् (बभाषे) ।

(२१.) असौ राजा । असाविति पुरोवर्तिनो निर्देशः। एवमुत्तरत्रापि द्रष्टव्यम् । शरणोन्मुखानां शरणार्थिनां शरण्यः शरणे रक्षणे साधुः। "तत्र साधुः" इति यत्प्रत्ययः। शरणं भवितुमर्हः शरण्य इति नाथनिरुक्तिर्निर्मूलैव । अगाधसत्त्वः [अगाधमधिकं सत्त्वं बलं यस्य सः–चा० सु०] गम्भीरस्वभावः । " सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः " इति विश्वः । मगधा जनपदाः । तेषु प्रतिष्ठास्पदं यस्य स मगधप्रतिष्ठः । "प्रतिष्ठा कृत्यमास्पदम्" इत्यमरः। प्रजारञ्जने लब्धवर्णो विचक्षणः । यद्वा प्रजारञ्जनेन लब्धोत्कर्षः। पराञ्छत्रूंस्तापयतीति परंतपः परंतपाख्यः [अनुप्रासोलंकारः– हे०] । " द्विषत्परयोस्तापेः " इति खच्प्रत्ययः । " खचि ह्रस्वः " इति ह्रस्वः । " अरुर्द्विषदजन्तस्य मुम् " इति मुमागमः । नामेति प्रसिद्धौ । यथार्थनामा (यथार्थं अर्थानुगतं नामाख्या यस्य सः) शत्रुसंतापनादिति भावः। [परंतपत्वेन क्रूरत्वं लोकरक्षणाय व्यग्रत्वं चेन्दुमत्या वैराग्यस्य सूचनं । अजव्यतिरिक्तेषु भूपेषु स्तुतिनिन्दापरत्वात्सर्वत्र लेशालंकारोऽवगंतव्यः। उक्तंच दण्डिना । "लेशमेके विदुर्निदां स्तुतिं वा लेशतः कृतां " इति–चा०] ।

(२२.) अन्ये नृपाः कामं ["कामं प्रकामं पर्याप्तं" प्रायः क्रियाविशेषणानि एतानीति क्षीरस्वामी ।"अकामानुमतौ कामं" इति विश्वः –हे०] सहस्रशः(सहस्रं सहस्रमिति सहस्रशः) सन्तु । भूमिमनेन राजन्वतीं शोभनराजवतीमाहुः । नैतादृक्कश्चिदस्तीत्यर्थः। " सुराज्ञि देशे राजन्वान्स्यात्ततोऽन्यत्र राजवान् " इत्यमरः । राजन्वान्सौराज्य इति निपातनात्साधुः । तथाहि । नक्षत्रैरश्विन्यादिभिस्ताराभिः साधारणैर्ज्योतिर्भिर्ग्रहैर्भौमादिभिश्च [अत्र हि विज्ञाने-

(21.) This is a king by name Parantapa and rightly (or significantly) so named, the refuge of those who look up to him for protection, of a spirit unfathomable, a resident of Magadha, and one who has obtained fame by pleasing his subjects.

(22.) Granted that there are other kings by thousands, yet they say that the earth has, in him alone, a good sovereign ; the night though crowded with constellations, stars and planets, is yet illuminated only by the moon.

क्रियाप्रबन्धादयमध्वराणामजस्रमाहूतसहस्रनेत्रः ।
शच्याश्चिरं पाण्डुकपोललम्बान्मन्दारशून्यानलकांश्चकार ॥ २३ ॥
अनेन चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे ।
प्रासादवातायनसंश्रितानां नेत्रोत्सवं पुष्पपुराङ्गनानाम् ॥ २४ ॥

श्वरः । तारा अश्विन्यादिव्यतिरिक्तानि ज्योतींषि । नक्षत्राण्यश्वयुक्प्रभृतीनि भौमादिग्रहास्तैः । यद्वा । तारा ग्रहा भौमादयः पञ्च तथा मुहूर्तदर्पणे । “ प्रकाशकौ द्वौ प्रथमौ ग्रहाणां ताराग्रहाः पञ्च ततोपरौ द्वौ तमोग्रहौ तेषु शुभास्तु मध्ये त्रयोवलीन्दुश्चपरेन्दुपापाः–हे०]। संकुलापि रात्रिश्चन्द्रमसैव ज्योतिरस्या अस्तीति ज्योतिष्मती (ज्योत्स्नावती) । नान्येन ज्योतिषेत्यर्थः ।

(२३.) अयं परंतपोऽध्वराणां क्रतूनां क्रियाप्रबन्धादनुष्ठानसातत्यात् । अविच्छिन्नादनुष्ठानादित्यर्थः । अजस्रं नित्यमाहूतसहस्रनेत्रः (आकारितेन्द्रः) संश्चिरं शच्या अलकान् (केशान्) पाण्डुकपोलयोर्लम्बान्स्रस्तान् [पाण्डुत्वं च भर्तृविरहात्–हे०] । पचाद्यच् । मन्दारैः कल्पद्रुमकुसुमैः शून्यांश्चकार [एतेन तस्य यज्ञकर्मत्ववर्णनेनेन्दुमत्यां वैराग्यहेतुत्वं सूचितं –चा०] । प्रोषितभर्तृका हि केशसंस्कारं न कुर्वन्ति । [लेशाख्योलंकारः। “ लेशमेकेविदुर्निन्दां स्तुतिं वा लेशतः कृताम्” इति दण्डी–हे०]। “प्रोषिते मलिना कृशा”इति ।“क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ” इति च (याज्ञवल्क्यस्मरणात् । [एतेन भोगाभावो ध्वन्यते । तथा पाराशरः।“दूरस्थानामविद्यानां मोक्षधर्मानुयायिनां शूराणां निर्धनानां च न देया कन्यका बुधैः”–हे०] ।

(२४.) वरेण्येन वरणीयेन । वृणोतेरौणादिक एण्यप्रत्ययः । अनेन राज्ञा गृह्यमाणं (पीड्यमानं) पाणिमिच्छसि चेत् [चेदिति स्वस्याः संमतिरुक्ता–हे०। अनेनात्मनोऽनंगीकारः सुनन्दया सूचितः–चा०] पाणिग्रहणमिच्छसि चेदित्यर्थः । प्रवेशे प्रवेशकाले प्रासादवातायनसंश्रितानां राजभवनगवाक्षस्थितानां पुष्पपुराङ्गनानां पाटलिपुराङ्गनानां नेत्रोत्सवं कुरु । सर्वोत्तमानां तासामपि दर्शनीया भविष्यसीति भावः ।

(२५.) एवं तया सुनन्दयोक्ते सति तं परंतपमवेक्ष्य किंचिद्विस्रंसिनी दूर्वाङ्का दूर्वाचिह्ना मधूकमाला गुडपुष्पमाला यस्याः सा [विवाहसमये कन्याः मंगलार्थं दुर्वाकमधूकमालां

(23.) This prince, in his unremitted course of sacrifices, incessantly invited the thousand-eyed god (Indra), and thus made the hair of S'achi, pendent on her pale cheeks, long destitute of Mandàra flowers.

(24.) If you wish your hand to be taken (in marriage) by this excellent king, (then) on your entrance, you shall be an object of delight to the eyes of the females of Pushpapura, seated by the windows of their mansions.

एवं तयोक्ते तमवेक्ष्य किंचिद्विस्रंसिदूर्वाङ्कमधूकमाला ।
ऋजुप्रणामक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमाणा ॥ २५ ॥
तां सैव वेत्रग्रहणे नियुक्ता राजान्तरं राजसुतां निनाय ।
समीरणोत्थेव तरंगलेखा पद्मान्तरं मानसराजहंसीम् ॥ २६ ॥
जगाद चैनामयमङ्गनाथः सुराङ्गनाप्रार्थितयौवनश्रीः ।
विनीतनागः किल सूत्रकारैरैन्द्रं पदं भूमिगतोऽपि भुङ्क्ते ॥ २७ ॥

कण्ठे बिभ्रति–सु०] । " मधूके तु गुडपुष्पमधुद्रुमौ " इत्यमरः । वरणे शिथिलप्रयत्नेति भावः [याजकोयं ब्रह्मचारित्वे वन्द्यः–हे०]। तन्वीन्दुमत्येनं नृपमभाषमाणर्ज्वा भावशून्यया प्रणामक्रिययैव (ऋजुः शुद्धा विभ्रमरहिता या नमस्क्रिया तयैव) प्रत्यादिदेश परिजहार [" इंगिताकारलक्ष्योर्थः । सौ (ल) क्ष्म्यात्सूक्ष्म इति स्मृतः" इति काव्यादर्शे–हे०] ।

(२६.) सैव नान्या । चित्तज्ञत्वादिति भावः । वेत्रग्रहणे (सुवर्णदण्डग्रहणे) नियुक्ता (स्थापिता) दौवारिकी सुनन्दा तां राजसुतां राजान्तरमन्यराजानं निनाय । नयतिर्द्विकर्मकः। कथमिव । समीरणोत्था वातोत्पन्ना तरंगलेखोर्मिपङ्क्तिर्मानसे सरसि या राजहंसी तां पद्मान्तरमिव [सुनन्दायाः इन्दुमतीबुध्यनुसरण सूचयत्येवकारः–हे० चा०] ।

(२७.) एनामिन्दुमतीं जगाद । किमिति । अयमङ्गनाथोऽङ्गदेशाधीश्वरः सुराङ्गनाभिः (देवस्त्रीभिः) प्रार्थिता कामिता यौवनश्री. (तारुण्यसंपद्) यस्य स तथोक्तः । पुरा किलैनमिन्द्रसाहाय्यार्थमिन्द्रपुरगामिनमकामयन्ताप्सरस इति प्रसिद्धिः । किंच । सूत्रकारैर्गजशास्त्रकृद्भिः [पाल्काव्यगौतमादयस्तैः–चा०] पालकादिभिर्महर्षिभिर्विनीतनागः शिक्षितगजः [मृगचर्मा (र्या) द्या गजशास्त्रप्रवक्तारः । पालकाव्ये कथाप्यस्ति । अथैकदांगराजः प्रथमं कुतोपि देशाद्दिवोवतीर्णं ऋषिणा पालकाव्येन पालितं दिग्गजानां कुमारं (कुलं) अवलोक्य विस्मितस्तद्ग्रहणोत्सुकः स्वयमशक्तः सन् इन्द्रमुपेत्य तदनुज्ञातैर्मृगचर्मा (र्या) दिभिर्महर्षिभिस्तद्गजकुलं ग्राहयित्वाशास्त्राणि कारयित्वा च शिक्षयामास । तदादिभूमौ गजसंतानः प्रवर्तते । अनेन ऋषिसेव्यत्वमुक्तं । भंग्या रणप्रियतोक्ता वा–हे०]। किलेत्यैतिह्ये । अत एव भूमिगतोऽपि

(25.) On this being said by her (Sunandá), the slender princess, whose garland of Madhúka-flowers, inter-strung with the Dúrvas, had fallen a little aside, having gazed at him without speaking a word, rejected him simply by making a bow with her head erect

(26) That very person (Sunandá) who was employed to hold a cane (in her hand) took the princess to another king; as a row of waves, raised by the wind, leads the female swan of the lake Mánasa to another lotus.

(27.) And spoke to her thus: " This is the king of the Angas whose youthful beauty had been sought by celestial damsels, whose elephants were trained by the professors of elephantine science and who enjoys the position of Indra even though living on the earth ".

अनेन पर्यासयताश्रुबिन्दून्मुक्ताफलस्थूलतमान्स्तनेषु ।
प्रत्यर्पिताः शत्रुविलासिनीनामुन्मुच्य सूत्रेण विनैव हाराः ॥ २८ ॥
निसर्गभिन्नास्पदमेकसंस्थमस्मिन्द्वयं श्रीश्च सरस्वती च ।
कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया ॥ २९ ॥

(भूमंडलस्थोऽपि) ऐन्द्रं पदमैश्वर्यं भुङ्क्ते । भूलोक एव स्वर्गसुखमनुभवतीत्यर्थः । गजाप्सरोदेवर्षिसेव्यत्वमैन्द्रपदशब्दार्थः । पुरा किल कुतश्चिच्छापकारणाद्भुवमवतीर्णं दिग्गजवर्गमालोक्य स्वयमशक्तेरिन्द्राभ्यनुज्ञया नीतैर्देवर्षिभिः प्रणीतेन शास्त्रेण गजान्वशीकृत्य भुवि संप्रदायं प्रावर्तयदिति कथा गीयते ।

(२८.) शत्रुविलासिनीनां स्तनेषु (कुचेषु) मुक्ताफलस्थूलतमान् [मुक्ताफलवत्स्थूलतमान् । मुक्ताफलसाम्यात्कज्जलाभावः सूच्यते-हे०] अश्रुबिन्दून् (बाष्पकणान्) । " अस्त्रमश्रुणि शोणिते " इति विश्वः । पर्यासयता प्रस्तारयता [पातयता-हे०] । भर्तृवधादिति भावः । अनेनाङ्गनाथेनोन्मुच्याक्षिप्य सूत्रेण विना हारा एव प्रत्यर्पिताः [अतिवीररसवर्णनं वैराग्यहेतुः-चा०] अविच्छिन्नाश्रुबिन्दुप्रवर्तनादुत्सूत्रहारार्पणमेव कृतमिवेत्युत्प्रेक्षा गम्यते [विशेषोक्तिरलंकारः-चा०] ।

(२९.) निसर्गतः स्वभावतो भिन्नास्पदं (भिन्नं परस्परविरुद्धं आस्पदं स्थानं यस्य तत्) भिन्नाश्रयम् । सहावस्थानविरोधीत्यर्थः । श्रीः (लक्ष्मीः) च सरस्वती (भारती) चेति द्वयमस्मिन्नङ्गनाथ एकत्र संस्था स्थितिर्यस्य तदेकसंस्थम् (सहस्थितं) । उभयमिह संगतमित्यर्थः ["प्रायेण हीश्वराः मूर्खा पण्डिता अपि निर्द्धनाः" इति-हे० चा०] । हे कल्याणि (हे शुभे) । " बह्वादिभ्यश्च " इति ङीष् । कान्त्या (श्रिया) सूनृतया सत्यप्रियया गिरा च योग्या संसर्गार्हा त्वमेव तयोः श्रीसरस्वत्योस्तृतीया । समानगुणयोर्युवयोर्दांपत्यं युज्यत एवेति भावः [अनेन प्रायस्तृतीया पत्नी न शुभावहा इत्युक्तं । तृतीयविवाहेऽर्कविवाहस्य शौनकेनोक्तत्वात् । सपत्नीसद्भावो वा-हे०] । दक्षिणनायकत्वं चास्य ध्वन्यते । तदुक्तम्— " तुल्योऽनेकत्र दक्षिणः" इति [लक्ष्मीसरस्वतीरूपसपत्नीसंभवादस्य त्यागः सूचितः-चा०] ।

(३०) अथ (भूपवर्णनानन्तरं) कुमार्यङ्गराजाच्चक्षुरवतार्य । अपनीयेत्यर्थः। जन्यां मातृसखीम् । " जन्या मातृसखीमुदोः " इति विश्वः । सुनन्दां याहि गच्छेत्यवदत् । न चाय-

---

(28.) "In causing the beautiful wives of his enemies to shed on their bosoms the drops of tears, as big as pearls, he returned, as it were, their pearl garlands, without strings, that had been (already) taken off."

(29.) "Both the Goddesses S'rî (wealth) and Sarasvatî (learning), whose abodes by nature are different, live together in him. And you, O fortunate girl (or blessed one), are by your beauty and a true pleasing address, fitted to become their third (a fit companion for them both)."

अथाङ्गराजादवतार्य चक्षुर्याहीति जन्यामवदत्कुमारी ।
नासौ न काम्यो न च वेद सम्यग्द्रष्टुं न सा भिन्नरुचिर्हि लोकः ॥ ३० ॥
ततः परं दुःप्रसहं द्विषद्भिर्नृपं नियुक्ता प्रतिहारभूमौ ।
निदर्शयामास विशेषदृश्यमिन्दुं नवोत्थानमिवेन्दुमत्यै ॥ ३१ ॥
अवन्तिनाथोऽयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः ।
आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति ॥ ३२ ॥

मङ्गराजनिषेधो दृश्यदोषान्नापि द्रष्टृदोषादित्याह—नेत्यादिना । असावङ्गराजः काम्यः कमनीयो नेति न । किंतु काम्य एवेत्यर्थः। सा कुमारी च सम्यग्द्रष्टुं विवेक्तुं न वेदेति न । वेदेत्यर्थः। [द्वौ नञौ प्रकृत्यर्थं गमयतः। वामनश्च ।"संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधात्" इति तर्ह्यगुणज्ञा सा चेदपि नेत्याह—हे०] किंतु लोको जनो भिन्नरुचिर्हि रुचिरमपि किंचित्कस्मैचिन्न रोचते (यदुक्तं किरातार्जुनीये । "विचित्ररूपाः खलु चित्तवृत्तयः") । किं कुर्मो न हीच्छा नियन्तुं शक्यत इति भावः ।

(३१.) ततोऽनन्तरं प्रतिहारभूमौ द्वारदेशे नियुक्ता दौवारिकी। "स्त्री द्वार्द्वारं प्रतीहारः" इत्यमरः। द्विषद्भिः शत्रुभिर्दुःप्रसहम् दुःसहम् । शूरमित्यर्थः। विशेषेण दृश्यं (अतिशयेन मनोहरं) दर्शनीयम् । रूपवन्तमित्यर्थः । परमन्यं नृपम् । नवोत्थानं नवोदयमिन्दुम् (चन्द्रं) इव । इन्दुमत्यै निदर्शयामास ["आक्षिपन्त्यरविन्दानि मुग्धे तव मुखश्रियं कोशदण्डसमग्राणां किमेषामस्ति दुष्करम्" इत्यादेर्लोकैरादृतत्वान्न दोषः। उक्तं हि कण्ठाभरणे।"इदं हि शास्त्रमाहात्म्यदर्शनालसचेतसां अपशब्दवदाभाति न च सौभाग्यमुज्झति " इति—चा०] ।

(३२.) उदग्रबाहुर्दीर्घबाहुः (" उच्चप्रांशून्नतोदग्रः " इत्यमरः) । विशालवक्षास्तनुवृत्तमध्यः कृशवर्तुलमध्योऽयं राजावन्तिनाथोऽवन्तिदेशाधीश्वरः [मालवदेशाधिपतिः—हे० सु०] । त्वष्ट्रा विश्वकर्मणा । भर्तुस्तेजोवेगमसहमानया दुहित्रा संज्ञादेव्या प्रार्थितेनेति शेषः । चक्रभ्रमं चक्राकारं शस्त्रोत्तेजनयन्त्रम् [अजुनयंत्रं—सु०] । " भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुण्डाख्ये शिल्पियन्त्रके " इति विश्वः । आरोप्य यत्नेनोल्लिखित उष्णतेजाः सूर्य इव [त्वष्टासंज्ञाभिधायाः दुहितुरादित्यपत्न्याः तत्तेजोऽसहमानायाः कृते रविं यंत्रेऽलिखदित्यागमः—हे०]। विभा-

(30) Then having removed her eyes from the king of the Angas, 'proceed,' said the maiden to her friend. Not that he was not attractive, nor that she was not a good judge herself ; but men have different tastes

(31.) Then she, who was appointed to keep the door, pointed out to Indumatî another prince, whom his enemies dared not withstand and who was particularly handsome like the moon newly risen.

(32.) "This long-armed, broad-breasted, and slender-and-round-waisted Lord of Avanti shines like the effulgent luminary, who was as if trimmed off with care by Tvashtri, having placed him on his round lathe."

अस्य प्रयाणेषु समग्रशक्तेरग्रेसरैर्वाजिभिरुत्थितानि ।
कुर्वन्ति सामन्तशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ॥ ३३ ॥
असौ महाकालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः ।
तमिस्रपक्षेऽपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान् ॥ ३४ ॥
अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते ।
सिप्रातरंगानिलकम्पितासु विहर्तुमुद्यानपरंपरासु ॥ ३५ ॥

ति ।[“निष्ठुराक्षरमत्यतं बुधैः श्रुतिकटुस्मृतं । एकाग्रमनसा मन्ये त्वष्ट्रेयं निर्मिता यथा” इति वाग्भटः–हे०] अत्र मार्कण्डेयः–“विश्वकर्मा त्वनुज्ञातः शाकद्वीपे विवस्वता।भ्रममारोप्य तत्तेजः शातनायोपचक्रमे ” इति । [उपमोत्प्रेक्षा वा–हे०] ।

(३३.) समग्रशक्तेः शक्तित्रयसंपन्नस्यास्यावन्तिनाथस्य प्रयाणेषु जैत्रयात्रास्वग्रेसरैः (पुरोगामिभिः) वाजिभिरश्वैरुत्थितानि रजांसि (धूलयः । कर्तॄणि) सामन्तानां [द्वित्रिग्रामाधीशः सामन्तः–हे०] समन्ताद्भवानां [मण्डलेश्वराणां–चा०] राज्ञां ये शिखामणयश्चूडामणयस्तेषां [भूम्येकदेशनृपशिरोरत्नानां–हे०] प्रभाप्ररोहास्तमयं तेजोङ्कुरनाशं कुर्वन्ति [अतितेजस्वितावर्णनं वैराग्यहेतुः -चा०] । नासीरैरेवास्य शत्रवः पराजीयन्त इति भावः [अनेन परदेशयात्राभिनिवेशः उक्तः–हे०] ।

(३४.) असाववन्तिनाथः । महाकाल नाम स्थानविशेषः [उज्जयिन्यां हि महाकालरूपो हरो वसतीति प्रसिद्धिः–हे०]। तदेव निकेतनं स्थानं [गृहं-हे०] यस्य तस्य चन्द्रमौलेरीश्वरस्यादूरे समीपे वसन् । अत एव हेतोस्तमिस्रपक्षे कृष्णपक्षेऽपि प्रियाभिः सह (वनिताभिः सार्धं) ज्योत्स्नावतः प्रदोषान्रात्रीर्निर्विशत्यनुभवति किल । नित्यज्योत्स्नाविहारत्वमेतस्यैव नान्यस्येति भावः [अनेन बहुस्त्रीकता सूचिता–हे०] ।

(३५.) रम्भे कदलीस्तम्भाविवोरू यस्याः सा रम्भोरूस्तस्याः संबोधनम् । हे रम्भोरु । “उरूत्तरपदादौपम्ये” इत्यूङ्प्रत्ययः । नदीत्वाद्ध्रस्वः । यूना (तरुणेन) अनेन पार्थिवेन सह । सिप्रा नाम तत्रत्या नदी । तस्यास्तरंगाणाम् (कल्लोलानां) अनिलेन कम्पितासूद्यानानां परंपरासु पङ्क्तिषु विहर्तुं (क्रीडितुं) ते तव मनसः (चित्तस्य) रुचिः (अभिलाषः) कच्चित् [“क-

---

(33.) “In the marches of this all-powerful prince, the dust, raised by the vanguard of horses, effects the disappearance of the rising lustre of the crest jewels of the tributary princes”

(34.) “Residing not far from the moon-crested S'iva, whose abode is Mahákála, this prince enjoys in the company of his beloveds, even in the dark fortnight, moon-light evenings”

(35.) “I hope you entertain a desire, O beautiful-thighed one, to sport with this young prince, in the rows of gardens, the trees of which are shaken by the breeze from the waves of the river Siprá ”.

तस्मिन्नभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के ।
बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम् ॥ ३६ ॥
तामग्रतस्तामरसान्तराभामनूपराजस्य गुणैरनूनाम् ।
विधाय सृष्टिं ललितां विधातुर्जगाद भूयः सुदती सुनन्दा ॥ ३७ ॥

च्चित्प्रश्ने कामवादे " इति वैजयंती-हे०] । स्पृहास्ति किमित्यर्थः [एतेन स्वासंमतिरुक्ता-हे०] । " अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम् " इत्यमरः ।

(३६.) उत्तमसौकुमार्योत्कृष्टाङ्गमार्दवा सेन्दुमती । अभिद्योतितान्युल्लसितानि बन्धव एव पद्मानि येन तस्मिन् । प्रतापेन तेजसा संशोषिताः शत्रव एव पङ्काः कर्दमा येन तस्मिन् । तस्मिन्नवन्तिनाथे कुमुद्वती (कुमुदानि अस्याः सन्तीति कुमुद्वती) । " कुमुदनडवेतसेभ्यो ड्मतुप् " इति ड्मतुप्प्रत्ययः । भानुमत्यंशुमति (सूर्ये) इव । भावं चित्तं (प्रेम) न बबन्ध । न तत्रानुरागमकरोदित्यर्थः [अनेन कुमार्याः सौकुमार्यं राज्ञः तैक्ष्ण्यं सूचितं-हे०] । बन्धूनां पद्मत्वेन शत्रूणां पङ्कत्वेन च निरूपणं राज्ञः सूर्यसाम्यार्थम् [अतिक्रूरत्वं वैराग्यकारणं-चा०] ।

(३७.) सुनन्दा (प्रतीहाररक्षी) तामरसान्तराभां (तामरसस्य कमलस्य अन्तरं मध्यं तामरसान्तरस्येव आभा कान्तिर्यस्याः सा तां तथोक्तां) पद्मोदरतुल्यकान्तिम् । कनकगौरीमित्यर्थः । गुणैः [विनयादिभिः-हे०] अनूनाम् (संपूर्णां) । अधिकामित्यर्थः । शोभना दन्ता यस्याः सा सुदती [ननु कथं सुदतीति नात्रकार्योपगम्यते । इयमिंदुमती तत्र बालापदेन निर्विशेषिता । "बाला च गीयते नारी यावत्षोडशवत्सरं" । अथवा । "आषोडशाभवेद्बाला तरुणी त्रिंशकामता । पंच पंचाशका प्रौढा वृद्धा भवति तत्परं " इति रतिरहस्ये । नागरसर्वस्वात् । एवं च तत्रापि यौवनं वयो गम्यते-चा०] । " वयसि दन्तस्य दतृ " इति दत्रादेशः । " उगितश्च " इति ङीप् । तां तां प्रकृतां प्रसिद्धां वा विधातुः (ब्रह्मणः) ललितां (रम्यां) सृष्टिम् । मधुरनिर्माणां स्त्रियमित्यर्थः । अनुगता आपो येषु तेऽनूपा नाम देशाः । " ऋक्पूरब्धूःपथामानक्षे " इत्यप्रत्ययः समासान्तः । " ऊदनोर्देशे " इत्यूदादेशः । तेषां [अनूपाख्यदेशानां-हे०] राज्ञोऽनूपराजस्याग्रतो विधाय (कृत्वा) व्यवस्थाप्य भूयः पुनर्जगाद (बभाषे) ।

(36.) That exquisitely delicate maiden, like a sun-lotus, did not set her heart on him, who illuminated the lotuses (in the form) of his friends and who dried the mud (in the form) of his enemies by his valour.

(37.) Sunandâ, having taken the princess to the presence of the king of the Anûpas, again spoke to her, bright as the interior of a lotus, who had a beautiful set of teeth, who was not wanting in good qualities, and who was the most beautiful creation of the Creator.

सङ्ग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः ।
अनन्यसाधारणराजशब्दो बभूव योगी किल कार्तवीर्यः ॥ ३८ ॥
अकार्यचिन्तासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात् ।
अन्तःशरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ॥ ३९ ॥

(३८.) सङ्ग्रामेषु युद्धेषु निर्विष्टा अनुभूताः (सुखिताः) सहस्रं बाहवो यस्य स तथोक्तः [इति पौरुषोक्तिः—हे०] । युद्धादन्यत्र द्विभुज एव दृश्यत इत्यर्थः । अष्टादशसु द्वीपेषु निखाताः स्थापिता यूपाः (यज्ञस्तंभाः) येन स तथोक्तः। [तथा च विष्णुपुराणे। "जंबूप्लक्षाह्वयौ द्वीपौ शाल्मलश्चापरो द्विपः । कुशक्रौञ्चौ तथा शाकः पुष्करश्चैव सप्तमः" इति। "इंद्रद्वीपः कुशेरूमान् ताम्रवर्णो गभस्तिमान् । नागद्वीपे तथा सौम्यो गन्धर्वो वरुणास्तथा । इलावृत्तं तथा सर्वं चन्द्रादित्यसमप्रभं । इलावृत्तस्य मध्ये यो मेरुः कनकपर्वतः । इत्थमष्टादश द्वीपाः समाख्याता मनीषिभिः"। जम्बूद्वीपान्तर्गतसिंहलाद्यवान्तरगणनयाष्टादशत्वं । तथा नैषधे। "अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्" इति—हे०] सर्वक्रतुयाजी सार्वभौमश्चेति भावः [अनेन धार्मिकत्वं—हे०] । जरायुजादिसर्वभूतरञ्जनादनन्यसाधारणः (समानं साधारणमाधारो यस्य सः अन्यसाधारणो न भवतीति अनन्यसाधारणः) राजशब्दो यस्य स तथोक्तः । योगी [योगः चित्तवृत्तिनिरोधस्तद्युक्तो योगी सिद्धः—चा०] । ब्रह्मविद्वानित्यर्थः । स किल भगवतो दत्तात्रेयाल्लब्धयोग इति प्रसिद्धिः । कृतवीर्यस्यापत्यं पुमान्कार्तवीर्यो नाम राजा [सहस्रार्जुनः—हे०] बभूव किलेति [ऐतिह्ये—चा०]। अयं चास्य महिमा सर्वोऽपि दत्तात्रेयवरप्रसादलब्ध इति भारते दृश्यते [उक्तं च विष्णुपुराणे।"न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः । यज्ञैर्दानैस्तपोभिर्वा प्रश्रयेण श्रुतेन वा"—हे०] ।

(३९.) विनेता शिक्षको यः कार्तवीर्यः । अकार्यस्यासत्कार्यस्य चिन्तया । अहं चौर्यादिकं करिष्यामीति बुद्ध्या । समकालमेककालमेव यथा तथा पुरस्तादग्रे चापधरः [धरतीति धरः चापस्य धनुषः धरः चापधरः।तथा वामनः। ब्रह्मविदादयः। "कृदन्तवृत्त्या तैर्महीधरादयो व्याख्याताः" इति—हे०] प्रादुर्भवन्सन् । प्रजानां जनानाम् ।"प्रजा स्यात्संततौ जने" इत्यमरः। अन्तःशरीरेष्वन्तःकरणेषु । शरीरशब्देनेन्द्रियं लक्ष्यते । अविनयमपि प्रत्यादिदेश (निराकार्षीत् ।"प्रत्यादेशो निराकृतिः" इत्यमरः) मानसापराधमपि निवारयामासेत्यर्थः । अन्ये तु वाक्कायापराधमात्रप्रतिकर्तार इति भावः [यदा कोपि कस्योपरि विरुद्धं चिन्तयति तदा

(38.) "It is said that formerly there was a devotee by name Kártavîrya who possessed a thousand arms in battle, who had fixed sacrificial posts in eighteen continents (or islands) and whose title of ' King ' was not common to other princes".

(39.) "The very moment that any evil desire entered into the inner organs (minds) of his subjects, the chastiser presenting himself before them, bow in hand, prevented their immoral actions ".

ज्याबन्धनिष्पन्दभुजेन यस्य विनिःश्वसद्वक्त्रपरंपरेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा प्रसादात् ॥ ४० ॥
तस्यान्वये भूपतिरेष जातः प्रतीप इत्यागमवृद्धसेवी ।
येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टम् ॥ ४१ ॥

चापं गृहीत्वा समये एव प्रकटीभवति । कार्तवीर्ये राज्यं कुर्वाणे केनापि चित्तेऽपि अन्यायं चिन्तयितुं न शक्यते किमुत बहिः—सु०] ।

(४०.) ज्याया मौर्व्या बन्धेन बन्धनेन निष्पन्दा निश्चेष्टाः (निश्चलाः) भुजा यस्य तेन (अत एव) विनिःश्वसती ज्याबन्धोपरोधाद्दीर्घं निःश्वसती वक्त्रपरंपरा दशमुखी यस्य तेन निर्जितवासवेनेन्द्रविजयिना । अत्रेन्द्रादयोऽप्यनेन जितप्राया एवेति भावः । लङ्केश्वरेण दशास्येन यस्य कार्तवीर्यस्य कारागृहे (कारा च तद्गृहं च तस्मिन् । " कारा बन्धनमुच्यते " इति हलायुधः) बन्धनागारे । " कारा स्याद्बन्धनालये " इत्यमरः । आ प्रसादादनुग्रहपर्यन्तमुषितं स्थितम् [पूर्वं हि जलकेलिलोलविलासिनीस्नानार्थार्जुनभुजपरिघरुद्धरेवावारिप्रवाहापत्हृतशिवलिंगार्चारुपितं रणरसागतं रावणमृद्धं जित्वा कार्तवीर्योऽर्जुनो निजचापज्याबन्धेन बबन्धे इत्यागमः–हे०व०] । " नपुंसके भावे क्तः" । एतत्प्रसाद एव तस्य मोक्षोपायो न तु क्षात्रमिति भावः ।

(४१.) आगमवृद्धसेवी श्रुतवृद्धसेवी प्रतीप इति । ख्यात इति शेषः । एष भूपतिस्तस्य कार्तवीर्यस्यान्वये वंशे जातः । येन प्रतीपेन संश्रयस्याश्रयस्य पुंसो दोषैः [द्यूतक्रीडाभिः–चा०सु०] व्यसनादिभी रूढमुत्पन्नं श्रियः सबन्धि स्वभावलोला प्रकृतिचञ्चलेत्येवंरूपमयशो दुष्कीर्तिः प्रमृष्टं निरस्तम् । दुष्टाश्रयत्यागशीलायाः श्रियः प्रकृतिचापलप्रवादो मूढजनपरिकल्पित इत्यर्थः[अस्य तु सन्मार्गवर्तित्वादचला इति–हे० । यतोयं विद्यावृद्धसेवी अत एव लक्ष्मीनाशकदोषाभावात्स्थिराभूदित्यर्थः–चा०] अयं तु दोषराहित्यान्न कदाचिदपि श्रिया त्यज्यत इति भावः ।

(४२.) यः प्रतीप आयोधने युद्धे कृष्णगतिं कृष्णवर्त्मानमग्निं सहायं (सखायं) अवाप्य ["बर्हिःशुष्मा कृष्णवर्त्मा"इत्यमरः।"वरेण तोषयामास तं नृपं स्विष्टकृत्तदा"इति भारते सहायहेतुः–हे०] । क्षत्रियाणां (राजन्यानां) कालरात्रिम् [यमभगिनीं नाशकरणशीलां–चा०] सं-

(40.) "In whose prison there stayed, until his (Kàrtavìrya's) favour, the lord of Lankà, by whom Indra had been conquered, whose arm was motionless being bound up by the bow-string, and whose row of mouths was breathing (hard)".

(41.) 'This king, Pratipa by name was born in his (Kàrtavîrya's) family, who is devoted to those who are versed (lit. ripe) in the Vedas, and who has wiped off the stain of the Goddess of wealth as being naturally fickle—the stain which arises from the faults of those to whom she is attached ".

आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिम्।
धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्त्रसाराम्॥ ४२॥
अस्याङ्कलक्ष्मीर्भव दीर्घबाहोर्माहिष्मतीवप्रनितम्बकाञ्चीम्।
प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः॥ ४३॥
तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव।
शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः॥ ४४॥

हाररात्रिमित्यर्थः। रामपरश्वधस्य जामदग्न्यपरशोः। "द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः" इत्यमरः। शितां तीक्ष्णां धारां मुखम्। "खड्गादीनां च निशितमुखं धारा प्रकीर्तिता" इति विश्वः। उत्पलपत्त्रस्य (कुमुदपत्त्रस्य) सारः (बलं) इव सारो यस्यास्तां तथाभूतां संभावयति मन्यते [अतिसाहसिकत्वं वैराग्यहेतुः–चा०]। एतन्नगरजिगीषया गतान्रिपून्स्वयमेव धक्ष्यामीति भगवता वैश्वानरेण दत्तवरोऽस्य राजा। दह्यन्ते च तथागताः शत्रव इति भारते कथानुसंधेया।

(४३.) दीर्घबाहोरस्य प्रतीपस्याङ्कलक्ष्मीः (उत्संगश्रीः) भव। एनं वृणीष्वेत्यर्थः। अनेनायं विष्णुतुल्य इति ध्वन्यते। माहिष्मती नामास्य नगरी। तस्या वप्रः प्राकार एव नितम्बः। तस्य काञ्चीं रशनाभूतां जलानां वेण्या प्रवाहेण रम्याम्। "ओघः प्रवाहो वेणी च" इति हलायुधः। रेवां नर्मदां प्रासादजालैः (सौधगवाक्षविवरैः) गवाक्षैः। "जालं समूह आनायो गवाक्षक्षारकावपि" इत्यमरः। प्रेक्षितुं (द्रष्टुं) कामः इच्छास्ति यदि [अकस्थायास्तवालिंगनमेव स्यादिति दीर्घबाहुत्वं–हे०]।

(४४.) प्रकामं प्रियं प्रीतिकरं दर्शनं यस्य सोऽपि। दर्शनीयोऽपीत्यर्थः। स क्षितीशः। शरदा प्रमृष्टाम्बुधरोपरोधो निरस्तमेघावरणः पर्याप्तकलः पूर्णकलः शशी [नृपपक्षे चतुःषष्टिः कलाः–हे० चा०] नलिन्या इव [नलिन्युपमानेन पद्मिनीजातित्वं–हे०]। तस्या इन्दुमत्या रुचये (प्रीत्यै) न बभूव (नाजनिष्ट)। रुचिं नाजीजनदित्यर्थः। लोको भिन्नरुचिरिति भावः।

(42.) "Having obtained the God of fire (lit. he who leaves a dark track behind him) as his ally in battle, he considers the sharp edge of Râma's axe, the destruction-night of the Kshatriyas, as having the strength of (as possessing no more strength than) a lotus-leaf."

(43.) "Be you the Lakshmî on the lap of this long-armed one, if you entertain a desire of seeing through the windows of his palace the river Revâ, beautiful with her streams of water, and looking like a girdle on the hips (in the form of) the rampart of Mâhishmatî."

(44.) That Lord of the earth, though of a lovely appearence, did not sufficiently come up to her taste, like the full moon even when freed from the obstruction of the clouds in autumn, to the taste of the lotus.

सा शूरसेनाधिपतिं सुषेणमुद्दिश्य लोकान्तरगीतकीर्तिम् ।
आचारशुद्धोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ॥ ४५ ॥
नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण ।
सिद्धाश्रमं शान्तमिवेत्य सत्त्वैर्नैसर्गिकोऽप्युत्ससृजे विरोधः ॥ ४६ ॥
यस्यात्मगेहे नयनाभिरामा कान्तिर्हिमांशोरिव संनिविष्टा ।
हर्म्याग्रसंरूढतृणाङ्कुरेषु तेजोऽविषह्यं रिपुमन्दिरेषु ॥ ४७ ॥

(४५.) लोकान्तरे [योगादिना–चा०] स्वर्गादावपि गीतकीर्तिमाचारेण शुद्धयोरुभयोर्वंशयोर्मातापितृकुलयोर्दीपं प्रकाशकम् । उभयवंशेत्यत्रोभयपक्षवन्निर्वाहः । शूरसेनानां देशानामधिपतिं सुषेणं नाम नृपतिमुद्दिश्याभिसंधाय [नाममात्रेण संकीर्तनमुद्देशः–हे०] शुद्धान्तरक्ष्यान्तःपुरपालिकया । "कर्मण्यण्" । "टिड्ढाणञ्–" इति ङीप् । सा कुमारी जगदे [बहुलस्त्रीकत्वाद्वैराग्यं–हे०] ।

• (४६.) यज्वा [इति वैराग्यहेतुः—हे०] विधिवदिष्टवान् । " सुयजोर्ङ्वनिप् " इति ङ्वनिप्प्रत्ययः । एष पार्थिवः । नीपो नामान्वयोऽस्येति नीपान्वयो नीपवंशजः । यं सुषेणमाश्रित्य (अधिगम्य) गुणैर्ज्ञानमौनादिभिः [क्षमाक्रौर्यादिभिः—हे०] शान्तं प्रसन्नं सिद्धाश्रमम् (सिद्धतपोवनं) ऋष्याश्रममेत्य प्राप्य सत्त्वैर्गजसिंहादिभिः प्राणिभिरिव । नैसर्गिकः स्वाभाविकोऽपि परस्परेण विरोधः (विग्रहः) उत्ससृजे त्यक्तः ।

(४७.) हिमांशोः कान्तिः (दीप्तिः) चन्द्रकिरणा इव नयनयोः (नेत्रयोः) अभिरामा (आनंदकारिणी) यस्य सुषेणस्य कान्तिः शोभात्मगेहे स्वभवने संनिविष्टा संक्रान्ता । अविषह्यं विसोढुमशक्यं तेजः प्रतापस्तु । हर्म्याग्रेषु धनिकमन्दिरप्रान्तेषु । " हर्म्यादि धनिनां वासः " इत्यमरः । संरूढाः (संजाताः) तृणाङ्कुरा येषां तेषु । शून्येष्वित्यर्थः [एतेनातिक्रूरत्वं वैराग्यकारणं–चा०] रिपुमन्दिरेषु शत्रुनगरेषु [शत्रुगृहेषु–चा०] । " मन्दिरं नगरे गृहे " इति विश्वः । संनिविष्टम् । स्वजनाह्लादको द्विषंतपश्चेति भावः ।

(45.) That princess was spoken to by the keeper of the harem, with reference to Sushena, the lord of the S'urasenas, whose fame was sung even in other worlds, and who by his conduct became the light (or ornament) of both pure families (paternal and maternal).

(46.) " This king, a performer of sacrifices, is of the race of the Nîpas ; having taken refuge in him even the natural opposition to each other has been given up by the qualities ; as by the beasts of forest on reaching a hermit's peaceful dwelling ".

(47.) " His splendour, shining in his own palace, becomes delightful to the eye like that of the cool-rayed moon, but his unbearable lustre is seen in the cities of his enemies, where the tops of mansions are over-grown with grassy-blades".

यस्यावरोधस्तनचन्दनानां प्रक्षालनाद्वारिविहारकाले ।
कलिंदकन्या मथुरां गतापि गङ्गोर्मिसंसक्तजलेव भाति ॥ ४८ ॥
त्रस्तेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः ।
वक्षःस्थलव्यापिरुचं दधानः सकौस्तुभं ह्रेपयतीव कृष्णम् ॥ ४९ ॥
संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्पशय्ये ।
वृन्दावने चैत्ररथादनूने निर्विश्यतां सुन्दरि यौवनश्रीः ॥ ५० ॥

(४८.) यस्य सुषेणस्य वारिविहारकाले जलक्रीडासमयेऽवरोधानामन्तःपुराङ्गनानां स्तनेषु चन्दनानां मलयजानां प्रक्षालनाद्धेतोः । कलिंदो नाम शैलस्तत्कन्या यमुना । "कालिंदी सूर्यतनया यमुना शमनस्वसा " इत्यमरः । मथुरा नामास्य राज्ञो नगरी । तां गतापि (मथुरापुरीसमीपवर्तिन्यपि) गङ्गाया विप्रकृष्टापीत्यर्थः । मथुरायां गङ्गाभावं सूचयत्यपिशब्दः । कालिंदीतीरे मथुरा लवणासुरवधकाले शत्रुघ्नेन निर्मास्यत इति वक्ष्यति । तत्कथमधुना मथुरासंभव इति चिन्त्यम् । मथुरा मथुरापुरीति शब्दभेदः । यद्वा साम्येति । गङ्गाया भागीरथ्या ऊर्मिभिः (तरंगैः) संसक्तजलेव (संमिलितोदकेव) भाति । धवलचन्दनससर्गात्प्रयागादन्यत्राप्यत्र गङ्गासंगतेव भातीत्यर्थः । [बहुलस्त्रीकत्वाद्वैराग्यं–हे०] । " सितासिते हि गङ्गायमुने " इति घण्टापथः ।

(४९.) तार्क्ष्याद्गरुडात्त्रस्तेन । यमुनौकः स्थानं यस्य तेन । कालियेन नाम नागेन विसृष्टं किलाभयदाननिष्क्रयत्वेन दत्तम् । किलेत्यैतिह्ये । वक्षःस्थलव्यापिरुचं [वक्षःस्थलं उरःस्थलं व्यापिनी रुक् यस्य तं तथोक्तं । स्थलशब्दः प्रशस्तार्थः तथा गणरत्नमहोदधौ । "प्रकाण्डस्थलभित्तयः" इति–हे०] मणिं (रत्नं)दधानः(बिभ्राणः)यः सुषेणः सकौस्तुभं (कौस्तुभरत्नयुक्तं) कृष्णं विष्णुं ह्रेपयतीव व्रीडयतीव । " अर्तिह्री–" इत्यादिना पुगागमः । कौस्तुभमणेरप्युत्कृष्टोऽस्य मणिरिति भावः ।

(५०.) युवानम् (तरुणं) अमुं सुषेणं भर्तारं संभाव्य (अंगीकृत्य) मत्वा । पतित्वे-

---

(48.) "By the washing of the sandle on the bosoms of the females of whose harem at the time of sporting in the water, the daughter of Kalinda, though flowing by Mathurà, appears to have mixed her waters with the waves of the Gangá."

(49)" It is said that he puts Krishna to shame together with his Kaustubha on account of his wearing a diamond, the lustre of which covers the surface of his chest, and which had been given to him by the snake Káliya, whose abode was in the Yamuná and who was afraid of Garuda (or by adopting the reading त्रातेन &c. 'and who was protected by him from Garuda')".

(50.) "Accepting this youth for your husband, you may, O charming lady, enjoy your loveliness of youth, in (the gardens of) Vrindávana, not inferior to Chaitraratha, on a flowery-couch overspread with tender sprouts."

अध्यास्य चाम्भःपृषतोक्षितानि शैलेयगन्धीनि शिलातलानि ।
कलापिनां प्रावृषि पश्य नृत्यं कान्तासु गोवर्धनकन्दरासु ॥ ५१ ॥
नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री ।
महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ॥ ५२ ॥

नाङ्गीकृत्येत्यर्थः । मृदुप्रवालोत्तरोपरिप्रस्तारितकोमलपल्लवा पुष्पशय्या यस्मिंस्तत्तस्मिन् [कोमलकिसलयाधिककुसुमशयनीये–व० मु०] चैत्ररथात्कुबेरोद्यानादनूने वृन्दावने [उक्तञ्च शंभुरहस्ये । "अलकायाः बहिश्चान्यद्वनं चैत्ररथं प्रिये । योजनायुताविस्तीर्णं सर्वं कल्पद्रुमाकुलं"–हे०] वृन्दावननामक उद्याने हे सुन्दरि यौवनश्रीर्यौवनफलं (तारुण्यलक्ष्मीः) निर्विश्यतां उपभुज्यताम् ।

(५१.) किंच । प्रावृषि वर्षासु कान्तासु गोवर्धनस्याद्रेः कन्दरासु दरीषु (गुहासु) " दरी तु कन्दरो वा स्त्री " इत्यमरः । अम्भसः पृषतैर्बिन्दुभिः (जलकणैः) उक्षितानि सिक्तानि । शिलायां भवं शैलेयम् [चन्दनवृक्षः–मु०] । " शिलाजतु च शैलेयम् " इति यादवः । यद्वा शिलापुष्पाख्य ओषधिविशेषः । " कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु । शैलेयम्"इत्यमरः।"शिलाया ढः" इत्यत्र शिलाया इति योगविभागादिवार्थे ढप्रत्ययः। तद्गन्धवन्ति शैलेयगन्धीनि शिलातलान्यध्यास्याधिष्ठाय ' कलापिनां बर्हिणां नृत्यं (नर्तनं) पश्य [तत्र मयूरसंचारेण सर्पाभावात्संभोगे निःशंकता । कौतुकाभावो ध्वन्यते–हे० चा०] ।

(५२.) "स्यादावर्तोऽम्भसां भ्रमः" इत्यमरः। आवर्तमनोज्ञा (वर्तुलाकारान्मनोहरा) नाभिर्यस्याः सा । इदं च नदीसाम्यार्थमुक्तम् । अन्यवधूरन्यपत्नी भवित्री भाविनी सा कुमारी तं नृपम् । सागरगामिनी सागरं गन्त्री स्रोतोवहा नदी मार्गवशादुपेतं प्राप्तं महीधरं पर्वतमिव । [शैलोपमयाराज्ञः उन्नतिः । सागरोपमया भाविनः पत्युर्गांभीर्यं ध्वनिरूपं । काव्यप्रकाशे । "इदमुत्तममतिशायिनि व्यंग्ये वाच्याद्ध्वनिर्बुधैः कथितः"–हे०] व्यत्यगादतीत्य गता [शैलदृष्टान्तेनातिक्रान्तस्य राज्ञस्तत्परित्यागे त्दृदयंभिदा सूच्यते–चा०] ।

(५३.) अथ भुजिष्या किंकरी सुनन्दा । "भुजिष्या किंकरी मता"इति हलायुधः। अङ्गदाश्लिष्टभुजं [अनेन मांसलत्वं–चा०] केयूरनद्धबाहुं [आभरणप्रियत्वं–हे०चा०] सादितशत्रु

(51.) "Sitting on slabs of stone, sprinkled with drops of water and fragrant with resin (storax or benzoin or mountain flowers, or by adopting the reading शैलेय नद्धानि 'covered by moss and such other vegetable plants growing on rocks '), you may look at the dance of peacocks, in the rainy season, in the beautiful caves of the mountain Govardhana".

(52.) She, who was destined to become the wife of another, with a beautiful navel like a whirlpool, passed by that king ; as a river, bent on going to the ocean, passes by a mountain standing in its course.

अथाङ्गदाश्लिष्टभुजं भुजिष्या हेमाङ्गदं नाम कलिङ्गनाथम्।
आसेदुषीं सादितशत्रुपक्षं बालामबालेन्दुमुखीं बभाषे ॥ ५३ ॥
असौ महेन्द्राद्रिसमानसारः पतिर्महेन्द्रस्य महोदधेश्च।
यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेन्द्रः ॥ ५४ ॥
ज्याघातरेखे सुभुजो भुजाभ्यां बिभर्ति यश्चापभृतां पुरोगः।
रिपुश्रियां साञ्जनबाष्पसेके बन्दीकृतानामिव पद्धती द्वे ॥ ५५ ॥

पक्षं विनाशितशत्रुवर्गं हेमाङ्गदं नाम (प्रसिद्धं) कलिङ्गनाथमासेदुषीमासन्नामबालेन्दुमुखीं पूर्णेन्दुमुखीं बालां [" बालाषोडशवार्षिकी " इति रतिरहस्ये–हे०] इन्दुमतीं बभाषे (जगाद) ।

(५४.) महेन्द्राद्रेः ("महेन्द्रो मलयः सह्यः" इति वैजयन्ती)। समानसारस्तुल्यसत्त्वोऽसौ हेमाङ्गदो महेन्द्रस्य नाम कुलपर्वतस्य महोदधेः (महासमुद्रस्य) च पतिः स्वामी।"महेन्द्रमहोदधी एवास्य गिरिजलदुर्गे " इति भावः । यस्य यात्रासु [दिग्विजयप्रयाणेषु । कटकचलनसमयेषु वा–सु०] क्षरतां मदस्राविणां सैन्यगजानां छलेन (व्याजेन) महेन्द्रो महेन्द्राद्रिः पुरोऽग्रे यातीव (गच्छति इव)। अद्रिकल्पा अस्य गजा इत्यर्थः [पर्वतसमुद्रस्वामित्वेन दुर्गकथनं–चा०] ।

(५५.) सुभुजः (शोभनबाहुः) चापभृतां (धनुर्धराणां) पुरोगो धनुर्धराग्रेसरो यः । बन्दीकृतानां प्रगृहीतानाम् (बलादाकृष्टानां) । " प्रग्रहोपग्रहौ बन्द्याम् " इत्यमरः । रिपुश्रियाम् (अरिलक्ष्म्यां । रोदनवशात्) साञ्जनः (सकज्जलः) बाष्पसेकः (अश्रुसेचनं) ययोस्ते । कज्जलमिश्राश्रुसिक्ते इत्यर्थः [सांजनत्वेन ज्याघाततुल्यता–चा०] । पद्धती (मार्गौ) इव । द्वे ज्याघातानां मौर्वीकिणानां रेखे राजी भुजाभ्यां बिभर्ति (धारयति) । द्विवचनात्सव्यसाचित्वं गम्यते । रिपुश्रियां भुजाभ्यामेवाहरणात्तद्गतरेखयोस्तत्पद्धतित्वेनोत्प्रेक्षा । तयोः श्यामत्वात्साञ्जनाश्रुसेकोक्तिः ।

(53.) Then the maid-servant spoke to the young damsel with a face like that of the moon not young (i.e. like the full moon) when she approached the Lord of the Kalingas, Hemàngada by name, whose arm was adorned with an armlet and who had destroyed the host of his enemies.

(54.) "This one whose power is equal to that of the mountain Mahendra, is the Lord of Mahendra and the great ocean; in whose marches the mountain Mahendra itself walks in front, as it were, under the pretext of the army of rutting elephants".

(55.) "This beautiful-handed prince, the head (or foremost) of the bowmen, bears two marks (or lines) caused by the strokes of the bow-strings in his two arms, the two foot-paths wet with tears mixed with collyrium, as it were, of the enemies' Glory taken prisoner".

यमात्मनः सद्मनि संनिकृष्टो मन्द्रध्वनित्याजितयामतूर्यः ।
प्रासादवातायनदृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तम् ॥ ५६ ॥
अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥ ५७ ॥
प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तयैवम् ।
तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ॥ ५८ ॥

(५६.) आत्मनः (शुद्धियुक्ते) सद्मनि सुप्तं यं हेमाङ्गदं संनिकृष्टः समीपस्थोऽत एव प्रासादवातायनैः (गवाक्षैः) दृश्यवीचिः [प्रेक्षणीयकल्लोलः । अतिसमीपवासप्रसंगादेतत्कथनं । यद्वा । येऽन्यस्य कम्पहेतुः सोऽप्युद्दीपः तस्या हर्षं करोतीति धैर्योक्तिः–हे०] । मन्द्रेण गम्भीरेण । “ मन्द्रस्तु गम्भीरे ” इत्यमरः । ध्वनिना (शब्देन) त्याजितं विवर्जितं यामस्य तूर्यं प्रहारावसानसूचकं वाद्यं येन स तथोक्तः । “ द्वौ यामप्रहरौ समौ ” इत्यमरः । अर्णव एव प्रबोधयति । अर्णवस्यैव तूर्यकार्यकारित्वात्तद्वैयर्थ्यमित्यर्थः । समुद्रस्यापि सेव्यः किमन्येषामिति [वैतालिकभावश्चोक्तः–हे०] ।

(५७.) अनेन राज्ञा सार्धं तालीवनैर्मर्मरेषु मर्मरेति ध्वनत्सु [अनेनोद्यानाभावश्चोक्तः–हे०] । “ अथ मर्मरः । स्वनिते वस्त्रपर्णानाम् ” इत्यमरवचनाद्गुणपरस्यापि मर्मरशब्दस्य गुणिपरत्वं प्रयोगादवसेयम् । अम्बुराशेः समुद्रस्य तीरेषु (तटेषु) द्वीपान्तरेभ्यः (अन्यद्वीपेभ्यः) आनीतानि लवङ्गपुष्पाणि देवकुसुमानि यैस्तैः । “ लवङ्गं देवकुसुमम् ” इत्यमरः । मरुद्भिर्वातैरपाकृताः प्रशमिताः [सुरतक्रीडाजनिताः–चा०] स्वेदस्य लवा बिन्दवो यस्याः सा तथाभूता सती त्वं विहर क्रीड [द्वीपान्तरात् लवङ्गपुष्पाण्यादाय मुक्तामणीनिव विहारोद्भवान् स्वेदलवान् अपहरिष्यन्तीति भावः–हे०] ।

(५८.) आकृत्या रूपेण लोभनीयाकर्षणीया [यादृशेन रूपेणेयं प्रलोभ्यते तादृशं रूपममुष्मिन्नृपे नास्तीत्यर्थः–चा०] । न तु वर्णनमात्रेणेत्यर्थः । विदर्भराजावरजा भोजानुजेन्दुमती तया सुनन्दयैवं (अनेन प्रकारेण) प्रलोभितापि प्रचोदितापि । नीत्या पुरुषकारेण दूरकृष्टा दूरमानीता लक्ष्मीः (श्रीः) प्रतिकूलं (पराङ्मुखं) दैवं (भाग्यं) यस्य तस्मात्पुंस इव । तस्माद्धेमाङ्गदादपावर्तत प्रतिनिवृत्ता ।

(56.) “The ocean itself, whose waves are visible from the windows of the palace, and whose roaring noise surpasses the sound of the watch drum being close at hand, awakes him asleep in his own room”.

(57.) “Sport with this prince on the coast of the sea, where the palm tree groves make a rustling noise, your drops of perspiration being relieved by winds that bring with them (the sweet scent of) the clove flowers from other continents.”

(58) Attractive in person as she was, the younger sister of the king of the Vidarbhas, though tempted thus by her (Sunandá), turned away from him as Lakshmî brought from a distance by human efforts turns away on account of adverse fate.

अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसरूपमेत्य।
इतश्चकोराक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भोज्याम् ॥ ५९ ॥
पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ॥ ६० ॥
विन्ध्यस्य संस्तम्भयिता महाद्रेर्निःशेषपीतोज्झितसिन्धुराजः।
प्रीत्याश्वमेधावभृथार्द्रमूर्तेः सौस्नातिको यस्य भवत्यगस्त्यः ॥ ६१ ॥

(५९.) अथ द्वारे नियुक्ता दौवारिकी (वेत्रधारिणी) सुनन्दा। " तत्र नियुक्तः " इति ठक्प्रत्ययः। " द्वारादीनां च " इत्यौ आगमः। आकारेण देवसरूपं देवतुल्यम्। उरगाख्यस्य पुरस्य पाण्ड्यदेशे कान्यकुब्जतीरवर्तिनागपुरस्य नाथमेत्य प्राप्य। हे चकोराक्षि [रक्तत्वाच्चकोरस्य अक्षिणीवाक्षिणी यस्याः सा।"चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे" इति रतिरहस्योक्तेः पद्मिनीत्वं-हे०]। इतो विलोकयेति पूर्वानुशिष्टां पूर्वमुक्तां भोजस्य राज्ञो गोत्रापत्यं स्त्रियं भोज्यामिन्दुमतीम्। " क्रौड्यादिभ्यश्च" इत्यत्र भोजात्क्षत्त्रियादित्युपसंख्यानात्ष्यङ्प्रत्ययः। " यङश्चाप् " इति चाप्। निजगाद (बभाण)। इतो विलोकयेति पूर्वमुक्त्वा पश्चाद्वक्तव्यं निजगादेत्यर्थः।

(६०.) अंसयोरर्पिताः। लम्बन्त इति लम्बाः। हाराः (मुक्तावल्यः) यस्य सः। हरिचन्दनेन ["घर्षणे कुंकुमच्छायं चंदनं हरिचन्दनम्" इति तन-हे०]गोशीर्षाख्येन चन्दनेन। " तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् " इत्यमरः। क्लृप्ताङ्गरागः सिद्धानुलेपनोऽयं पाण्डूनां जनपदानां राजा पाण्ड्यः। "पाण्डोर्जनपदशब्दात्क्षत्त्रियाड्ड्यण्वक्तव्यः" इति ड्यण्प्रत्ययः। तस्य राजन्यपत्यवदितिवचनात्। बालातपेन रक्ता अरुणाः सानवः (शिखराणि) यस्य स सनिर्झरोद्गारः प्रवाहस्यन्दनसहितः। " वारिप्रवाहो निर्झरो झरः " इत्यमरः। अद्रिराजः (मेरुः) इवाभाति [अत्र वाक्यार्थवृत्तिरुपमा। यद्वामनः। "तद्वैविध्यं पदवाक्यार्थवृत्तिभेदात् " इति-हे०]।

(६१.) विन्ध्यस्य नाम्नो महाद्रेः (कर्मणि षष्ठी)। तपनमार्गनिरोधाय वर्धमानस्येति शेष.

(59.) Then the door-keeper, having come to the Lord of the city called Nága (i. e. a snake i. e. Nágapura) who was god like in figure, spoke to the princess of Bhoja who had before been addressed thus: " O you with eyes like those of the Chakoras, look here ! "

(60.) " This is the king of the Pándus, from whose shoulders a garland is hanging down, who has his body annointed with the yellow sandle and who looks like the prince of the mountains whose summits are reddened with the rays of the young sun and which has rivulets flowing down. "

(61.) " The sage Agastya, the subduer of the great mountain Vindhya, and by whom the ocean was drunk up to a drop and poured forth again, became at-

अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकावजयाय दृप्तः ।
पुरा जनस्थानविमर्दशङ्की संधाय लङ्काधिपतिः प्रतस्थे ॥ ६२ ॥
अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी ।
रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः ॥ ६३ ॥

। संस्तम्भयिता निवारयिता निःशेषं पीत उज्झितः पुनस्त्यक्तः सिन्धुराजः समुद्रो येन सोऽगस्त्योऽश्वमेधस्यावभृथे दीक्षान्ते कर्मणि । "दीक्षान्तोऽवभृथो यज्ञः" इत्यमरः । आर्द्रमूर्तेः (आर्द्रा जलकणयुक्ता मूर्तिः शरीरं यस्य तस्य तथोक्तस्य)। स्नातस्येत्यर्थः । यस्य पाण्ड्यस्य प्रीत्या स्नेहेन । न तु दाक्षिण्येन । सुस्नातं पृच्छतीति सौस्नातिकः [सुखेन स्नातः इति पृच्छति यः स सौस्नातिकः–सु०]। भवति । पृच्छतौ सुस्नातादिभ्य इत्युपसंख्यानाट्ठक् । [अगस्त्यस्य माहात्म्येन पाण्ड्यमहिमाप्युक्तो भवति–हे० अनेन नायकोत्कर्षः–चा०] ।

(६२.) पुरा ["स्यात्प्रबन्धे चिरातीते निकटागमिके पुरा"–हे०] पूर्वं जनस्थानस्य खरालयस्य विमर्दशङ्की दृप्त उद्धतो लङ्काधिपती रावणो दुरापं दुर्लभमस्त्रं ब्रह्मशिरोनामकं हरादाप्तवता येन पाण्ड्येन (सह) संधाय (मैत्रीं कृत्वा) इन्द्रलोकावजयायेन्द्रलोकं जेतुं प्रतस्थे [पुरा पाण्ड्याद्भीतो रावणः शिवप्रसादात् ब्राह्ममस्त्रं प्रापत्–चा०]। इन्द्रविजयिनो रावणस्यापि विजेतेत्यर्थः ।

(६३.) महाकुलीनेन महाकुले जातेन [यद्वा । महती या कुः पृथ्वी तत्र लीनेन–सु०]। "महाकुलादञ्खञौ" इति खञ्प्रत्ययः । अनेन पाण्ड्येन पाणौ त्वदीये विधिवद्यथाशास्त्रं गृहीते सति गुर्वी गुरुः । "वोतो गुणवचनात्" इति ङीष् । महीव रत्नैरनुविद्धो व्याप्तोऽर्णव एव मेखला यस्यास्तस्याः । इदं विशेषणं मह्यामिन्दुमत्यां च योज्यम् । दक्षिणस्या दिशः सपत्नी [इति पिण्डगन्धलोहितकुक्षिवेणीपक्षेष्वपीति केचित्–हे०] भव [इति वैराग्य हेतुः–हे०–चा०] । अनेन सपत्न्यन्तराभावो ध्वन्यते ।

(६४.) (हे इन्दुमति) ताम्बूलवल्लीभिः नागवल्लीभिः परिणद्धाः परिरब्धाः पूगाः क्रमुका यासु तासु [इति शैत्यं–हे०]। "ताम्बूलवल्ली ताम्बूली नागवल्ल्यपि" इति । "घोण्टा तु पूगः क्रमुकः" इति चामरः । एलालताभिरालिङ्गिताश्चन्दना मलयजा यासु तासु [इति सौरभ्यं–हे०] ।

---

fectionately the catechiser on holy ablutions of him whose person was wet with the concluding holy baths of the As'vamedha sacrifice."

(62.) "Having made peace with him, who had obtained the unattainable missile from Hara, formerly, the haughty king of Lanká, fearing the destruction of Janasthána, set out for the conquest of the regions of Indra."

(63.) "When this prince of an illustrious race has taken your hand in marriage, according to the proper ceremonies, you shall, like the great earth, be a fellow-wife (or rival wife) of the southern quarter having for its girdle the ocean abounding in jewels."

ताम्बूलवल्लीपरिणद्धपूगास्वेलालतालिङ्गितचन्दनासु ।
तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु ॥ ६४ ॥
इन्दीवरश्यामतनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः ।
अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥ ६५ ॥
स्वसुर्विदर्भाधिपतेस्तदीयो लेभेऽन्तरं चेतसि नोपदेशः ।
दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविन्दे ॥ ६६ ॥

" गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्" इत्यमरः । तमालस्य तापिच्छस्य पत्राण्येवास्तरणानि यासु तासु [इति मार्दवं–हे०] । "कालस्कन्धस्तमालः स्यात्तापिच्छोऽपि" इत्यमरः। मलयस्थलीषु (मलयाद्रिभूमिषु) शश्वत् [शश्वच्छब्देन ताम्बूललतादीनामुद्दीपनविभावनानामाधिक्यं सूच्यते–चा०] । मुहुः सदा वा रन्तुं (क्रीडितुं) प्रसीदानुकूला भव ।

(६५.) (हे इन्दुमति) असौ नृप इन्दीवरश्यामतनुः (इन्दीवरं नीलोत्पलं तद्वत् श्यामा तनुः शरीरं यस्य सः)। त्वं रोचना गोरोचनेव गौरी शरीरयष्टिः (गात्रलता) यस्याः सा । ततस्तडित्तोयदयोर्विद्युन्मेघयोरिव [मेघविद्युतोः क्षणिकयोगाद्वैराग्योक्तिः । राज्ञो नीलत्वं तोयदपदेन–चा०] । वां युवयोर्योगः समागमोऽन्योन्यशोभायाः परिवृद्धयेऽस्तु [अनेन परस्परशोभा नान्येषामित्युक्तं दक्षिणत्वं वा–हे०] ।

(६६.) विदर्भाधिपतेर्भोजस्य स्वसुः (भगिन्याः) इन्दुमत्याश्चेतसि (मनसि) तदीयः सुनन्दासंबन्ध्युपदेशो वाक्यम् । दिवाकरस्य (सूर्यस्य) अदर्शनेन [अनेन अजस्य सूर्यनिभत्वमुक्तं–हे०] बद्धकोशे मुकुलितेऽरविन्दे (कमले) नक्षत्रनाथांशुश्चन्द्रकिरण इव । अन्तरमवकाशं न लेभे [एतेन दिवसकरकमलयोरिवेन्दुमत्यभीष्टस्याजकुमारस्य मनसश्च स्नेहाधिक्यं सूच्यते–चा०] ।

(६७.) पतिंवरा सेन्दुमती रात्रौ संचारिणी (संचरतीति संचारः सोऽस्याः अस्तीति संचारिणी । पुरुषगृहीतत्वात्) दीपशिखेव (प्रदीपार्चिरिव) यं यं भूमिपालं व्यतीयायातीत्य गता स स भूमिपालः । स सर्व इत्यर्थः । " नित्यवीप्सयोः " इति वीप्सायां द्विवच-

---

(64.) "Be pleased to sport for ever in the dales of the Malaya mountain, over-spread with Tamāla leaves, where the sandle trees are encircled (lit. embraced) by cardamom creepers, and where the betel trees are enveloped with ताम्बूल creepers."

(65.) "This prince has a body dark like the blue lotus, and your bodily frame is as fair as the yellow-pigment. May the union of both of you set off each-other's beauty, like that of lightning and cloud."

(66.) Her (Sunandā's) advice found no place in the mind of the sister of the Lord of the Vidarbhas, like the rays of the Lord of stars (the moon) in the day-lotus with its receptacle closed in consequence of the disappearance of the sun.

संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥ ६७ ॥
तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोऽभूत् ।
वामेतरः संशयमस्य बाहुः केयूरबन्धोच्छ्वसितैर्नुनोद ॥ ६८ ॥
तं प्राप्य सर्वावयवानवद्यं व्यावर्ततान्योपगमात्कुमारी ।
न हि प्रफुल्लं सहकारमेत्य वृक्षान्तरं काङ्क्षति षट्पदाली ॥ ६९ ॥

नम् । नरेन्द्रमार्गे राजपथेऽट्टाख्यो गृहभेद इव [पण्यगृहमिव—हे० क्षौमाख्यो मंदिरभेदः इव—चा०]। "स्यादट्टः क्षौममस्त्रियाम्" इत्यमरः । विवर्णभावं विच्छायत्वम् । अट्टस्तु तमोवृतत्वम् । प्रपेदे । [इन्दुमत्यामुक्तानां राज्ञां वैवर्ण्यकथनेन अर्थ लप्स्यमानस्य कुमारस्य सौभाग्यातिशयः सूचितः—चा०] ।

(६८.) तस्यामिन्दुमत्यामुपस्थितायामासन्नायां सत्यां रघोः सूनुरजो मां वृणीत न वेति समाकुलः संशयितोऽभूत् । अथास्याजस्य वामेतरो वामादितरो दक्षिणो बाहुः । केयूरं बध्यतेऽत्रेति केयूरबन्धोऽङ्गदस्थानम् । तस्योच्छ्वसितैः स्फुरणैः संशयं नुनोद । [" वामभागस्तु नारीणां श्रेष्ठः पुंसां तु दक्षिणः। दाने देवादिपूजायां स्पन्दे कुंकरणेपिच" इति निमित्तनिदाने । तथा । "अंगविस्फुरणं नृणां दक्षिणं सर्वकामदं। तदेव शस्यते सद्भिर्नारीणामप्रदक्षिणं"—हे०।दक्षिणभुजस्फुरणं कान्तालिंगनं कथयति—चा०] ।

(६९.) कुमारी । सर्वेष्ववयवेष्वनवद्यमदोषं तमजं प्राप्य । अन्योपगमाद्राजान्तरोपगमाद्व्यावर्तत निवृत्ता । तथाहि । षट्पदाली भृङ्गावलिः। प्रफुल्लतीति प्रफुल्लं विकसितम् । पुष्पितमित्यर्थः। प्रपूर्वात्फुल्लतेः पचाद्यच् । फलतेस्तु प्रफुल्तमिति पठितव्यम् ।" अनुपसर्गात्—" इति निषेधात् । इत्युभयथापि न कदाचिदनुपपत्तिरित्युक्तं प्राक् । सहकारं चूतविशेषमेत्य (प्राप्य)। "आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः"इत्यमरः। वृक्षान्तरं न काङ्क्षति (नेच्छति)। न हि सर्वोत्कृष्टवस्तुलाभेऽपि वस्त्वन्तरस्याभिलाषः स्यादित्यर्थः ।

(७०.) तस्मिन्नजे समावेशिता संक्रामिता चित्तवृत्तिः (रागः) यया ताम् । इन्दोः प्र-

(67.) Whatsoever king, she, bent on choosing a husband, passed by, every one of them got into a state of having no colour (turned pale) ; like a buttress on the royal-road at night when the moving flame of a light (or torch) goes beyond it.

(68) When she came near, the son of Raghu became doubtful as to whether she would choose him or not. But his right arm (lit. other than left) removed his doubt by the upheavings of the bands of his shoulder-ornament.

(69.) Having approached him who was faultless in all limbs, the princess stopped from going to any other ; as a row of bees does not long for any other tree having reached a full blossomed mango tree.

तस्मिन्समावेशितचित्तवृत्तिमिन्दुप्रभामिन्दुमतीमवेक्ष्य ।
प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनन्दा ॥ ७० ॥
इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोशलेन्द्राः ॥ ७१ ॥
महेन्द्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः ।
चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्त्रलेखाः ॥ ७२ ॥

भेव प्रभा यस्यास्ताम् । आह्लादकत्वादिन्दुसाम्यम् । इन्दुमतीमवेक्ष्यानुक्रमज्ञा (अनुक्रमं परिपाटीं जानातीति अनुक्रमज्ञा । क्रमवित्) वाक्यपौर्वापर्याभिज्ञा सुनन्देदं वक्ष्यमाणं सविस्तरं सप्रपञ्चम् । " प्रथने वावशब्दे " इति घञो निषेधात् " ऋदोरप् " इत्यप्प्रत्ययः । " विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः " इत्यमरः । वाक्यं वक्तुं प्रचक्रमे ।

(७१.) इक्ष्वाकोर्मनुपुत्रस्य वंश्यो वंशे भवः । नृपाणां ककुदं श्रेष्ठः [प्रधानं । प्रधानमेव प्राधान्यमिति क्षीरस्वामी–हे०]। " ककुच्च ककुदं श्रेष्ठे वृषांसे राजलक्ष्मणि " इति विश्वः । आहितलक्षणः प्रख्यातगुणः (गुणैः प्रधानः) । " गुणैः प्रतीते तु कृतलक्षणाहितलक्षणौ " इत्यमरः । ककुदि वृषांसे तिष्ठतीति ककुत्स्थ इति प्रसिद्धः कश्चिद्राजाभूत् । यतः (यमारभ्य) ककुत्स्थादारभ्योन्नतेच्छा महाशयाः । " महेच्छस्तु महाशयः " इत्यमरः । उत्तरकोशलेन्द्रा राजानो दिलीपादयः श्लाघ्यं प्रशस्तम् । ककुत्स्थस्यापत्यं पुमान्काकुत्स्थ इति शब्दं संज्ञां दधति बिभ्रति । तन्नामसंस्पर्शोऽपि वंशस्य कीर्तिकर इति भावः । पुरा किल पुरंजयो नाम साक्षाद्भगवतो विष्णोरंशावतारः कश्चिदैक्ष्वाको राजा देवैः सह समयबन्धन देवासुरयुद्धे महोक्षरूपधारिणो महेन्द्रस्य ककुदि स्थित्वा पिनाकिलीलया (वृषपर्वनामानं दैत्यमारभ्य) निखिलमसुरकुलं निहत्य ककुत्स्थसंज्ञां लेभ इति पौराणिकी कथानुसंधेया । वक्ष्यते चायमेवार्थ उत्तरश्लोके ।

(७२.) यः ककुत्स्थः [ककुदि वृषांके तिष्ठतीति ककुत्स्थः । ककुदशब्दोऽप्यस्तीति क्षी-

(70.) Sunandá, versed in the art (lit. order) of speech, having observed Indumatî, possessed of the splendour of the moon, to have fixed her heart (lit. to have placed her tendency of mind) on him proceeded to make the following observation in detail.

(71.) " There was a king, named Kakutstha, descended from the race of Ikshváku, most excellent among princes and endowed with well-known virtues ; from whom the lords of the Uttarakoshalas of noble aspirations inherit the dignified title of Kákutstha."

(72.) "Playing the Pinákin in battle by mounting upon the great Indra in the form of a great bull, he by means of his arrows rendered the cheeks of the Asura (demon) females, devoid of amorous paintings."

ऐरावतास्फालनविश्लथं यः संघट्टयन्नङ्गदमङ्गदेन ।
उपेयुषः स्वामपि मूर्तिमग्र्यामर्धासनं गोत्रभिदोऽधितष्ठौ ॥ ७३ ॥
जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः ।
अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः ॥ ७४ ॥
यस्मिन्महीं शासति वाणिनीनां निद्रां विहारार्धपथे गतानाम् ।
वातोऽपि नास्रंसयदंशुकानि को लम्बयेदाहरणाय हस्तम् ॥ ७५ ॥

रस्वामी–हे०] संयति युद्धे । महानुक्षा महोक्षः । " अचतुर– " इत्यादिना निपातः । तस्य रूपमिव रूपं यस्य तं महेन्द्रमास्थायारुह्य । अत एव प्राप्ता (लब्धा) पिनाकिन ईश्वरस्य लीला (श्रीः) येन स तथोक्तः सन्बाणैः (भर्तृवधात्) असुराङ्गनानां (दैत्यस्त्रीणां) गण्डस्थलीः (कपोलपालीः) प्रोषितपत्त्रलेखा निवृत्तपत्त्ररचनाश्चकार । तद्भर्तॄनसुरानवधीदित्यर्थः । न हि विधवाः प्रसाध्यन्त इति भावः [पुरा किल इक्ष्वाकुवंश्यः पुरंजयो नाम राजा इन्द्रसाहाय्यार्थं वृषस्वरूपं वृषं (इन्द्रं) आरुह्य वृषपर्वनामानं असुरं हतवान् ततःप्रभृति ककुत्स्थ इत्यागमः–हे०] ।

(७३.) यः (पुरंजयो नाम) ककुत्स्थ ऐरावतस्य स्वर्गजस्यास्फालनेन ताडनेन विश्लथं शिथिलमङ्गदमैन्द्रमङ्गदेन स्वकीयेन संघट्टयन्संघर्षयन् (महोक्षरूपत्यागात्) स्वामग्र्यां श्रेष्ठां मूर्तिमुपेयुषोऽपि प्राप्तस्यापि [उपेयाय इति 'उपेयिवान् तस्य उपेयुषः । नाश्वानिति साधुः न चात्रोपसर्गस्तंत्रं । तथाहि किराते । "गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परं "–हे०] गोत्रभिद इन्द्रस्यार्धमासनस्यार्धासनम् । " अर्धं नपुंसकम् " इति समासः (" अधिशीङ्स्थासां कर्म") । अधितष्ठावधिष्ठितवान् । स्थादिष्वभ्यासेन चाभ्यासस्येत्यभ्यासेन व्यवायेऽपि षत्वम् । न केवलं महोक्षरूपधारिण एव तस्य ककुदमारुक्षत् । किंतु निजरूपधारिणोऽपीन्द्रस्यार्धासनमित्यपिशब्दार्थः । अथवा । अर्धासनमपीत्यपेरन्वयः ।

(७४.) उरुकीर्तिर्महायशाः कुलप्रदीपो वंशप्रदीपको दिलीपो नृपतिस्तस्य ककुत्स्थस्य कुले जातः किल । यो दिलीपः शक्राभ्यसूयाविनिवृत्तये (इन्द्रद्वेषपरिहाराय) । न त्वशक्त्येति भावः । एकेनोनाः शतं क्रतवो यस्य स एकोनशतक्रतुः । तस्य भावे तत्त्वेऽतिष्ठत् । इन्द्रप्रीतये शततमं क्रतुमवशेषितवानित्यर्थः ।

(७५.) यस्मिन्दिलीपे महीं (भुवं) शासति (रक्षति) सति । विहरन्त्यत्रेति विहारः क्री-

(73.) " Causing his own armlet to rub against his (Indra's) loosened by the blows inflicted on the celestial elephant, he occupied half the seat of the Destroyer of the mountains (Indra), even when he had assumed his original excellent form."

(74.) " It is known that in his race was born the king Dilîpa of wide fame, the light of his family, who stood in the position of a performer of ninty-nine sacrifices in order to wipe off the jealousy of S'akra."

(75.) "When he was reigning over the earth, even the wind did not cause

पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता ।
चतुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद्विभूतिम् ॥ ७६ ॥
आरूढमद्रीनुदधीन्वितीर्णं भुजंगमानां वसतिं प्रविष्टम् ।
ऊर्ध्वं गतं यस्य न चानुबन्धि यशः परिच्छेत्तुमियत्तयालम् ॥ ७७ ॥

डास्थानम् । तस्य [यद्वा । विहारस्य राजमार्गेपवनस्य—हे०]अर्धपथे [संकेतपथे वा—चा०]निद्रां गतानां वाणिनीनां मत्ताङ्गनानाम् [दूतीनामिति—हे०] । " वाणिनी नर्तकीमत्ताविदग्धवनितासु च" इति विश्वः । "वाणिन्यौ नर्तकीमत्ते" इत्यमरश्च । अंशुकानि वस्त्राणि वातोऽपि (वायुरपि) नास्रंसयन्नाकम्पयत् । आहरणायापहर्तुं को हस्तं लम्बयेत् । तस्याज्ञासिद्धत्वादकुतोभयसंचाराः प्रजा इत्यर्थः । अर्धश्चासौ पन्थाश्चेति विग्रहः । समप्रविभागे प्रमाणाभावान्नैकदेशिसमासः ।

(७६.) विश्वजितो नाम महाक्रतोः [सर्वदक्षिणत्वात्क्रतोर्महत्त्वं—हे०] प्रयोक्तानुष्ठाता तस्य [इतिपदं काकाक्षिगोलकन्यायेनोभयत्र योज्यं—चा०] दिलीपस्य पुत्रो रघुः पदं (राज्यं स्थानं वा । "पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु"इत्यमरः) पैत्र्यमेव प्रशास्ति पालयति । यो रघुश्चतसृभ्यो दिग्भ्य आवर्जिताहृता संभृता सम्यग्वर्धिता (पुष्टा) च या तां चतुर्दिगावर्जितसंभृतां विभूतिं संपदं मृत्पात्रमेव (मृत्तिकाभाजनमेव) शेषो यस्यास्तामकरोत् । विश्वजिद्यागस्य सर्वस्वदक्षिणाकत्वादित्यर्थः । [" चतस्रः कीर्तयेद्वाष्टौ दश वा ककुभः क्वचित्" इति वाग्भटः -हे०] ।

(७७.) किंच । अद्रीनारूढम् । उदधीन्वितीर्णमवगाढम् । सकलभूगोलव्यापकमित्यर्थः भुजंगमानां (सर्पाणां) वसतिं (निलयं) पातालं प्रविष्टम् । ऊर्ध्वं स्वर्गादिकं गतं व्याप्तम् । इत्थं सर्वदिग्व्यापीत्यर्थः [यशसः सकर्मकत्वविवक्षायां कश्चिदिति कर्तृपदाध्याहारो वा—हे०] । अनुबध्नातीत्यनुबन्धि चाविच्छेदि (अद्यापि प्रसरणशीलमिति—व०चा०सु०] । कालत्रयव्यापकं चेत्यर्थः । अत एवैवंभूतं यस्य यश इयत्तया (इदं परिमाणमस्य इयत् इयतो भा-

---

to slip down (could not put in disorder) the garments of intoxicated women fallen asleep on half the way to the pleasure-gardens Who could then stretch forth his hand to take them away ?"

(76.) "His son Raghu, the performer of the great sacrifice called Vis'vajit, now reigns in his place, who turned his wealth, amassed by the sweeping of the four quarters, into the residue of an earthen pot " (retained nothing for himself except an earthen pot.)

(77.) "His fame had ascended the mountains, had plunged into the oceans, had entered Pátála, the abode of serpents, had gone up to the skies, was eternal (i. e. and yet extensive enough to occupy more space) and too much to be measured by any standard."

असौ कुमारस्तमजोऽनुजातस्त्रिविष्टपस्येव पतिं जयन्तः ।
गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशं बिभर्ति ॥ ७८ ॥
कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन ॥ ७९ ॥

वः इयत्ता तया) देशतः कालतो वा केनचिन्मानेन परिच्छेत्तुं परिमातुं नालं न शक्यम् (पर्याप्तवचनेष्वलमर्थेष्विति तुमुन्) ।

(७८.) असावजाख्यः कुमारः । त्रिविष्टपस्य स्वर्गस्य पतिमिन्द्रं जयन्तः (ऐन्द्रिः) इव । " जयन्तः पाकशासनिः " इत्यमरः । तं रघुमनुजातः [अनुजननं यद्यपि भ्रातृविषये प्रसिद्धं । तथापि इह प्रकरणवशात् जन्यजनकविषयमित्यवगंतव्यं । तस्माज्जात इत्ययमर्थोऽवतिष्ठते–हे०] । तस्माज्जात इत्यर्थः (अनुर्लक्षणे तृतीयार्थे इति कर्मप्रवचनीयः) । तज्जातोऽपि तदनुजातो भवति जन्यजनकयोगानन्तर्यात् । " गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च " इति क्तः । सोपसृष्टत्वात्सकर्मकत्वम् । आह चात्रैव सूत्रे वृत्तिकारः—" श्लिषादयः सोपसृष्टाः सकर्मका भवन्ति " इति । दम्य शिक्षणीयावस्थः (बालः) । योऽजो गुर्वीं भुवनस्य धुरं (भारं) धुर्येण धुरंधुरेण चिरनिरूढेन , पित्रा सदृशं तुल्यं यथा तथा बिभर्ति (तुल्यार्थैरिति तृतीया) । यथा कश्चिद्वत्सतरोऽपि धुर्येण महोक्षेण समं वहतीत्युपमालंकारो ध्वन्यते । " दम्यवत्सतरौ समौ " इत्यमरः ।

(७९.) कुलेन (वंशेन) कान्त्या लावण्येन नवेन वयसा यौवनेन विनयः प्रधानं येषां तैस्तैः (प्रसिद्धैः) गुणैः श्रुतशीलादिभिश्चात्मनस्तुल्यं स्वानुरूपममुमजं त्वं वृणीष्व [" ययोरेव समं वित्तं ययोरेव समं कुलं । तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित्"–हे०] । [प्रतिवस्तूपमामाह–हे०चा०] । किं बहुना । रत्नं (माणिक्यं) काञ्चनेन (सुवर्णेन) समागच्छतु (संमिलतु) संगच्छताम् [आङ्व्यवधानात्समोगमीति न तङ्–हे०] । प्रार्थनायां लोट् । रत्नकाञ्चनयोरिवात्यन्तानुरूपत्वाद्युवयोः समागमः [त्वं तावत्स्त्रीरत्नं अयं महानुभावस्तु सुवर्णं अतो रत्नस्य काञ्चनेन योगः–सु०] प्रार्थ्यत इत्यर्थः [" वस्तु किंचिदुपन्यस्य न्यसनं तत्सधर्मणः साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा यथा " इति काव्यादर्शे–हे०] ।

(78.) "This prince Aja is born of him, as Jayanta is born of the Lord of the heavens ; he bears the weighty yoke of the world equally with his father, like a young bull with one broken to the yoke."

(79.) "Do you elect him your equal in birth, in beauty, youth, (lit. young age) and in all (other) good qualities with modesty at their head ; let the jewel (thus) be united with gold."

ततः सुनन्दावचनावसाने लज्जां तनूकृत्य नरेन्द्रकन्या ।
दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव ॥ ८० ॥
सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुम् ।
रोमाञ्चलक्ष्येण स गात्रयष्टिं भित्त्वा निराक्रामदरालकेश्याः ॥ ८१ ॥
तथागतायां परिहासपूर्वं सख्यां सखी वेत्रभृदाबभाषे ।
आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ॥ ८२ ॥

(८०.) ततः सुनन्दावचनस्य (वाक्यस्य) अवसानेऽन्ते नरेन्द्रकन्येन्दुमती लज्जां तनूकृत्य संकोच्य । (ईषद्विहायेत्यर्थः) । प्रसादेन मनःप्रसादेनामलया प्रसन्नया दृष्ट्या संवरणस्य स्रजा स्वयंवरणार्थं स्रजेव कुमारमजं प्रत्यग्रहीत्स्वीचकार । सम्यक्सानुरागमपश्यदित्यर्थः ।

(८१.) सा कुमारी यूनि तस्मिन्नजेऽभिलाषबन्धमनुरागग्रन्थिं (आसक्तिं) शालीनतयाधृष्टतया । "स्यादधृष्टस्तु शालीनः" इत्यमरः। "शालीनकौपीने अधृष्टकार्ययोः" इति निपातः । वक्तुं न शशाक (न समर्था बभूव) । तथाप्यरालकेश्याः (अरालाः अकुटिलाः सुन्दराः केशाः यस्याः तस्याः तथोक्तायाः । "अरालं वृजिनं जिह्मं व्याजोपदेशलक्षणं " इत्यमरः) । सोऽभिलाषबन्धो रोमाञ्चलक्ष्येण पुलकव्याजेन । "व्याजोऽपदेशो लक्ष्यं च " इत्यमरः। गात्रयष्टिं (शरीरलतां) भित्त्वा निराक्रामत् । सात्त्विकाविर्भावलिङ्गेन प्रकाशित इत्यर्थः ।

(८२.) सख्यामिन्दुमत्यां तथागतायां तथाभूतायाम् (अभिलाषबन्धं वक्तुमशक्तायां) । दृष्टानुरागायां सत्यामित्यर्थः । सखी सहचरी [भृत्ये सखीशब्दव्यवहारो दृश्यते । तथा कुमारसंभवे । "पूर्वं सखे त्वय्युपपन्नमेतत्" इति । तथा च किराते । " स किंसखा साधु न शास्ति योऽधिपम् " इति–हे०] । " सख्यशिश्वीति भाषायाम् " इति निपातनान्ङीष् । वेत्रभृ-

(80.) Then at the conclusion of Sunandâ's speech, having attenuated bashfulness, the daughter of the king accepted the prince by her glance brightened with joy as if by a garland used in the self-electing marriage.

(81.) Owing to her bashfulness she was not able to express her love (lit. bond of affection) for the young prince. But the affection of that curled-haired damsel, having pierced through her bodily frame, came out by the mark of the erection of the hair on her body.

(82.) Her friend having gone to such a state, the cane-holder confidante spoke to her in jest as follows :—" Let us go, O noble princess, to another." When the bride glanced at her with a frown of displeasure (disdain).

सा चूर्णगौरं रघुनन्दनस्य धात्रीकराभ्यां करभोपमोरूः ।
आसञ्जयामास यथाप्रदेशं कण्ठे गुणं मूर्तमिवानुरागम् ॥ ८३ ॥
तया स्रजा मङ्गलपुष्पमय्या विशालवक्षःस्थललम्बया सः ।
अमंस्त कण्ठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ॥ ८४ ॥

त्सुनन्दा । हे आर्ये पूज्ये अन्यतोऽन्यं प्रति (अन्यमुद्दिश्य वा) व्रजाम इति परिहासपूर्वमाबभाषे । अथ वधूरिन्दुमत्येनां सुनन्दामसूयया रोषेण कुटिलं ददर्श [पुंसि वध्वाः प्रसिद्धाभिलाषत्वात्–हे०] । अन्यागमनस्यासह्यत्वादित्यर्थः ।

(८३.) करभः करप्रदेशविशेषः । " मणिबन्धादाकनिष्ठं करस्य करभो बहिः " इत्यमरः । करभ उपमा ययोस्तावूरू यस्याः सा करभोपमोरूः । " ऊरूत्तरपदादौपम्ये " इत्यूङ्प्रत्ययः । सा कुमारी चूर्णेन [काश्मीरजातिमांगल्यद्रव्येण–चा०] मङ्गलचूर्णेन गौरं लोहितं [कुङ्कुमादिक्षोदारुणं हरिद्राचूर्णपीतं वा–हे०] गुणं स्रजम् [मधूकमालां–चा०]। मूर्तं मूर्तिमन्तमनुरागमिव । धात्र्या उपमातुः सुनन्दायाः कराभ्यां रघुनन्दनस्याजस्य कण्ठे यथाप्रदेशं यथास्थानमासञ्जयामासासक्तं कारयामास (आरोपयामास) । न तु स्वयमाससञ्ज । अनौचित्यात् [गुणस्तंतुस्तेन माला लक्ष्यते । स्रक्शब्दं विहाय अनुरागोपमार्थे गुणशब्दः प्रयुक्तः । मूर्त्तमिवेत्यनुरागाख्येपि गुणस्तास्मिन्नर्पिते इति भावः–हे०] ।

(८४.) वरेण्यो वरणीय उत्कृष्टः (श्रेष्ठो वा) वृञ एण्यः । सोऽजो मङ्गलपुष्पमय्या मधूकादिकुसुममय्या विशालवक्षःस्थले [विस्तीर्णवक्षःस्थले । स्थलशब्दः प्रशस्तार्थः–हे०] लम्बया लम्बमानया तया प्रकृतया स्रजा विदर्भराजावरजामिन्दुमतीं कण्ठार्पितौ बाहू एव पाशौ यया साममंस्त (अज्ञासीत्)। मन्यतेर्लुङ् । बाहुपाशकल्पसुखमन्वभूदित्यर्थः।

(८५.) तत्र स्वयंवरे समगुणयोस्तुल्यगुणयोरिन्दुमतीरघुनन्दनयोर्योगेन प्रीतिर्येषां ते समगुणयोगप्रीतयः पौराः पुरे भवा जनाः । इयमजसंगतेन्दुमती मेघैर्मुक्तं (अत एव व्यक्तं) शशिनं शरच्चन्द्रमुपगता कौमुदी (ज्योत्स्ना)। अनुरूपं सदृशं जलनिधिम् (समुद्रं) अव-

(83.) She, who had thighs comparable to the trunk of an elephant, placed exactly (lit. not missing the place) on the neck of the son of Raghu, the garland (lit. string) which was red with auspicious powder and which was, as it were, her love incarnate, by the hands of her nurse.

(84.) With that garland made of (full of) auspicious flowers and hanging over the surface of his broad chest, that worthy (eligible) prince thought the younger sister of the king of the Vidarbhas to have thrown the cords of her arms round his neck.

शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः॥ ८५॥

प्रमुदितवरपक्षमेकतस्तत्क्षितिपतिमण्डलमन्यतो वितानम्।
उषसि सर इव प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत्॥ ८६॥

तीर्णा प्रविष्टा जह्नुकन्या भागीरथी। तत्सदृशीत्यर्थः। [उपमानोपमेययोरभेदोक्तिः-हे०]। इत्येवं नृपाणां श्रवणयोः कटु परुषमेकमविसंवादि वाक्यमेकवाक्यं विवव्रुः (ऊचुः)। मालिनीवृत्तम्। (" ननमयययुतेयं मालिनी भोगिलोकैः")।

(८६.) एकत एकत्र प्रमुदितो हृष्टो वरस्य जामातुः पक्षो वर्गो यस्य तत्तथोक्तम्। अन्यतोऽन्यत्र वितानं (हर्ष-) शून्यम्। भग्नाशत्वादप्रहृष्टमित्यर्थः। तत्क्षितिपतिमण्डलम् (भूपवृन्दं)। उषसि प्रभाते प्रफुल्लपद्मं (विकसितपंकजं) कुमुदवनेन प्रतिपन्ननिद्रं प्राप्तनिमीलनं सरः (तडागः) इव सरस्तुल्यम्। आसीत्। पुष्पिताग्रावृत्तमेतत्।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये स्वयंवरवर्णनोनाम षष्ठः सर्गः।

(85.) The citizens pleased with the union of like qualities gave forth a unanimous utterance, unpleasant to the ears of the kings, that she was the moonlight united with the moon freed from clouds ; or the daughter of Jahnu (Gangà) gone down to the store of water (the ocean, who is) fit for her.

(86.) The assembly of princes having in one part, the delighted party of the bride-groom and being gloomy in others, was like a lake at dawn, having the day-lotuses blooming and the beds of moon-lotuses gone to sleep.

सप्तमः सर्गः।

अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम्।
स्वसारमादाय विदर्भनाथः पुरप्रवेशाभिमुखो बभूव ॥ १ ॥
सेनानिवेशान्पृथिवीक्षितोऽपि जग्मुर्विभातग्रहमन्दभासः।
भोज्यां प्रति व्यर्थमनोरथत्वाद्रूपेषु वेषेषु च साभ्यसूयाः ॥ २ ॥

भजेमहि निपीयैकं मुहुरन्यं पयोधरम्।
मार्गन्तं बालमालोक्याश्वासयन्तौ हि दंपती ॥

(१.) अथ विदर्भनाथो भोजः सदृशेनोपयन्त्रा (उपयच्छते स्वीकरोतीति उपयन्ता तेन) वरेण युक्ताम्। अत एव साक्षात्प्रत्यक्षम्। " साक्षात्प्रत्यक्षतुल्ययोः " इत्यमरः। स्कन्देन युक्तां देवसेनामिव [शक्रपुत्रीमिव-चा० सु०]। देवसेना नाम देवपुत्री स्कन्दपत्नी [पूर्वं हि ब्रह्मणा निर्मिते देवसेनादैत्यसेनेन्द्रकन्येऽभूतां । तयोः पूर्वस्याः पतित्वे स्कन्दोभिषिक्तः इत्यागमः। " देवसेनेन्द्रकन्यायां मेनायाश्च दिवौकसां" इति विश्वः-हे०व०]। तामिव स्थितां स्वसारं भगिनीमिन्दुमतीमादाय गृहीत्वा पुरप्रवेशाभिमुखो बभूव। [" अथ कुमारगांगेयगौरेयाः ब्रह्मचारिणः "। " स्वामी महौजा एषा च देवसेनास्य योषित् " इत्यमरशेषे। तत्कथं ब्रह्मचारीति। ब्रम्हशब्देन वेदार्थं व्रतमुच्यते ब्रह्म चरतीति ब्रह्मचारी। व्रते णिनि इत्यमरपोटिभेद्यां-हे०]। उपजातिवृत्तं सर्गेऽस्मिन्।

(२.) भोजस्य राज्ञो गोत्रापत्यं स्त्री भोज्या। तामिन्दुमतीं प्रति व्यर्थमनोरथत्वात् (निरर्थकाभिलाषत्वात्) रूपेष्वाकृतिषु (" रूपं स्वभावे सौन्दर्ये " इति विश्वः) वेषेषु नेपथ्येषु च साभ्यसूया वृथेति निन्दन्तः [सक्रोधाः-हे०]। किंच। विभाते प्रातःकाले ये ग्रहाश्चन्द्रादयस्त इव मन्दभासः क्षीणकान्तयः पृथिवीक्षितो नृपा अपि सेनानिवेशाञ्छिबिराणि जग्मुः (" निवेशः शिबिरोद्वाहविन्यासेषु प्रकीर्तितः " इति विश्वः)। ननु क्रुद्धाश्चेत्क्षुभ्यन्तां तत्राह—

(३.) तत्र स्वयंवरक्षेत्रे शच्या इन्द्राण्याः। संनिधिरेव सांनिध्यम्। तस्य योगात्सञ्ज्ञा-

---

(1.) Then the Lord of the Vidarbhas bent his steps towards (entering) the city, taking with him his sister, united to a bride-groom equally qualified ; like Devasenà (the personification of the army of the gods) to Skanda being, as it were, visibly present.

(2.) The lords of the earth also, pale (dimmed in lustre) as stars at dawn, went to their encampments, indignant both with their beauty and apparel, on account of their hopes proving futile with respect to the sister of Bhoja.

सांनिध्ययोगात्किल तत्र शच्याः स्वयंवरक्षोभकृतामभावः ।
काकुत्स्थमुद्दिश्य समत्सरोऽपि शशाम तेन क्षितिपाललोकः ॥ ३ ॥
तावत्प्रकीर्णाभिनवोपचारमिन्द्रायुधद्योतिततोरणाङ्कम् ।
वरः स वध्वा सह राजमार्गं प्राप ध्वजच्छायनिवारितोष्णम् ॥ ४ ॥
ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु ।
बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि ॥ ५ ॥

वाद्धेतोः स्वयंवरस्य क्षोभकृतां विघ्नकारिणामभावः किल [शचीसंनिधौ ये विघ्नमुपजनयन्ति ते त्वचिरात्प्रलीयन्ते इति प्रवादः–हे० । इन्द्राण्याः सामीप्यात् प्रत्यूहं विना पाणिग्रहणपरिसमाप्तिर्भवतीति–चा० सु०] । किलेति स्वयंवरविघातकाः शच्या विनाश्यन्त इत्यागमसूचनार्थम् । तेन हेतुना काकुत्स्थमजमुद्दिश्य समत्सरोऽपि सवैरोऽपि क्षितिपाललोकः शशाम नाक्षुभ्यत् [विवाहे शचीपूजनं नारदीयसंहितायां । " संपूज्य प्रार्थयित्वा तां शचीदेवीं गुणाश्रयां " इति । तथा च प्रयोगरत्नाकरे । ततो दाता पात्रस्थसिततण्डुलपुञ्जे शचीमावाह्य षोडशोपचारैः पूजयेत् तां च कन्यैव प्रार्थयेत् । " देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि । विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे " इति–हे० ध०] ।

(४.) " यावत्तावच्च साकल्ये " इत्यमरः [यावन्तो राजानो गताः तावदेव स वरः–हे० चा० सु०]। तावत्प्रकीर्णाः साकल्येन प्रसारिता अभिनवा नूतना उपचाराः [पूर्णकुंभादयः–चा०] पुष्पप्रकारादयः [चंदनसेकः पुष्पविक्षेपादिः–हे०] यस्य तं तथोक्तम् । इन्द्रायुधानीव [इन्द्रायुधमिति कविप्रसिद्धिः–हे० । हीरकमणीन्–चा० सु०] द्योतितानि [नानारत्नदीप्तिसमूहेन–हे०] प्रकाशितानि तोरणान्यङ्काश्चिह्नानि यस्य तम् । ध्वजानां छाया ध्वजच्छायम् । " छाया बाहुल्ये " इति नपुंसकत्वम् । तेन निवारित उष्णः (" उष्णः स्यादातपे ग्रीष्मे " इति विश्वः) आतपो यत्र तं तथा राजमार्गं स वरो वोढा वध्वा सह प्राप विवेश ।

(५.) ततस्तदनन्तरं चामीकरजालवत्सु ("चामीकरं जातरूपं" इत्यमरः) सौवर्णगवाक्षयुक्तेषु ("जालं समूह आनायगवाक्षक्षारकेष्वपि" इत्यमरः) सौधेषु तस्याजस्यालोकने

(3.) Owing no doubt to the presence of S'achî (i. e. S'achî's being near) there was absence of disturbers in self-electing marriage there, and hence the assemblage of the lords of the earth, though jealous of the descendant of the Kákutstha remained quiet.

(4.) Meanwhile the bride-groom accompanied with his bride got to the Royal road strewn with fresh offerings of flowers and decorated with the triumphal arches as brilliant as the rain-bow and the heat whereof was kept off by the shade of banners.

(5.) Then, the actions of the beautiful women of the city, who were intent upon looking at him in their mansions having golden windows, other engagements being laid aside became thus (as follows):—

आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बन्द्धुं न संभावित एव तावत्करेण रुद्धोऽपि च केशपाशः ॥ ६ ॥
प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ॥ ७ ॥

तत्पराणामासक्तानां (" तत्परे प्रसितासक्तौ " इत्यमरः) पुरसुन्दरीणां (नगरप्रमदानां) इत्थं वक्ष्यमाणप्रकाराणि त्यक्तान्यन्यकार्याणि केशबन्धनादीनि येषु तानि विचेष्टितानि व्यापाराः [हस्तपादादिचालनं चेष्टाः–सु०] । नपुंसके भावे क्तः । बभूवुः। तान्येवाह पञ्चभिः श्लोकैः—

(६.) सहसालोकमार्गं (यतोवलोकनं भवति तत्र स्थले) गवाक्षपथं व्रजन्त्या (गच्छन्त्या) कयाचित्कामिन्योद्वेष्टनवान्तमाल्यः । उद्वेष्टनो द्रुतगतिवशादुन्मुक्तबन्धनः । अत एव वान्तमाल्यः (उद्गतं विश्लिष्टं वेष्टनं बन्धो यस्य केशपाशस्य अत एव वांतानि माल्यानि पुष्पाणि यस्मात् सः) बन्धविश्लेषणोद्गीर्णमाल्यः [टुवमुद्गिरणे । " ट्वैवायोऽमुंडबन्धोप्त्योः" इति कविकल्पद्रुमः । अनुनासिकस्य क्वीति दीर्घः । उद्गिरणं भुक्तस्योर्ध्वगतिः । मुख्यार्थं परित्यज्य गौणार्थेऽप्येवं वर्तमानो वान्तशब्दो न ग्राम्यः । तथा काव्यादर्शे । " निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयात् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते "–हे०]। करेण रुद्धो गृहीतोऽपि च केशपाशः केशकलापः । " पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे " इत्यमरः । तावदालोकमार्गप्राप्तिपर्यन्तं बन्द्धुं बन्धनार्थं न संभावितः [एतेन कुतूहलातिशयः सूचितः–चा०] न चिन्तित एव [तावदेवशब्दाभ्यां बन्धस्य दूरावस्थोच्यते । यत्र करणे रोधमात्रमपि नास्ति तत्र बन्धस्तावद्दूरापास्तः इत्यर्थः–हे०] ।

(७.) काचित् । प्रसाधिकयालंकर्त्र्यालम्बितं रञ्जनार्थं धृतं द्रवरागमेवार्द्रालक्तकमेव । [एवकारेण कदाचिदपि अवस्थायाः गत्यभाव उक्तः–हे० ।एवकारेण कदाचिदपि आर्द्ररागपादमपकृष्य स्त्रियो न यन्ति–चा०] । अग्रश्चासौ पादश्चेत्यग्रपाद इति कर्मधारयसमासः [यद्वा । पादस्याग्रं अग्रपादः । "आहिताग्न्यादिः" । भेदपक्षे पादस्य अग्रं इति षष्ठीसमासः–हे०] । "हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदाभ्याम्" इति वामनः । [गुणोऽवयवः गुणी अवयवी लक्षणे अभेदः–हे०] । तमाक्षिप्याकृष्य । उत्सृष्टलीलागतिस्त्यक्तमन्दगमना (त्यक्त-

---

(6.) A certain lady while suddenly hastening to the window (lit. the passage to look through) did not at all think of binding the braid of hair till she reached there though she held it in her hand and the flowers were dropping down on account of being loose.

(7.) Snatching her fore-foot supported by the decorating maid (helping maid) even when the colour on it was still wet, a certain lady having given up her sportive way of walking, spread as far as the window a row of foot-prints marked by the red lac.

विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा।
तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती ॥ ८ ॥
जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम्।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ॥ ९ ॥
अर्धाञ्चिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती।
कस्याश्चिदासीद्रशना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा ॥ १० ॥

विलासगमना) सती। आगवाक्षाद्गवाक्षपर्यन्तं पदवीं पन्थानमलक्तकाङ्कां (अलक्तकः अङ्कः यस्याः तां तथोक्तां) लाक्षारागचिह्नां ततान विस्तारयामास।

(८.) अपरा स्त्री दक्षिणं विलोचनं (नेत्रं) अञ्जनेन संभाव्यालंकृत्य [दक्षिणशब्देन संभ्रमात्क्रमभंगः सूचितः-हे०]। संभ्रमादिति भावः। तद्वञ्चितं तेनाञ्जनेन वर्जितं वामनेत्रं यस्याः सा सती तथैव शलाकामञ्जनतूलिकां वहन्ती (दधाना) सती वातायनसंनिकर्षं गवाक्षसमीपं ययौ (जगाम)। दक्षिणग्रहणं संभ्रमाद्व्युत्क्रमकरणद्योतनार्थम्।" सव्यं हि पूर्वं मनुष्या अञ्जते" इति श्रुतेः। [निमित्तनिदाने च। " वामभागस्तु नारीणां श्रेष्ठः पुंसां तु दक्षिणः। दाने देवादिपूजायां शृङ्गारकरणेपि च" इति-हे०]।

(९.) अन्या स्त्री जालान्तरप्रेषितदृष्टिः (जालान्तरे गवाक्षमध्ये प्रेषिता प्रेरिता दृष्टिर्लोचनं यया सा) गवाक्षमध्यप्रेरितदृष्टिः सती प्रस्थानेन गमनेन भिन्नां त्रुटितां नीवीं (परिधान-) वसनग्रन्थिम्। " नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससः " इति विश्वः। न बबन्ध। किंतु [गलितनीवीत्वात्-हे०-चा०] नाभिप्रविष्टाभरणानां कङ्कणादीनां प्रभा यस्य तेन। प्रभैव नाभेराभरणमभूदिति भावः। हस्तेन वासः (वस्त्रं) अवलम्ब्य गृहीत्वा तस्थौ। (स्थिता। " वस्त्रमाच्छादनं वासः " इत्यमरः)।

(१०.) सत्वरं (शीघ्रं) उत्थितायाः कस्याश्चिदर्धाञ्चिता मणिभिरर्धगुम्फिता दुर्निमिते संभ्रमाद्दुरुत्क्षिप्ते। "डुमिञ्प्रक्षेपणे" इति धातोः कर्मणि क्तः। पदे पदे प्रतिपदम्। वीप्सायां द्विर्भावः। गलन्ती गलद्रत्ना सती रशना मेखला तदानीं गमनसमयेऽङ्गुष्ठमूलेऽर्पितं (ब-

---

(8.) Having adorned (decorated) the right eye with collyrium, another lady with her left eye destitute of it, went forth just so to the window, carrying with her the pencil (used in decoration).

(9.) Another lady with her eye directed to the holes of the window did not tie up the knot (of her garment), which was loosened by her walking, and remained standing holding her garment by her hand, the lustre of the ornaments on which, had entered her navel.

(10.) The half-stringed girdle of some other lady who rose up in haste, which dropped down at every faltering step, had at the time the string fastened only to the root of her foot-toe.

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम्।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन्॥ ११ ॥
ता राघवं दृष्टिभिरापिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि।
तथा हि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥ १२ ॥

द्धं स्थापितं वा) सूत्रमेव (तन्तुरेव) शेषः (अवशिष्टं) यस्याः सासीत् [अंगुष्ठमूले सूत्रमारोप्य मेखलादि ग्रथ्यते इति स्त्रीणां जातिस्वभावः—चा०सु०] ।

(११.) तदानीं सान्द्रकुतूहलानां (सान्द्रमधिकं कुतूहलं कौतुकं यासां) तासां स्त्रीणामासवगन्धो गर्भे येषां तैः [सान्द्रकुतूहलत्वेन मुखविकारात् पद्मगन्धाविर्भावः —हे०] । विलोलानि (चंचलानि) नेत्राण्येव भ्रमरा येषां तैः । मुखैः (आननैः) व्याप्तान्तराश्छन्नावकाशा गवाक्षाः [गवामक्षिणी इव गवाक्षाः। अक्ष्णोऽदर्शनादित्यच् । चक्षुःपादयोर्दर्शनशब्दः। "अवङ्स्फोटायनस्य"इत्यत्रेन्द्राक्षयोः षच् समाप्नोतीति नित्यमवङ्–हे०]। सहस्रपत्राभरणा इव कमलालंकृता इव । "सहस्रपत्रं कमलम्" इत्यमरः। आसन् (" कुवलयितगवाक्षा लोचनैरङ्गनानां " इत्येवं समार्थः श्लोकांशः)।

(१२.) ता नार्यः [इत्यत्र अचोरहाभ्यां द्वे इति प्राप्तस्य द्वित्वस्य दीर्घादाचार्याणामिति शेषः । आचार्यग्रहणं पूजार्थं इति न्यासकृत्–हे०] रघोरपत्यं राघवमजम् । "तस्यापत्यम्" इत्यण्प्रत्ययः । दृष्टिभिरापिबन्त्योऽतितृष्णया पश्यन्त्यः [शब्दादि–हे०] विषयान्तराण्यन्यान्विषयान्न जग्मुः। न विविदुरित्यर्थः [उत्प्रेक्षते–हे०] । तथा हि । आसां नारीणां शेषेन्द्रियवृत्तिः (शेषाणि यानि श्रवणादीनि इन्द्रियाणि तेषां वृत्तिः आकर्णनादिव्यापारः) चक्षुर्व्यतिरिक्तश्रोत्रादीन्द्रियव्यापारः सर्वात्मना स्वरूपकात्स्न्र्येन चक्षुःप्रविष्टेव । [इन्द्रियांन्तरं त्यक्त्वा तद्विलोकनमेव चक्षुरिति वाक्यार्थः–हे०] । श्रोत्रादीनीन्द्रियाणि स्वातन्त्र्येण ग्रहणाशक्तेश्चक्षुरेव प्रविश्य कौतुकात्स्वयमप्येनमुपलभन्ते किमु । अन्यथा स्वस्वविषयाधिगमः किं न स्यादिति भावः [संभाषणादि विमुच्य तद्दर्शनैकरसा अभूवन्निति भावः–चा०]। " शृण्वन्कथाः श्रोत्रसुखाः कुमारः " इति वक्ष्यति । ताः कथयति 'स्थाने' इत्यादिभिस्त्रिभिः—

(१३.) भोज्या (भोजस्य गोत्रापत्यं स्त्री भोज्या) इन्दुमती परोक्षैः (अक्षिभ्यां परे इति परोक्षास्तैः तथोक्तैः । "परोक्षे लिट् " इति निपातनात् अक्षिशद्बस्य अकारस्य उत्वं "प्रतिपरःसमनुभ्योक्ष्णोः" इति अक्षिब्दादच्)अदृष्टैर्भूपतिभिर्वृता ममैवेयमिति प्रार्थितापि स्वयंवर-

(11.) The windows the holes of which were filled up with faces, containing the fragrance of wines, of those ladies whose curiosity was greatly excited, were decoratd, as it were, with lotuses, where the rolling eyes served for the black bees.

(12.) Those ladies drinking with their eyes the son of Raghu, did not mind the objects of other senses, because the functions of the rest of the organs of sense, had, as it were, by concentration entered the organ of sight.

स्थाने वृता नृपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या ।
पद्मेव नारायणमन्यथासौ लभेत कान्तं कथमात्मतुल्यम् ॥ १३ ॥
परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत् ॥ १४ ॥
रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथा हि बाला ।
गतेयमात्मप्रतिरूपमेव मनो हि जन्मान्तरसंगतिज्ञम् ॥ १५ ॥

मेव साधुं हितममंस्त मेने । न तु परोक्षमेव कंचित्प्रार्थकं वव्रे । स्थाने युक्तमेतत् । "युक्ते द्वे सांप्रतं स्थाने" इत्यमरः । कुतः । अन्यथा स्वयंवराभावेऽसाविन्दुमती । पद्ममस्या अस्तीति पद्मा लक्ष्मीः । "अर्शआदिभ्योऽच्" इत्यच्प्रत्ययः । नारायणमिव । आत्मतुल्यं स्वानुरूपं कान्तं पतिं कथं लभेत [विभाषाकथमिति कालत्रयेऽपि लिङ्–हे०] । न लभेतैव । सदसद्विवेकासौकर्यादिति भावः ।

(१४.) स्पृहणीयशोभं सर्वाशास्यसौन्दर्यमिदं द्वन्द्वं मिथुनम । "द्वन्द्वं रहस्य–" इत्यादिना निपातः । परस्परेण नायोजयिष्यच्चेन्न योजयेद्यादि । तर्हि प्रजाना पत्युर्विधातुरस्मिन्द्वये द्वन्द्वे रूपविधानयत्नः सौन्दर्यनिर्माणप्रयासो वितथो विफलोऽभविष्यत । एतादृशानुरूपस्त्रीपुंसान्तराभावादिति भावः [यद्वा । इन्दुमत्याः शोभा अजेन स्पृहणीया अजस्य शोभा इन्दुमत्यैव स्पृहणीयेति । शोभेत्यत्र वामनः । शोभेति निपातनादिति शुभशुंभशोभार्थाविति शुभे भिदादेराकृतिगणत्वादङ् सिद्ध एव । गुणप्रतिषेधाभावस्तु निपात्यते इति–हे०] । "लिङ्निमित्ते लृङ्क्रियातिपत्तौ" इति लृङ् । "कुतश्चित्कारणवैगुण्यात्क्रियाया अनभिनिष्पत्तिः क्रियातिपत्तिः" इति वृत्तिकारः ।

(१५.) रतिस्मरौ यौ । नित्यसहचरावित्यभिप्रायः । नूनं [नूनं निश्चये उत्प्रेक्षायां वा "नूनं तर्कार्थनिश्चये" इत्यमरः–हे०] । ताववेयं चायं चेमौ दंपती अभूताम् । एतद्रूपेणोत्पन्नौ । कुतः । तथा हि । इयं बाला [मुग्धा । बालेति अज्ञत्वसूचनं–हे०] राज्ञां सहस्रेषु राजसहस्रमध्ये । सत्यपि व्यत्यासकारण इति भावः । आत्मप्रतिरूप भवतुल्यमेव । "तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः" इति दण्डी । गता प्राप्ता । तदपि कथ जातमत आह—

(13.) The sister of Bhoja, longed for by many absent kings, did well in thinking of self-electing marriage as the right way (course for her to adopt); otherwise how could she obtain a husband worthy of her, as Lakshmi obtained Náráyana?

(14.) If he (Creator) had not united the couple of enviable beauty one with the other, the efforts of creating beauty in this pair on the part of the Lord of living beings would have been fruitless !

(15.) Surely these two were Rati and Smara, for this maiden (princess) has chosen a counterpart of her own self from amongst thousands of kings ; for the mind is cognizant of the association of another birth.

24

इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन्कथाः श्रोत्रसुखाः कुमारः ।
उद्भासितं मङ्गलसंविधाभिः संबन्धिनः सद्म समाससाद ॥ १६ ॥
ततोऽवतीर्याशु करेणुकायाः स कामरूपेश्वरदत्तहस्तः ।
वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमन्तः ॥ १७ ॥
महार्हसिंहासनसंस्थितोऽसौ सरत्नमर्घ्यं मधुपर्कमिश्रम् ।
भोजोपनीतं च दुकूलयुग्मं जग्राह सार्धं वनिताकटाक्षैः ॥ १८ ॥

हि यस्मान्मनो जन्मान्तरसंगतिज्ञं (पूर्वभवमेलापकं) भवति । तदेवेदमिति प्रत्यभिज्ञाभावेऽपि वासनाविशेषवशादनुभूतार्थेषु मनःप्रवृत्तिरस्तीत्युक्तम् । जन्मान्तरसाहचर्यमेवात्र प्रवर्तकमिति भावः [यद्यप्येते श्लोकाः कुमारोत्पत्तावपि विद्यन्ते तथाप्येककर्तृकत्वान्न दोषः–हे० चा०] ।

(१६.) इति " स्थाने वृता " इत्याद्युक्तप्रकारेण पौरवधूमुखेभ्यः (पुरप्रमदानां आस्येभ्यः) उद्गता उत्पन्नाः श्रोत्रयोः सुखा मधुराः । सुखशब्दो विशेष्यनिघ्नः । "पापपुण्यसुखादि च" इत्यमरः । कथा गिरः शृण्वन् (आकर्णयन्) कुमारोऽजो मङ्गलसंविधाभिर्मङ्गलरचनाभिः [पताकादिसामग्रीभिः–हे० पूर्णकलशकुसुममालादिभिः-चा० गीतवादित्रशोभनस्वनादिभिः–सु०] उद्भासितं (अधिक–) शोभितं संबन्धिनः कन्यादायिनः (भोजस्य) सद्म गृहं समाससाद प्राप । (चतुर्भिः कलापकं)।

(१७.) ततोऽनन्तरं करेणुकाया हस्तिन्याः सकाशादाशु शीघ्रमवतीर्य [आरोहणार्थं राज्ञामश्वाः इति नीतिः–हे०] । कामरूपेश्वरे दत्तो हस्तो येन [कामरूपेश्वरेण दत्तः हस्तः यस्य –हे०] सोऽजः । अथोऽनन्तरं वैदर्भेण निर्दिष्टं प्रदर्शितमन्तश्चतुष्कं चत्वरम् । नारीणां मनांसीव [चित्तानीव । इति सर्वप्रियोक्तिः–हे०] । विवेश [प्राविक्षत् । इवशब्दार्थोत्र सहार्थे व्याख्यायते नारीमनोभिः सह चतुष्कमध्यं प्राविशत् । नारीमनांस्यपि विवेशेत्यर्थः–सु०] ।

(१८.) महार्हसिंहासने (महानर्हो मौल्यं यस्य । यद्वा । महच्च तदर्हश्च महार्हं तच्च सिंहासनं तत्र) संस्थितोऽसावजः । भोजेनोपनीतम् । रत्नैः सहितं सरत्नम् । मधुपर्कमिश्रं [मधुना पच्यते इति मधुपर्कः तेन मिश्रं युतं पञ्चामृतमिश्रं । "अलंकृतः सितच्छत्रोऽपदाति-

---

(16.) Thus hearing the words pleasing to the ear coming out from the mouths of the women of the city, the prince reached the palace of his relative, adorned with auspicious decorations.

(17.) Then he quickly alighted from the female-elephant and with his hand in that of the Lord of the Kamarupas entered the inner-quadrangle (of the palace) shown by the Lord of the Vidarbhas as if he entered the hearts of the women (of the palace).

(18.) Seated on a rich throne, he accepted the offering with jewels, mixed with the Madhuparka (consisting of equal parts of curds, honey and clarified butter) and a pair of silk-woven clothes (garments) presented to him by Bhoja, together with the glances of the beautiful women.

दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः ।
वेलासकाशं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः ॥ १९ ॥
तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिरग्निकल्पः ।
तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संगमयांचकार ॥ २० ॥
हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां चकासे ।
अनन्तराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन ॥ २१ ॥

ज्ञातिबान्धवैः । वृतो वधूगृहं गत्वा मधुपर्केण पूजितः" इत्याश्वलायनकारिकायां–हे०] । अर्घ्यं पूजासाधनद्रव्यं [पूजार्थमुदकादि–हे०] दुकूलयोः क्षौमयोर्युग्मं च । वनिताकटाक्षैः (वनितानां सानुरक्तप्रमदानां कटाक्षाः तैः) अन्यस्त्रीणामपाङ्गदर्शनैः सार्धम् (समं) । जग्राह गृहीतवान् ।

(१९.) दुकूलवासाः (दुकूले वाससी यस्य) सोऽजः । विनीतैर्नम्रैरवरोधरक्षैरन्तःपुराधिकृतैः (कञ्चुकिभिः) वधूसमीपं (वध्वाः नैकट्यं) निन्ये । तत्र दृष्टान्तः—स्फुटफेनराजिः (व्यक्तडिण्डीरश्रेणिः) उदन्वान्समुद्रः (उदकमस्यास्तीति उदन्वान्) नवैर्नूतनैश्चन्द्रपादैश्चन्द्रकिरणैः। ("पादा रश्म्यंघ्रितुर्यांशाः"इत्यमरः)। वेलायाः सकाशं समीपमिव । पूर्णदृष्टान्तोऽयम् । [अजस्य समुद्रोपमानं इन्दुमत्याः वेलोपमानं अवरोधरक्षाणां चन्द्रपादोपमानं–सु०] ।

(२०.) तत्र सद्मनि (दानमानादिभिः) अर्चितः पूजितः (अग्नेः ईषन्न्यूनः)अग्निकल्पोऽग्नितुल्यो भोजपतेर्भोजदेशाधीश्वरस्य पुरोधाः (पुरस्तात् एव राज्ञो हितं धत्ते सः) पुरोहितः । " पुरोधास्तु पुरोहितः " इत्यमरः । आज्यादिभिर्द्रव्यैरग्निं हुत्वा तमेव चाग्निं विवाहसाक्ष्ये आधाय (परिकल्प्य) । साक्षिणं च कृत्वेत्यर्थः । वधूवरौ संगमयांचकार योजयामास ["सप्तमे क्रामिते तत्स्थः शिरसी संनिधाय च " इत्याश्वलायनकारिकायां–हे०] ।

(२१.) स राजसूनुर्हस्तेन स्वकीयेन वध्वाः (इन्दुमत्याः) हस्तं परिगृह्य ["अंगुष्ठादिव (ति) गृह्णीयाद्गृभ्णामीत्यकया ततः" इत्याश्वलायनकारिकायां–हे०] । अनन्तरायाः संनिहि-

---

(19.) He, dressed in silken-garments, was led near the bride by the humble keepers of the haram, as the ocean with its line of foam clearly displayed is led near the coast by the new rays of the moon.

(20.) There the revered priest of the Lord of the Bhojas, himself like fire having offered to the fire the clarified butter and other things (i. e. S'ami-leaves, fried grain, Akshatas &c.) and having made the same fire a witness to the marriage, united the bride and the bride-groom.

(21.) That prince shone still more bright on taking the hand of his bride with his own, as the mangotree having received with its own foliage the shoots of an As'oka-creeper clung to it.

आसीद्वरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलिः संववृते कुमारी ।
वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य ॥ २२ ॥
तयोरपाङ्गप्रतिसारितानि क्रियासमापत्तिनिवर्तितानि ।
ह्रीयन्त्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि ॥ २३ ॥

ताया अशोकलतायाः प्रवालं पल्लवं प्रतिपल्लवेन स्वकीयेन (अनुरूपकिशलयेन) प्राप्य चूत आम्र इव । सुतरां (अतिशयेन) चकासे (शुशुभे) ।

(२२.) वरः कण्टकितः (कण्टकाः रोमांचाः जाताः अस्य सः) पुलकितः प्रकोष्ठः (कराग्रभागः) यस्य स आसीत् । " सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः " इत्यमरः । कुमारी स्विन्नाङ्गुलिः संववृते बभूव । अत्रोत्प्रेक्ष्यते—पाणिसमागमेन पाण्योः संस्पर्शेन । कर्त्रा । तयोर्वधूवरयोर्मनोभवस्य वृत्तिः स्थितिः समं विभक्तेव समीकृतेवेत्यर्थः । प्राक्सिद्धस्याप्यनुरागसाम्यस्य सम्प्रति तत्कार्यदर्शनात्पाणिस्पर्शकृतत्वमुत्प्रेक्ष्यते [सात्त्विकाश्च भावा भरतेनोक्ताः। "स्तम्भः प्रलयरोमाञ्चौ स्वेदो वैवर्ण्यवेपथू । अश्रु वैस्वर्यमित्यष्टौ स्तंभो स्विन्नक्रियांगतः । प्रलयो नष्टचेष्टत्वं शेषास्तु व्यक्तलक्षणाः" इति-हे०] । अत्र वात्स्यायनः—"कन्या तु प्रथमसमागमे स्विन्नाङ्गुलिः स्विन्नमुखी च भवति । पुरुषस्तु रोमाञ्चितो भवति । एभिरनयोर्भावं परीक्षेत " इति । स्त्रीपुरुषयोः स्वेदरोमाञ्चाभिधानं सात्त्विकमात्रोपलक्षणम् । न तु प्रतिनियमो विवक्षितः । एभिरिति बहुवचनसामर्थ्यात् । एवं सति कुमारसंभवे—" रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुगवकेतुरासीत् " इति व्युत्क्रमवचनं न दोषायेति [अपरे तु तुल्यत्वमुत्प्रेक्षितमिति व्याचक्षते—चा०] ।

(२३.) अपाङ्गेषु नेत्रप्रान्तेषु प्रतिसारितानि प्रवर्तितानि क्रिययोर्निरीक्षणलक्षणयोः समापत्त्या यदृच्छासंगत्या निवर्तितानि [अनेन रत्या भाव उक्तः । तथा हि । " परस्परस्योपरि दृष्टिपातं रतिप्रकर्षास्पदलिङ्गमाहुः " इति–हे०] प्रत्याकृष्टान्यन्योन्यस्मिँल्लोलानि सतृष्णानि (परस्परदर्शनेन साभिलाषाणि) । " लोलश्चलसतृष्णयोः " इत्यमरः । तयोर्दंपत्योर्विलोचनानि दृष्टयो मनोज्ञा रम्यां ह्रिया (लज्जया) निमित्तेन यन्त्रणां संकोचमानशिरे प्रापुः ।

(22.) The hair on the wrist of the bride-groom stood erect and the fingers of the princess became wet with perspiration; thus by the joining of their hands the action of love was, as it were, equally divided in them at that moment.

(23.) The eyes of both of them were closed with charming blush, eyes which were (insatiately) coveting (to see) one another, whose pupils were moving towards the end of the corners (mutually exchanging rolling glances), and which were withdrawn (turned back) when by accident the gazes mutually encountered (met).

प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे ।
मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम् ॥ २४ ॥
नितम्बगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन ।
चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ ॥ २५ ॥
हविःशमीपल्लवलाजगन्धी पुण्यः कृशानोरुदियाय धूमः ।
कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे ॥ २६ ॥

(२४.) तन्मिथुनं (युगुलं) उदर्चिष उद्गतज्वालस्य [उत्कृष्टदीप्तेर्वा–हे०] कृशानोर्वह्नेः प्रदक्षिणप्रक्रमणात्प्रदाक्षिणीकरणात् ["हविर्भुजं सकुम्भंच दृषद्वजं प्रदक्षिणं वधूं परिणयन्मंत्रममोहमिति वै जपेत्" इत्याश्वलायनकारिकायां–हे०] । मेरोः (कनकाचलस्य) । उपान्तेषुसमीपेषु वर्तमानमावर्तमानम् । मेरुं प्रदक्षिणीकुर्वदित्यर्थः । अन्योन्यसंसक्त परस्परसंगतम् । मिथुनस्याप्येतद्विशेषणम् । अहश्च (त्रयो यामाः यस्याः सा) त्रियामा चाहस्त्रियामं रात्रिंदिवमिव । समाहारे द्वन्द्वैकवद्भावः । चकासे दिदीपे ।

(२५.) नितम्बेन (नितम्बश्रोणितटेन) गुर्व्यलघ्वी [इति प्रदक्षिणायामसंगतिः– हे०]। "दुर्धरालघुनोर्गुर्वी" इति शाश्वतः । विधातृप्रतिमेन ब्रह्मतुल्येन तेन गुरुणा याजकेन प्रयुक्ता जुहुधीति नियुक्ता । (धूमसम्बन्धादत्यरुणत्वात्) मत्तचकोरस्येव । ("जीवंजीवश्चकोरकः" इत्यमरः)। नेत्रे यस्याः सा लज्जावती (ह्रियावनतमुखी) सा वधूरग्नौ (हुतभुजि) लाजविसर्गं (लाजमोक्षं) चकार ।

(२६.) हविष आज्यादेः शमीपल्लवानां (समिधां) लाजानां च गन्धोऽस्यास्तीति हविःशमीपल्लवलाजगन्धी । "शमीपल्लवमिश्राँल्लाजानञ्जलिना वपति" इति कात्यायनः । पुण्यः [पवित्रः । पुनन्ति येन तत्पुण्यं ।अहःसर्वैकदेशेतिनिपातनात्क्यप्–हे०] धूमः कृशानोः पावकादुदियायोद्गतः । कपोलयोः संसर्पिणी प्रसरणशीला शिखा यस्य स तथोक्तः स धूमस्तस्या वध्वा मुहूर्तं कर्णोत्पलतां कर्णाभरणतां (श्रवणेन्दीवरावतंसत्वं) प्रपेदे (प्राप) ।

(२७.) तद्वधूमुखमाचारेण प्राप्ताद्धूमग्रहणात् [लाजांजलिं विसृज्य धूमं समाजिघ्रेदितिप्रयोगवृत्तिकारोक्तेराचारो द्रष्टव्यः । तथा हि। "पापा ऋतुमती कन्या पापो राजाप्यरक्षकः

(24.) The couple (pair) became resplendent by going round the blazing fire (always keeping the right side towards it) like the day and night joined to each other and keeping their round (lit. existing) at the extremities of the Meru.

(25.) That bashful bride, with heavy hips and eyes like those of the Chakora bird maddened with passion, having been enjoined by that family preceptor, the very image of the Creator, made an offering of the fried grain to the (sacred) fire.

(26.) There rose up from that fire the sacred smoke fragrant with the scent of oblations, S'ami-leaves and Lájás ; which as its spire passed by her cheeks looked for a moment like (lit. got to the state of) a lotus on her ear.

तदञ्जनक्लेदसमाकुलाक्षं प्रम्लानबीजाङ्कुरकर्णपूरम् ।
वधूमुखं पाटलगण्डलेखमाचारधूमग्रहणाद्बभूव ॥ २७ ॥
तौ स्नातकैर्बन्धुमता च राज्ञा पुरंध्रिभिश्च क्रमशः प्रयुक्तम् ।
कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूताम् ॥ २८ ॥
इति स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा ।
महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीः ॥ २९ ॥

पापं व्याधकुलं हिंस्त्रं पण्यास्त्री पण्य आश्रमः" इति–हे० चा० सु०]। अञ्जनस्य क्लेदोऽञ्जनक्लेदः अञ्जनमिश्रबाष्पोदकमित्यर्थः । तेन समाकुलाक्षम् । प्रम्लानो बीजाङ्कुरो यवादिबीजाङ्कुरः । ("बीजं रेतसि सत्त्वे च हेतावंकुरकारणे" इति विश्वः) । एव कर्णपूरोऽवतंसो यस्य तत्पाटलगण्डलेखं [पाटला गण्डलेखा गण्डभित्तिर्यस्य तत्–चा० सु०] अरुणगण्डस्थलं च बभूव ।

(२८.) कनकासनस्थौ (सुवर्णपीठस्थितौ) । तौ कन्याकुमारौ (वधूवरौ) स्नातकैर्गृहस्थविशेषैः [कृतसमावर्त्तनैः । त्रिविधाः स्नातकाः विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्चेति । तथा हि याज्ञवल्क्यः । "गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया । वेद व्रतानि वा पारं नीत्वा ह्युभयमेव वा" इति–हे० चा०]। "स्नातकस्त्वाप्लुतो व्रती" इत्यमरः। बन्धुमता । बन्धुपुरःसरेणेत्यर्थः । राज्ञा च पुरंध्रिभिः पतिपुत्रवतीभिर्नारीभिश्च क्रमशः प्रयुक्तं स्नातकादीनां पूर्वपूर्ववैशिष्ट्यात्क्रमेण कृतमार्द्राक्षतानामारोपणमन्वभूतामनुभूतवन्तौ [आर्द्राक्षतारोपणं हि वृद्धाचारः–चा०] ।

(२९.) अधिश्रीः (अधिगता प्राप्ता श्रीः संपत्तिः येन सः) अधिकसंपन्नो भोजकुलप्रदीपः स राजा । इति स्वसुः (भगिन्याः) इन्दुमत्याः पाणिग्रहणं विवाहं संपाद्य कारयित्वा । (स्वयंवरागतानाम्) महीपतीनां राज्ञां पृथगेकैकशोऽर्हणार्थं पूजार्थमधिकृतानधिकारिणः (पुरुषान्) समादिदेशाज्ञापयामास ।

(३०.) मुदः संतोषस्य (मोदते इति मुद् तस्य । क्विप्) लिङ्गैश्चिह्नैः कपटहासादिभिः संवृतविक्रिया निगूहितमत्सराः अत एव प्रसन्ना बहिर्निर्मला गूढनक्रा अन्तर्लीनग्राहाः [गूढ-

(27.) Having to be exposed to the smoke (of the ritual sacrifice) in accordance with the religious custom, the face of the bride had the eyes troubled with the moistened collyrium, the sprouts that formed the ear-rings faded, and the expanse of the cheeks ruddy.

(28.) The prince and princess seated on a seat of gold underwent the shower of the wet Akshatás thrown over them in regular order by the householders, the king with relatives and the matrons (having their husbands and sons alive).

(29.) That excessively wealthy king, the light of the Bhoja family, having thus completed the marriage of his sister, gave orders to his officers for separate reception of the (other) lords of the earth.

लिङ्गैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः।
वैदर्भमामन्त्र्य ययुस्तदीयां प्रत्यर्प्य पूजामुपदाछलेन ॥ ३० ॥
स राजलोकः कृतपूर्वसंविदारम्भसिद्धौ समयोपलभ्यम्।
आदास्यमानः प्रमदामिषं तदावृत्य पन्थानमजस्य तस्थौ ॥ ३१ ॥
भर्तापि तावत्क्रथकैशिकानामनुष्ठितानन्तरजाविवाहः।
सत्त्वानुरूपाहरणीकृतश्रीः प्रास्थापयद्राघवमन्वगाच्च ॥ ३२ ॥

नक्रा हि बहिः प्रसन्नाः—चा०] ह्रदा इव स्थितास्ते नृपा वैदर्भं भोजमामन्त्र्यापृच्छ्य तदीयां वैदर्भीयां पूजां [वस्त्रतुरंगमादिकां—चा०] उपदाछलेनोपायनमिषेण प्रत्यर्प्य ययुः गतवन्तः ।

(३१.) आरम्भसिद्धौ [वधूहरणारंभरूपायां—हे०) कार्यसिद्धौ विषये । पूर्वं कृता कृतपूर्वा । सुप्सुपेति समासः । कृतपूर्वा संवित्संकेतः [प्रतिज्ञा वा—चा०] मार्गावरोधरूप उपायो येन स तथोक्तः । "संविद्युद्धे प्रतिज्ञायां संकेताचारनामसु" इति केशवः । स राजलोकः समयोपलभ्यमजप्रस्थानकाले लभ्यम् [समयेन शपथेन प्रयाणकालेन वोपलभ्यं—चा०] । ["न चोपलेभे वणिजापणायाः" इति भट्टिकाव्यप्रयोगात्—चा०] । तदा तस्यैकाकित्वादिति भावः। तत्प्रमदैवामिषं भोग्यवस्तु [रन्ध्रोपहार्यं वस्तु—चा० सु०] । "आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि" इति केशवः । आदास्यमानो ग्रहीष्यमाणः सन्नजस्य पन्थानमावृत्यावरुध्य तस्थौ ।

(३२.) अनुष्ठितः संपादितोऽनन्तरजाया अनुजाया विवाहो येन स तथोक्तः (कृतस्वसृविवाहः) क्रथकैशिकानां देशानां भर्ता स्वामी भोजोऽपि तावत्तदा सत्त्वानुरूपमुत्साहानुरूपं यथा तथा । आ समन्तात् । अनेनानियतवस्तुदानमित्यर्थः । हरणं कन्यायै देयं धनम् [अत्र कात्यायनः । " ऊढया कन्यया वापि पत्युः पितृगृहेपि वा भ्रातुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतं " इति हे०]। "यौतुकादि तु यद्देयं सुदायो हरणं च तत् " इत्यमरः । आहरणं हरणीकृता श्रीः (लक्ष्मीः) येन तथोक्तः सन्राघवमजं प्रास्थापयत्प्रस्थापितवान्स्वयमन्वगादनुजगाम च [सुपुत्रं लभस्वेत्यत्र व्याख्यातं—हे०]।

(30.) They (kings) who had concealed their malice by the signs of joy like pleasant (i. e. clear) lakes with alligators lurking in them, having bade good-bye to the Lord of the Vidarbhas, went away, having repaid the (same kind of) honour under the pretext of marriage presents.

(31.) That multitude of kings, who had previously formed a plot for the accomplishment of their object, and who were bent on snatching away that bait of a young damsel obtainable at the time (of his departure) stood obstructing the way of Aja.

(32.) Meanwhile the Lord of the Krathakais'ikas also, who had performed the marriage of his younger sister and who had presented him with his wealth as a dowery according to his own position, dismissed Raghava and accompanied him.

तिस्रस्त्रिलोकप्रथितेन सार्धमजेन मार्गे वसतीरुषित्वा ।
तस्मादपावर्तत कुण्डिनेशः पर्वात्यये सोम इवोष्णरश्मेः ॥ ३३ ॥
प्रमन्यवः प्रागपि कोशलेन्द्रे प्रत्येकमात्तस्वतया बभूवुः ।
अतो नृपाश्चक्षमिरे समेताः स्त्रीरत्नलाभं न तदात्मजस्य ॥ ३४ ॥
तमुद्वहन्तं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः ।
बलिप्रदिष्टां श्रियमाददानं त्रैविक्रमं पादमिवेन्द्रशत्रुः ॥ ३५ ॥

(३३.) कुण्डिनं विदर्भनगरम् । तस्येशो भोजस्त्रिषु लोकेषु प्रथितेन (विश्वत्रयप्रसिद्धेन) अजेन सार्धं (सार्कं) मार्गे पथि तिस्रो वसती रात्रीरुषित्वा स्थित्वा ।"वसती रात्रिवेश्मनोः" इत्यमरः । " कालाध्वनोरत्यन्तसंयोगे " इति द्वितीया । पर्वात्यये दर्शान्त उष्णरश्मेः सूर्यात्सोमश्चन्द्र इव [अजस्य तिग्मरश्मित्वं ध्वन्यते–हे०] । तस्मादजादपावर्तत (पश्चाज्जगाम) । तं विसृज्य निवृत्त इत्यर्थः ।

(३४.) नृपा राजानः प्रागपि (आदावेव) प्रत्येकमात्तस्वतया (गृहीतधनत्वेन । आत्तं गृहीतं स्वं धनं येभ्यस्तेषां भावस्तया) दिग्विजये गृहीतधनत्वेन कोशलेन्द्रे रघौ प्रमन्यवो रूढवैरा बभूवुः । (" मन्युर्दैन्ये क्रतौ क्रुधि " इत्यमरः) । अतो हेतोः (स्वयंवरार्थं) समेताः संगताः सन्तस्तदात्मजस्य रघुसूनोः स्त्रीरत्नलाभं । (" रत्नं श्रेष्ठे मणावपि " इति वैजयन्ती। " रत्नं स्वजातिश्रेष्ठेऽपि " इत्यमरः) । न चक्षमिरे न सेहिरे [इन्दुमतीमादायैनं कुमारं मारयाम इति भावः–सु०] ।

(३५.) दृप्त उद्धतः स राजन्यगणो राजसंघातः । भोजकन्यां (इन्दुमतीं) उद्वहन्तं नयन्तं तमजम् । बलिना वैरोचनिना प्रदिष्टां दत्तां श्रियमाददानं स्वीकुर्वाणम् । त्रिविक्रमस्येमं त्रैविक्रमम् । पादमिन्द्रशत्रुः प्रह्लादः [वृत्रासुरो वा–हे० नमुचिः–व० सु०] इव पथि (मार्गे) रुरोध । तथा च वामनपुराणे—" विरोचनविरोधेऽपि प्रह्लादः प्राक्तनं [प्राग्वधं–हे०] स्मरन् । विष्णोस्तु क्रममाणस्य पादाम्भोजं रुरोध ह " इति ।

(33.) Having halted at three stages on the way with Aja renowned in three worlds, the Lord of Kundina turned back from him (left him) as at the end of the conjunction, the moon departs from the sun.

(34.) Every one of them had already become irritated against the Lord of the Kos'alas (i e Raghu) on account of their having been deprived of their wealth (by Raghu) hence the kings assembled could not endure the acquisition of that jewel-of-a woman by his son.

(35.) That haughty host of kings assailed him (i. e Aja) on his way as he was taking (with him) the Bhoja princess, as the enemy of India had intercepted the (third) foot of Trivikrama receiving the wealth granted by Bali.

तस्याः स रक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमारः ।
प्रत्यग्रहीत्पार्थिववाहिनीं तां ज्योतीरथां शोण इवोत्तरंगः ॥ ३६ ॥
पत्तिः पदातिं रथिनं रथेशस्तुरंगसादी तुरगाधिरूढम् ।
यन्ता गजस्याभ्यपतद्गजस्थं तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ॥ ३७ ॥
नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयन्ति स्म कुलोपदेशान् ।
बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः शशंसुः ॥ ३८ ॥

(३६.) स कुमारोऽजस्तस्या इन्दुमत्या रक्षार्थमनल्पयोधं बहुभटम्। पितुरागतं पित्र्यम्। आप्तमित्यर्थः। सचिवमादिश्याज्ञाप्य तां पार्थिववाहिनीं राजसेनाम्। "ध्वजिनी वाहिनी सेना" इत्यमरः। ज्योतीरथां (महानदीं–सु०) उत्तरंगः (उच्चैस्तरोर्मिः) शोणः शोणाख्यो नद इव। प्रत्यग्रहीदभियुक्तवान्।

(३७.) पत्तिः पादचारो योद्धा पदातिं पादचारमभ्यपतत्। पदाभ्यामततीति पदातिः। पादस्य पदित्यादिना पदादेशः। "पदातिपत्तिपदगपादातिकपदाजयः" इत्यमरः। रथेशो रथिको रथिनं रथारोहमभ्यपतत्। तुरंगसाद्यश्वारोहस्तुरगाधिरूढमश्वारोहमभ्यपतत्। "रथिनः स्यन्दनारोहा अश्वारोहास्तु सादिनः" इत्यमरः। गजस्य यन्ता हस्त्यारोहो गजस्थं पुरुषमभ्यपतत्। इत्थमनेन प्रकारेण तुल्यप्रतिद्वन्द्व्येकजातीयप्रतिभटं युद्धं बभूव [तथा चतुर्वर्गचिन्तामणौ व्रतखण्डे। "रथी च रथिना सार्द्धं पदातिश्च पदातिना। कुंजरस्थो गजस्थेन योद्धव्यो भृगुनन्दन" इति–हे०]। अन्योन्यं द्वन्द्वं कलहोऽस्त्येषामिति प्रतिद्वन्द्विनो योधाः। "द्वन्द्वं कलहयुग्मयोः" इत्यमरः। [यथायोग्यं युद्धं समभूदित्यर्थः–चा०]।

(३८.) तूर्येषु नदत्सु सत्स्वविभाव्यवाचोऽनवधार्यगिरश्चापभृतो धानुष्काः। कुलमुपदिश्यते प्रख्याप्यते यैस्ते कुलोपदेशास्तान्कुलनामानि नोदीरयन्ति स्म नोच्चारयामासुः। श्रोतुमशक्यत्वाद्वाचो नाब्रुवन्नित्यर्थः। किंतु बाणाक्षरैर्बाणेषु [स्वप्रभोः–सु०] लिखिताक्षरैरेव परस्परस्यान्योन्यस्योर्जितं [रूढाहंकारं–चा०] प्रख्यातं नाम (अभिधानं) शशंसुरूचुः।

(36.) Having directed the minister of his father for her (i. e Indumati's) protection with an army consisting of not a few warriors, the prince himself attacked that army of the kings, as the S'*ona* with its swollen waves pours into the Jyotirathá.

(37.) The infantry fell on foot-soldiers, the warrior in the chariot on one fighting in the car, the horse-man on the rider on horse, elephant-driver on one on elephant, thus the battle ensued between the warriors of equal-footing

(38.) While the martial drums were resounding, the bowmen whose voices were inaudible, did not utter the names of their families; but they pronounced (made known) the high names of each other only by means of letters engraven on arrows.

उत्थापितः संयति रेणुरश्वैः सान्द्रीकृतः स्यन्दनवंशचक्रैः ।
विस्तारितः कुञ्जरकर्णतालैर्नेत्रक्रमेणोपरुरोध सूर्यम् ॥ ३९ ॥
मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि ।
बभुः पिबन्तः परमार्थमत्स्याः पर्याविलानीव नवोदकानि ॥ ४० ॥
रथो रथाङ्गध्वनिना विजज्ञे विलोलघण्टाक्वणितेन नागः ।
स्वभर्तृनामग्रहणाद्बभूव सान्द्रे रजस्यात्मपरावबोधः ॥ ४१ ॥

(३९.) संयति संग्रामेऽश्वैः (तुरगैः) उत्थापितः । स्यन्दनवंशाना रथसमूहानां चक्रै रथाङ्गैः । (" चक्रं सैन्ये जलावर्त्ते रथावयवराष्ट्रयोः । संसारे मण्डले वृत्ते धर्मभेदास्त्रभेदयोः " इति वैजयन्ती) । सान्द्रीकृतो घनीकृतः । " वंशः पृष्ठास्थिन गेहोर्ध्वकाष्ठे वेणौ गणे कुले" इति केशवः । कुञ्जरकर्णानां तालैः [उभयोरैक्यत्वात्—हे०] ताडनैः [चपेटैः—चा०] विस्तारितः प्रसारितः । ("तालः कालक्रियामाने तृणराजाख्यपादपे । अंगुष्ठमध्यमाने च चपेटत्र-पुमेपि च" इति केशवः) । रेणुः (धूलिः) नेत्रक्रमेणांशुकपरिपाट्या । अंशुकमिवेत्यर्थः [चक्षुर्निरोधप्रकारेण वा—चा०] । " स्याज्जटांशुकयोर्नेत्रम् " इति । "क्रमोऽङ्घ्रौ परिपाट्यां च" इति च केशवः । (" नेत्रग्रन्थिगुणे वस्त्रे तन्तुमूले विलोचने नेत्रं रथे च नद्यां च नेत्रो नेतरिभेपि च" इति विश्वः) । सूर्यमुपरुरोधाच्छादयामास [यथांशुकेन निरोधः क्रियते तथा रेणुनापि कृतः इत्यर्थः—चा०] ।

(४०.) वायुवशात् (वातवशतः) विदीर्णैर्विवृतैर्मुखैः प्रवृद्धानि ध्वजिनीरजांसि सैन्य-रेणून्पिबन्तो गृह्णन्तो (योद्धृणां) मत्स्यध्वजा मत्स्याकारा ध्वजाः । पर्याविलानि परितः कलुषाणि (मेघेन परित्यक्तानि) नवोदकानि [नवोदकत्वं रजःसामर्थ्य—चा०] पिबन्तः परमार्थमत्स्याः सत्यमत्स्या इव । बभुर्भान्ति स्म [कृत्रिमवस्त्रमत्स्यं दृष्ट्वोत्प्रेक्षा क्रियते किमु एते कलुषाणि नवोदकानि पिबंतीतिभावः सु०] ।

(४१.) सान्द्रे प्रवृद्धे (निबिडे) रजसि (रेणौ) रथो रथाङ्गध्वनिना चक्रस्वनेन वि-

(39.) The dust, raised in the battle by horses, thickened by the wheels of a number of chariots and spread around by the flapping ears of elephants, covered the sun as if with a cloth.

(40.) The fish-banners with their mouths opened by the force of the wind, and receiving in the increased dust of the army, appeared like real fishes drinking the new turbid waters.

(41) The chariot was recognized by the rattling of its wheels, the elephant by the tinkling sound of his moving bells, the distinction between one's self and his enemy was, in the thick dust, made only by the utterance of the names of their respective kings.

आवृण्वतो लोचनमार्गमाजौ रजोऽन्धकारस्य विजृम्भितस्य ।
शस्त्रक्षताश्वद्विपवीरजन्मा बालारुणोऽभूद्रुधिरप्रवाहः ॥ ४२ ॥
स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः ।
अङ्गारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाबभासे ॥ ४३ ॥
प्रहारमूर्छापगमे रथस्था यन्तॄनुपालभ्य निवर्तिताश्वान् ।
यैः सादिता लक्षितपूर्वकेतूंस्तानेव सामर्षतया निजघ्नुः ॥ ४४ ॥

जज्ञे ज्ञातः । नागो हस्ती विलोलानां घण्टानां क्वणितेन नादेन विजज्ञे [विलोलेति गुञ्जराभसिकता–हे०] । आत्मपरावबोधः स्वपरविवेकः । योधानामिति शेषः । स्वभर्तॄणां स्वस्वामिनां नामग्रहणान्नामोच्चारणाद्बभूव । रजोऽन्धतया सर्वे स्वं परं च शब्दादेवानुमाय प्रजह्रुरित्यर्थः [आत्मशब्देन आत्मीयाः उच्यन्ते-हे०]।

(४२.) लोचनमार्गमावृण्वतो दृष्टिपथमुपरुन्धतः । आजौ युद्धे विजृम्भितस्य व्याप्तस्य [विसृतस्य-हे० चा०] रज एवान्धकारं तस्य । शस्त्रक्षतेभ्योऽश्वद्विपवीरेभ्यो जन्म यस्य स तथोक्तो रुधिरप्रवाहः (रक्तसंघः) बालारुणो बालार्कोऽभूत् [अर्कोऽनूरुवाताभ्यां तमो हि निवार्यते–हे०। यथा बालारुणेनान्धकारो ध्वस्यते तथा रुधिरप्रवाहेण संग्रामरेणुः ध्वस्तः इत्यर्थः –चा० सु०] । "अरुणो भास्करेऽपि स्यात्" इत्यमरः । बालविशेषणं रुधिरसावर्ण्यार्थम् ।

(४३.) क्षतजेन रुधिरेण छिन्नमूलः । त्याजितभूतलसंबन्ध इत्यर्थः । तस्य क्षतजस्योपरिष्टात् [उपर्युपरिष्टादिति साधुः–हे०] । पवनावधूतो वाताहतः स रेणुः । अङ्गारशेषस्य (अंगारः निर्धूतोल्मुकं शेषः अवशिष्टं यस्य तथोक्तस्य) हुताशनस्याग्नेः पूर्वोत्थितो धूम इव । आबभासे दिदीपे । [रक्तावलिप्तस्य रेणोः अंगारसादृश्यम् । ऊर्ध्वं वातेनावधूतस्य धूलेर्धूमसाम्यं । इह धूम इवेत्युक्त्या धूमकालिदासः इति विख्यातिः–चा०] ।

(४४.) रथस्था रथिनः प्रहारेण या मूर्छा तस्या अपगमे सति । मूर्छितानामन्यत्र नीत्वा संरक्षणं सारथिधर्म इति कृत्वा । निवर्तिताश्वान् (निवर्तिताः पश्चाद्वलिताः अश्वाः तुरगाः यैः तान्) यन्तॄन्सारथीन् [भवद्भिरयं पराभवो नीतः इति–हे०] उपालभ्यासाधु कृतमि-

(42.) The stream of blood arising from warriors, elephants and horses wounded by weapons proved (lit- became) the young sun to the increased dust-darkness that obstructed the range of eyes in the battle field

(43.) That dust cut asunder from its root by blood and wafted by the wind over it, appeared like the smoke, raised before, of the fire which has embers remaining.

(44.) When the swoon caused by the blows was over the warriors in chariots, having reproved the charioteers who had turned back the horses, killed through rage them alone by whom they had been wounded and whose flags they had marked before,

अप्यर्धमार्गे परबाणलूना धनुर्भृतां हस्तवतां पृषत्काः ।
संप्रापुरेवात्मजवानुवृत्त्या पूर्वार्धभागैः फलिभिः शरव्यम् ॥ ४५ ॥
आधोरणानां गजसंनिपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः ।
हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः ॥ ४६ ॥
पूर्वं प्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी ।
तुरंगमस्कन्धनिषण्णदेहं प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥ ४७ ॥

त्यधिक्षिप्य । पूर्वं यैः स्वयं सादिता हताः । लक्षितपूर्वकेतून् [पूर्वं प्रहारसमये लक्षिताः लक्षितपूर्वाः तादृशाः केतवो येषां तान् तथोक्तान्–चा०] पूर्वदृष्टैः केतुभिः प्रत्यभिज्ञातानित्यर्थः । तानेव सामर्षतया सकोपत्वेन हेतुना निजघ्नुः प्रजह्रुः ।

(४५.) अर्धश्चासौ मार्गश्च तस्मिन्नर्धमार्गे परेषां बाणैर्लूनाश्छिन्ना अपि हस्तवतां (प्रशस्तौ अभ्यासयुक्तौ हस्तौ येषां तेषां। इति प्रशंसायामतुप्) कृतहस्तानां [लघुहस्तानां–चा०] धनुर्भृतां पृषत्काः शरा आत्मजवानुवृत्त्या स्ववेगानुबन्धेन हेतुना फलिभिर्लोहाग्रवद्भिः।"सस्यबाणाग्रयोः फलम्" इति विश्वः । पूर्वार्धभागैः । शृणातीति शरुः । तस्मै हितं शरव्यं लक्ष्यम् । "उगवादिभ्यो यत्" इति यत्प्रत्ययः । "लक्षं लक्ष्यं शरव्यं च" इत्यमरः । संप्रापुरेव । न तु मध्ये पतिता इत्यर्थः । [यदवाचि भगवता काश्यपेन । "नोदनाद्यमिषोः कर्म कर्मकारित्वाच्च संस्काराश्छतोत्तरकर्म" इति–चा०] ।

(४६.) गजसंनिपाते गजयुद्धे निशितैरत एव क्षुराग्रैः क्षुरस्याग्रमिवाग्रं येषां तैश्चक्रैरायुधविशेषैर्हृतानि छिन्नान्यपि । श्येनानां (शशादनानां) पक्षिविशेषाणाम् । "पक्षी श्येनः" इत्यमरः । नखाग्रकोटिषु व्यासक्ताः केशा येषां तानि । आधोरणानां हस्त्यारोहाणाम् । "आधोरणा हस्तिपका हस्त्यारोहा निषादिनः" इत्यमरः । शिरांसि चिरेण पेतुः पतितानि । शिरःपातात्प्रागेवारुह्य पश्चादुत्पततां पक्षिणां नखेषु केशसङ्गश्चिरपातहेतुरिति भावः । [कृन्तानि मस्तकानि यावद्भूमौ निपतन्ति तावत्प्रथमतः एव श्येनैर्गृहीतानीत्यर्थः–चा०] ।

(४७.) पूर्वं प्रथमं प्रहर्ताश्वसादी तौरंगिकः [अश्ववारः–चा०] प्रतिप्रहारेऽक्षममशक्तं

(45.) The arrows of dexterous warriors though cut down in half the way by the arrows of enemies, reached their very marks (aims) with their iron-headed fore-halves, by following their own speed.

(46.) In the elephant fight the heads of their drivers though severed off by the sharp discuses (the sharp circular missile weapons) with razor-like edges, fell down after a long time, the hair on them being stuck to the points of the ends of the nails of hawks.

(47.) The warrior on horse, who had first dealt a blow at his enemy who had his body reclining on the shoulder-joint of his horse and who was unable to strike him in return, did not strike him again, but wished that he would revive.

तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दन्तेष्वसिभिः पतद्भिः ।
उद्यन्तमग्निं शमयांबभूवुर्गजा विविग्नाः करशीकरेण ॥ ४८ ॥
शिलीमुखोत्कृत्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव ।
रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ॥ ४९ ॥
उपान्तयोर्निष्कुषितं विहंगैराक्षिप्य तेभ्यः पिशितप्रियापि ।
केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार ॥ ५० ॥

तुरंगमस्कंधे निषण्णदेहम् । मूर्च्छितमित्यर्थः । रिपुं भूयो न जघान पुनर्न प्रजहार । किंतु प्रत्याश्वसन्तं पुनरुज्जीवन्तमाचकाङ्क्ष [जीवत्वयं वराक इति पुनर्मारयितुं नोत्सुकोऽभूत्–चा० यथा प्राणिति तथाचकांक्ष येन पुनर्युद्धं भवेदिति भावः–हे०] । " नायुधव्यसनं प्राप्तं नार्तं नातिपरिक्षतम् " इति निषेधादिति भावः ।

(४८.) तनुत्यजाम् (मरणे कृतनिश्चयानां) । तनुषु निस्पृहाणामित्यर्थः [देहमुत्सृज्य गजैः सह योद्धॄणां–हे०] । वर्मभृतां कवचिनां संबन्धिभिर्बृहत्सु दन्तेषु पतद्भिरत एव विकोशैः पिधानादुद्धृतैः । " कोशोऽस्त्री कुड्मले खड्गपिधाने " इत्यमरः । असिभिः खड्गैरुद्यन्तमुत्थितमग्निं विविग्ना भीता गजाः करशीकरेण शुण्डादण्डजलकणेन शमयांबभूवुः शान्तं चक्रुः ।

(४९.) शिलीमुखैर्बाणैरुत्कृत्तानि शिरांस्येव फलानि (बीजपूरादीनि) तैराढ्या संपन्ना । च्युतैर्भ्रष्टैः । शिरांसि त्रायन्त इति शिरस्त्राणि शीर्षण्यानि । " शीर्षण्यं च शिरस्त्रे च " इत्यमरः । तैः [टोपैः–हे०] । चषकोत्तरा चषकः पानपात्रमुत्तरं (श्रेष्ठं) यस्यां सेव । " चषकोऽस्त्री पानपात्रम् " इत्यमरः । शोणितान्येव मद्यं तस्य कुल्याः प्रवाहा यस्यां सा । " कुल्याल्पा कृत्रिमा सरित् " इत्यमरः । रणक्षितिर्युद्धभूमिर्मृत्योः (यमस्य । "तपनात्मभवो मृत्युः" इत्यमरशेषे) पानभूमिरिव रराज [अन्यापि पानभूमिः फलाढ्या चषकयुक्ता मद्यवती च स्यात् –चा०] ।

(५०.)उपान्तयोः प्रान्तयोर्विहंगैः पक्षिभिर्निष्कुषितं खण्डितम् [निःसारीकृतं–हे०चा०] । " इण्निष्ठायाम् " इतीडागमः । भुजच्छेदं भुजखण्डं तेभ्यो विहंगेभ्य आक्षिप्याच्छिद्य पि-

---

(48.) The terrified elephants quenched, with the watery drops thrown out of their trunks, the fire that arose from the unsheathed swords falling on their large tusks, (the swords) which belonged to desperate warriors in armour.

(49.) The battle-field appeared like the drinking place of Mrityu rich in fruits consisting of the heads of the warriors severed by arrows, abounding in drinking cups consisting of the dropped helmets and flowing with liquor consisting of blood.

(50.) A female jackal having snatched away a piece of an arm torn off at both the ends by vultures threw it away, though she was fond of eating flesh, being hurt in the roof of her palate by the points of the armlet.

कश्चिद्द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य ।
वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श ॥ ५१ ॥
अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित् ।
व्यश्वौ गदाव्यायतसंप्रहारौ भग्नायुधौ बाहुविमर्दनिष्ठौ ॥ ५२ ॥

शितप्रिया (प्रियं पिशितं यस्याः सा । पूर्वनिपातः) मांसप्रियापि शिवा क्रोष्ट्री । " शिवः कीलः शिवा क्रोष्ट्री " इति विश्वः । केयूरकोट्याङ्गदाग्रेण क्षतस्तालुदेशो यस्याः सा सती । अपाचकारापसारयामास । किरतेः करोतेर्वा लिट् । [पक्षिभिर्गृहीतसारत्वात् केयूरधारया क्षततालुत्वाच्च मांसलोलुपापि शृगाली बाहुखण्डं तत्याजेत्यर्थः-चा०] ।

(५१.) द्विषतः (वैरिणः) खड्गेन हृतोत्तमाङ्गश्छिन्नशिराः (" उत्तमाङ्गं शिरः प्रोक्तं " इत्यमरः) कश्चिद्वीरः सद्यः (शीघ्रं) विमानप्रभुतां विमानाधिपत्यम् । देवत्वमित्यर्थः । उपेत्य प्राप्य वामाङ्गसंसक्ता सव्योत्सङ्गसङ्गिनी । [पुरुषस्य वामभागे स्त्रीणां स्थितिरिति वृद्धाचारः-चा०] । सुराङ्गना यस्य स तथोक्तः सन् [चतुर्वर्गचिन्तामणौ व्रतखण्डे अग्निपुराणात् । "वराप्सरः सहस्राणि भूपमायोधने हतं । त्वरितान्युपधावन्ति मम भर्तायमेति च" इति-हे०] । समरे (संग्रामे) नृत्यत् (नृत्यं कुर्वाणं) स्वं निजं कबन्धं विशिरस्कं कलेवरं ददर्श [यस्मिन्युद्धे भटानां सहस्रं हन्यते तत्रैव कबन्धो नृत्यतीत्यागमः । एतेनात्र तादृशं युद्धं जातमिति द्योत्यते इति-चा०] । " कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम् " इत्यमरः ।

(५२.) कौचिद्वीरावन्योन्यस्य सूतयोः सारथ्योरुन्मथनान्निधनात् (हेतोः) तावेव सूतौ रथिनौ योद्धारौ चाभूताम् [स्वरथचोदनात्-हे०] । तावेव व्यश्वौ नष्टाश्वौ सन्तौ गदाभ्यां व्यायतो दीर्घः संप्रहारो युद्धं ययोस्तावभूताम् । ततो भग्नायुधौ भग्नगदौ सन्तौ बाहुविमर्दे निष्ठा नाशो [अवसानं-हे०] ययोस्तौ बाहुयुद्धसक्तावभूताम् [अत्राखिल युद्धवेदित्वमुक्तं-व०] । " निष्ठा निष्पत्तिनाशान्ता " इत्यमरः (" निष्ठोत्कर्षे व्यवस्थायां नाशान्ते व्रतयज्ञयोः " इति वैजयन्ती) ।

(५३.) परस्परेणान्योन्यं क्षतयोः क्षततन्वोः समकालमेककालं यथा तथोत्क्रान्तवाय्वोर्युगपदुद्गतप्राणयोः । एकैवाप्सराः प्रार्थिता याभ्यां तयोरेकाप्सरः प्रार्थितयोः । प्रार्थितैकाप्स-

---

(51.) A certain warrior whose head was severed off by the sword of his enemy, having instantly obtained the mastery of a celestial vehicle with a heavenly damsel clung to him on his left (side), saw his own trunk dancing in the battle field.

(52.) Two other chariot-warriors, on account of their killing each others' charioteers, became themselves the charioteers and being both without horses maintained a prolonged contest with their maces, and their weapons broken, became intent on fighting with arms (personal struggle).

परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्यभावेऽपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः ॥ ५३ ॥
व्यूहावुभौ तावितरेतरस्माद्भङ्गं जयं चापतुरव्यवस्थम् ।
पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ॥ ५४ ॥

र्त्रोरित्यर्थः । "वाहिताग्न्यादिषु" इति परनिपातः । अथवा । एकस्यामप्सरसि प्रार्थितं प्रार्थना ययोरिति विग्रहः । स्त्रियां बहुष्वप्सरस इति बहुत्वाभिधानं प्रायिकम् [नियमार्थं अप्सरा इत्येकवचनान्तस्यापि प्रयोगदर्शनादिति सुबोधिनीकारः। यथा नलोदये । "तुल्येप्सरसा देहि प्रभवो भग्नाप्सरः प्रसरसा देहि । तानभिसरसा देहि स्रजं च नाकात्सुखं च सरसा देहि" इति । एकवचनान्तोप्यस्तीति क्षीरस्वामी नाविराजश्चैतदेव मनसि निधायाह । तथा प्रतापमार्तण्डे । "स्त्रियामप्सरसः" । स्वर्गगणिका मेनकादयः इति । कृष्णामुक्तवान्नबहुष्विति । "अप्सरस्त्वप्सरा प्रोक्ता"इति शब्दभेदेपि । तथा ।"आपः सुमनसो वर्षाः अप्सरस्सिकताः समाः एते स्त्रियां बहुत्वे स्युः एकत्वेप्युत्तरत्रयं"इति–हे०चा०। तथाहि।"काचिदप्सरा भूत्वा प्रांजलिर्व्यजिज्ञपत्" इति दशकुमारे–चा०] । कयोश्चित्प्रहर्त्रोर्योधयोरमर्त्यभावेऽपि देवत्वेऽपि विवादः कलह आसीत् । एकामिषाभिलाषो हि महद्वैरबीजमिति भावः [यस्तु संग्रामे हन्यते स्वर्गामिनं देवत्वमुपगतं तमनुगृहीतुमप्सरसः समायान्ति इह तु समकालं मरणमुपगतयोः एकस्यामेव समायातायां देवांगनायां कामुकयोरनयोर्दिवि रणमभूदित्यर्थः–चा०] ।

(५४.) तावुभौ व्यूहौ सेनासंघातौ । " व्यूहस्तु बलविन्यासः " इत्यमरः । पश्चात्पुरश्च यौ मारुतौ [द्वन्द्वान्ते श्रूयमाणः शब्दः प्रत्येकमभिसंबध्यते इति न्यायान्मारुतशब्दस्योभयत्र प्रवृत्तिः–चा०] तयोः पर्यायवृत्त्या क्रमवृत्त्या प्रवृद्धौ महार्णवोर्मी इव (तरङ्गाविव) इतरेतरस्मादन्योन्यस्मादव्यवस्थं व्यवस्थारहितमनियतं जयं भङ्गं पराजयं चापतुः प्राप्तवन्तौ। [यदा प्रतीच्यो वायुर्वर्धते तदा वीचिकल्लोलाः प्रेर्यन्ते यदा च पौरस्त्यो वायुर्वर्धते तदा प्रतीच्या भंगं प्राप्नुवन्तीति भावः–सु०]।

(५५.) बले स्वसैन्ये परेण परबलेन [इति जातावेकवचनं–चा०] भग्नेऽपि (पराजिते सत्यपि) महौजा महाबलोऽजोऽरिसैन्यं प्रत्येव (अभिमुखमेव) । ययौ । तथा हि । समीरणेन वायुना धूमो निवर्त्येत कक्षादपसार्येत । वर्ततेर्ण्यन्तात्कर्मणि संभावनायां लिङ् । वह्निस्तु यतो यत्र कक्षस्तृणम् [तृणकाष्ठादिसमूहः–चा०] ।" कक्षौ तु तृणवीरुधौ" इत्यमरः । तत

(53.) There was a quarrel between two other combatants wounded by each other and who had expired at one and the same time even in their immortal state, both of them being coveted by one and the same nymph.

(54.) Both the armies suffered defeats from and obtained victories over each other without any order, like two waves of the great ocean swollen by two winds behind and before successively.

परेण भग्नेऽपि बले महौजा ययावजः प्रत्यरिसैन्यमेव ।
धूमो निवर्त्येत समीरणेन यतस्तु कक्षस्तत एव वह्निः ॥ ५५ ॥
रथी निषङ्गी कवची धनुष्मान्दृप्तः स राजन्यकमेकवीरः ।
निवारयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवाम्भः ॥ ५६ ॥
स दक्षिणं तूणमुखे न वामं व्यापारयन्हस्तमलक्ष्यताजौ ।
आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान् ॥ ५७ ॥

एव तत्रैव [सैन्यस्य तृणसाम्येन अजस्य महाशक्तिश्चोक्ता-हे०] । प्रवर्तत इति शेषः [यथाग्नेः कक्षो ज्वालने निरालस्यता तथा कुमारस्य वैरिसेनायामित्यर्थः—चा०। वह्निसदृशोऽजः शत्रुकक्षं त्यक्त्वा न क्वापि यातीति भावः—सु०] । सार्वविभक्तिकस्तसिः ।

(५६.) रथी रथारूढो निषङ्गी तूणीरवान् (परिहितबाणवारः) । " तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः " इत्यमरः । कवची वर्मधरो धनुष्मान् (प्रशस्तं धनुरस्यास्तीति धनुष्मान्) धनुर्धरो दृप्तो रणदृप्त एकवीरोऽसहायशूरः [पूर्वापरप्रथमचरमजघन्येति कर्मधारयः । राजदंतादित्वात् परनिपातः । पूर्वकालैकेति समासः इति केचित् तन्न विप्रतिषेधत्वात्—हे०] । सोऽजो राजन्यकं राजसमूहम् । "गोत्रोक्ष–" इत्यादिना वुञ्प्रत्ययः । [एभिर्विशेषणैः सावधानतोच्यते–हे०]। महावराहो वराहावतारो विष्णुः कल्पक्षये कल्पान्तकाल उद्वृत्तमुद्वेलमर्णवाम्भः (जलं) इव। (" संवर्त्तः प्रलयः कल्पः" इत्यमरः)। निवारयामास ।

(५७) सोऽजः । आजौ संग्रामे दक्षिणं हस्तं तूणमुखे निषङ्गविवरे व्यापारयन्नालक्ष्यत नादृश्यत । न वा वामं दक्षिणेतरं। अस्य हि शरविमोक्षणे उभयोरपि हस्तयोः लाघवाद्दृढप्रहारत्वं दुर्लक्ष्यमित्यर्थः। सकृत् (एकवारं) आकर्णकृष्टा (कर्णपर्यंतं कृष्टा) योद्धुरस्याजस्य मौर्वी (प्रत्यंचा) ज्या । रिपून्हन्तीति रिपुघ्नाः (शत्रुमारणचतुराः) । तान् । " अमनुष्यकर्तृके च " इति टक्प्रत्ययः । बाणान्सुषुव इव सुषुवे किमु । इत्युत्प्रेक्षा [किं तूणीराद्बाणानादत्त उत धनुराकृष्य मुञ्चतीति हस्तलाघवं दृढप्रहारत्वं चोक्तं–चा०] ।

(55.) Though his army was routed by his enemy the most powerful Aja went against (fell on) the enemy's army itself; for the smoke may be driven away by the wind but the fire remains there alone where there is grass.

(56.) He the sole warrior, confident (in his own power), riding on a chariot, equipped with a quiver, putting on an armour and weilding a bow, kept off the host of the kings, as the Great Boar did the waters of the ocean swollen at the end of the Kalpa.

(57.) He was seen in the battle putting neither the right nor the left hand into the mouth of the quiver (so great was his agility) ; but (it seemed) that as if the warrior's bow-string drawn up to his ears at once produced arrows destructive of his enemies.

स रोषदष्टाधिकलोहितोष्ठैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः ।
तस्तार गां भल्लनिकृत्तकण्ठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ॥ ५८ ॥
सर्वैर्बलाङ्गैर्द्विरदप्रधानैः सर्वायुधैः कङ्कटभेदिभिश्च ।
सर्वप्रयत्नेन च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एव ॥ ५९ ॥
सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः ।
नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव ॥ ६० ॥

(५८.) सोऽजः । रोषेण दष्टा अतएवाधिकलोहिता ओष्ठा येषां तानि तैः । व्यक्ताः (प्रकटाः) ऊर्ध्वा रेखा यासां ताः [अनेन छिन्नमस्तकरेखात्रयं संपद्यत इत्युक्त–चा०] भ्रु-कुटीर्भ्रूभङ्गान्वहद्भिः (बिभ्राणैः)। भल्लनिकृत्ता बाणविशेषच्छिन्नाः कण्ठा येषां तैः । हुंकार-गर्भैः सहुंकारैः । हुंकुर्वद्भिरित्यर्थः । द्विषतां (रिपूणां) शिरोभिर्गां भूमिं तस्तार आच्छादया-मास ।

(५९.) द्विरदप्रधानैर्गजमुख्यैः सर्वैर्बलाङ्गैः सेनाङ्गैः । " हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् " इत्यमरः । कङ्कटभेदिभिः कवचभेदिभिः । " उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियाम् " इत्यमरः । सर्वायुधैश्च । बाह्यबलमुक्त्वान्तरमाह—सर्वप्रयत्नेन च सर्व एव भूमिपाला युधि (रणे) तस्मिन्नजे प्रजह्रुः। तं प्रजह्रुरित्यर्थः । सर्वत्र सर्वकारकशक्तिसंभवात्कर्म-णोऽप्यधिकरणविवक्षायां सप्तमी । तदुक्तम्—" अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः । सर्वदा सर्वथाभावात्क्वचित्किंचिद्विवक्ष्यते " इति ।

(६०.) परेषां द्विषामस्त्रव्रजैः (आयुधसमूहैः) छन्नरथः (आच्छादितस्यन्दनः) सो-ऽजः। नीहारैर्हिमैः।("अवश्यायस्तु नीहारः" इत्यमरः।"नीहारो हिमशीतयोः"इति अनेकार्थप्र-काशः)। मग्नो दिनपूर्वभागः प्रातःकालः किंचित्प्रकाशेनाल्पलक्ष्येण विवस्वतेव (सूर्येणेव)। ध्वजाग्रमात्रेण (ध्वजाग्रमेव ध्वजाग्रमात्रं तेन) लक्ष्यः (दृश्यः) बभूव । ध्वजाग्रादन्यन्न किंचिल्लक्ष्यते स्मेत्यर्थः ।

(58.) He strewed the ground with the heads of his enemies which were cut at the throats by the Bhalla arrows, which had their lips still more reddened when bitten with rage, which had their frowning eye-brows with lines above visible and which were full of defiant sounds (or warcries).

(59.) With all the constituents of their armies of which elephants formed the chief element and with all the weapons piercing through even armour, and with every possible effort, even all the kings (even all of them) fell upon him in the fight.

(60.) He whose car was covered with multitudes of missiles of the enemies could only be distinguished by the extreme point (top) of his banner ; as the first part of the day (the dawn) obscured by the mist is discovered by the sun whose light is dim.

प्रियंवदात्प्राप्तमसौ कुमारः प्रायुङ्क्त राजस्वधिराजसूनुः ।
गान्धर्वमस्त्रं कुसुमास्त्रकान्तः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ॥ ६१ ॥
ततो धनुष्कर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालम् ।
तस्थौ ध्वजस्तम्भनिषण्णदेहं निद्राविधेयं नरदेवसैन्यम् ॥ ६२ ॥
ततः प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलजं कुमारः ।
येन स्वहस्तार्जितमेकवीरः पिबन्यशो मूर्तमिवाबभासे ॥ ६३ ॥

(६१.) अधिराजसूनुः (अधिकं राजते इति अधिराजो रघुस्तस्य सूनुः पुत्रः)महाराजपुत्रः कुसुमास्त्रकान्तो मदनसुन्दरः स्वप्ननिवृत्तलौल्य· स्वप्नवितृष्णः । जागरूक इत्यर्थः । असौ कुमारोऽजः प्रियंवदात्पूर्वोक्ताद्गन्धर्वात्प्राप्तं गान्धर्वं गन्धर्वदेवताकम् । "सास्य देवता" इत्यण् । प्रस्वापयतीति प्रस्वापनं निद्राजनकमस्त्रं राजसु प्रायुङ्क्त प्रयुक्तवान् ।

(६२.) ततः (अस्त्रप्रयोगानन्तरं) धनुष्कर्षणे चापकर्षणे मूढहस्तमव्यापृतहस्तम् । एकस्मिन्नंसे पर्यस्तं स्रस्तं शिरस्त्राणां शीर्षण्यानां जालं समूहो यस्य तत् । ध्वजस्तम्भेषु निषण्णा अवष्टब्धा देहा यस्य तत् [एभिर्विशेषणैर्निद्रितजातिकथनं–चा०] । [अस्त्रसामर्थ्यात्–हे०] नरदेवानां राज्ञां सेनैव सैन्यम् । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्ययः । निद्राविधेयं निद्रापरतन्त्रं तस्थौ ।

(६३.) ततः कुमारोऽजः प्रिययेन्दुमत्योपात्तरसे आस्वादितमाधुर्ये । अतिश्लाघ्य इति भावः । अधरोष्ठे जलजं शङ्खं निवेश्य (संस्थाप्य) । " जलजं शङ्खपद्मयोः " इति विश्वः । दध्मौ मुखमारुतेन पूरयामास । येनौष्ठनिविष्टेन शङ्खेनैकवीरः स स्वहस्तार्जितं (निजभुजजनितं) मूर्तं मूर्तिमद्यशः पिबन्निवाबभासे [शंखधमने श्वेतत्वाद्यशःपानोत्प्रेक्षा युक्ता–चा०] । यशसः शुभ्रत्वादिति भावः [इति शृङ्गारिकत्वोक्तिः । " उर्ध्वं त्रिरात्रमथवा द्वादशाहं भवेद्व्रती"इति ब्रह्मचर्यविधानात् । विशेषतोऽप्रगल्भाया नवोढाया कुतोधरपानं । अत्राभूतमप्यधरपानं भूतत्वेन विवक्षितं । यथा । " वृष्टश्चेद्देवः संपन्नाः शालयः" इति । यद्वा । नान्या भूतपूर्वा प्रिया ज्ञेया–हे० एतेन अनुरागातिशयः सूचितः ।"विवाहानन्तरं द्वादशरात्रमन्ततः" इति

(61.) That prince the son of the Sovereign Lord who was as handsome as the flower-armed god (Kāma) and who was disinclined to sleep (wide awake hence cautious) employed against the kings, the Gāndharva-missile which he had obtained from Priyamvada and which had the quality of causing slumber.

(62.) Then that army of the kings whose hands were incapacitated for drawing in the bow-string, whose collection of helmets slipped on one of their shoulders, stood with the bodies of its soldiers leaning upon the staffs of their banners, being overpowered by sleep

(63.) Then that prince having put the conch to his lips the flavour of which has been tasted by his beloved, blew it ; and he appeared thereby a sole hero drinking, as it were, fame embodied, obtained by his own hands.

शङ्खस्वनाभिज्ञतया निवृत्तास्तं सन्नशत्रुं ददृशुः स्वयोधाः।
निमीलितानामिव पङ्कजानां मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥ ६४ ॥
सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु पार्थिवानाम्।
यशो हृतं संप्रति राघवेण न जीवितं वः कृपयेति वर्णाः ॥ ६५ ॥
स चापकोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः।
ललाटबद्धश्रमवारिबिन्दुर्भीतां प्रियामेत्य वचो बभाषे ॥ ६६ ॥

वचनं। त्रिरात्रानन्तरं अपि रतसंभवात्प्रियोपात्तरमेति युक्तायते। ननु नूतनपरिणीतायाः कथं स्वयमधरपानं संभवेत्। उच्यते। चिरकालाभिकांक्षितकान्तनवसंमोहनरसनिमग्नतया विगतलज्जत्वात्स्वयंवरेण प्राप्तप्रौढित्वाच्च कोककामन्दप्रमुखकन्दर्पशास्त्रप्रावीण्याच्च नवपरिणीताया अपि युक्तं-चा०]।

(६४.) शंखस्वनस्याजशङ्खध्वनेरभिज्ञतया प्रत्यभिज्ञातत्वान्निवृत्ताः प्राक्पलाय्य सम्प्रति प्रत्यागताः स्वयोधाः सन्नशत्रुं निद्राणशत्रुं [नष्टरिपुं-हे०] तमजम्। निमीलितानां मुकुलितानां पङ्कजानां (सरसि स्थितानां तथोक्तानां) मध्ये स्फुरन्तं प्रतिमा चासौ शशाङ्कश्च तं प्रतिमाशशाङ्कं प्रतिबिम्बचन्द्रमिव। ददृशुः।

(६५.) संप्रति राघवेण रघुपुत्रेण [राघवपदेनाभिजात्या कृपावत्त्वं-चा०]। पूर्वं रघुर्णेति भावः। हे राजानो वो युष्माकं यशो हृतं जीवितं तु कृपया न हृतम्। न त्वशक्त्येति भावः। इत्येवंरूपा वर्णाः। एतदर्थप्रतिपादकं वाक्यमित्यर्थः। सशोणितैः शोणितदिग्धैः शिलीमुखाग्रैर्बाणाग्रैः साधनैस्तेनाजेन। प्रयोजककर्त्रा। पार्थिवानां राज्ञां केतुषु ध्वजस्तम्भेषु निक्षेपिताः प्रयोज्यैरन्यैर्निवेशिताः। लेखिता इत्यर्थः। क्षिपतेर्ण्यन्तात्कर्मणि क्तः।

(६६.) चापकोट्यां निहित एकबाहुर्येन सः [इति धनुर्धरजातिः-चा०]। शिरस्त्रस्य (शीर्षण्यस्य) निष्कर्षणेनापनयनेन भिन्नमौलिः श्लथकेशबन्धः। "चूडाकिरीटं केशाश्च संयता मौलयस्त्रयः" इत्यमरः। ललाटे बद्धाः श्रमवारिबिन्दवो यस्य सः। सोऽजो भीतां

(64.) By the recognition of the sound of his conch, his warriors returned and saw him with his enemies overwhelmed with sleep, like the trembling reflection of the moon in the midst of lotuses that are closed.

(65.) By him were impressed on the banners of the lords of the earth by means of the ends (points) of his arrows besmeared with blood the following letters— " Your glory has been taken away by the son of Raghu but not your life through mercy ! "

(66.) He, who had rested one of his hands on the extreme point of his bow and whose hair-band was loosened as he dropped his helmet and on whose forehead were formed drops of perspiration arising from fatigue, having come to his terrified beloved spoke thus to her;—

इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्यानुमता मयासि ।
एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः ॥ ६७ ॥
तस्याः प्रतिद्वन्द्विभवाद्विषादात्सद्यो विमुक्तं मुखमाबभासे ।
निःश्वासबाष्पापगमात्प्रपन्नः प्रसादमात्मीयमिवात्मदर्शः ॥ ६८ ॥
दृष्टापि सा ह्रीविजिता न साक्षाद्वाग्भिः सखीनां प्रियमभ्यनन्दत् ।
स्थली नवाम्भःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृन्दम् ॥ ६९ ॥

(भयत्रस्तां) प्रियामिन्दुमतीमेत्य (प्राप्य) आसाद्य वचो बभाषे [जगाद । संक्षेपानादर इति वचोग्रहणं । तथा दण्डी । "अलंकृतं न संक्षिप्तं" इति-हे० । इति पौनरुक्त्यम्-चा०] ।

(६७.) हे वैदर्भि इन्दुमति इत इदानीमर्भकहार्यशस्त्रान्बालकापहार्यायुधान्परानशत्रून्पश्य (विलोकय) । [अननुज्ञाता कथमहमन्यान् पश्यामीति चेत्-हे० चा० सु०] मयानुमतासि । द्रष्टुमिति शेषः । एभिर्नृपैरेवंविधेन निद्रारूपेणाहवचेष्टितेन रणकर्मणा मम हस्तगता । हस्तगतवद्ग्रहेत्यर्थः । त्वं प्रार्थ्यसे [अग्रे किमेते करिष्यन्तीति तात्पर्यार्थः-चा०] अपजिहीर्ष्यस इत्यर्थः । एवंविधेनेत्यत्र स्वहस्तनिर्देशेन सोपहासमुवाचेति द्रष्टव्यम् ।

(६८.) प्रतिद्वन्द्विभवात्प्रतिपक्षोत्थाद्विषादाद्दैन्यात्सद्यो विमुक्तं तस्या मुखम् । निःश्वासस्य यो बाष्प उष्मा । "बाष्पो नेत्रजलोष्मणोः" इति विश्वः । तस्यापगमात् (नाशात्) हेतोरात्मीयं प्रसादं नैर्मल्यं प्रपन्न. प्राप्तः । आत्मा स्वरूपं दृश्यतेऽनेनेत्यात्मदर्शः । दर्पण इव । आबभासे (शुशुभे) ।

(६९.) सेन्दुमती हृष्टापि पत्युः पौरुषेण प्रमुदितापि ह्रिया (लज्जया) विजिता (परवशीभूता) यतोऽतः प्रियमज साक्षात्स्वयं नाभ्यनन्दन्न प्रशशंस । किंतु नवैरम्भःपृषतैः पयोबिन्दुभिरभिवृष्टाभिषिक्ता स्थल्यकृत्रिमा भूमिः । "जानपदकुण्डगोणस्थल" इत्यादिनाकृत्रिमार्थे ङीष् । अभ्रवृन्दं मेघसंघं मयूरकेकाभिरिव [केकाग्रहणे सिद्धे मयूरग्रहणं प्रशंसार्थं । लोभ्रद्रुमवत्-हे० यद्यपि केकाशब्देनैव मयूरध्वनिर्लभ्यते तथापि मयूरशब्दस्य करिकलभादिवदुक्तिपोषकत्वं न दोषोऽत्र-चा० सु०] सखीनां वाग्भिः (स्तुतिवाक्यैः) अभ्यनन्दत् (अस्तौषीत्) ।

(67.) "O princess of Vidarbha, here look at these enemies whose weapons can be taken away even by a child, you are permitted by me. By such warlike deeds you, secure as you are in my possession, are sought after by these."

(68.) Suddenly her face shone bright being relieved from the fear arising from the enemies, like a looking-glass (mirror) which by the removal of the moisture produced by the breath, is restored to its own (natural) clearness.

(69.) Though delighted, she could not, being overcome by bashfulness, openly congratulate her beloved herself but through the words of her friends ; as a dry ground showered with fresh drops of water does (congratulate) the collection of clouds by (through the medium of) the notes of peacocks.

इति शिरसि स वामं पादमाधाय राज्ञा-
मुदवहदनवद्यां तामवद्यादपेतः ।
रथतुरगरजोभिस्तस्य रूक्षालकाग्रा
समरविजयलक्ष्मीः सैव मूर्ता बभूव ॥ ७० ॥
प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं
विजयिनमभिनन्द्य श्लाघ्यजायासमेतम् ।
तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभू-
न्न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥ ७१ ॥

(७०.) नोद्यते नोच्यत इत्यवद्यं गर्ह्यम् । " अवद्यपण्य " इत्यादिना निपातः । "कु- पूयकुत्सितावद्यखेटगर्ह्याणकाः समाः " इत्यमरः । तस्मादपेतः । निर्दोष इत्यर्थः । सोऽज इति राज्ञां शिरसि (मौलौ) वामं पादं (चरणं) आधाय (संस्थाप्य) अनवद्यामदोषां तामि- न्दुमतीमुदवहदुपानयत् । आत्मसाच्चकारेत्यर्थः । अयमर्थः -" तमुद्वहन्तं पथि भोजकन्याम् " इत्यत्र न श्लिष्टः । तस्याजस्य रथतुरगाणां रजोभी रूक्षाणि परुषाण्यलकाग्राणि यस्याः सा सेन्दुमत्येव मूर्ता मूर्तिमती समरविजयलक्ष्मीर्बभूव । एतल्लाभादन्यः को विजयलक्ष्मीलाभ इत्य- र्थः [ननु विवाहस्य पूर्वमेव निष्पन्नत्वात्कथमिदानीं उदवहदिति प्रयोगः कथ्यते । अत्यर्थं प्रबलोरिवारिधिजयात्सांप्रतमिवेन्दुमतीलाभाद्विवाहोऽभवत् । यदि तान् प्रत्यर्थिनो न व्यजेष्यत् तदा तैरिन्दुमत्यपहारे कृते करग्रहणमपि अकृतमेव भवेदिति–चा० सु०] ।

(७१.) प्रथममजागमनात्प्रागेव परिगतो ज्ञातोऽर्थो विवाहविजयरूपो येन स प्रथम- परिगतार्थो रघुर्विजयिनं विजययुक्तं श्लाघ्यजायासमेतं (योग्यपत्न्या समेतं) संनिवृत्तं प्रत्याग- तं तमजमभिनन्द्य । तस्मिन्नज उपहितकुटुम्बः (आरोपितराज्यभारः) सन् । "सुतविन्यस्त- पत्नीकः" इति याज्ञवल्क्यस्मरणादिति भावः । शान्तिमार्गे मोक्षमार्गे उत्सुकोऽभूत् । तथा हि कुलधुर्ये कुलधुरंधरे सति सूर्यवंश्या गृहाय गृहस्थाश्रमाय न भवन्ति [अर्थान्तरन्यासः–हे०] ।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया स- मेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये अजपाणिग्रहणो नाम सप्तमः सर्गः।

(70.) Thus he, himself free from faults, having placed his left foot on the heads of the kings conducted that faultless one. She herself became the goddess of martial victory incarnate with the ends of her hair sullied with the dust raised by his horses and chariots.

(71.) Raghu, who already knew all that had happened having welcomed (congratulated) him who had come back a victor united to a worthy wife and having devolved the cares of the family on him, became eager to lead a peaceful life; for when there is one to bear the yoke of the family the descendants of the solar race are not for home (desire not to remain at home).

अष्टमः सर्गः।

अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः।
वसुधामपि हस्तगामिनीमकरोदिन्दुमतीमिवापराम् ॥ १ ॥
दुरितैरपि कर्तुमात्मसात्प्रयतन्ते नृपसूनवो हि यत्।
तदुपस्थितमग्रहीदजः पितुराज्ञेति न भोगतृष्णया ॥ २ ॥
अनुभूय वशिष्ठसंभृतैः सलिलैस्तेन सहाभिषेचनम्।
विशदोच्छ्वसितेन मेदिनी कथयामास कृतार्थतामिव ॥ ३ ॥

हेरम्बमवलम्बेऽहं यस्मिन्पातालकेलिषु।
दन्तेनोदस्यति क्षोणीं विश्राम्यन्ति फणीश्वराः ॥

(१.) अथ (अनन्तरं) पार्थिवो रघुर्ललितं सुभगं विवाहकौतुकं विवाहमङ्गलं [कङ्कणसूत्रं–चा० सु०] विवाहहस्तसूत्रं वा बिभ्रत एव (धारयतः एव)। "कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले" इति शाश्वतः। तस्याजस्य। अपरामिन्दुमतीमिव [इति अनन्यसाधारणत्वेन सार्वभौमत्वं सूचितं–हे०। अनेन साधारण भोग्यत्वमुक्तं–चा०] वसुधामपि (भुवमपि) हस्तगामिनीं (हस्तायत्तां) अकरोत् [राज्ये तमभ्यषिचदित्यर्थः–हे० चा० सु०]। अस्मिन्सर्गे वैतालीयं छन्दः।

(२.) नृपसूनवो राजपुत्रा यद्राज्यं दुरितैरपि [अपि शब्दो निषिद्धसूचकः–हे०] विषप्रयोगादिनिषिद्धोपायैरप्यात्मसात्स्वाधीनम्। "तदधीनवचने" इति सातिप्रत्ययः। कर्तुं प्रयतन्ते हि। प्रवर्तन्त एवेत्यर्थः [तथाहि कामन्दके। "राजपुत्रा मदोद्वृत्ता गजा इव निरंकुशाः। भ्रातरं पितरं वापि निघ्नन्त्येवाभिमानिनः" इति हे०]। हिशब्दोऽवधारणे [प्रातिकूल्येत्र–हे०]। "हि हेताववधारणे" इत्यमरः। उपस्थितं स्वतः प्राप्तं तद्राज्यमजः पितुराज्ञेति हेतोरग्रहीत्स्वीचकार। भोगतृष्णया तु नाग्रहीत्।

(३.) मेदिनी भूमिः। महिषी च ध्वन्यते। वशिष्ठेन संभृतैः (प्रगुणीकृतैस्तीर्थेभ्य आनीतैः अर्थादावर्जितैः) सलिलैस्तेनाजेन सहाभिषेचनमनुभूय विशदोच्छ्वसितेन स्फुटमुद्भू-

---

(1.) Then the king (Raghu) made over the Earth also into his hands, as if it were another Indumatî even while he wore the elegant marriage-thread-ring.

(2.) Aja accepted the offered kingdom not out of thirst for enjoyment but out of regard to the command of his father,—the kingdom indeed, which the sons of kings strive to come by even by foul means.

(3.) Having enjoyed the bath of coronation in his company, with waters fetched and poured by the priest Vas'ishtha, the Earth as if expressed her satisfaction by her manifest (or white because vaporous) exhalation.

स बभूव दुरासदः परैर्गुरुणाथर्वविदा कृतक्रियः ।
पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा ॥ ४ ॥
रघुमेव निवृत्तयौवनं तममन्यन्त नवेश्वरं प्रजाः ।
स हि तस्य न केवलां श्रियं प्रतिपेदे सकलान्गुणानपि ॥ ५ ॥

हणेन (विशदपदेन मृत्सलिलसंयोगादुद्भूतस्य बाष्पस्य धवलिमा ध्वन्यते) । आनन्दनिर्मलोच्छ्वसितेन चेति ध्वन्यते [अन्यापि रमणी प्रियसंगमनुभूयानन्दोच्छ्वसितेन संभोगनिर्वृतिं कथयति–हे० चा०] । कृतार्थतां गुणवद्भर्तृलाभकृतं साफल्यं कथयामासेव । न चैतावता पूर्वेषामपकर्षः [एतेन पूर्वेभ्यो नृपेभ्योस्य महत्त्वमुक्तं–चा०] । प्रशंसापरत्वात् । " सर्वत्र जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम् " इत्यङ्गीकृतत्वाच्च [वशिष्ठमंत्रजलाभिषेके क्रियमाणे मही सिक्ता सती उच्छ्वसितच्छलेन कृतार्था जातेवेति भावः–सु०] ।

(४.) अथर्वविदाथर्ववेदाभिज्ञेन गुरुणा वशिष्ठेन कृतक्रियः (कृता अभिषेकक्रिया यस्य) । अथर्वोक्तविधिना कृताभिषेकसंस्कार इत्यर्थः । सोऽजः परैः शत्रुभिर्दुरासदो दुर्धर्षो बभूव । तथा हि । अस्त्रतेजसा क्षत्त्रतेजसा सहितं युक्तं यद्ब्रह्म ब्रह्मतेजोऽयं पवनाग्निसमागमो हि । तत्कल्प इत्यर्थः । पवनाग्नीत्यत्र पूर्वनिपातशास्त्रस्यानित्यत्वात् " द्वन्द्वे घि " इति नाग्निशब्दस्य पूर्वनिपातः । तथा च काशिकायाम् " अयमेकस्तु लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम् " इति । क्षात्रेणैवायं दुर्धर्षः किमयं पुनर्वसिष्ठमन्त्रप्रभावे सतीत्यर्थः । अत्र मनुः—" नाक्षत्रं ब्रह्म भवति क्षत्रं नाब्रह्म वर्धते । ब्रह्मक्षत्रे तु संयुक्ते इहामुत्र च वर्धते " इति ।

(५.) प्रजा नवेश्वरं तमजं निवृत्तयौवनं प्रत्यावृत्तयौवनं रघुमेवामन्यन्त (अज्ञासिषुः) । न किंचिद्भेदकमस्तीत्यर्थः । कुतः । हि यस्मात्सोऽजस्तस्य रघोः केवलामेकां श्रियं (राजराजलक्ष्मीं) न प्रतिपेदे । किंतु सकलान् (समस्तान्) गुणाञ्छौर्यदाक्षिण्यादीनपि प्रतिपेदे [तथा हि । "प्रोक्षितायां व्रजत्यस्तं प्रजाधर्मो यशः सुखं । निवृत्तं च निवृत्तायां महाबन्धु (न्धुः) कुलांगमा" इति (?)–हे०] । अतस्तद्गुणयोगात्तद्बुद्धिर्युक्तेत्यर्थः [यथा प्रजा रघौ प्रीतिमत्यो ऽभूवन् तथाजेपि आसन्निति तात्पर्यार्थः–चा० सु०] ।

(६.) द्वयमेव [एवकारेण तु शुभंयुविशेषणमाकृष्टं । यथा विदुषा देवदत्तेन यज्ञदत्त एव संगत इति यज्ञदत्तस्यापि विद्वत्ता प्रतीयते । अन्ययोगव्यवच्छेदार्थो वा । नैवेत्यन्यः

(4.) He, the ceremony of whose coronation was performed by his preceptor versed in the Atharva Veda became invincible to his enemies, for it is like the union of fire and wind that the Brahmanical power is associated with that of missiles.

(5.) The subjects looked upon him (the prince) their new Lord as Raghu himself returned to youth, for he inherited not only his (Raghu's) fortune but also all his good qualities.

अधिकं शुशुभे शुभंयुना द्वितयेन द्वयमेव संगतम् ।
पदमृद्धमजेन पैतृकं विनयेनास्य नवं च यौवनम् ॥ ६ ॥
सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति ।
अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव ॥ ७ ॥
अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् ।
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ॥ ८ ॥

–हे०] शुभंयुना (शुभं मङ्गलं विद्यते यस्य तत् शुभंयु तेन) शुभवता । " शुभंयुस्तु शुभान्वितः " इत्यमरः । " अहंशुभमोर्युस् " इति युस्प्रत्ययः [अनुनासिकाभावात् युवोरनाकाविति न भवति । तत्राह पदमंजरीकारः । उदितोर्युवाग्रहणात् अस्य उदितत्वं नास्तीति कृत्वा तत्रापि दूषणं । नन्दनेत्यत्र कङीप् प्राप्नोति । अयमेव सिद्धान्तः अनुनासिक इति–हे०] । द्वितयेन संगतं युतं सदधिकं शुशुभे । किं केनेत्याह—पदमिति । पैतृकं पितुरागतम् । " ऋतष्ठञ्" इति ठञ्प्रत्ययः । ऋद्धं समृद्धं पदं राज्यमजेन । अस्याजस्य नवं यौवनं विनयेनेन्द्रियजयेन च [यौवने विनयः सुदुर्लभः । असौ तु प्राप्तविभवो यौवनेपि विनयवानभूत्–चा०। प्राप्तराज्यलक्ष्मीकोऽप्यजो विनयवान्–सु०] । " विजयो हीन्द्रियजयस्तद्युक्तः शास्त्रमर्हति " इति कामन्दकः । राज्यस्थोऽपि प्राकृतवन्न दृप्तोऽभूदित्यर्थः ।

(७.) महाभुजः [इति संम्राड्लक्षणं तारुण्यं चोक्तं–हे०] सोऽजोऽचिरोपनतां नवोपगतां मेदिनीं भुवम् । नवं पाणिग्रहणं विवाहो यस्यास्तां नवोढां वधूमिव [" मुग्धामर्जयत्येष मृदूपायेन सान्त्वयन् " इति रुद्रटः । रतिरहस्येपि । "सौम्यैरालिंगनैर्वाक्यैश्चुम्बनैश्चापि सान्त्वयेत्" इति–हे० चा०] । सहसा बलात्कारेण चेत् । " सहो बलं सहा मार्गः" इत्यमरः। इयं मेदिनी वधूर्वोद्वेगं भयं (वैरस्यं) व्रजेदिति हेतोः । सदयं सकृपं बुभुजे भुक्तवान् । " भुजोऽनवने " इत्यात्मनेपदम् ।

(८.) प्रकृतिषु प्रजासु [अमात्यादिषु–चा० सु०] मध्ये सर्वोऽपि जनः । अथवा प्रकृतिष्वित्यस्याहमित्यनेनान्वयः। व्यवधानं तु सह्यम् । सर्वोऽपि जनः प्रकृतिष्वहमेव महीपतेर्मतः (अभीष्टः) महीपतिना मन्यमानः । " मतिबुद्धिपूजार्थेभ्यश्च " इति वर्तमाने क्तः ।

(6.) Only two things being joined to two other things respectively looked more beautiful (by their connection) : viz. the prosperous kingdom inherited from his father, by its union with Aja, and his youth by its union with modesty.

(7.) He the long-armed one (powerful) enjoyed with kindness, the lately obtained Earth, like a newly wedded wife, lest, through violence she should fall into a state of terror (stupor).

(8.) Every one of his subjects thought, " I alone am favoured by the lord of the earth.' There was no disrespect from him any where (i. e. to any one) as among hundreds of rivers, (there is no disrespect to any) from the ocean.

न खरो न च भूयसा मृदुः पवमानः पृथिवीरुहानिव ।
स पुरस्कृतमध्यमक्रमो नमयामास नृपाननुद्धरन् ॥ ९ ॥
अथ वीक्ष्य रघुः ...
विषयेषु विनाशधर्मसु त्रिदिवस्थेष्वपि निःस्पृहोऽभवत् ॥ १० ॥
गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः ।
पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे ॥ ११ ॥

" क्तस्य च वर्तमाने " इति षष्ठी । इत्यचिन्तयदमन्यत । उदधेर्निम्नगाशतेष्विव [नदीषु सिन्धोः समवर्तित्वं प्रसिद्धं–हे०] । अस्य नृपस्य । कर्तुः । "कर्तृकर्मणोः कृति" इति कर्तरि षष्ठी । क्वचिदपि जनविषये विमाननावगणना तिरस्कारो नाभवत् । यतो न कंचिदवमन्यतेऽतः सर्वोऽप्यहमेवास्य मत इत्यमन्यतेत्यर्थः [अयं ममायत्त इति उक्त्या सर्वस्य लोकस्य प्रियमतिरासीदिति भाव इति–चा०] ।

(९.) स नृपो भूयसा बाहुल्येन खरस्तीक्ष्णो न । भूयसा मृदुरतिमृदुरपि न । किंतु पुरस्कृतमध्यमक्रमः (पुरस्कृतोङ्गीकृतो मध्यमः ईषत्तीव्रत्वान्मृदुत्वरूपः क्रमो येन सः) सन् । मध्यमपरिपाटीमवलम्ब्येत्यर्थः । पवमानो वायुः पृथिवीरुहांस्तरूनिव । नृपाननुद्धरन्ननुत्पाटयन्नेव नमयामास । अत्र कामन्दकः—"मृदुश्चेदवमन्येत तीक्ष्णादुद्विजते जनः । तीक्ष्णश्चैव मृदुश्चैव प्रजानां स च संमतः" इति [तथा भारते ।"तीक्ष्णादुद्विजते लोको मृदुः सर्वत्र बाध्यते । एवं बुद्ध्वा महाराज मा तीक्ष्णो मा मृदुर्भव" इति–हे० चा०] ।

(१०.) अथ रघुरात्मजं पुत्रं प्रकृतिष्वमात्यादिषु [प्रजासु वा–सु० चा०] प्रतिष्ठितं रूढमूलं वीक्ष्य ज्ञात्वा विनाशो धर्मो येषां तेषु विनाशधर्मसु । अनित्येष्वित्यर्थः । " धर्मादनिच्केवलात् " इत्यनिच्प्रत्ययः समासान्तः । त्रिदिवस्थेषु स्वर्गस्थेष्वपि विषयेषु शब्दादिषु आत्मवित्तया आत्मज्ञत्वेन (ब्रह्मज्ञत्वेन) निःस्पृहो निर्गतेच्छोऽभवत् । कुलधर्मश्चायमेवेत्याह—

(११.) दिलीपवंशजाः परिणामे वार्द्धके गुणवत्सुतेषु [गुणाः शौर्यधैर्यादय आभिगामिका वा ते विद्यंते येषां ते गुणवन्तः तेषु सुतेषु–चा०] रोपितश्रियः स्थापितलक्ष्मीकाः प्र-

(9.) Neither too severe nor (yet) too mild he who had adopted a middle course of policy, subdued the kings without rooting them up, and so resembling the wind that bends down the trees.

(10.) Then Raghu seeing his son established among his subjects, became indifferent even to heavenly objects of sense perishable by nature in consequence of his knowledge of the soul.

(11.) For, the descendants of Dilîpa, having transferred their royal fortune to their qualified sons, becoming devout, betook themselves in their old age to the life of ascetics whose garments are the barks of trees.

तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः ।
पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः ॥ १२ ॥
रघुरश्रुमुखस्य तस्य तत्कृतवानीप्सितमात्मजप्रियः ।
न तु सर्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियम् ॥ १३ ॥
स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुराद्बहिः ।
समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया ॥ १४ ॥

यताश्च सन्तः । तरुवल्कान्येव वासांसि येषां तेषां संयमिनां यतीनां पदवीं [वनाश्रमं–चा० मार्गं–हे०] प्रपेदिरे [वानप्रस्थो जटिलश्चीराजिनवासा इत्यत्र चीरं वस्त्रखण्डो वल्कलं वेति विज्ञानेश्वरः–हे०] । यस्मात्तस्मादस्यापीदमुचितमित्यर्थः ।

(१२.) अरण्यसमाश्रयोन्मुखं वनवासोद्युक्तं ["गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः। सापत्यो निरपत्यो वा तदारण्यं समाश्रयेत्" इत्याह मनुरिति–हे०]पितरं तं रघुं सुतोऽजः । वेष्टनशोभिनोष्णीषमनोहरेण [पट्टबन्धेन वा–हे०] शिरसा पादयोः प्रणिपत्य । आत्मनोऽपरित्यागमयाचत । मां परित्यज्य न गन्तव्यमिति प्रार्थितवानित्यर्थः [अवेष्टनशोभिनेत्यकारप्रश्लेषो वा । उष्णीषं त्यक्त्वा ननामेत्यर्थः–हे०] ।

(१३.) आत्मजप्रियः(प्रियोऽभिष्ट आत्मजः पुत्रः यस्य सः । "वापरस्य" इति परनिपातः) पुत्रवत्सलो रघुः । अश्रूणि मुखे यस्य तस्याश्रुमुखस्य (बाष्पायमाणस्य) अजस्य तदपरित्यागरूपमीप्सितमभिलषितं कृतवान् । किंतु सर्पस्त्वचमिव (कञ्चुलिकामिव । यथोरगस्त्यक्तं कंचुकं न गृह्णाति तद्वत्) व्यपवर्जितां त्यक्तां श्रियं पुनर्न प्रतिपेदे न प्राप [औदासीन्यत्वेन स्थितः इत्यर्थः–हे०] ।

(१४.) स रघुः किलान्त्यमाश्रमं प्रव्रज्यामाश्रितः पुरान्नगराद्बहिरावसथे स्थाने निवसन्नविकृतेन्द्रियः । जितेन्द्रियः सन्नित्यर्थः [इति निराभिलाषता–हे०] । अत एव स्नुषयेव वध्वेव पुत्रभोग्यया । न स्वभोग्यया । श्रिया समुपास्यत शुश्रूषितः । जितेन्द्रियस्य तस्य स्नुषयेव श्रियापि पुष्पफलोदकाहरणादिशुश्रूषाव्यतिरेकेण न किंचिदपेक्षितमासीदित्यर्थः ।

(**12.**) The son with his head adorned with a crown, having fallen at his father's feet who was anxious to betake himself to the forest, implored him not to abandon him.

(13.) Raghu fond of his son acted up to the desire of him (Aja) whose face was besmeared with tears, but did not resume the royal fortune (once) abandoned, as a snake does not wear the (same) slough again.

(14.) It is said that he (Raghu) whose senses were unaffected and who had betaken himself to the last stage in life (fourth order), residing in a place out side the city was served by the Goddess of Royal Fortune, as by a daughter-in-law who can be enjoyed only by the son.

प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरम् ।
नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत् ॥ १५ ॥
यतिपार्थिवलिङ्गधारिणौ ददृशाते रघुराघवौ जनैः ।
धर्मयोर्गतौ ॥ १६ ॥

अत्र यद्यपि " ब्राह्मणाः प्रव्रजन्ति " इति श्रुतेः । " आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् " इति मनुस्मरणात् । " मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् । बाहुजातोरुजातानामयं धर्मो न विद्यते " इति निषेधाच्च ब्राह्मणस्यैव प्रव्रज्या न क्षत्रियादेरित्याहुः । तथापि " यदहरेव विरजेत्तदहरेव प्रव्रजेत् " इत्यादि श्रुतेस्त्रैवर्णिकसाधारण्यात् । " त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः " इति सूत्रकारवचनात् । " ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद्गृहात् " इति स्मरणात् । " मुखजानामयं धर्मो वैष्णवं लिङ्गधारणम् बाहुजातोरुजातानां त्रिदण्डं न विधीयते " इति निषेधस्य त्रिदण्डविषयत्वदर्शनाच्च । कुत्रचिद्ब्राह्मणपदस्योपलक्षणमाचक्षाणाः केचित्त्रैवर्णिकाधिकारं प्रतिपेदिरे । तथा सति " स किलाश्रममन्त्यमाश्रितः " इत्यत्रापि कविनाप्ययमेव पक्षो विवक्षित इति प्रतीमः । अन्यथा वानप्रस्थाश्रमतया व्याख्याते " विदधे विधिमस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित् ", इति वक्ष्यमाणेनानग्निसंस्कारेण विरोधः स्यात् । अग्निसंस्काररहितस्य वानप्रस्थस्यैवाभावात् । इत्यलं प्रासङ्गिकेन ।

(१५.) प्रशमे (परमशान्तौ) स्थितः पूर्वपार्थिवो रघुर्यस्य तत् । अभ्युद्यतोऽभ्युदितो नूतनेश्वरोऽजो यस्य तत् । प्रसिद्धं कुलं निभृतेन्दुनास्तमयासन्नचन्द्रेणोदितार्केण प्रकटितसूर्येण च नभसा (आकाशेन) तुलां सादृश्यं समारुरोह प्राप । न च नभसा तुलामित्यत्र " तुल्यार्थैः-" इत्यादिना प्रतिषेधस्तृतीयायाः । तस्य सदृशवाचितुलाशब्दविषयत्वात् । कृष्णस्य तुला नास्तीति प्रयोगात् । अस्य च सादृश्यवाचित्वात् ।

(१६.) यतिर्भिक्षुः [जितेन्द्रियत्वेनात्र यतिशब्दप्रयोगः-हे०] । पार्थिवो राजा । तयोर्लिङ्गधारिणौ रघुराघवौ रघुतत्सुतौ । अपवर्गमहोदयार्थयोर्मोक्षाभ्युदयफलयोर्धर्मयोः [धर्मादेव मोक्षोऽर्थश्चेति प्रसिद्धं-हे०] । निवर्तकप्रवर्तकरूपयोरित्यर्थः [यदाह कात्यायनः । " यतोऽभ्युदयो निश्रेयसहेतुः स धर्मः " इति-हे०] । भुवं गतौ भूलोकमवतीर्णावंशाविव । जनैर्ददृशाते दृष्टौ [यदाह कणभक्षः ।" यतोऽभ्युदयनिश्रेयसः सा सिद्धिर्धर्मयोरपि" इति । ननु

(15.) That family of which the former (late) king was in a peaceful state and which had a new lord risen (to his place), attained comparison with the sky (resembled the sky) in which the moon is set and the sun (newly) risen.

(16.) Raghu and his son wearing (respectively) the symbols of the ascetic and the king, appeared to the people like portions of the two kinds of धर्म whose fruits were salvation and great rise, come into the world.

अजिताधिगमाय मन्त्रिभिर्युयुजे नीतिविशारदैरजः ।
अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः ॥ १७ ॥
नृपतिः प्रकृतीरवेक्षितुं व्यवहारासनमाददे युवा ।
परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विष्टरम् ॥ १८ ॥

"आत्मन्यग्नीन्समाधाय ब्राह्मणः प्रव्रजेद्गृहात्" इति वाक्यतो ब्राह्मणस्यैव सन्न्यासकथनात्कथमिह यतिलिंगधारित्वं अत्र समाधीयते। "मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणं। बाहुजातोरुजातानां नैष धर्मः सनातनः" इति प्रकाशनाय ब्राह्मण इत्युपलक्षणं वा । ब्राम्हणस्यैव किंवा सन्न्यासः इति श्रुत्या विरुध्यते । "लिंगसंन्यासरहितं प्रमाणं नावकल्पते" इति सुरेश्वराचार्यैः संन्यासस्य त्रैवर्णिकाधिकारस्य दर्शितत्वाद्रघोरपि संभवति–चा०] ।

(१७.) अजोऽजिताधिगमाय [अजितानामरीणां अधिगमाय जयाय अभिमुखप्रस्थानाय ज्ञानाय वा–हे० चा०] अजितपदलाभाय नीतिविशारदैर्नीतिज्ञैर्मन्त्रिभिर्युयुजे संगतः। रघुरप्यनपायिपदस्योपलब्धये मोक्षस्य प्राप्तये [आत्मसाक्षात्काराय–चा०] यथार्थदर्शिनो यथार्थवादिनश्चाप्ताः (आप्तस्तु यथार्थवक्ता) । तैर्योगिभिः समियाय संगतः । उभयत्राप्युपायचिन्तार्थमिति शेषः ।

(१८.) युवा नृपतिरजः प्रकृतीः प्रजाः कार्यार्थिनीरवेक्षितुम् । दृष्टादृष्टपरिज्ञानार्थमित्यर्थः । व्यवहारासनं धर्मासनमाददे स्वीचकार [तथा हि धर्मशास्त्रे । "विना नार्थेन संदेहे हरणं हार उच्यते । नानासंदेहहरणाद् व्यवहारः प्रकीर्तितः" इति–हे० । उक्तंच याज्ञवल्क्येन । "व्यवहारान्नृपः पश्येत्" इति–चा०]। प्रवयाः स्थविरो नृपती रघुस्तु । "प्रवयाः स्थविरो वृद्धः" इत्यमरः । [योगशास्त्रनिर्दिष्टां–हे०] धारणां चित्तस्यैकाग्रतां [योगविशेषं–हे०] परिचेतुमभ्यासितुमुपांशु विजने । "उपांशु विजने प्रोक्तम्" इति हलायुधः । कुशैः पूतं विष्टरमासनमाददे । [योगयाज्ञवल्क्यस्तु–हे०] "यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि । धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैः" इति वशिष्ठः [धारणालक्षणं विज्ञानेश्वरेणोक्तं । "संभ्राम्य छोटिकां दद्यात्कराग्रं जानुमण्डले । मात्राभिः पंचदशभिः प्राणायामोऽधमः स्मृतः। मध्यमो द्विगुणः श्रेष्ठः त्रिगुणो धारणा तथा" इति–हे०] ।

(१९.) एकोऽन्यतरः । अज इत्यर्थः । अनन्तरान्स्वभूम्यनन्तरान्नृपतीन्यातव्यपार्ष्णिग्राहादीन्प्रभुशक्तिसंपदा कोशदण्डमहिम्ना वशं स्वायत्ततामनयत् [कोशदुर्गदण्डसंपत्प्रभुशक्तिः

(17.) In order to obtain what was (yet) unconquered, Aja united himself to ministers well-versed in politics,—while Raghu, for obtaining imperishable position (salvation), kept company with adepts in Yoga (devotees) who always spoke the truth.

(18.) The young king took the seat of judgement in order to inspect his subjects, but the aged king sat, in solitude, on a seat made holy (or purified) by the Kus'a-grass to practise concentration of mind.

अनयत्प्रभुशक्तिसंपदा वशमेको नृपतीननन्तरान् ।
अपरः प्रणिधानयोग्यया मरुतः पञ्च शरीरगोचरान् ॥ १९ ॥
अकरोदचिरेश्वरः क्षितौ द्विषदारम्भफलानि भस्मसात् ।
अपरो दहने स्वकर्मणां ववृते ज्ञानमयेन वह्निना ॥ २० ॥

। विज्ञानसंपन्मंत्रशक्तिः । पराक्रमसंपदुत्साहशक्तिः इति शक्तित्रयं–हे०] । " कोशो दण्डो बलं चैव प्रभुशक्तिः प्रकीर्तिता " इति मिताक्षरायाम् । अपरो रघुः प्रणिधानयोग्यया समाध्यभ्यासेन [साध्यात्माभ्यासेन–हे०] । " योगाभ्यासार्कयोषितोः " इति विश्वः । शरीरगोचरान्देहाश्रयान्पञ्च [पञ्चग्रहणं प्राणादीनामर्थसूचकं–हे०] मरुतः प्राणादीन्वशमनयत् [उक्तश्च योगवासिष्ठेन ।"मारुतान्मरुतां स्थाने मनसैव समन्विते । धारयेत् पञ्चघटिकाहृदयस्यास्तेन्तरानिलाः" इति । तथा नैषधेपि । "योग्यामुपास्तेतनुयुजां (वां) युयुक्षुः–हे०चा०]। " प्राणोऽपानः समानश्चोदानव्यानौ च वायवः । [नागः कृकरकूर्मौ च देवदत्तो धनंजयः इत्यादयः।"हृदि प्राणः गुदेपानः समानो नाभिसंस्थितः उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः । घोषे धनंजयो ज्ञेयः क्रंदने कृकरः स्मृतः । जृंभायां देवदत्तः स्यादुद्गारे नागनामकः उन्मीलने भवेत्कूर्मो दशैवं मरुतो मताः" इत्यमरशेषे–हे०] ।

(२०.) अचिरेश्वरः (नूतनः प्रभुः) अजः [चिरशब्दो नाव्ययं–हे०] । क्षितौ (भुवि) द्विषताम् (शत्रूणां) आरम्भाः कर्माणि तेषां फलानि भस्मसादकरोत्कार्त्स्न्येन भस्मीकृतवान् (कार्त्स्न्येन भस्म संपद्यते इति भस्मसात्) । " विभाषा सातिकार्त्स्न्ये " इति सातिप्रत्ययः [कर्मशब्देन लक्षणतस्तदुपार्जितौ धर्मौ गृह्येते–चा० सु०] । अपरो रघुर्ज्ञानमयेन तत्त्वज्ञानप्रचुरेण वह्निना पावकेन । करणेन । स्वकर्मणां भवबीजभूतानां [पुण्यपापानां–हे०] दहने भस्मीकरणे ववृते । स्वकर्माणि दग्धुं प्रवृत्त इत्यर्थः । "यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा " इति गीतावचनात् ।[उक्तं च वशिष्ठेन । " ज्ञानमात्मस्वरूपस्य वेदनं मनसैव हि " इति–हे० चा०] ।

(२१.) " पणबन्धः संधिः " इति कौटिल्यः। अजः पणबन्धमुखान्संध्यादीन्षड्गुणान् । " संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः । द्वैधीभावश्च विज्ञेयः षड्गुणा नीतिवर्णने " इत्यमरः । तत्फलं तेषां गुणानां फलं समीक्ष्यालोच्योपायुङ्क्त । फलिष्यन्यतमेव गुणं प्रायुङ्क्तेत्यर्थः । " प्रोपाभ्यां युजेरयज्ञपात्रेषु " इत्यात्मनेपदम् । समस्तुल्यतया भावितो लोष्टो मृ-

---

(19.) The one (Aja) by the excellence of his sovereign power **brought under his control the surrounding princes,** while the other (Raghu), by the **practice of concentration,** subdued the five (vital) airs existing in the body.

(20.) The new king (entirely) reduced to ashes the fruits of his enemy's undertakings on the earth, while the other was bent on burning (up) his own actions by the fire of knowledge.

पणबन्धमुखान्गुणानजः षडुपायुङ्क समीक्ष्य तत्फलम् ।
रघुरप्यजयद्गुणत्रयं प्रकृतिस्थं समलोष्टकाञ्चनः ॥ २१ ॥
न नवः प्रभुराफलोदयात्स्थिरकर्मा विरराम कर्मणः ।
न च योगविधेर्नवेतरः स्थिरधीरापरमात्मदर्शनात् ॥ २२ ॥
इति शत्रुषु चेन्द्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयोरुभयीं सिद्धिमुभाववापतुः ॥ २३ ॥

त्पिण्डः काञ्चनं सुवर्णं च यस्य स समलोष्टकाञ्चनः । निस्पृह इत्यर्थः । " लोष्टानि लेष्टवः पुंसि " इत्यमरः । रघुरपि गुणत्रयं सत्त्वादिकम् । " गुणाः सत्त्वं रजस्तमः " इत्यमरः । प्रकृतौ साम्यवस्थायामेव तिष्ठतीति प्रकृतिस्थं पुनर्विकारशून्यं यथा तथाजयत् । [सांख्यमते हि । प्रधानाश्रिताः गुणाः पुरुषस्तु निर्गुणः इति ज्ञानमपवर्ग इति–चा०] ।

(२२.) स्थिरकर्मा फलोदयकर्मकारी नवः प्रभुरज आफलोदयात् फलोदयसिद्धिपर्यन्तं कर्मण आरम्भान्न विरराम न निवृत्तः [अनेन महापुरुषलक्षणं–हे०] ।"जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् " इत्यपादानात्पञ्चमी । " व्याङ्परिभ्यो रमः " इति परस्मैपदम् । स्थिरधीर्निश्चलितः [" दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते " इति गीतासु । स्थिताः प्रतिष्ठिताः अहमस्मि परं ब्रह्मेति धीर्यस्य " इति गीताभाष्ये–हे०] नवेतरो रघुश्चापरमात्मदर्शनात्परमात्मसाक्षात्कारपर्यन्तं योगविधेरैक्यानुसंधानान्न विरराम [संयोगो योग इत्युक्तो जीवात्मपरमात्मनोर्दर्शनात् इति योग वासिष्ठः। योगश्चित्तवृत्तिनिरोधः इति वा-हे० चा०] ।

(२३.) इत्येवं प्रतिषिद्धः प्रसरः स्वार्थप्रवृत्तिः [दिशातिक्रमणं विषयासंगश्च–हे० चा० सु०] । येषां तेषु शत्रुषु चेन्द्रियेषु च जाग्रतावप्रमत्तावुदयापवर्गयोरभ्युदयमोक्षयोः प्रसितावासक्तौ । " तत्परे प्रसितासक्तौ" इत्यमरः। उभावजरघू उभयीं द्विविधामभ्युदयमोक्ष-

(21.) Aja employed the six expedients beginning with peace after having observed their results, Raghu also, with whom gold and a lump of clay were of equal value, conquered the three qualities (the Guṇas or attributes) inherent in Prakṛiti (or nature.)

(22.) Neither the new lord steady in actions ceased from his undertakings until the rise (attainment) of their fruits, nor the king other than the young one of a firm mind desisted from the practice of contemplation until the visitation (or vision) of the Supreme Being.

(23.) Thus both of them, the one awake against the enemies who were baffled in their attempts and the other against the organs of sense, whose cravings were curbed, being devoted, the one to worldly prosperity and the other to the final beatitude (the emancipation of the soul from the body and exemption from further transmigration), attained the fulfilment of their desires.

अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः ।
तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः ॥ २४ ॥
श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः ।
विदधे विधिमस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित् ॥ २५ ॥

रूपाम् । "उभादुदात्तो नित्यं" इति तयप्प्रत्ययस्याजादेशः । "टिड्ढा-" इति ङीप् । सिद्धिं फलमवापतुः । उभावुभे सिद्धी यथासंख्यमवापतुरित्यर्थः ।

(२४.) अथ रघुः [मानापमानयोः सुखदुःखयोश्च–हे०] समदर्शनः सर्वभूतेषु समदृष्टिः सन्नजव्यपेक्षयाजाकाङ्क्षानुरोधेन (नतु स्वेच्छया) काश्चित्समाः कतिचिद्वर्षाणि । "समा वर्षं समं तुल्यम्" इति विश्वः [समाशब्दो बहुवचनान्तः एकवचनान्तो वा । तथाप्रतापमार्तण्डः । "शरत्स्त्रियां समास्त्रीत्वे भूम्न्येकत्वे च दृश्यते"–हे०] । गमयित्वा नीत्वा योगसमाधिनैक्यानुसंधानेन [जीवात्मपरमात्मनोर्योगविषयेण–हे०] । "संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः" इति वाशिष्ठः । अव्ययमविनाशिनं तमसः परमविद्यायाः परम् । मायातीतमित्यर्थः [अनित्यसुखेनात्मसुखविपरीतज्ञानमविद्या–हे०] । पुरुषं परमात्मानमापत्प्राप । सायुज्यं प्राप्त इत्यर्थः ["महतस्तमसः पारे पुरुषं ज्वलनप्रभं ज्ञात्वा मृत्युमुपेत्येति"–हे०] ।

(२५.) अग्निचिदग्निं चितवानाहितवान् । "अग्नौ चेः" इति क्विप्प्रत्ययः । राघवोऽजः पितुः श्रुतदेहविसर्जन आकर्णितपितृतनुत्यागः संश्चिरमश्रूणि बाष्पान्विमुच्य विसृज्यास्य पितुरनग्निम् । अग्निसंस्काररहितमित्यर्थः । नैष्ठिकं निष्ठायामन्ते भवं [वसुधाततलस्थापनरूपं–चा०] विधिमाचारमन्तेष्टिं यतिभिः संन्यासिभिः सार्धं सह विदधे चक्रे [यथा संन्यासिनामन्तेष्टिरभिहिता तथातैरेवसमं विहितवानितिभावः–चा०] । अनग्निं विधिमित्यत्र शौनकः— "सर्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च । न तस्य दहनं कार्यं नैव पिण्डोदकक्रिया । निदध्यात्प्रणवेनैव बिले भिक्षोः कलेवरम् । प्रोक्षणं खननं चैव सर्वं तेनैव कारयेत्" इति (एतदेवहेमाद्रिचारित्रवर्द्धनसुमतिविजयाः) ।

(२६.)पितृकार्यस्य तातश्राद्धस्य कल्पवित् (कल्पाः प्रतिपादनग्रन्थाः तान् वेत्तीति) विधानज्ञः सोऽजः पितृभक्त्या पितरि प्रेम्णा । करणेन । न पितुः परलोकसुखापेक्षया । मुक्तत्वादिति भावः । तस्य रघोरौर्ध्वदैहिकम् । देहादूर्ध्वं भवतीति तत्तिलोदकपिण्डदानादिकमकरोत् ["मृ-

---

(24.) Then Raghu, who viewed all things with an equal eye, having passed some years in conformity with the wishes of Aja, obtained by means of Yoga-contemplation (the absorption of the soul in profound meditation peculiar to the Yoga system) the eternal spirit that is beyond (or free from) darkness (ignorance).

(25.) The son of Raghu, himself a keeper of the sacred fire, when he heard of his father's resignation of the body (his death), having shed tears for a long time, celebrated his obsequies without fire, in company with recluses.

अकरोत्स तदौर्ध्वदैहिकं पितृभक्त्या पितृकार्यकल्पवित् ।
न हि तेन पथा तनुत्यजस्तनयावर्जितपिण्डकाङ्क्षिणः ॥ २६ ॥
स परार्ध्यगतेरशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः ।
शमिताधिरधिज्यकार्मुकः कृतवानप्रतिशासनं जगत् ॥ २७ ॥
क्षितिरिन्दुमती च भामिनी पतिमासाद्य तमग्र्यपौरुषम् ।
प्रथमा बहुरत्नसूरभूदपरा वीरमजीजनत्सुतम् ॥ २८ ॥

तार्थं यदर्हं दानं त्रिषु स्यादौर्ध्वदैहिकम्"–हे०]। "उर्ध्वं देहाच्च" इति वक्तव्याट्ठक्प्रत्ययः। अनुशातिकादित्वादुभयपदवृद्धिः । ननु कथं भक्तिरेव श्राद्धादिफलप्रेप्सापि कस्मान्नाभूदित्याशंक्याह—न हीति । तेन पथा योगरूपेण मार्गेण तनुत्यजः शरीरत्यागिनः पुरुषास्तनयेनावर्जितं दत्तं पिण्डं कांक्षन्तीति तथोक्ता न हि भवन्ति (पुत्रदत्तग्रासाभिलाषिणो न हि भवन्ति) ।

(२७.) [मोक्षगामित्वात्–हे०] परार्ध्यगतेः प्रशस्तगतेः प्राप्तमोक्षस्य पितुरशोच्यतामशोचनीयत्वमुद्दिश्याभिसंधाय ।शोको न कर्तव्य इत्युपादिश्येत्यर्थः। ["परिव्राजि विपन्ने तु पातिते चात्मवेश्मनि कार्यो न शोको ज्ञातीनामन्यथा दोषभागिनः" इति सुमन्तुः–हे० चा०] । सदर्थवेदिभिः परमार्थज्ञैर्विद्वद्भिः (वशिष्ठादिशाखिभिः) शमिताधिः (शमिता शान्तीकृता आधिर्मानसी पीडा यस्य सः) निवारितमनोव्यथः ।" पुंस्याधिर्मानसी व्यथा " इत्यमरः । सोऽजोऽधिज्यकार्मुकः । अधिज्यमारोपितमौर्वीकं कार्मुकं यस्य स तथोक्तः सन् । जगत्कर्मभूतमप्रतिशासनं (न विद्यते प्रतिशासनं प्रतिनृपतेराज्ञा यत्र तत्) द्वितीयाज्ञारहितम् । आत्माज्ञाविधेयमित्यर्थः । कृतवांश्चकार ।

(२८.) क्षितिर्मही भामिनी कामिनीन्दुमती च । " भामिनी कामिनी च " इति हलायुधः । अग्र्यपौरुषं महापराक्रममुत्कृष्टभोगशक्तिं च तमजं पतिमासाद्य प्राप्य । तत्र प्रथमा क्षितिः । बहूनि रत्नानि श्रेष्ठवस्तूनि सूत इति बहुरत्नसूरभूत् । " रत्नं स्वजातिश्रेष्ठेऽपि " इत्यमरः । अपरेन्दुमती वीरं (विशेषेण शत्रून् ईरयति कम्पयति इति वीरस्तं) सुतमजीजनज्जनयति स्म । जायतेर्णौ लुङि रूपम् । सहोक्त्या सादृश्यमुच्यते [भामिनीशब्देन भुवः सापत्न्यात् स्पर्धया इव पुत्रमसूतेति भावः–हे०] । किंनामकोऽसावत आह—

(26.) He knowing the rules of the rites due to a father (deceased parent) performed his obsequies through filial devotion to his parent; for those who quit the body in that way are not desirous of the rice-balls offered by their sons.

(27.) He whose bow was strung, and whose mental grief was soothed by men versed in the knowledge of the highest truth (philosophers) on the ground of the unlamentable condition of his father who had attained the highest bliss, rendered the world destitute of a rival-command (ruled the sole master of the world).

(28.) The earth and his wife Indumatī, having obtained for their husband him who possessed the greatest valour, the first became the producer of many excellent things and the other gave birth to a brave son.

दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम्।
दशपूर्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः ॥ २९ ॥
ऋषिदेवगणस्वधाभुजां श्रुतयागप्रसवैः स पार्थिवः।
अनृणत्वमुपेयिवान्बभौ परिधेर्मुक्त इवोष्णदीधितिः ॥ ३० ॥
बलमार्तभयोपशान्तये विदुषां सत्कृतये बहु श्रुतम्।
वसु तस्य विभोर्न केवलं गुणवत्तापि परप्रयोजना ॥ ३१ ॥

(२९.) दश रश्मिशतानि यस्य स दशरश्मिशतः सूर्यः। स उपमा यस्याः सा दशरश्मिशतोपमा द्युतिर्यस्य तम्। यशसा। करणेन। दशस्वपि दिक्ष्वाशासु श्रुतं प्रसिद्धम्। दशकण्ठारे रावणारे रामस्य गुरुं पितरं यं सुतम्। आख्यया नाम्ना दशपूर्वो दशशब्दपूर्वो रथो रथशब्दस्तम्। दशरथमित्यर्थः [दशरथस्यार्थपरत्वे वा। विवक्षितस्यार्थस्य कष्टकल्पनायाः प्रतीतेः अलंकारज्ञा नानुमन्यन्ते। प्रयोगश्च। " हिरण्यपूर्वं कशिपुं प्रचक्षते " इति माघे। " धनुरुपपदमस्मै वेदमभ्यादिदेश " इति किरातार्जुनीये। यमाख्ययेति ग्राम्यं यम प्रतीतेः–हे० कविः स्वसमयापेक्षया दशकण्ठेत्यादि प्रायुंक्त। अथवा प्रवाहरूपत्वाज्जगतोऽनादित्वाद्रामपरम्पराया अप्यनादित्वान्न दोषः। अस्मिन् श्लोके दशरथेति प्रयोक्तुमशक्यत्वाद्दशपूर्वरथेत्यादिप्रयोगे कविभिरादृतत्वान्न दोषः–चा० सु०]। बुधा विद्वांसो विदुर्वेदन्ति। " विदो लटो वा " इति झेर्उसादेशः। [अनुप्रासः–हे०]।

(३०.) श्रुतयागप्रसवैरध्ययनयज्ञसंतानैः। करणैः। यथासंख्यमृषीणां देवगणानामिन्द्रादीनां स्वधाभुजां [स्वधापूर्वं यद्दत्तं कव्यादि तद्भुञ्जते इति स्वधाभुजस्तेषां–चा०] पितॄणामनृणत्वमृणविमुक्तत्वमुपेयिवान्प्राप्तवान् [" ऋणं देवस्य यज्ञेन पितॄणं दानकर्मणा संतत्या पितॄलोकानां धावयित्वा परिव्रजेत्–चा०]। "एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वा" इति श्रुतेः। स पार्थिवोऽजः परिधेः परिवेशात्। " परिवेशस्तु परिधिः " इत्यमरः। मुक्तो निर्गतः। कर्मकर्ता। उष्णदीधितिः सूर्य इव। बभौ दिदीपे। इत्युपमा।

(३१.) तस्य विभोरजस्य केवलं वसु धनमेव परप्रयोजनं परोपकारकं नाभूत्। किंतु

(29.) Whom wise men knew by the name " Ratha " with " Das'a " as its prefix and as the father of the enemy of the ten-necked demon, whose lustre was comparable to that of the thousand-rayed luminary (sun), and who was known by his fame even in the ten quarters.

(30.) That king, having got free from the debts due to the sages, gods and the Svadhá-eaters (the enjoyers of oblations i. e. manes) by means of the Vedas, sacrifices, and offsprings (respectively), shone like the hot-rayed luminary (the sun) freed from his misty halo (or circle).

(31.) His bodily strength was for allaying the fears of the distressed and his profound learning was for honouring the learned ; so that not only the wealth of that mighty king, but his possession of virtues also was for the use of others.

28

स कदाचिदवेक्षितप्रजः सह देव्या विजहार सुप्रजाः ।
नगरोपवने शचीसखो मरुतां पालयितेव नन्दने ॥ ३२ ॥
अथ रोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरम् ।
उपवीणयितुं ययौ रवेरुदगावृत्तिपथेन नारदः ॥ ३३ ॥

गुणवत्तापि (गुणानां शौर्यादीनां भावः) गुणित्वमपि परप्रयोजना परेषामन्येषां प्रयोजनं यस्यां सा [उक्तञ्च कुमारसंभवे । " अकालसंध्यामिव धातुमत्तां "—हे०] । विधेयांशत्वेन प्राधान्याद्गुणवत्ताया विशेषणं वस्त्वित्यत्र तूहनीयम् । तथा हि । बलं पौरुषमार्तानामापन्नानां भयस्योपशान्तये निषेधाय । न तु स्वार्थं परपीडनाय वा । बहु भूरि श्रुतं विद्या विदुषां सत्कृतये सत्काराय । न तूत्सेकाय । बभूव । तस्य धनं परोपयोगीति किं वक्तव्यम् । बलश्रुतादयोऽपि गुणाः परोपयोगिन इत्यर्थः ।

(३२.) अवेक्षितप्रजोऽकुतोभयत्वेनानुसंहितप्रजः । " नित्यमसिच्प्रजामेधयोः " इत्यस्प्रत्ययः । न केवलं स्त्रैण इति भावः । शोभना प्रजा यस्यासौ सुप्रजाः । सुपुत्रवान् । पुत्रन्यस्तभार इति भावः । सोऽजः कदाचित् (कस्मिंश्चित्प्रस्तावे) देव्या ("देवी कृताभिषेकायां") महिष्येन्दुमत्या सह नगरोपवने [उपवनलक्षणं वृक्षारोपे ।"उद्यानोपवनारामा वनं प्रमदपूर्वकं। पञ्चधा निष्कुटं चेति वृक्षवाटी प्रशस्यते।राज्ञामेकोपभोग्यं यद् उद्यानं तदुदाहृतं। पुरबाह्ये तु सामान्यं भवेदुपवनं नृणां। आरामस्त्वेकभोग्योथ वनं प्रमदपूर्वकं। अन्तःपुरैकभोग्यं स्यान्निष्कुटं तु गृहे कृतं । अमात्यगणिकादीनां सर्वं नानातरूज्ज्वलं । आरामं त्रिविधा द्रौमं शाकं पौष्पं विदुर्बुधाः इति हे०] । नन्दने नन्दनाख्येऽमरावत्युपकण्ठवने शचीसखः । शच्या सहेत्यर्थः । मरुतां देवानां [कर्तृकर्मणोः कृति नित्यामिति कर्तरि षष्ठी—चा०] पालयितेन्द्र इव । विजहार चिक्रीड ।

(३३.) अथ दक्षिणस्योदधेः समुद्रस्य रोधसि तीरे श्रितगोकर्णनिकेतमधिष्ठितगोकर्णाख्यस्थानमीश्वरं शिवमुपवीणयितुं वीणयोप समीपे गातुम् । " सत्यापपाश"—इत्यादिना वीणाशब्दादुपगानार्थे णिच्प्रत्ययः। ततस्तुमुन् । नारदः [नराणां समूहो नारं तद् द्यति खण्डयति कलिदानात् इति नारदः—हे० चा०] देवर्षी रवेः सूर्यस्य उदीच उत्तरस्या दिश आकाश आवृत्तिर्निवर्तनम् (उदगावृत्तिः) तस्याः पन्थाः गतिप्रकारस्तेन । यथा रविरुत्तरस्या दिशो व्यावृत्य दक्षिणायनमागच्छति तद्वदित्यर्थः।ययौ जगाम । सूर्योपमानेनास्यातितेजस्त्वमुच्यते ।

(32.) He, who had good offspring and who cherished his subjects, on a certain occasion sported in the garden of the city with his queen;as the friend of S'achi, the protector of the gods does in Nandana-forest.

(33.) At this time Nárada was going by the path of the sun's return from the north to sing in harmony with his lute unto Is'vara who had taken his abode in the temple of Gokarna on the shores of the southern ocean.

कुसुमैर्ग्रथितामपार्थिवैः स्रजमातोद्यशिरोनिवेशिताम्।
अहरत्किल तस्य वेगवानधिवासस्पृहयेव मारुतः ॥ ३४ ॥
भ्रमरैः कुसुमानुसारिभिः परिकीर्णा परिवादिनी मुनेः।
ददृशे पवनावलेपजं सृजती बाष्पमिवाञ्जनाविलम् ॥ ३५ ॥

(३४.) अपार्थिवैरभौमैः । दिव्यैरित्यर्थः । कुसुमैर्ग्रथितां रचिताम् । तस्य नारदस्यातोद्यस्य वाद्यस्य वीणायाः ["चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकं। ततं चैवानुविद्धं च घनं शुषिरमेव च। चतुर्विधं तु विज्ञेयमातोद्यलक्षणान्वितं । ततं तंत्रिगतं तेयं अनुविद्धं च दुष्करं । घनं कांस्यमयं ज्ञेयं । शुषिरं वंश उच्यते" । आतोद्यशब्दो यद्यपि अविशेषेण वाद्यमात्राभिधायी तथाप्यत्रोपवीणायितुमित्युक्तत्वात् वीणैव । यद्वा समुदायेषु हि प्रवृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते इति–हे० । यद्यपि आतोद्यपदं चतुष्टये वाद्ये विद्यते तदप्यत्रप्रकरणाद्वीणावाची तदुक्तं । "शब्दात्प्रकरणाल्लिङ्गादौचित्याद्देशकालयोः । शब्दादर्थं विजानीयान्न शब्दादेव केवलात्"इति–चा०] शिरस्यग्रे निवेशिताम् । "चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्" इत्यमरः । स्रजं मालां वेगवान्मारुतः । अधिवासे वासनायां [अधिवासो गन्धपुष्पादिकृतः संस्कारः तद्वाञ्छयेव । अनया स्रजा अहमपि संस्कृतो भवामीत्याशयेनेत्यादि–चा०] ।स्पृहयेव [इत्युत्प्रेक्षा–हे०] । स्रजा स्वाङ्गं संस्कर्तुमित्यर्थः । "संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम्" इत्यमरः । अहरत्किल । किलेत्यैतिह्ये ।

(३५.) कुसुमानुसारिभिः पुष्पानुयायिभिर्भ्रमरैरलिभिः परिकीर्णा व्याप्ता मुनेर्नारदस्य परिवादिनी वीणा ["विश्वावसोस्तु बृहती तुम्बरोस्तु कलावती । महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपी । महती शततंत्री" इति क्षीरस्वामी–हे०] । "वीणा तु वल्लकी । विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी" इत्यमरः । पवनस्य वायोरवलेपोऽधिक्षेपस्तज्जम् (वायुपराभवजं) अञ्जनेन कज्जलेनाविलं कलुषं [कज्जलनीलं–हे०] बाष्पमश्रु सृजती मुञ्चतीव [इत्युत्प्रेक्षा–हे०] । ददृशे दृष्टा (लोकैरिति शेषः) । भ्रमराणां साञ्जनबाष्पबिन्दुसादृश्यं विवक्षितम् [अन्याप्यवमानिता साञ्जनं अश्रु त्यजति–हे० सु०] । "वा नपुंसकस्य" इति वर्तमाने "आच्छीनद्योर्नुम्" इति नुम्विकल्पः [कुसुमानुकारिभिरिति तच्छीलको णिनिः । सुपीत्यनुवर्तमाने पुनः सुपग्रहणं उपसर्गनिवृत्त्यर्थं । केवलस्योपसर्गस्य निवृत्त्यर्थं द्रष्टव्यमिति जयमङ्गलकारः। तथा भट्टिकाव्ये ।"सकर्मतः कर्मसुतानुबन्धि" इति । तथात्रैव । "तामभ्यगच्छद्रुदितानुसारी" इति–हे०] ।

(34.) It is said that a violent gust of wind took away a garland placed on the top of the lute, strung with celestial flowers (flowers not produced on earth), as if with the desire of fragrance.

(35.) The lyre of the sage which was surrounded by black-bees moving after the flowers, was seen, as it were, to shed tears caused by the insult given by the Wind, and sullied with collyrium.

अभिभूय विभूतिमार्तवीं मधुगन्धातिशयेन वीरुधाम् ।
नृपतेरमरस्रगाप सा दयितोरुस्तनकोटिसुस्थितिम् ॥ ३६ ॥
क्षणमात्रसखीं सुजातयोः स्तनयोस्तामवलोक्य विह्वला ।
निमिमील नरोत्तमप्रिया हृतचन्द्रा तमसेव कौमुदी ॥ ३७ ॥
वपुषा करणोज्झितेन सा निपतन्ती पतिमप्यपातयत् ।
ननु तैलनिषेकबिन्दुना सह दीपार्चिरुपैति मेदिनीम् ॥ ३८ ॥

(३६.) सामरस्रग्दिव्यमाला । मधुगन्धयोर्मकरन्दसौरभयोरतिशयेनाधिक्येन । वीरुधां लतानाम् । " लता प्रतानिनी वीरुत् " इत्यमरः । ऋतोः प्राप्तामार्तवीमृतुसंबन्धिनीं विभूतिं समृद्धिम् (संपदं) अभिभूय तिरस्कृत्य नृपतेरजस्य दयिताया इन्दुमत्या उर्वोर्विशालयोः स्तनयोर्ये कोटी चूचुकौ तयोः सुस्थितिं गोप्यस्थाने पतितत्वात्प्रशस्तां स्थानं (निवासं) आप प्राप्ता ।

(३७.) सुजातयोः सुजन्मनोः । सुन्दरयोरित्यर्थः [" सुजातं सुन्दरे प्रोक्तं सभ्यग्जाते च वस्तुनि " इति त्रिविक्रमः–हे०] । स्तनयोः [सखीकुचालिंगनात् स्तनयोरिति षष्ठी-सप्तमी वा–हे०] क्षणमात्रं सखीं सखीमिव स्थिताम् । सुजातत्वसाधर्म्यात्स्रजः स्तनसखीत्वमिति भावः । तां स्रजमवलोक्येषद्दृष्ट्वा विह्वला परवशा नरोत्तमप्रियेन्दुमती । तमसा राहुणा । " तमस्तु राहुः स्वर्भानुः " इत्यमरः । हृतचन्द्रा कौमुदी चन्द्रिकेव । निमिमील मुमोह । ममारेत्यर्थः ।" निमीलो दीर्घनिद्रा च " इति हलायुधः [" दीर्घनिद्रा निमीलनम्" इत्यभिधानचिन्तामणिः–चा०] । कौमुद्या निमीलनं प्रतिसंहारः ।

(३८.) करणैरिन्द्रियैरुज्झितेन मुक्तेन । " करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि " इत्यमरः । वपुषा निपतन्ती सेन्दुमती पतिमजमप्यपातयत्पातयति स्म ।[नन्वेकस्य पाते कथमन्यस्य पात इत्याह–हे० चा० सु०] । तथा हि । निषिच्यते निषेकः । तैलस्य निषेकस्तैलनिषेकः । क्षरत्तैलमित्यर्थः । तस्य बिन्दुना सह दीपार्चिर्दीपज्वाला मेदिनीं भुवमुपैति नन्वेत्येव । नन्वत्रावधारणे । " प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु " इत्यमरः । [" प्रश्नावधारणैतिह्यसमीहानुमते ननु " इति यादवः–हे०] । इन्दुमत्या दीपार्चिरुपमानम् । अजस्य तैलबिन्दुः । तत एव तस्या जीवितसमाप्तिस्तस्य जीवितशेषश्च सूच्यते ।

(36.) That celestial garland which by its excessive fragrance and honey despised the vernal dignity of creepers, obtained a secure position between the nipples of the expansive breasts of the King's beloved.

(37.) The beloved of the most excellent of men, having seen it (i. e. garland) the momentary companion of her well-formed breasts, and being convulsed, closed her eyes (for ever), like moonlight in which the moon is eclipsed by Ráhu.

(38.) She falling down with her body forsaken by the senses (i. e. senseless), caused her husband also to drop down ; for does not the flame of a lamp get to the ground together with the drops of dripping oil?

उभयोरपि पार्श्ववर्तिनां तुमुलेनार्तरवेण वेजिताः ।
विहगाः कमलाकरालयाः समदुःखा इव तत्र चुक्रुशुः ॥ ३९ ॥
नृपतेर्व्यजनादिभिस्तमो नुनुदे सा तु तथैव संस्थिता ।
प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते ॥ ४० ॥
प्रतियोजयितव्यवल्लकीसमवस्थामथ सत्त्वविप्लवात् ।
स निनाय नितान्तवत्सलः परिगृह्योचितमङ्कमङ्गनाम् ॥ ४१ ॥

(३९.) उभयोर्दम्पत्योः (अजेन्दुमत्योः) पार्श्ववर्तिनां परिजनानां तुमुलेन संकुलेन (" तुमुलं संकुलं रवे " इति हलायुधः) आर्तरवेण करुणस्वनेन वेजिता भीताः कमलाकरालयाः (कमलानां आकरः एव आलयः एषां ते तथोक्ताः) सरःस्थिता विहगा हंसादयोऽपि तत्रोपवने समदुःखा इव तत्पार्श्ववर्तिनां समानशोका इव चुक्रुशुः क्रोशन्ति स्म [तद्दीनस्वरं श्रुत्वा पक्षिणोऽपि रुरुदुरिति भावः–सु०] ।

(४०.) नृपतेरजस्य तमोऽज्ञानं (मोहः) व्यजनादिभिः साधनैर्नुनुदेऽपसारितम् । आदिशब्देन जलसेककर्पूरक्षोदादयो गृह्यन्ते । सा त्विन्दुमती तथैव संस्थिता मृता । [तुल्येऽपि करणे अजः कथं बुद्धः सामृतेति हेतुमाह–हे० चा० सु०] । तथा हि । प्रतिकारविधानं चिकित्सा । (कर्तृ)। आयुषो जीवितकालस्य शेषे सति विद्यमाने । " आयुर्जीवितकालो ना " इत्यमरः । फलाय सिद्धये कल्पत आरोग्याय भवति (क्लृप्यर्थे संपद्यमाने चेति चतुर्थी) । नान्यथा नृपतेरायुःशेषसद्भावात्प्रतीकारस्य साफल्यम् । तस्यास्तु तदभावाद्वैफल्यमित्यर्थः ।

(४१.) अथ (अनंतरं) सत्त्वस्य चैतन्यस्य विप्लवाद्विनाशाद्धेतोः । " द्रव्यासुव्यवसायेषु सत्त्वम् " इत्यमरः । प्रतियोजयितव्या तन्त्रिभिर्योजनीया । न तु योजिततन्त्रीत्यर्थः । या वल्लकी वीणा। तस्याः समावस्था [" प्रोपाभ्यां समवस्थार्थाभ्याम्" इत्यत्र समशब्दस्य समानार्थत्वं तद्वत्समावस्थामिति । यद्वा।" वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः" इति अकारलोपः–हे० चा०] दशा यस्यास्ताम् (अपशब्दां) अङ्गनां वनितां नितान्तवत्सलोऽतिप्रेमवान्सोऽजः परिगृह्य हस्ताभ्यां गृहीत्वोचितं परिचितम् (वामं)अङ्कमुत्सङ्गं निनाय नीतवान् (द्विकर्मकः)। वल्लकीपक्षे तु सत्त्वं तन्त्रीणामवष्टम्भकः शलाकाविशेषः ।

(39.) Frightened by the confused shrieks of lamentations of the attendants even of both, the birds living in the repository of lotuses cried there as if they were equally grieved.

(40.) The swoon of the king was removed by fanning and other means, but she remained in the same condition ; for the application of a remedy produces some fruit when there is a remnant of the period of life.

(41.) He, who was extremely loving having taken up his wife, who through loss of consciousness, was in a state similar to that of a lute the strings of which are to be put in tune, placed her on his lap familiar to her.

पतिरङ्कनिषण्णया तया करणापायविभिन्नवर्णया ।
समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चन्द्रमाः ॥ ४२ ॥
विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥ ४३ ॥
कुसुमान्यपि गात्रसंगमात्प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः ॥ ४४ ॥

(४२.) पतिरजोऽङ्कनिषण्णयोत्सङ्गस्थितया करणानामिन्द्रियाणामपायेनापगमेन (नाशेन) हेतुना विभिन्नवर्णया विच्छायया तया ["इत्थंभूतलक्षणे तृतीया"-हे०]।उषसि प्रातःकाल आविलां मलिनां मृगलेखां लाञ्छनं मृगरेखारूपं बिभ्रद्धारयंश्चन्द्रमा इव । समलक्ष्यतादृश्यत । इत्युपमा ।

(४३.) सोऽजः सहजां स्वाभाविकीमपि धीरतां धैर्यमपहाय विप्रकीर्य बाष्पेण कण्ठगतेन गद्गदं विशीर्णाक्षरं यथा तथा ध्वनिमात्रानुकारिगद्गदशब्दैर्विललाप परिदेवितवान् । "विलापः परिदेवनम्" इत्यमरः। [धीरस्य कुतः शोक इति चेत् अत आह–हे०चा०]। अभितप्तमग्निना संतप्तमयो लोहमचेतनमपि मार्दवं मृदुत्वमवैरत्वं च भजते प्राप्नोति । शरीरिषु देहिषु । अभिसंतप्तेष्विति शेषः । विषये कैव कथा वार्ता । अनुक्तसिद्धमित्यर्थः ।

(४४.)कुसुमानि पुष्पाण्यपि।(कर्तॄणि)। अपिशब्दो नितान्तमार्दवद्योतनार्थः।गात्रसंगमाद्देहसंसर्गादायुरपोहितुमपहर्तुं प्रभवन्ति (समर्थानि भवन्ति) यदि । हन्त विषादे । "हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः " इत्यमरः । प्रहरिष्यतो हन्तुमिच्छतो विधेर्दैवस्यान्यत्कुसुमातिरिक्तं किमिव वस्तु । इवशब्दो वाक्यालंकारे कीदृशमित्यर्थः । साधनं प्रहरणं न भविष्यति न भवेत् । सर्वमपि साधनं भविष्यत्येवेत्यर्थः [असाधनं पुष्पमपि साधनं जातं अन्यत् किमुतेत्यर्थः-हे० चा० सु०] ।

(४५.) अथवा पक्षान्तरे प्रजान्तकः कालो मृदु कोमलं वस्तु मृदुनैव वस्तुना हिंसितुं हन्तुमारभत उपक्रमते । अत्रार्थे हिमसेकेन तुषारनिष्यन्देन विपत्तिर्मृत्युर्यस्याः सा तथा नलिनी पद्मिनी [अत्रार्थे–हे०] । मे [मया । तेमेशब्दौ निपातेषु द्रष्टव्यौ । " त्वयामयेत्य-

(42.) The husband appeared, on account of her lying on his lap with her complexion faded by the loss of the organs of sense, like the moon at dawn wearing the turbid streak of the deer.

(43.) He having given up even his natural fortitude, lamented in accents choked with tears; even iron when heated by fire gets softness, what then need be said of those that have (frail) bodies?

(44.) If even flowers by their contact with the body have the power of taking away life, then alas! what other thing will not be an instrument of Fate when it is bent upon striking.

अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः।
हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ॥ ४५ ॥
स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम्।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥ ४६ ॥
अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ॥ ४७ ॥

स्मिन्नर्थे" इति वामनः–हे०]। पूर्वं प्रथमं निदर्शनमुदाहरणं मता द्वितीयं निदर्शनं पुष्पमृत्युरिन्दुमतीति भावः।

(४६.) इयं (कोमला) स्रग्जीवितमपहन्तीति जीवितापहा (जीवनापहारिणी) यदि। हृदये वक्षसि। "हृदयं वक्षसि स्वान्ते" इत्यमरः। निहिता (निक्षिप्ता) सती मां किं न हन्ति। ईश्वरेच्छया [दैवस्येच्छया–हे०]। क्वचित्प्रदेशे विषमप्यमृतं भवेत्क्वचिदमृतं वा विषं भवेत् [अत्रेन्दुमतीनाशत्वादमृतरूपायाः मालायाः विषत्वं। सिद्धविषत्वायाश्च तस्या नृपाहननादमृतत्वं–हे०]। दैवमेवात्र कारणमित्यर्थः [जीवितापहेत्ययं शब्दः चिन्त्यः। "अपेक्लेशतमसोः" इति डल्यविधानात्। क्लेशरागतमोदुःखरोगज्वरादिषु डः। कर्मस्वपहन्तेः स्याध्यातः (नः)पापापहः शिव इति गणदर्पणोक्तेः घटते। यथात्र सप्तदशसर्गे।"परकामापहः सोभूत्"। एकोनविंशे सर्गेपि। "अन्वभुंक्त सुरतक्लमापहां" इति–हे०। जीवितापहेति चिन्त्यं। कथं आशिषि हन इत्यस्याप्राप्तेर्डप्रत्ययस्य। एके तु।"अपेक्लेशतमसोः"इति नियमाद्यपिडप्रत्ययाभावस्तथाप्यन्येभ्योपि दृश्यते इति प्रयोगानुसरणाद्दृशि ग्रहणाच्च साधुत्वं ब्रुवते–चा०]।

(४७.) अथवा [इति पूर्वापेक्षायाः पक्षान्तरे–हे० चा० सु०] मम भाग्यस्य विप्लवाद्विपर्ययाद्देषः। स्रगित्यर्थः। विधेः प्राधान्यात्पुलिङ्गनिर्देशः। वेधसा विधात्रा [दैवेन–चा०] कुसुमावलिरूपोऽशनिर्वैद्युतोऽग्निः [वज्रं–हे०चा० सु०] कल्पितः। "दम्भोलिरशनिर्द्वयोः" इत्यमरः। अपूर्वः कृतः इत्यभिसन्धिः। अपूर्वत्वमेवस्पष्टयति। यद्यस्मात्कारणादनेन पुरोवर्तिनापि पुष्पाशनिना प्रसिद्धाशनिनेव तरुस्तरुस्थानीयः स्वयमेव [तरुरत्राजो लतेन्दुमती–हे०] न पातितः न प्रध्वंसितः। किंतु तस्य तरोर्विटपाश्रिता (स्कन्धाधारा) लता वल्ली क्षपिता नाशिता। [अशनेः प्रायेणैषः स्वभावः यदुपरिशाखातरोर्नाशयति न स्तम्भं–हे०]। तच्छ-

(45.) Or perhaps the destroyer of men (the god Yama) undertakes to destroy a soft thing only by means of a soft instrument; and herein the first instance observed by me is the lotus-plant being subject to destruction by the showers of dew.

(46.) If this wreath is the killer of life then why does it not kill me, when it is placed on my bosom ? By the will of God even poison may sometimes become nectar and nectar poison.

(47.) Or perhaps through the evil turn of my fate this has, by the Creator, been turned into the fire of lightning, since the tree has not been struck down by it, but the creeper clung to its branches has been destroyed.

कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि ।
कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ॥ ४८ ॥
ध्रुवमस्मि शठः शुचिस्मिते विदितः कैतववत्सलस्तव ।
परलोकमसंनिवृत्तये यदनापृच्छ्य गतासि मामितः ॥ ४९ ॥
दयितां यदि तावदन्वगाद्विनिवृत्तं किमिदं तया विना ।
सहतां हतजीवितं मम प्रबलामात्मकृतेन वेदनाम् ॥ ५० ॥

ब्देनात्मा ध्वन्यते लताशब्देनेन्दुमती । लोके प्रसिद्धोऽशनिस्तरुं लतां च क्षपयति । अयं च लतामेव न तरुमित्यनेन प्रकारेणास्यापूर्वत्वमित्यभिप्रायः ।

(४८.) (हे प्रिय) मयि चिर भूरिशोऽपराद्धेऽप्यपराधं कृतवत्यपि (अपराध्यत्यस्मिन्निति अपराद्धः तस्मिन्) । राधेः कर्तरि क्तः । यदा यस्माद्धेतोः । यदेति हेत्वर्थः । " स्वरादौ पठ्यते यदेति हेतौ " इति गणव्याख्यानात् । अवधीरणामवज्ञां न कृतवत्यसि नाकार्षीः [अव्ययानामनेकार्थत्वादसि इत्यव्ययं । पाणिनिमतदर्पणे । अस्यस्मिमन्येशङ्कब्रूह्यासहेकर्षकौ (बलार्थकौ) इति । अथवा । असीति वर्तमानसामीप्यभूतार्थे लट्–हे०] । तत्कथमेकपदे तत्क्षणे । " स्यात्तत्क्षण एकपदम् " इति विश्वः । निरागसं नितरामनपराधमिमं जनम् । इममिति स्वात्मनिर्देशः । मामित्यर्थः । आभाष्यं संभाष्यं न मन्यसे न चिन्तयसि [कथं प्रलपतो मम वचनं न ददासीत्यर्थः–हे० एवं विलापं कुर्वाणं मल्लक्षणं जनं कथं न संभावयसि–चा०] ।

(४९.) हे शुचिस्मिते धवलहसिते शठो गूढविप्रियकारी[धूर्तः।"प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम्"इत्यादिधूर्तलक्षणं रुद्रटालंकारादवगन्तव्यं(अवश्यं सेव्यं)–चा०।"गूढविप्रियकृत् शठः"इति रूपके–हे०]। कैतवेन कपटेन वत्सलः कैतवस्निग्ध इति ध्रुवं सत्यं तव विदितस्त्वया विज्ञातोऽस्मि ।"मतिबुद्धि–" इत्यादिना कर्तरि क्तः।" क्तस्य च वर्तमाने" इति कर्तरि षष्ठी । कुतः । यद्यस्मान्मामनापृच्छ्यानामन्त्र्येतोऽस्माल्लोकात्परलोकमसंनिवृत्तयेऽपुनरावृत्तये गतासि [अस्निग्धो ह्यपेक्ष्यते–हे०] ।

(५०.) इदं मम हतजीवितं (दग्धजीवितं) कुत्सितं जीवितं ।["मारिते कुत्सिते हतं" इति हलायुधः–हे०]। तावदादौ दयितामिन्दुमतीमन्वगादन्वगच्छद्यदि । अन्वगादेव । यद्यत्रावधारणे । पूर्वं मूर्छितत्वादिति भावः । तर्हि तया दयितया विना किं किमर्थं विनिवृत्तं प्रत्यागतम् । प्रत्यागमनं न युक्तमित्यर्थः । अत एवात्मकृतेन स्वदुश्चेष्टितेन निवृत्तिरूपेण प्रबलामधिकां वेदनां दुःखं सहतां क्षमताम् । स्वयंकृतापराधेषु सहिष्णुतैव शरणमिति भावः ।

(48.) Since you did not show disregard towards me even when I was constantly (lit. for a long time) in guilt; why then all at once do you not consider this innocent person as one fit to be spoken to ?

(49.) It is certain O lady of pure smiles, that I am known to thee as a false husband with insincere love, since thou hast departed without bidding me adieu from this world (lit. from hence) to the next (lit. to the other) never to return !

(50.) Let this wretched life of mine suffer the overwhelming torments brought on by its own act ! For why has it returned without her if it then followed my beloved ?

सुरतश्रमसंभृतो मुखे ध्रियते स्वेदलवोद्गमोऽपि ते
अथ चास्तमिता त्वमात्मना धिगिमां देहभृतामसारताम् ॥ ५१ ॥
मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि माम्।
ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबन्धना रतिः ॥ ५२ ॥
कुसुमोत्खचितान्वलीभृतश्चलयन्भृङ्गरुचस्तवालकान्।
करभोरु करोति मारुतस्त्वदुपावर्तनशङ्कि मे मनः ॥ ५३ ॥
तदपोहितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे।
ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ॥ ५४ ॥

(५१.) सुरतश्रमेण (मोहनक्रीडाश्रमेण) संभृतो जनितः स्वेदलवोद्गमोऽपि ते तव मुखे ध्रियते वर्तते [अपिशब्देन लवस्य क्षणविनाशित्वं सूचितं–हे०] । अथ च त्वमात्मना स्वरूपेणास्तं नाशमिता प्राप्ता । अतः कारणाद्देहभृतां प्राणिनामिमां प्रत्यक्षामसारतामस्थिरतां धिक् [असारताशब्देन यद्यपि निन्दा प्रतीयते तथापि धिग्जाल्ममितिवत् न पौनरुक्त्यं । "उभयवंतसोः" इति द्वितीया–हे०] ।

(५२.) मया मनसापि (चित्तेनापि) तव विप्रियं अनभीष्टं न कृतपूर्वम् [पूर्वं कृतं इति कृतपूर्वं "वाहिताग्न्यादिषु"–हे०]। पूर्वं न कृतमित्यर्थः। सुप्सुपेति समासः । किं केन निमित्तेन मां जहासि त्यजसि । नन्वहं क्षितेः शब्दपतिः शब्दत एव पतिः । नत्वर्थत इत्यर्थः । भावनिबन्धनाभिप्रायनिबन्धना स्वभावहेतुका मे रतिः प्रेम तु त्वय्येव । अस्तीति शेषः ।

(५३.) कुसुमैरुत्खचितानुत्कर्षेण रचितान् (अलंकृतान्) वलीभृतो भङ्गीयुक्तान् । कुटिलानित्यर्थः । भृङ्गरुचो नीलांस्तवालकान् (तव ललाटकेशान्) चलयन्कम्पयन्मारुतः(वायुः)। हे करभोरु करभसदृशोरु । " मणिबन्धादाकनिष्ठं करस्य करभो बहिः " इत्यमरः । मे मनस्त्वदुपावर्तनशङ्कि तव पुनरागमने शङ्कावत्करोति । त्वदुज्जीवने शङ्कां कारयतीत्यर्थः ।

(५४.) हे प्रिये तत्तस्मात्कारणादाशु (शीघ्रं) मे विषादं दुःखम् । नक्तं रात्रावोष-

(51.) The rise of the drops of perspiration brought on (lit. brought together) by sexual labour still exists on thy face, while thou thyself hast faded away. Oh fie upon the frailty of human beings!

(52.) Hitherto I have done nothing unpleasant to thee even in thought (lit. in my mind), why then dost thou abandon me ? In sooth I am lord of the earth only in name (while) my love bound up by (lit. having the tie of) deep feeling is (only) in thee.

(53.) The wind, Oh beautiful thighed lady, shaking thy flowing hair dark as black bees and adorned with flowers makes my mind hopeful of thy revival.

(54.) Therefore, O my beloved, you ought quickly to dispel my sadness by coming to life, as the herbs at night dispel by their light the darkness existing in the caves of the snowy mountain (the Himálaya).

इदमुच्छ्वसितालकं मुखं तव विश्रान्तकथं दुनोति माम्।
निशि सुप्तमिवैकपङ्कजं विरताभ्यन्तरषट्पदस्वनम्॥ ५५ ॥
शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्रिणम्।
इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः॥ ५६ ॥

धिस्तृणज्योतिराख्या लता ज्वलितेन प्रकाशेन तुहिनाद्रेर्हिमाचलस्य गुहागतं (कंदरान्तः प्रविष्टं) तमोऽन्धकारमिव [हिमाद्रौ नक्तमोषधयः सप्रकाशा भवन्तीति प्रसिद्धिः–चा०] प्रतिबोधेन ज्ञानेनापोहितुं निरसितुमर्हसि ।

(५५.) इदमुच्छ्वसितालकं चलितचूर्णकुन्तलं विश्रान्तकथं निवृत्तसंलापं (विगलितवचनं) तव मुखम् । निशि रात्रौ [निशीत्यनेनालकस्थाने तमःसम्बन्धः सूचितः–हे०] सुप्तं निमीलितं विरतोऽभ्यन्तराणामन्तर्वर्तिनां षट्पदानां (भृंगानां) स्वनः (शब्दः) यत्र तत् । निःशब्दभृङ्गमित्यर्थः । एकपङ्कजमद्वितीयं पद्ममिव । मां दुनोति परितापयति [प्राणिनां संयोगवियोगौ विलोक्यते तत्त्वया किमर्थमेवं संतप्यते इत्याशंक्याह–हे० चा० सु०] ।

(५६.) शर्वरी रात्रिः शशिनं चन्द्रं पुनरेति प्राप्नोति । द्वन्द्वीभूय चरतीति द्वन्द्वचरः। तं पतत्रिणं चक्रवाकं दयिता चक्रवाकी पुनरेति । इति हेतोस्तौ चन्द्रचक्रवाकौ विरहान्तरक्षमौ विरहावधिसहौ (वियोगनिमित्तकालव्यवधानक्षमौ) । "अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये " इत्यमरः । [व्यतिरेकेणाह–हे०] । अत्यन्तगता पुनरावृत्तिरहिता त्वं तु कथं न मां दहेर्न संतापयेः [विरहलक्षणं रत्नाकरे । "विप्रलम्भस्तु सामान्ये वियोगे विरहोऽन्यथा । यावज्जीववियोगः स्यादीर्ष्याख्योऽहर्निशं भवेत्" इति । "मृतप्रियाणामत्यंतं यावज्जीवार्तिदायिनं । वियोगं विरहं प्राहुः दुःसहं पूर्वसूरयः " इति शब्दार्णवे । कथमत्र शोकयोर्विरहः । " समानधर्मार्थनिर्देशे तद्रूपं " इति साहित्यमीमांसासूत्रात् । " उपमानाद्यदन्यस्य व्यतिरेकः स एव च" इति । काव्यप्रकाशे तु व्यतिरेकः आधिक्यं–हे०]। अपि तु दहेरेवेत्यर्थः [पुरा किल दशरथात्मजस्य रामचन्द्रस्य शापात् रात्रौ चक्रवाकयोर्विरहः । रामस्तूत्पत्स्यतेऽतः । कथमत्राजविलापे चक्रवाकविरहं रचयाञ्चकार । कवेराद्यतनत्वात् विलोक्यमानस्य वर्णनत्वान्न दूषणमत्र । अथवा संसारस्यानादित्वाद्रामपरम्पराया अपि अनादित्वात् युक्तमेवोक्तं -चा०] ।

(५७.) नवपल्लवसंस्तरे नूतनप्रवालास्तरणेऽप्यर्पितं स्थापितं मृदु ते तव यदङ्गं शरीरं दूयेत (खिद्येत अर्थात्) परितप्तं भवेत् [पल्लवानां नवशब्दोऽतिकोमलत्वसूचनार्थः–चा०]।

(55.) This face of your's with its dishevelled hair and with speech stopped, like a solitary (or single) lotus closed at night with the humming of the bees in the inside silenced, torments me.

(56.) The night again goes back to the moon, the Chakravâka-beloved joins her consort that wanders about in couple, and thus are those two able to bear the interval of separation ; how canst thou gone for ever not burn me ?

नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम् ।
तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ॥ ५७ ॥
इयमप्रतिबोधशायिनी रशना त्वां प्रथमा रहःसखी ।
गतिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते ॥ ५८ ॥
कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतम् ।
पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमाः ॥ ५९ ॥
त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया ।
विरहे तव मे गुरुव्यथं हृदयं न त्ववलम्बितुं क्षमाः ॥ ६० ॥

वामौ सुन्दरौ ऊरू यस्याः सा हे वामोरु । " वामं स्यात्सुन्दरे सव्ये" इति केशवः । " संहितशफलक्षण- " इत्यादिनोङ्प्रत्ययः । तदिदमङ्गं चितायाः काष्टसंचयस्याधिरोहणं कथं विषहिष्यते वद [तस्य दुःसहत्वात्-हे०] ।

(५८.) इयं प्रथमाद्या [प्रवरा वा-हे०] रहःसखी [रहस्येकान्ते सखी । सुप्तेपि निबन्धनात् रहःसखी-हे०] । सुरतसमयेऽप्यनुयानादिति भावः । गतिविभ्रमसादेन नीरवा विलासोपरमेण निःशब्दा रशना मेखलाप्रतिबोधमपुनरुद्बोधं यथा तथा शायिनीम् । मृतामित्यर्थः । त्वामनु त्वया सह । तृतीयार्थ इत्यनुशब्दस्य कर्मप्रवचनीययुक्ते द्वितीया । शुचा शोकेन मृतेव न लक्ष्यत इति न । लक्ष्यत एवेत्यर्थः । संभाव्यनिषेधनिवर्तनाय द्वौ प्रतिषेधौ ।

(५९—६०.) युग्मम् । उभयोरेकान्वयः । अन्यभृतासु कोकिलासु कलं मधुरं भाषितं भाषणम् [वनप्रियाः परभृताः-हे०] । कलहंसीषु विशिष्टहंसीषु मदालसं मन्थरं गतं गमनम् । पृषतीषु हरिणीषु विलोलमीक्षितं चञ्चला दृष्टिः । पवनेन वायुनाधूतलतास्वीषत्कम्पितलतासु विभ्रमा विलासाः । इत्यमी पूर्वोक्ताः कलभाषणादयो गुणाः । एषु कोकिलादिस्थानेष्विति शेषः । त्रिदिवोत्सुकयापीह जीवन्त्येव स्वर्गं प्रति प्रस्थितयापि त्वया मामवेक्ष्य विरहासहं विचार्य सत्यं निहिताः [स्थापिताः । गुणगणकलितां मामन्तरेणासावजो दुःखवान् कथं भविष्यतीति मामाश्वासयितुं परपुष्टादिषु स्वगुणा निहिता इत्यर्थः । परं ते गुणाः-

---

(57.) O beautiful thighed-lady that tender body of thine which when laid even on a bed of fresh leaves would be afflicted, tell me how can that same body (now) suffer thy mounting on the funeral pile ?

(58.) This girdle thy first (only) companion in privacy (now noiseless) in consequence of the cessation of thy sportive gait (or motion), not that it does not seem, by sorrow, as if to have died after thee sleeping not to awake again.

(59.) (60.) Sweet words in the cuckoo, gait slow in consequence of youthfulness in the female flamingoes, lovely glances in the hinds and sportiveness in the creepers shaken by the wind,—these qualities have been indeed deposited by thee for my sake though thou wert eager for heaven; still they are not able to uphold (or support) my heart suffering severely in thy separation,

मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ ।
अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसांप्रतम् ॥ ६१ ॥
कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति ।
अलकाभरणं कथं नु तत्तव नेष्यामि निवापमाल्यताम् ॥ ६२ ॥
स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभम् ।
अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे ॥ ६३ ॥

चा०]। मत्प्राणधारणोपायतया स्थापिता इत्यर्थः। तव विरहे गुरुव्यथमतिदुःखं मे हृदयं मनोऽवलम्बितुं स्थापयितुं न क्षमा न शक्ताः । ते तु तत्संग एव सुखकारिणः । नान्यथा [अतस्तवोपरि दोषो नास्ति–हे०] । प्रत्युत प्राणानपहरन्तीति भावः ।

(६१.) ननु हे प्रिये । सहकारश्चूतविशेषः फलिनी प्रियंगुलता चेमौ त्वया मिथुनं (युग्मं) परिकल्पितं मिथुनत्वेनाभ्यमानि (अयं च इयं च पुमान् स्त्रियां) । अनयोः फलिनीसहकारयोर्विवाहसत्क्रियां विवाहमङ्गलमविधायाकृत्वागम्यत । (स्वर्लोकं इति शेषः) । इत्यसांप्रतमयुक्तम् [विवाहकारणं प्रयोगरत्नावल्यां ।"विवाहमंगलाचारा गीतनेपथ्यसंयुता । वृक्षेणोद्वाहिता श्यामा जायते कुसुमान्विता" इति–हे०] । मातृहीनानां न किंचित्सुखमस्तीति भावः। ("सङ्कल्पितं प्रथममेव मया तवार्थे भर्तारमात्मसदृशं सुकृतैर्गता त्वम् । चूतेन संश्रितवती नवमालिकेयमस्यामहं त्वयि च संप्रति वीतचिन्तः" इत्येवं समार्थः श्लोकः) ।

(६२.) वृक्षादिपोषकं दोहदम् । त्वया कृतं दोहदं पादताडनरूपं यस्य सोऽयमशोको यत्कुसुममुदीरयिष्यति प्रसविष्यते [तथाच प्रयोगरत्नावल्यां । " नूपुरान्वितपादेन तरुण्या ताडितो भृशं । अशोकः केसरो वक्त्रसीधुसिक्तश्च फुल्लति " इति । " तरुगुल्मलतादीनामकाले कुशलैः कृतं । पुष्पाद्युत्पादकं द्रव्यं दोहदः स्यात्तु तत्क्रिया" इति शब्दार्णवे–हे०। स्त्रीणां चरणप्रहारेण अशोकतरुः पुष्पतीति प्रसिद्धिः–चा० सु०] । तवालकानामाभरणमाभरणभूतं तत्कुसुमं कथं नु केन प्रकारेण निवापमाल्यतां दाहाञ्जलेरर्घ्यतां (और्ध्वदेहिकदानपुष्पत्वं) नेष्यामि । " निवापः पितृदानं स्यात् " इत्यमरः ।

(६३.) अन्यदुर्लभम् । किंतु स्मर्तव्यमेवेत्यर्थः। सशब्दं ध्वनियुक्तं नूपुरं मञ्जीरं यस्य तं

(61.) The mango tree and the Priyangu creeper have been indeed designed by thee to be a couple (husband and wife) ; it is unworthy (on thy part) that thou art gone without having celebrated the auspicious ceremonies of their nuptials.

(62.) The flower which this As'oka-tree having its longing of pregnancy satisfied by thee, will put forth, how can I lead that ornament of thy hair to the state of a funeral garland ?

(63.) O thou of beautiful form, thou art bewailed by this As'oka tree that sheds tears in the form of flowers remembering as it were the favour of thy feet unattainable by any other tree and adorned with ringing anklets.

तव निःश्वसितानुकारिभिर्बकुलैरर्धचितां समं मया।
असमाप्य विलासमेखलां किमिदं किन्नरकण्ठि सुप्यते ॥ ६४ ॥
समदुःखसुखः सखीजनः प्रतिपच्चन्द्रनिभोऽयमात्मजः।
अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ॥ ६५ ॥

चरणेनानुग्रहं पादेन ताडनरूपं स्मरतेव चिन्तयतेव कुसुमान्येवाश्रूणि तद्वर्षिणामुना पुरोवर्ति-नाशोकेन। हे सुगात्रि। "अङ्गगात्रकण्ठेभ्यश्च" इति वक्तव्यान्ङीप्। त्वं शोच्यसे [यद्वा अन्येन वृक्षेण दुर्लभं शोच्यसे इत्यत्र इवशब्दसंबाधो वा–हे० चा० सु०]।

(६४.) (सुगन्धित्वात्) तव निःश्वसितानुकारिभिः (मुखमारुतानुवादिभिः) बकुलैर्बकुलकुसुमैर्मया समं सार्धम् (त्वया) अर्धचितामर्धं यथा तथा रचितां (अर्धप्रोतां) विलासमेखलामसमाप्यापूरयित्वा। (माधुर्यात्) किंनरस्य देवयोनिविशेषस्य कण्ठ इव कण्ठो यस्यास्तत्संबुद्धिर्हे किंनरकण्ठि। "अङ्गगात्रकण्ठेभ्यश्च" इति ङीप्। किमिदं सुप्यते निद्रा क्रियते। "वचिस्वपि–" इत्यादिना सम्प्रसारणम्। अनुचितमिदं स्वपनमित्यर्थः।

(६५.) सखीजनः समदुःखसुखः। त्वद्दुःखेन दुःखी त्वत्सुखेन सुखीत्यर्थः। अयमात्मजो बालः प्रतिपच्चन्द्रनिभः। दर्शनीयो वर्धिष्णुश्चेत्यर्थः। प्रतिपच्छब्देन द्वितीया लक्ष्यते प्रतिपदि चन्द्रस्यादर्शनात्। [यद्यपि प्रतिपदि चन्द्रकलास्ति तथाप्यदृश्यमानत्वान्न युज्यते। तथाचोक्तं। "प्रतिपच्चन्द्रमिव प्रजा नृपं" इति–चा०]। अहमेकरसोऽभिन्नरागः। "शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः" इत्यमरः। तथापि। जीवितसामग्रीसत्त्वेऽपीत्यर्थः। ते तव व्यवसायः [मरणोद्यमः–हे०चा०] अस्मत्परित्यागरूपो व्यापारः प्रतिपत्त्या निश्चयेन आकस्मिकगमनव्यञ्जितेन [स्वभावेन–व० दुराग्रहेण। इदमेव मयावश्यं कार्यमिति प्रतिपत्तिरभ्युपगमः–हे०]निष्ठुरः क्रूरः[तथापि ते व्यवसाये। मरणोद्योगः प्रतिपत्तौ प्रीतौ निष्ठुरः कर्कशः पराङ्मुखः इति भावः–चा० सु०]|"प्रतिपत्तिः पदप्राप्तौ प्रवृत्तौ गौरवेऽपि च। प्रागल्भ्ये च प्रबोधे च"इति विश्वः। ["प्रतिपत्तिस्तु प्रागल्भ्ये प्रीतिसज्जनयोरपि"इति केशवः–चा०सु०]। स्मर्तुं न शक्यः किमुताधिकर्तुमिति भावः।(अत्राहि हेमाद्रिः। तथापि ते व्यवसायो मरणोद्यमः प्रतिपत्त्या दुराग्रहेण निष्ठुरः। कठिनः तेन क्रूरः। तमेवाह–)।

(६६) अद्य मे धृतिर्धैर्यं प्रतीतिर्वास्तं नाशमिता। रतिः क्रीडा [सुरतं रमणं च –हे०] च्युता गता। गेयं गानं विरतम् (समाप्तं) ऋतुर्वसन्तादिर्निरुत्सवः (उत्सवरहि-

---

(64.) O thou whose voice resembles that of the Kinnaras (celestial songsters) why art thou asleep without having completed the fancy zone which together with me was half set with Bakula flowers imitating thy breath ?

(65.) These your friends are partakers of your joys and sorrows ; this your son is (young and hopeful) like the moon of the first day ; I love you exclusively ; and yet your action is contrary to love.

धृतिरस्तमिता रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः ।
गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ॥ ६६ ॥
गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥ ६७ ॥
मदिराक्षि मदाननार्पितं मधु पीत्वा रसवत्कथं नु मे ।
अनुपास्यसि बाष्पदूषितं परलोकोपनतं जलाञ्जलिम् ॥ ६८ ॥

तोऽभूत्) । आभरणानां प्रयोजनं [शृङ्गारादिकं–चा०] गतमपगतम् ["ना कामी मण्डनप्रियः" इत्युक्तत्वात्–चा०]। शेतेऽस्मिन्निति शयनीयं तल्पम् । "कृत्यल्युटो बहुलम्" इत्यधिकरणार्थेऽनीयर्प्रत्ययः । परिशून्यम् । त्वां विना सर्वमपि निष्फलमिति भावः ।

(६७.) त्वमेव गृहिणी दाराः । अनेन सर्वं कुटुम्बं त्वदाश्रयमिति भावः । सचिवः बुद्धिसहायो मन्त्री । सर्वो हितोपदेशस्त्वदायत्त इत्यनेनोच्यते । मिथो रहसि सखी नर्मसचिवः । सर्वोपभोगस्त्वदाश्रय इत्यमुना प्रकटितम् । ललिते मनोहरे कलाविधौ वादित्रादिचतुःषष्टिकलाप्रयोगे प्रियशिष्या [गीतनृत्यवादित्रचित्रचुंबनाश्लेषपुष्पसंदर्भसारिक्रीडालिपिज्ञानादीनां चतुःषष्टीसंख्याकानां च विद्याध्ययने रहःप्रियाभिमता शिष्यान्तेवासिनीति–चा०]। प्रियत्वं प्राज्ञत्वादित्यभिसंधिः सर्वानन्दोऽनेन त्वान्निबन्धन इत्युद्घाटितम् । अतस्त्वां ["एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्याः" इति त्वामौ द्वितीयाया इति न । तथा मेघदूते । "जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः" इति–हे०] समष्टिरूपां हरतात एव करुणाविमुखेन कृपाशून्येन (अर्थान्निष्ठुरेण) मृत्युना(यमेन) मे मत्संबन्धि किं वस्तु न हृतं वद (कथय) । सर्वमपि हृतमित्यर्थः ।

(६८.) [पद्मिनीजातित्वात्–चा०] माद्यत्यनयेति मदिरा लोकप्रसिद्धा । तथापि "नार्यो मदिरलोचनाः" इत्यादिप्रयोगदर्शनान्माद्यत्याभ्यामिति मदिरे अक्षिणी यस्यास्तत्संबुद्धिर्हे मदिराक्षि [मदिराभिधं अक्षि दृष्टिर्यस्याः तत्संबोधनं । तथा संगीतकलिकायां।"स्निग्धाद्धमुकुलीकान्ता लंभिता मदिरा तथा । पंचैवात्र परिज्ञाताः शौर्यादित्येन दृष्टयः। सौष्ठवेनापरित्यक्ता स्मेरापांगमनोहरा । वेपमानान्तरा दृष्टिर्मदिरा परिकीर्तिता"। यद्वा ।माद्यंति आभ्यां इति

(66.) All patience (or cheerfulness) is at an end, pleasures are no more, music has ceased, the season is (now) without festivities (or has lost all its charms), there is no use of ornaments, and my bed has become all empty to-day.

(67.) Thou wert my wife, thou my counsellor, thou my companion in solitude, my beloved pupil in the fine arts (arts of music &c) ; in taking thee away say what things of mine has not death, averse to pity, robbed me of ?

(68.) O thou of intoxicated eyes, having drank luscious wine passed (that was given) from my mouth, how wilt thou drink after that the oblation of water soiled by my tears and presented to thee (or sent up to thee) in the next world ?

विभवेऽपि सति त्वया विना सुखमेतावदजस्य गण्यताम्।
अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः ॥ ६९ ॥
विलपन्निति कोशलाधिपः करुणार्थग्रथितं प्रियां प्रति।
अकरोत्पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान् ॥ ७० ॥
अथ तस्य कथंचिदङ्कतः स्वजनस्तामपनीय सुन्दरीम्।
विससर्ज तदन्त्यमण्डनामनलायागुरुचन्दनैधसे ॥ ७१ ॥

मदिरे अक्षिणी यस्याः सा-हे०]। मदाननेनार्पितं रसवत्स्वादुतरं मधु मद्यं पीत्वा बाष्पदूषितमश्रुतप्तं परलोकोपनतं परलोकप्राप्तं [अनेन अनुपानस्य विलंबः सूचितः-हे०]। मे जलाञ्जलिं तिलोदकाञ्जलिं कथं त्वन्वनन्तरं पास्यसि। तदनन्तरमिदमनर्हमित्यर्थः [मधुपानानंतरं जलपानं च निषिद्धं-हे०]। यथाह भट्टमल्लः—" अनुपानं हिमजलं यवगोधूमनिर्मिते। दधि मद्ये विषे द्राक्षे पिष्टे मिष्टमयेऽपि च " इति। तच्च इहैव युज्यते। इदं तूष्णं लोकान्तरोपयोगि चेत्यायुर्वेदविरोधात्कथमनुपास्यसीति भावः।

(६९.) विभव ऐश्वर्ये सत्यपि [अथवा सति प्रशस्ते विभवेपि-हे०] त्वया विनाजस्य एतावत् (एतत्परिमाणं अस्येति एतावत्) एव सुखं गण्यताम् (ज्ञायतां)। यावत्त्वया सह भुक्तं ततोऽन्यन्न किंचिद्भविष्यतीत्यर्थः। कुतः। विलोभनान्तरैर्विषयान्तरैः [यद्वा। अन्याभिः स्त्रीभिः-हे० चा०] अहृतस्यानाकृष्टस्य [इति प्रीतिकारणं-हे०] मम सर्वे विषया भोगादयस्त्वदाश्रयास्त्वदधीनाः (त्वदालंबनाः)। त्वां विना मे न किंचिद्रोचत इत्यर्थः [त्वयि मृतायां किमपि सुखं नानुभवामीत्यर्थः-हे०]।

(७०.) कोसलाधिपोऽज इति करुणः शोकरसः स एवार्थस्तेन ग्रथितं संबद्धं [गुम्फितं-हे०] यथा तथा प्रियां प्रतीन्दुमतीमुद्दिश्य विलपन् (रुदन्) पृथिवीरुहान्वृक्षानपि [अपिशब्देन अचेतनत्वं द्योत्यते-चा०] स्रुताः (क्षरिताः) शाखारसा मकरन्दा एव बाष्पास्तैर्दूषितानकरोत्। अचेतनानप्यरोदयदित्यर्थः।

(७१.) अथ स्वजनः (स्वः आत्मीयश्चासौ जनश्च। स्वासां ज्ञातीनां जनः इति वा) बन्धुवर्गस्तस्याजस्यांकत उत्सङ्गात्कथंचित् (बलात्कारेण) अपनीय। तद्दिव्यकुसुममेवान्त्यं

(69.) Even when there is wealth the pleasures of me Aja without you may be counted as having their end here; for unattracted by any other temptations all my objects of enjoyments depended upon you (rested in you).

(70.) Lamenting in this manner for his beloved in expressions consisting of the sentiments of sorrow the Lord of the Kos'alas, made even the trees (growing on earth) heavily (sadly) shower the tears of exudation dripping down from their branches.

(71.) Then his relations, having with difficulty removed that beautiful lady from his lap consigned her, adorned with the funeral decorations, to fire having black sandle-wood for its fuel.

प्रमदामनु संस्थितः शुचा नृपतिः सन्निति वाच्यदर्शनात् ।
न चकार शरीरमग्निसात्सह देव्या न तु जीविताशया ॥ ७२ ॥
अथ तेन दशाहतः परे गुणशेषामुपदिश्य भामिनीम् ।
विदुषा विधयो महर्द्धयः पुर एवोपवने समापिताः ॥ ७३ ॥

मण्डनमलंकारो यस्यास्ताम् । तां सुन्दरीमगुरूणि चन्दनान्येधांसीन्धनानि यस्य तस्मा अनलायाग्नये विससर्ज विसृष्टवान् । " क्रियाग्रहणमपि कर्तव्यम् " इति क्रियामात्रप्रयोगे संप्रदानत्वाच्चतुर्थी ।

(७२.) नृपतिरजः सन्नपि विद्वानपि शुचा शोकेन प्रमदामनु प्रमदया सह संस्थितो मृत इति वाच्यदर्शनान्निन्दादर्शनात् ["उपक्रोशश्च निर्वादो विज्ञेयं वाच्यमद्वयोः" इति प्रतापमार्तण्डः–हे०] । देव्येन्दुमत्या सह शरीरमग्निसादग्न्यधीनं न चकार । "तदधीनवचने" इति सातिप्रत्ययः । जीविताशया प्राणेच्छया तु नेति । [अथवा अनुसंस्थितः इत्येकं पदं । अनुमृतः इत्यर्थः–चा०] ।

(७३.) अथ विदुषा शास्त्रज्ञेन तेनाजेन । गुणा एव शेषा रूपादयो यस्यास्तां गुणशेषां [अर्थात्स्वर्गतां–हे०] भामिनीमिन्दुमतीमुपदिश्योद्दिश्य । दशानामह्नां समाहारो दशाहः [दशाहोत्र विधिविशेषो न तु दशदिनानि–व०। यद्वा। दशाहो विधिविशेषः–चा०] । " तद्धितार्थ–" इत्यादिना समासः । समाहारस्यैकत्वादेकवचनम् । " राजाहःसखिभ्यष्टच्" इति टच् । " रात्राह्नाहाः पुंसि " इति पुंवत् । ततस्तसिल् । तस्माद्दशाहतः परे ऊर्ध्वं कर्तव्या महर्द्धयो महासमृद्धयः [भूरिदक्षिणाविषय एकादशाहादिश्राद्धादयः–चा० सु०] विधयः क्रियाः पुरः पुर्या उपवन उद्यान एव समापिताः संपूर्णमनुष्ठिताः । [विद्वान् क्षत्रियश्चदशाह " इति विष्णुस्मृतिः–हे०] । दशाहतः इत्यत्र " विप्रः शुध्येद्दशाहेन द्वादशाहेन भूमिपः वैश्यः पञ्चदशाहेन शुध्यति " इति मनुवचनविरोधो नाशङ्कनीयः । तस्य निर्गुणक्षत्रियविषयत्वात् गुणवत्क्षत्रियस्य तु दशाहेन शुद्धिमाह पराशरः– " क्षत्रियस्तु दशाहेन स्वधर्मनिरतः शुचिः " इति (एतदेव चारित्रवर्द्धनः)। सूच्यतेऽस्यापि गुणवत्त्वं विदुषेत्यनेन ।

(७४.) तयेन्दुमत्या विना । [निष्प्रभत्वात्–हे०] क्षणदाया रात्रेरपायेऽपगमे यः शशाङ्कश्चन्द्रः स इव दृश्यत इति क्षणदापायशशांकदर्शनः । प्रातःकालीकचन्द्र इव दृश्यमान इत्यर्थः । दृश्यत इति कर्मार्थे ल्युट् । सोऽजः पौरवधूमुखाश्रुषु स्वशुचः स्वशोकस्य परिवाहं

(72.) He did not consign his body to fire with his queen not because he cared for his life but because he apprehended the scandal that the king, knowing as he was, died after his wife for grief.

(73.) Then after ten days the ceremonies attended with great magnificence in honour of his wife whose virtues were the only remains were finished by that learned prince in the very garden of the capital.

स विवेश पुरीं तया विना क्षणदापायशशाङ्कदर्शनः।
परिवाहमिवावलोकयन्स्वशुचः पौरवधूमुखाश्रुषु ॥ ७४ ॥
अथ तं सवनाय दीक्षितः प्रणिधानाद्गुरुराश्रमस्थितः।
अभिषङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ॥ ७५ ॥
असमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणम्।
न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं पथश्च्युतम् ॥ ७६ ॥
मयि तस्य सुवृत्त वर्तते लघुसंदेशपदा सरस्वती।
शृणु विश्रुतसत्त्वसार तां हृदि चैनामुपधातुमर्हसि ॥ ७७ ॥

जलोच्छ्वासमिवावलोकयन् [तस्य शोकस्य तत्र भागीकृतत्वात्–हे०]। " जलोच्छ्वासाः परीवाहाः " इत्यमरः। स्वदुःखपूरातिशयमिव पश्यन्पुरा (अयोध्यां) विवेश। वधूग्रहणात्तस्यामिन्दुमत्यां सख्याभिमानादजसमानदुःखसूचकपरीवाहोक्तिर्निर्वहति।

(७५.) अथ सवनाय यागाय दीक्षितो गुरुर्वशिष्ठ आश्रमे स्वकीयाश्रमे स्थितः सन्। तमजमभिषङ्गजडं दुःखमोहितं प्रणिधानाच्चित्तैकाग्र्याद्विजज्ञिवाञ्ज्ञातवान्। " क्वसुश्च " इति क्वसुप्रत्ययः। इति वक्ष्यमाणप्रकारेण शिष्येण [अन्तेवासिना वामदेवेन–हे०] अन्वबोधयत्किल (समाश्वासयत्किल)। बुधेर्ण्यन्ताण्णिचि लङ्। [स्वयं गृहीतदीक्षत्वाद्वशिष्ठः शिष्यं प्राहिणोदित्यर्थः–चा०]। वशिष्ठशिष्य आह—

(७६.) यतो हेतोर्मुनिरसमाप्तविधिरसमाप्तक्रतुस्ततस्तव तापकारणं दुःखहेतुं कलत्रनाशरूपं विद्वाञ्जानन्नपि। " विदेः शतुर्वसुः " इति वस्वादेशः। " न लोक–" इत्यादिना षष्ठीप्रतिषेधः। पथश्च्युतं स्वभावाद्भ्रष्टं भवन्तं प्रकृतौ स्वभावे स्थापयितुम्। समाश्वासयितुमित्यर्थः। स्वयं नोपस्थितो नागतः [दीक्षितेन न किल गन्तव्यमिति–हे० विहितसंकल्पः क्वापि न व्रजेदिति–चा० सु०]।

(७७.) हे सुवृत्त सदाचार। संदिश्यत इति संदेशः संदेष्टव्यार्थः। तस्य पदानि वाच-

(74.) Looking like the moon at the close of night, he entered his capital without her, beholding as it were the outburst of his sorrow in the tears on the faces of the women of the city.

(75.) It is said that his preceptor who had then undergone an initiative ceremony of a sacrifice and who therefore remained in his hermitage, having known him, by reason of his profound religious meditation, to be stupefied by affliction, exhorted him thus through his disciple

(76.) Knowing as he does the cause of your distress, the sage has not come personally to restore you to your natural state from which you have fallen, because he has not yet finished the rites of the sacrifice.

(77.) O thou of noble character, his words brief in their message are confided to me. Hear them, O thou of a well known powerful energy, worthy as thou art to treasure them in thy heart.

30

पुरुषस्य पदेष्वजन्मनः समतीतं च भवच्च भावि च ।
स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ॥ ७८ ॥
चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा ।
प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम् ॥ ७९ ॥
स तपःप्रतिबन्धमन्युना प्रमुखाविष्कृतचारुविभ्रमाम् ।
अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा भुवि ॥ ८० ॥

कानि लघूनि संक्षिप्तानि संदेशपदानि यस्यां सा लघुसंदेशपदा तस्य मुनेः सरस्वती वाङ्मयि वर्तते । हे विश्रुतसत्त्वसार प्रख्यातधैर्यातिशय [विश्रुतं विख्यातं सत्त्वं सारो यस्य तस्य संबोधनं । हर्षविषादयोरेकरूपा बुद्धिः सत्त्वं–हे०] तां सरस्वतीं शृणु । एनां वाचं हृदुपधातुं धर्तुं चार्हसि । वक्ष्यमाणार्थानुगुणं मुनेः सर्वज्ञत्वं तावदाह—

(७८.) अजन्मनः पुरुषस्य पुराणपुरुषस्य भगवतस्त्रिविक्रमस्य पदेषु विक्रमेषु । त्रिभुवनेष्वपीत्यर्थः । समतीत भूतं च भवद्वर्तमानं च भावि भविष्यच्चेति त्रितयं स मुनिर्निष्प्रतिघेनाप्रतिबन्धेन ज्ञानमयेन (ज्ञानरूपेण) चक्षुषा ज्ञानदृष्ट्या पश्यति हि । अतस्तदुक्तिषु न संशयितव्यमित्यर्थः [भुवनत्रये कालत्रयस्य वार्तां गुरुर्वशिष्ठो ज्ञानेन जानातीति भावः–सु०]।

(७९.) पुरा किल दुश्चरं तीव्रं तपश्चरतः (तपः कुर्वतः) तृणबिन्दोस्तृणबिन्दुनामकात्कस्माच्चित् [अत्रिवंश्यात्–हे०] राजर्षेः[स्वर्गराज्यहरणे–हे०] परिशङ्कितो भीतः। कर्तरि क्तः। "भीत्रार्थानां भयहेतुः" इत्यपादानात्पञ्चमी । हरिरिन्द्रः समाधिभेदिनीं तपोविघातिनीं (ध्यानप्रत्यूहकारिणीं) । (" समाधिर्नियमे ध्याने " इति विश्वः)। हरिणीं नाम सुराङ्गनाम् [यद्वा । हरिणीं सुवर्णप्रतिमां । अतितेजस्विनीमित्यर्थः । " हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या । त्रिषु पाण्डौ च हरिणः" इत्यमरः–हे०] अस्मै तृणबिन्दवे प्रजिघाय प्रेरितवान् ।

(८०.) स मुनिः । शमः शान्तिरेव वेला मर्यादा । तस्याः प्रलयोर्मिणा प्रलयकालतरंगेण शमविघातकेनेत्यर्थः [कल्पान्तकालकल्लोलसदृशेन–चा० सु०] । " अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि" इत्यमरः । तपसः प्रतिबन्धेन विघ्नेन यो मन्युः क्रोधस्तेन हे-

---

(78.) Indeed with his unobstructed eye of knowledge, he sees the triad,—the past, the present and the future—in the (three) steps of the unborn person the Eternal Being (i e. in the three worlds.)

(79.) In olden times, it is said, Hari (Indra), afraid of the sage *Trina*bindu who was practising a rigourously hard penance, sent against him a celestial damsel by name Harini capable of interrupting his profound meditation.

(80.) That sage, through rage which arose from the interruption to his penance, and which was a destructive wave breaking the barriers of the coast of peacefulness, cursed her, who manifested before him her bewitching graces of love, thus " Be thou a woman on earth. "

भगवन्परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे ।
इति चोपनतां क्षितिस्पृशं कृतवाना सुरपुष्पदर्शनात् ॥ ८१ ॥
क्रथकैशिकवंशसंभवा तव भूत्वा महिषी चिराय सा ।
उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणम् ॥ ८२ ॥
तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता ।
वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः ॥ ८३ ॥

तुना । प्रमुखेऽग्र आविष्कृतचारुविभ्रमां [यद्वा । प्रकृष्टेन चारुणा मुखेन आविष्कृतः प्रकटीकृतः चारुः मनोहरो विभ्रमो विलासो यया तां तथोक्तां–हे०] प्रकाशितमनोहरविलासां तां हरिणीं भुवि भूलोके मानुषी मनुष्यस्त्री भवेत्यशपच्छशाप ।

(८१.) हे भगवन्महर्षे । अयं जनः (मल्लक्षणो जनः) । परोऽस्यास्तीति स्वामित्वेन परवान्पराधीनः । [शक्राधीन इत्यर्थः–चा० सु०] । अयमित्यात्मनिर्देशः । अहं पराधीनेत्यर्थः । मे मम प्रतिकूलाचरितम् (विरुद्धाचरणं) अपराधं क्षमस्वेत्यनेन प्रकारेणोपनतां शरणागतां च हरिणीमा सुरपुष्पदर्शनात्सुरपुष्पदर्शनपर्यन्तम् । क्षितिं स्पृशतीति क्षितिस्पृक्तां क्षितिस्पृशं (भूमिस्थां) मानुषीं कृतवानकरोत् । दिव्यपुष्पदर्शनं शापावधिरित्यनुगृहीतवानित्यर्थः ।

(८२.) क्रथकैशिकानां (विदर्भाणां) राज्ञां वंशे (अन्वये) संभवः (जन्म) यस्याः सा हरिणी तव महिषी [पट्टराज्ञी–चा०] अभिषिक्ता स्त्री । " कृताभिषेका महिषी " इत्यमरः । भूत्वा चिराय दिवः स्वर्गाच्च्युतं पतितं शापनिवृत्तिकारणं सुरपुष्परूपमुपलब्धवती विवशा । अभूदिति शेषः । मृतेत्यर्थः ।

(८३.) तत्तस्मात्तस्या अपायचिन्तयालम् [नाशचिन्तयालं–हे० चा०] । तस्या मरणं न चिन्त्यमित्यर्थः । निषेधक्रियां प्रति करणत्वाच्चिन्तयेति तृतीया । कुतो न चिन्त्यमत आह —उत्पत्तिमतां जन्मवतां (प्राणिनां) विपद्विपत्तिः (मृतिरूपा) उपस्थिता सिद्धा [नित्या –हे० चा० सु०] । जातस्य हि ध्रुवो मृत्युरित्यर्थः । तथापि कलत्ररहितस्य किं जीवितेन । तत्राह—त्वयेयं वसुधा भूमिरवेक्ष्यतां पाल्यताम् । हि यस्मान्नृपा वसुमत्या पृथिव्या कलत्रिणः कलत्रवन्तः [राज्ञां भूरेव प्रिया–चा०] । अतो न शोचितव्यमित्यर्थः ।

(81.) " Venerable sir ! this person (myself) is dependent ; forgive me therefore my offensive action "; her, thus humbled, he made an earthly being until her seeing the celestial flowers.

(82.) Born in the family of the Krathakais'ikas, she having become your crowned queen for a long time obtained the cause of the cessation of her curse fallen from the sky and died.

(83.) Therefore cease to think of her death, for the things that are produced have destruction at hand. Let this Earth be now protected by you, for kings have a wife in the Earth.

उदये मदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्तया ।
मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाश्यताम् ॥ ८४ ॥
रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते ।
परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम् ॥ ८५ ॥
अपशोकमनाः कुटुम्बिनीमनुगृह्णीष्व निवापदत्तिभिः ।
स्वजनाश्रु किलातिसंततं दहति प्रेतमिति प्रचक्षते ॥ ८६ ॥

(८४.) उदयेऽभ्युदये सति मदेन यद्वाच्यं निन्दादुःखं तदुज्झता परिहरता सत्यपि मदहेतावमाद्यता त्वया यदात्मवत्तयाविकृतचित्ततया लिङ्गेन श्रुतं शास्त्रम् । तज्जनितं ज्ञानमिति यावत् । आविष्कृतं प्रकाशितम् । तच्छ्रुतं मनसो ज्वरे संताप उपस्थिते प्राप्तेऽक्लीबतया धैर्येण लिङ्गेन पुनः प्रकाश्यताम् [राज्याभिगमने यत्तवापयशो नासीत्तेन तच्छ्रुतं प्रादुर्भूतं । संप्रति त्वदधिगतदुःखपरित्यागेन तच्छ्रुतमत्यंतं प्रकटय–चा० सु०] । विदुषा सर्वास्ववस्थास्वपि धीरेण भवितव्यमित्यर्थः । इतोऽपि न रोदितव्यमित्याह—

(८५.) रुदता भवता सा कुत एव लभ्यते । न लभ्यत एव । अनुम्रियत इत्यनुमृत् । क्विप् । तेनानुमृतानुमृतवतापि भवता पुनर्न लभ्यते । कथं न लभ्यत इत्याह—परलोकजुषां लोकान्तरभाजां देहिनाम् । गम्यन्त इति गतयो गम्यस्थानानि स्वकर्मभिः पूर्वाचरितपुण्यपापैर्भिन्नपथाः पृथक्कृतमार्गा हि [केचिन्मर्त्याः केचित्पशवः केचिद्देवाः केचिद्रक्षांसीति–चा० सु०]। परत्रापि स्वस्वधर्मानुरूपफलभोगाय भिन्नदेहगमनान्न मृतेनापि लभ्यत इत्यर्थः ।

(८६.) किंत्वपशोकमनाः (अपगतः शोकः यस्मात्तदपशोकं अपशोकं गतदुःखं मनः यस्य सः) निर्दुःखचित्तः सन्कुटुम्बिनीं पत्नीं निवापदत्तिभिः पिण्डोदकादिदानैरनुगृह्णीष्व । तर्पयेत्यर्थः । अन्यथा दोषमाह–अतिसंततमविच्छिन्नं स्वजनानां बन्धूनाम् । “ बन्धुस्वस्वजनाः समाः ” इत्यमरः । अश्रु । कर्तृ । प्रेतं मृतं दहतीति प्रचक्षते मन्वादयः किल । अत्र

(84.) In prosperity by your self-restraint you exhibited (the effects of) your sacred knowledge by avoiding any thing censurable arising from arrogance ; now that distress has befallen your soul, exhibit the same again by your fortitude.

(85.) How can she be obtained again by you thus lamenting (for her) ? Not, even if she were followed by you in death (even if you die after her you will not be able to reclaim her again, much less by lamentations). For the ways of men who enjoy the other world lie along different roads according to their respective actions.

(86.) Relieving your mind of sorrow do you favour your wife with offerings of water. For it is said with certainty that the very incessant tears of relatives burn (torment) the departed soul,

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ ॥ ८७ ॥
अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् ।
स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ॥ ८८ ॥
स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा ।
विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ॥ ८९ ॥

याज्ञवल्क्यः—" श्लेष्माश्रु बन्धुभिर्मुक्तं प्रेतो भुंक्ते यतोऽवशः । अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः " इति ।

(८७.) शरीरिणां (देहभाजां) मरणं[नित्यत्वात्–हे०चा०] प्रकृतिः स्वभावः। ध्रुवमित्यर्थः ।जीवितं विकृतिर्यादृच्छिकं [विकारः–हे०चा०सु०] बुधैरुच्यते । एवं स्थिते जन्तुः प्राणी क्षणमपि ।अत्यन्तसंयोगे द्वितीया । श्वसञ्जीवन्नवतिष्ठते यद्यसौ क्षणजीवी लाभवान्ननु [पिण्डस्य विनाशित्वात्–हे०]। जीवने यथालाभं संतोष्टव्यम् । अलभ्यलाभात् । मरणे तु न शोचितव्यम् । अस्य स्वाभाव्यादिति भावः [अत्र मरणशब्देन स्थूलशरीरत्यागोऽवगन्तव्यः–चा०]।

(८८.) मूढचेतनो भ्रान्तबुद्धिः. प्रियनाशमिष्टनाशं हृद्यर्पितं निखातं शल्यं शंकुमवगच्छति मन्यते । स्थिरधीर्विद्वांस्तु तदेव शल्यं समुद्धृतमुत्खातं मन्यते । प्रियनाशे सतीति शेषः । कुतः । कुशलद्वारतया । प्रियनाशस्य मोक्षोपायतयेत्यर्थः । विषयलाभविनाशयोर्यथाक्रमं हिताहितसाधनत्वाभिमानः पामराणाम् । विपरीतं तु विपश्चितामिति भावः [न चेष्टजनविरहसन्तापो युक्त एवेत्याह–हे०] ।

(८९.) स्वस्य शरीरशरीरिणौ देहात्मानावपि यदा यतः श्रुतौ श्रुत्यवगतौ संयोगविपर्ययौ संयोगवियोगौ ययोस्तौ तथोक्तौ । तदा बाह्यैर्विषयैः पुत्रमित्रकलत्रादिभिः (विषयैः सह) विरहो विपश्चितं विद्वांसं किमिवानुतापयेत्त्वं वद [सदासंयुक्तयोर्देहात्मनोरपि वियोगोऽवश्यंभावी किं पुनर्बाह्यानामन्येषामिति । उक्तञ्च । " सहजीवितयोर्नास्ति सम्बन्धः कायजीवयोः पुत्रमित्रकलत्रेषु सम्बन्धः केन हेतुना " इति–हे०।" यस्यास्ति नैक्यं वपुषापि सार्द्धं

(87.) Wise men say that death is but the nature of embodied souls, and life is a mere change ; if a creature remains breathing even for a moment, he is assuredly a gainer.

(88.) The stupid-minded consider the loss of a dear person as a dart fixed in the heart, but the firm-minded regard the same as a dart extracted on account of its serving as a door leading to blessedness.

(89.) Since the connection and separation of one's own body and soul are so well known, tell me why separation from external objects should at all destress a wise man ?

न पृथग्जनवच्छुचो वशं वशिनामुत्तम गन्तुमर्हसि ।
द्रुमसानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः ॥ ९० ॥
स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने प्रतियातमिवान्तिकमस्य गुरोः ॥ ९१ ॥
तेनाष्टौ परिगमिताः समाः कथंचिद्बालत्वादवितथसूनृतेन सूनोः ।
सादृश्यप्रतिकृतिदर्शनैः प्रियायाः स्वप्नेषु क्षणिकसमागमोत्सवैश्च ॥ ९२॥

तस्यास्ति किं पुत्रकलत्रमित्रैः । पृथक् च ते चर्मणि रोमकूपाः कुतो हि तिष्ठन्ति शरीरमध्ये " इति–चा०] । न किंचिदित्यर्थः । अथवा स्वशब्दस्य शरीरेणैव संबन्धः ।

(९०.) हे वशिनामुत्तम जितेन्द्रियवर्य । पृथग्जनवत्पामरजनवत् । ("पृथग्जनः स्मृतो नीचे मूर्खे च " इति विश्वः) । शुचः शोकस्य वशं (अधीनतां) गन्तुं नार्हसि । तथा हि । द्रुमसानुमतां तरुशिखरिणां किमन्तरं को विशेषः । वायौ सति द्वितयेऽपि द्विप्रकारा अपि [पवनेन वृक्षाः किल कम्पन्ते न गिरयः तथा नीचाः शोकेनाभिभूयन्ते न तु त्वादृशाः अतः शोकं दूरीकुरु इति भावः–सु०] । "प्रथमचरम-" इत्यादिना जसि विभाषया सर्वनामसंज्ञा । ते द्रुमसानुमन्तश्चलाश्चञ्चला यदि । सानुमतामपि चलने द्रुमवत्तेषामप्यचलसंज्ञा न स्यादित्यर्थः ।

(९१.) सोऽज उदारमतेर्विनेतुर्गुरोर्वशिष्ठस्य वचस्तच्छिष्यमुखेरितं तथेति प्रतिगृह्याङ्गीकृत्य मुनिं वशिष्ठशिष्यं [वामदेवं–हे०] विससर्ज प्रेषयामास । किंतु तद्वचः शोकघने दुःखसान्द्रेऽस्याजस्य हृद्यलब्धपदमप्राप्तावकाशं सद्गुरोर्वशिष्ठस्यान्तिकं प्रतियातमिव प्रतिनिवृत्तं किमु । इत्युत्प्रेक्षा । तोटकवृत्तमेतत्—"इह तोटकमम्बुधिसैः प्रथितम्" इति तल्लक्षणम् ।

(९२.) अवितथं यथार्थं सूनृतं प्रियवचनं यस्य तेनाजेन । सूनोः पुत्रस्य बालत्वात् । राज्याक्षमत्वादित्यर्थः । प्रियाया इन्दुमत्याः सादृश्यं वस्त्वन्तरगतमाकारसाम्यम् । प्रतिकृतिश्चित्रम् । तयोर्दर्शनैः स्वप्नेषु क्षणिकाः क्षणभङ्गुरा ये समागमोत्सवास्तैश्च । कथंचित्कृच्छ्रेण । अष्टौ समा वत्सराः । " संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः "

(90.) O thou, the best of the self-controlled, it is not proper on thy part to become a prey to sorrow like other people ; what difference is there between the trees and the mountains if even both of them are moveable by the wind ?

(91.) With the words "be it so", he, having accepted the words of his noble-minded instructor (Vámadeva by name), dismissed the sage ; but the advice, not having obtained a (firm) footing in his heart, filled with grief, returned, as it were, to his preceptor.

(92.) On account of the childhood of his son, by him whose words were agreeable and true, were passed with great difficulty eight years with the sight of the exact image of his beloved (in his son) and with the pleasures of her momentary company in dreams,

तस्य प्रसह्य हृदयं किल शोकशङ्कुः
प्लक्षप्ररोह इव सौधतलं बिभेद ।
प्राणान्तहेतुमपि तं भिषजामसाध्यं
लाभं प्रियानुगमने त्वरया स मेने ॥ ९३ ॥
सम्यग्विनीतमथ वर्महरं कुमार-
मादिश्य रक्षणविधौ विधिवत्प्रजानाम् ।
रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः
प्रायोपवेशनमतिर्नृपतिर्बभूव ॥ ९४ ॥

इत्यमरः । परिगमिता अतिवाहिताः । उक्तं च—" वियोगावस्थासु प्रियजनसदृक्षानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतीकारः कामव्यथितमनसां कोऽपि कथितः" इति । प्रकृते सादृश्यादित्रितयाभिधानं तदङ्गस्पृष्टपदार्थस्पृष्टेरप्युपलक्षणम् [स्वप्नस्वरूपं तु जाग्रद्दशायामदृष्टवशादात्मा सुखदुःखभोगं भुङ्क्ते । तथा स्वप्नावस्थायामपि पूर्वकर्मवशादात्मा नाडीतो निर्गत्य तत्र देशे नवं देहं निर्माय पूर्वं शरीरं तत्रैव देशे प्राणवायुना रक्षन् स्वप्नभोगान्भुंक्त्वा पुनरपि पूर्वशरीरे प्रविशति । तथार्थे शातपथा श्रुतिः । " प्राणेन रक्षन्नपरं कुलायं । बहिः कुलायादमृतश्चरित्वा । स ईयते अमृतो यत्र कामः । हिरण्मयः पूरुष एकहंसः । स्वप्नान्त उच्चावचमीयमानः । रूपाणिदेवः कुरुते बहूनि" इति–हे०] महर्षिणीवृत्तमेतत् ।

(९३.) शोक एव शङ्कुः कीलः । " शङ्कुः कीले शिवेऽस्त्रे च " इति विश्वः । तस्याजस्य हृदयम् । प्लक्षप्ररोहः (प्लक्षस्याङ्कुरः) सौधतलमिव [" प्लक्षस्याधोगच्छतो मूलैः " इति क्षीरस्वामी–हे०] । प्रसह्य बलात्किल बिभेद । सोऽजः प्राणान्तहेतुं मरणकारणमपि भिषजाम् (वैद्यानां) साध्यमप्रतिसमाधेयं । (विभाषायामिति कर्त्तरि षष्ठी) । तं शोकशङ्कुं रोगपर्यवसितं प्रियाया अनुगमने त्वरयोत्कण्ठया लाभं मेने । तद्विरहस्यातिदुःसहत्वात्तत्प्राप्तिकारणं मरणमेव वरमित्यमन्यतेत्यर्थः ।

(९४.) अथ नृपतिरजः सम्यग्विनीतं निसर्गसंस्काराभ्यां विनयवन्तं वर्म हरतीति व-

---

(93.) It is said that the dart of grief broke his heart forcibly as the off-shoot of a figtree does the terrace of a palace. In his haste to follow his beloved, he considered even that cause of the end of his life incurable by physicians, as a gain.

(94.) Then having charged the prince who was well educated and who was able to wear an armour, with the duty of protecting his subjects as enjoined by rules, the king desirous of giving up his residence in a body pervaded by disease, became intent on starving himself to death.

तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।
पूर्वाकाराधिकतररुचा संगतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥ ९५ ॥

मेहरः कवचधारणार्हवयस्कः । " वयसि च " इत्यच्प्रत्ययः । तं कुमारं दशरथं प्रजानां रक्षणविधौ राज्ये विधिवद्विध्यर्हम् । यथाशास्त्रमित्यर्थः । " तदर्हम् " इति वतिप्रत्ययः । आदिश्य नियुज्य रोगेणोपसृष्टाया व्याप्तायास्तनोः शरीरस्य दुर्वसतिं दुःखावस्थितिं मुमुक्षुर्जिहासुः सन् । प्रायोपवेशनेऽनशनावस्थाने मतिर्यस्य स बभूव । " प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपि " इति विश्वः । अत्र पुराणवचनम्—" समासक्तो भवेद्यस्तु पातकैर्महदादिभिः । दुश्चिकित्स्यैर्महारोगैः पीडितो वा भवेत्तु यः । स्वयं देहविनाशस्य काले प्राप्ते महामतिः । आब्रह्माणं वा स्वर्गादिमहाफलजिगीषया । प्रविशेज्ज्वलनं दीप्तं कुर्यादनशनं तथा । एतेषामधिकारोऽस्ति नान्येषां सर्वजन्तुषु । नराणामथ नारीणां सर्ववर्णेषु सर्वदा " इति । अनयोर्वसन्ततिलकाच्छन्दः । तल्लक्षणम्—" उक्ता वसन्ततिलका तभजा जगौ गः " इति ।

(९९.) असावजो जह्नुकन्यासरय्वोस्तोयानां जलानां व्यतिकरेण संभेदेन भवे तीर्थे गङ्गासरयूसंगमे देहत्यागात्सद्य एवामरगणनायां लेख्यं लेखनम् । "तयोरेव कृत्यक्तखलर्थाः" इति भावार्थे ण्यत्प्रत्ययः । आसाद्य प्राप्य । [आदित्यत्वं प्राप्येत्यर्थः—हे०] । पूर्वस्मादाकारादधिकतरा रुग्यस्यास्तया कान्तया रमण्या संगतः सन् । नन्दनस्येन्द्रोद्यानस्याभ्यन्तरेष्वन्तर्वर्तिषु लीलागारेषु क्रीडाभवनेषु पुनररमत [चिक्रीड । "मरणात्प्रागवस्थापि मरणं मुनिनोदितं । शृङ्गारे मरणादूर्ध्वं पुनर्योगो विधीयते " इति काव्योपदेशे—हे०] । " यथाकथंचित्तीर्थेऽस्मिन्देहत्यागं करोति यः । तस्यात्मघातदोषो न प्राप्नुयादीप्सितान्यपि " इति स्कान्दे । मन्दाक्रान्ताच्छन्दः । तल्लक्षणम्—" मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् " इति ।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये अजविलापो नामाष्टमः सर्गः ।

(95.) By abandoning his body at the sacred place formed by the confluence of the waters of the daughter of Jahnu and the Sarayú and having immediately obtained an enlisting in the number of the immortals, he, being united to his wife now of a loveliness surpassing her former figure, sported again in the pleasure-houses within the gardens of the Nandana forest.

नवमः सर्गः ।

पितुरनन्तरमुत्तरकोशलान्समधिगम्य समाधिजितेन्द्रियः ।
दशरथः प्रशशास महारथो यमवतामवतां च धुरि स्थितः ॥ १ ॥
अधिगतं विधिवद्यदपालयत्प्रकृतिमण्डलमात्मकुलोचितम् ।
अभवदस्य ततो गुणवत्तरं सनगरं नगररन्ध्रकरौजसः ॥ २ ॥

एकलोचनमेकार्धे सार्धलोचनमन्यतः ।
नीलार्धे नीलकण्ठार्धे महः किमपि मन्महे ॥

(१.) [इदानीं यमकं दर्शयिष्यन् दशरथव्यापारं वर्णयति-हे०] समाधिना संयमेन [चित्तैकाग्र्येण-हे० धर्मार्थकामानामेकरूपतया-व० नियमेन-चा०] जितेन्द्रियः [नृपतेर्नीतिशास्त्रानुसारेण ।" भवन्ति ज्वलिता लक्ष्मीः कीर्तयश्च नभःस्पृशः " इति कामन्दकः-हे०] । " समाधिर्नियमे ध्याने " इति कोषः । यमवतां (यमा विद्यन्ते येषां तेषां तथोक्तानां) संयमिनां [" ब्रह्मचर्यं दया क्षान्तिर्दानं सत्यमकल्पता । अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः " इति याज्ञवल्क्यः-हे०। " अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहा " इत्यादयो यमाः-चा० सु० व०] अवतां रक्षतां राज्ञां च धुर्यग्रे स्थितो महारथः । " एको दश सहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते" ["धनुर्वेदस्य तत्त्वज्ञः सर्वशास्त्रविशारदः सहस्रं योधयत्येकः स महारथ उच्यते" । "महारथाद्दशगुणो विज्ञेयोऽतिरथो बुधैः"-हे० व०] इति । दशरथः पितुः (अजस्य) अनन्तरमुत्तरकोशलाञ्जनपदान्समधिगम्य (संप्राप्य) प्रशशास [पर्यपालयत्। लब्धपालनं हि राजधर्मः-हे०] । अत्र मनुः—" क्षत्रियस्य परो धर्मः प्रजानां परिपालनम् " इति ।[" स्यात्पादपदवर्णानामावृत्तिः संयुतायुता । यमकं भिन्नवाच्यानामादिमध्यान्तगोचरं " इति वाग्भटः-हे० चा०] । द्रुतविलम्बितमेतद्वृत्तम् । तल्लक्षणम्—" द्रुतविलम्बितमाह नभौ भरौ " इति ।

(२.) अधिगतं प्राप्तमात्मकुलोचितं स्वकुलागतं सनगरं नगरजनसहितं प्रकृतिमण्डलं

(1.) After his father, Das'aratha, who had conquered his senses by abstract meditation, who was a great chariot-warrior, and who stood at the head both of devotees and protectors, ruled over the Uttarakos'alas after having obtained their possession.

(2.) Since he protected the circle of provinces inherited from his own ancestors together with the capital, as enjoined by the S'ástras; it (the circle of provinces and the capital) became more excellent to (favourably inclined towards) him than before, whose valour was equal to that of Kumara, the render of the Krauncha Mountain.

उभयमेव वदन्ति मनीषिणः समयवर्षितया कृतकर्मणाम् ।
बलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदण्डधरान्वयम् ॥ ३ ॥
जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः ।
क्षितिरभूत्फलवत्यजनन्दने शमरतेऽमरतेजसि पार्थिवे ॥ ४ ॥

जानपदमण्डलम् । अत्र प्रकृतिशब्देन प्रजामात्रवाचिना नगरशब्दयोगाद्ब्राह्मणवलीवर्दन्यायेन जानपदमात्रमुच्यते ["स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च। सप्तांगानि प्रकृतयः पौराणां श्रेणयोपि च"–हे०] यद्यस्माद्विधिवद्यथाशास्त्रमपालयत् । ततो हेतोः। रन्ध्रं करोतीति रन्ध्रकरः। रन्ध्रहेतुरित्यर्थः। "कृञो हेतुताच्छील्यानुलोम्येषु" इति टप्रत्ययः। नगस्य रन्ध्रकरो नगरन्ध्रकरः कुमारः [भार्गवो वा–हे० चा० सु० व०]। "कुमारः क्रौञ्चदारणः" इत्यमरः ["हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रं" इति मेघदूते–हे०]। तदोजसस्तत्तुल्यबलस्यास्य दशरथस्य गुणवत्तरं [गुणाः दाक्षिण्यादयस्तैरधिकं–चा०] अभवत् । तत्पौरजानपदमण्डलं तस्मिन्नतीवासक्तमभूदित्यर्थः ।

(३.) मनस ईषिणो मनीषिणो विद्वांसः । पृषोदरादित्वात्साधुः । बलनिषूदनं [बलं दैत्यविशेषं निषूदयति मारयतीति तं तथोक्तं–हे०] इन्द्रम् । ("बलो हलायुधे दैत्यभेदे बलिनि वायसे" इति विश्वः) । दण्डस्य धरो राजा मनुरिति यो दण्डधरः स एवान्वयः कूटस्थो यस्य तमर्थपतिं दशरथं चेत्युभयमेव । समयेऽवसरे जलं धनं च वर्षतीति समयवर्षी। तस्य भावः समयवर्षिता । तया हेतुना कृतकर्मणां स्वकर्मकारिणाम् । नुदतीति नुदम् । "इगुपधज्ञाप्रीकिरः कः" इति कप्रत्ययः । श्रमस्य नुदं श्रमनुदम् ["अनुदात्तेतश्च" इति युचि प्राप्ते "सूददीपदीक्षश्च" इति प्रतिषिद्धे कथं मधुसूदनः बलनिषूदनः। अनित्योयं द्वन्द्वप्रतिषेधः। प्रतिषेधे इति योगविभागाद्विज्ञायते । अथवा । नंद्यादिषु मधुसूदनादयो वक्ष्यन्ते इति काशिकावृत्तौ–हे०]। क्विबन्तत्वे नपुंसकलिङ्गेनोभयशब्देन सामानाधिकरण्यं न स्यात् । इति वदन्ति [नृपः कृतकार्यस्य भृत्यादेरर्थदानेन खेदं निरस्यति इन्द्रोपि काले वर्षणात् कृतकर्मणां कर्षुकादीनां श्रमनुत् । यद्वा । कर्षुकादेः इन्द्रकृतयज्ञादेः श्रमनुदिन्द्रः–हे० चा० सु०] ।

(४.) शमरते शान्तिपरेऽमरतेजस्यजनन्दने दशरथे पार्थिवे पृथिव्या ईश्वरे सति ।

(3.) Wise men speak of two only as rewarding (lit: removing the toils) the labours of those who have done their own duty, by timely showers (of rains and of wealth) viz: the destroyer of the demon Bala and that Lord of wealth sprung from the family of the batoon-holder Manu.

(4.) When the king the son of Aja whose lustre (or valour) was like that of the immortals and who was in the full enjoyment of mental peace, was reigning, the earth became fruitful, no plague stepped into his country, what possibility then there was of ravages caused by the enemies (whence then could there be any defeat or disgrace from enemies) ?

दशदिगन्तजिता रघुणा यथा श्रियमपुष्यदजेन ततः परम् ।
तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमम् ॥ ५ ॥
समतया वसुवृष्टिविसर्जनैर्नियमनादसतां च नराधिपः ।
अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रुचा ॥ ६ ॥

" तस्येश्वरः " इत्यण्प्रत्ययः । जनपदे देशे गदो व्याधिः । "उपतापरोगव्याधिगदामयाः" इत्यमरः । पदं (स्थानं) नादधौ (न चकार)। न चक्रामेत्यर्थः । सपत्नजः शत्रुजन्योऽभिभवः कुत एव । असंभावित एवेत्यर्थः [दैवकृतस्य रोगाद्युपद्रवस्याभावे वैरिविहितो मानवोभिभवः कुतो भवेदिति भावः–चा० मु०] । क्षितिः फलवती (प्रशस्तफला) अभूच्च [इति दैवानुकूल्यं–हे० चा०] ।

(५.) मही । दशदिगन्ताञ्जितवानिति दशदिगन्तजित् ।["चतस्रः कीर्तयेद्वाष्टौ दश वा ककुभः क्वचित्" इति वाग्भट·–हे०]। तेन रघुणा यथा श्रियं कान्तिमपुष्यत्। ततः परं रघोरनन्तरमजेन च यथा श्रियमपुष्यत् । तथैवाहीनपराक्रमं अन्यूनविक्रमं (अहीनपौरुषं) न हीनः पराक्रमो यस्य तमन्यूनपराक्रमं [यद्वा । अहीनां सर्पाणां इनस्य शेषस्येव पराक्रमः पौरुषं यस्येति वा । " इनः स्वामिनि सूर्ये च तथैव विषयिण्यपि" इति विश्वप्रकाशः । यद्वा । अहीनेषु शूरेषु पराक्रमो यस्येति । यद्वा । " हि गतौ वृद्धौ च " । हिन्वन्ति भंगं प्राप्नुवन्ति रणे इति हयः न हयः अहयः राजानः तेषां इनाः प्रभवः तेषु पराक्रमो यस्य सः । यद्वा । अहः गरुडः अहिः सर्पः तयोः इनः स्वामी विष्णुः तस्य पराक्रमो यस्य सः। " अ कृष्णे विनतासूनौ अ विधातरि मन्मथे " इति अनेकार्थः । यद्वा । अहिः शेषः सर्पः इनः सूर्यः तयोः पराक्रम इव पराक्रमो यस्य सः । यद्वा । अहीनां इनः स्वामी शंभुः । तद्भूषणधारित्वात् । तस्येव पराक्रमो यस्येति । अहीनां इनाः स्वामिनः महासर्पाः तान् पिबतीत्यहीनपः गरुडः तस्येव रः तीक्ष्णः आक्रमो यस्येति वा । अहीनान् पान्तीति अहीनपाः महत्तराः तेषु रस्येव वह्नेरिव आक्रमो यस्येति वा–हे०] तं दशरथमिनं स्वामिनमधिगम्य पुनर्न बभाविति न । बभावेवेत्यर्थः । द्वौ नञौ प्रकृतमर्थं गमयतः ।

(६.) नराधिपो दशरथः समतया समवर्तित्वेन [समलोचनप्रतिपातेन–चा०] । मध्यस्थत्वेनेत्यर्थः । वसुवृष्टेर्धनवृष्टेर्विसर्जनैः (दानैः) । असतां दुष्टानां नियमनान्निग्रहाच्च

(5.) The Earth, as it had maintained its splendour by means of Raghu, the conquerer of the ten quarters, and after him by means of Aja, so now having obtained him for a Lord not inferior in valour, did not but shine just the same again.

(6.) The Lord of the people followed Yama in equal dealing (of justice) ; (followed) the Lord of the Punya-janas (Kubera) in raining showers of wealth (gifts) ; Varuna in chastising the wicked ; and the Sun before whom goes Aruna, by his splendour.

न मृगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु।
तमुदयाय न वा नवयौवना प्रियतमा यतमानमपाहरत् ॥ ७ ॥
न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि ।
न च सपत्नजनेष्वपि तेन वागपरुषा परुषाक्षरमीरिता ॥ ८ ॥

[निजमार्गस्थापनाच्च–चा०] । सवरुणौ वरुणसहितौ यमपुण्यजनेश्वरौ यमकुबेरौ यमकुबेरवरुणान्यथासंख्यमनुययावनुचकार [" भवेत्पुण्यजनो यक्षः " इति विश्वः–हे०] । रुचा तेजसारुणाग्रसरमरुणसारथिं सूर्यमनुययौ [समत्वेन यमं । वसुवृष्ट्या धनदं । रुचा रविं । असतां नियमनाद्वरुणं । वरुणो हि पाशसहस्रेणासतो नियमयति । तथा च श्रुतिः । " अनृते खलु वै क्रियमाणे वरुणो निगृह्णाति" इति–हे०] । तस्य व्यसनासक्तिर्नासीदित्याह—

(७.) उदयाय यतमानमभ्युदयार्थं व्याप्रियमाणं तं दशरथं मृगयाभिरतिराखेटव्यसनं नापाहरन्नाचकर्ष ।"आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम्" इत्यमरः। दुष्टमासमन्तादुदरमस्येति दुरोदरं द्यूतं च नापाहरत् । " दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम् " इत्यमरः । शशिनः प्रतिमा प्रतिबिम्बमाभरणं यस्य तन्मधु नापारहत् [शशिप्रतिमत्वं मद्यस्य प्रायेण रात्रौ सेवनात्–हे०चा०]। न वेति पदच्छेदः। वाशब्दः समुच्चये । नवयौवना नवं नूतनं यौवनं तारुण्यं यस्यास्तादृशी प्रियतमा वा स्त्री नापाहरत् । जाताविकवचनम् । अत्र मनुः— " पानमक्षः स्त्रियश्चेति मृगया च यथाक्रमम् । एतत्कष्टतमं विद्याच्चतुष्कं कामजे गुणे " इति [चत्वारि कामजान्येतानि व्यसनानि । क्रोधजानि त्रीणि एवं सप्त । " स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम् । महच्च दण्डपारुष्यमर्थदूषणमेव च" इति । क्रोधजान्यग्रे वक्ष्यति–हे०] ।

(८.) तेन राज्ञा प्रभवति प्रभौ सति [स्वामिनि–चा०] वासवेऽपि कृपणा दीना वाङ्नेरिता नोक्ता । परिहासकथास्वपि (हास्यवार्तास्वपि) वितथानृता वाङ्नेरिता । किंचापरुषा (अपगता रुट् क्रुध् यस्य तेन) रोषशून्येन तेन सपत्नजनेष्वपि शत्रुजनेष्वपि परुषाक्षरं निष्ठुराक्षरं यथा तथा वाङ्नेरिता [इति उत्कर्षातिशयोक्तिः–चा०] । किमुतान्यत्रेति । सर्वत्रापिशब्दार्थः । किंत्वदीना सत्या मधुरैव वागुक्तेति फलितार्थः ।

(९.) वसुधाधिपा राजानः । उद्वहतीत्युद्वहो नायकः । पचाद्यच् । रघूणामुद्वहो रघुनायकः [रघुपुत्रः । " उद्वहस्तनयः पोतः " इति धनंजयः–हे०] । तस्माद्रघुनायकादुदयं

(7.) Neither pleasure in hunting, nor gambling, nor yet wine ornamented with the reflection of the moon, nor his beloved in the bloom of her youth diverted him (from) striving for eminence (glory).

(8.) By him was not uttered a pitiful speech even before Vásava with his prowess (i. e. his Lord), nor a falsehood even in tales of mirth, nor any harsh expression (his nature) being far from angry (one), even to his enemeis.

उदयमस्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः ।
स हि निदेशमलङ्घयतामभूत्सुहृदयोहृदयः प्रतिगर्जताम् ॥ ९ ॥
अजयदेकरथेन स मेदिनीमुदधिनेमिमधिज्यशरासनः ।
जयमघोषयदस्य तु केवलं गजवती जवतीव्रहया चमूः ॥ १० ॥
अवनिमेकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः ।
विजयदुन्दुभितां ययुरर्णवा घनरवा नरवाहनसंपदः ॥ ११ ॥

वृद्धिम् । अस्तमयं नाशं च । इत्युभयमानशिरे लेभिरे । कुतः । हि यस्मात्स दशरथो निदेशमाज्ञामलङ्घयताम् । शोभनं हृदयमस्येति सुहृन्मित्रमभूत् । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः । प्रतिगर्जतां प्रतिस्पर्धिनाम् । अय इव हृदयं यस्येत्ययोहृदयः कठिनचित्तोऽभूत् । आज्ञाकारिणो रक्षति । अन्यान्मारयतीत्यर्थः [अर्थदूषणपारुष्ययोरभावः उक्तः । तथाकामन्दकः । " दूष्यस्य दूषणार्थं तु परित्यागो महीयसः । अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते । महत्स्वप्यपराधेषु दण्डं प्राणान्तिकं त्यजेत् । कृते राज्यापहारे तु तत्र दण्डः प्रशस्यते " इति । मनुना तु व्यसनानि अष्टादशोक्तानि । " मृगयाक्षा दिवास्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाघातः कामजो दशमो गुणः । पैशून्यं साहसं द्रोहमीर्ष्यासूयार्थदूषणं । वाग्दण्डजं च पारुष्यं क्रोधजोपि गुणोऽष्टकः" इति तत्र च सप्त कष्टतमानि । यथाह । "पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमं । एतत्कष्टतमं विद्याच्चतुष्कं कामजे गुणे । दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे । क्रोधजेपि गुणे विद्यात्कष्टमेतत्त्रिकं सदा " इति–हे०] । [इतः सप्तभिः श्लोकैर्दिग्विजयवर्णनं–हे० चा० सु०] ।

(१०.) अधिज्यशरासनः (ज्यामधिरूढं अधिज्यं शरासनं धनुर्यस्य) स दशरथ उदधिनेमिं समुद्रवेष्टनां मेदिनीमेकरथेनाजयत् । स्वयमेकरथेनाजैषीदित्यर्थः । [तर्हि किमर्थं सेनामगृहीदित्याह–हे० चा०] गजवती गजयुक्ता । जवेन तीव्रा जवाधिका हया यस्यां सा चमूस्त्वस्य नृपस्य केवलं जयमघोषयदप्रथयत् । स्वयमेकवीरस्य चमूरुपकरणमात्रमिति भावः ।

(११) वरूथिना गुप्तिमता । " वरूथो रथगुप्तिर्या तिरोधत्ते रथस्थितिम् " इति स-

---

(9.) The lords of the earth experienced both rise and set at the **hands** of (lit. from) the head of the family of Raghu, for he was kind hearted to those who did not transgress his commands but to his defiants he had a heart made of steel.

(10.) He, who had strung his bow, conquered the Earth circled by the ocean with but a single car (himself without any assistance), while his army with elephants and horses dashing with speed only proclaimed his victory.

(11.) To him conquering the Earth by means of a single car furnished with a protecting plank or ledge (having a fender) weilding a bow and possessing wealth like that of Kubera, the cloud-like thundering seas assuredly served as (lit. went to the state of) kettle drums of victory.

शमितपक्षबलः शतकोटिना शिखरिणां कुलिशेन पुरंदरः ।
स शरवृष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः ॥ १२ ॥
चरणयोर्नखरागसमृद्धिभिर्मुकुटरत्नमरीचिभिरस्पृशन् ।
नृपतयः शतशो मरुतो यथा शतमखं तमखण्डितपौरुषम् ॥ १३ ॥
निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन् ।
समनुकम्प्य सपत्नपरिग्रहाननलकानलकानवमां पुरीम् ॥ १४ ॥

ज्जनः । एकरथेनाद्वितीयरथेनावनिं (भुवं) जितवतो धनुर्भृतः (धनुर्धरस्य) नरवाहनसंपद. कुबेरतुल्यश्रीकस्य तस्य दशरथस्य घनरवा मेघसमघोषा अर्णवाः (समुद्राः) विजयदुन्दुभिता (जयपटहतां) किल ययुः (प्रापुः) । अर्णवान्तविजयीत्यर्थः ।

(१२.) पुरंदरः इन्द्रः शतकोटिना (शतं कोटयो धारा यस्य तेन) शतास्त्रिणा कुलिशेन वज्रेण शिखरिणां पर्वतानां शमितपक्षबलो विनाशितपक्षसारः [केचिद्वज्रस्य सहस्रकोटित्वमाहुः–हे० चा०] । नवतामरसाननो नवपङ्कजानन. (विकसितपद्मवदनः) । " पङ्केरुहं तामरसम्" इत्यमरः । स दशरथः शरवृष्टिमुचा (बाणवृष्टिमुचा) स्वनवता (शब्दवता) धनुषा द्विषां शमितो नाशितः पक्षः सहायो बलं च येन स तथोक्तः । "पक्षः सहायेऽपि " इत्यमरः । [" पक्षः पार्श्वगरुत्साध्यः सहायबलभित्तिषु " इति यादवः–हे०] ।

(१३.) शतशो नृपतयः (राजानः) अखण्डितपौरुषं (अप्रतिहतपराक्रमं) तं दशरथम् । मरुतो देवाः शतमखं यथा शतक्रतुमिव । नखरागेण चरणनखकान्त्या समृद्धिभिः सम्पादितर्द्धिभिर्मुकुटरत्नमरीचिभिः (मुकुटमणिकिरणैः) चरणयोरस्पृशन् । तं प्रणेमुरित्यर्थः ।

(१४.) स दशरथः सचिवैः संप्रयोजितैः कारिता बालसुतानामञ्जलयो यैस्तान् । स्वयमसंमुखागतानित्यर्थः । [भर्तृवधात्०चा०] अनलकान्हतभर्तृकतयालकसंस्कारशून्यान्सपत्नपरिग्रहाञ्छत्रुपत्नीः । " पत्नीपरिजनादानमूलशापाः परिग्रहाः " इत्यमरः । [राज्यादिकदानेन–चा०] समनुकम्प्यानुगृह्यालकानवमामलकानगरादन्यूनां [अलति भूषयति स्वस्थान-

(12.) The town-destroying god (Indra) humbled the force of the wings of mountains with his thunder-bolt having a hundred points ; while he wearing a face resembling a fresh lotus, destroyed the party force of his enemies by means of his twanging bow that sent forth showers of arrows.

(13.) The princes by hundreds touched him of undaunted valour on his feet with rays proceeding from the diamonds in their diadems brightened (or increased) by the red lustre on his toe-nails, as the gods (touched i. e. bowed to) him of one hundred sacrifices (Indra).

(14.) He returned from the shore of the great ocean to his capital not inferior to Alaka, having taken compassion on the wives of his enemies, destitute of hair decorations (or destitute of hair) and who had made their ministers to join the hands of their infant-sons (as a token of their supplication).

उपगतोऽपि च मण्डलनाभितामनुदितान्यसितातपवारणः ।
श्रियमवेक्ष्य स रन्ध्रचलामभूदनलसोऽनलसोमसमद्युतिः ॥ १५ ॥
तमपहाय ककुत्स्थकुलोद्भवं पुरुषमात्मभवं च पतिव्रता ।
नृपतिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु ॥ १६ ॥

मित्यलका-हे०,] पुरीमयोध्यां प्रति महार्णवानां रोधसः पर्यन्तान्निववृते (प्रत्याययौ) । शरणागतवत्सल इति भावः ।

(१५.) अनुदितमनुच्छ्रितमन्यत्स्वच्छत्रातिरिक्तं सितातपवारणं श्वेतच्छत्रं यस्य सः । अनलसोमयोरग्निचन्द्रयोः समे द्युती तेजःकान्ती यस्य स तथोक्तः । श्रियं लक्ष्मीं रन्ध्रेऽन्यथालस्यादिरूपे छले चलां चञ्चलामवेक्ष्यावलोक्य । श्रीर्हि केनचिन्मिषेण पुमांसं परिहरति । स दशरथो मण्डलस्य नाभितां द्वादशराजमण्डलस्य प्रधानमहीपतित्वमुपगतोऽपि (प्राप्तोपि) । चक्रवर्ती सन्नपीत्यर्थः । " अथ नाभिस्तु जन्त्वङ्गे यस्य संज्ञा प्रतारिका । रथचक्रस्य मध्यस्थपिण्डिकायां च ना पुनः । आद्यक्षत्रियभेदे तु मतो मुख्यमहीपतौ " इति केशवः । अनलसोऽप्रमत्तोऽभूत् । द्वादशराजमण्डलं तु कामन्दकेनोक्तम्--" अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् । तथारिमित्रमित्रं च विजिगीषोः पुरःसराः । पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम् । असारावनयोश्चैव विजिगीषोस्तु पृष्ठतः । अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वधे । मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः । अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः " इति । " अरिमित्रादयः पञ्च विजिगीषोः पुरःसराः । पार्ष्णिग्राहाक्रन्दपार्ष्णिग्राहासाराक्रन्दासाराः " इति पृष्ठतश्चत्वारः। मध्यमोदासीनौ द्वौ विजिगीषुरेक इत्येवं द्वादशराजमण्डलम् (एतदेव हेमाद्रिः) । तत्रोदासीनमध्यमोत्तरश्चक्रवर्त्ती । दशरथश्चैतादृगिति तात्पर्यार्थः।

(१६.) पत्यौ व्रतं नियमो यस्याः सा [पतिरेव व्रतं यस्याः सा–हे०] पतिव्रता [आलयत्वेन पाणिपद्मत्वेन वा कमलेन सह वर्तमाना-हे०] सकमला कमलहस्ता देवता लक्ष्मीरर्थिषु विषयेऽलाघवं लघुत्वरहितम् । अपराङ्मुखमित्यर्थः । ककुत्स्थकुलोद्भवं तं दशरथमात्मभवं पुरुषं [पुरि शरीरे उषतीति पुरुषः–हे० चा०] विष्णुं चापहाय त्यक्त्वा । अन्यं कं नृपतिमसेवत ।

(15.) Though got to the state of the navel of the cirle (of twelve princes) he, who was equal to fire and the moon in splendour and besides whose white umbrella no other white umbrella was raised (predominent on the earth), remained vigilant thinking that Fortune is apt to slip on (a slight) fault.

(16.) Except (lit. abandoning) the self-existent person and him sprung from the family of Kakutstha, (who were both) liberal (lit. not niggardly) to supplicants, what other prince could the devoted and virtuous Goddess of Wealth with a lotus in her hand, serve ?

तमलभन्त पतिं पतिदेवताः शिखरिणामिव सागरमापगाः ।
मगधकोशलकेकयशासिनां दुहितरोऽहितरोपितमार्गणम् ॥ १७ ॥
प्रियतमाभिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः ।
उपगतो विनिनीषुरिव प्रजा हरिहयोऽरिहयोगविचक्षणः ॥ १८ ॥

कमपि नासेवतेत्यर्थः [विष्णुः पृथ्वीपतिरिति व्रतभंगाभावः–हे०] । विष्णाविव विष्णुतुल्ये तस्मिन्नपि श्रीः स्थिराभूदित्यर्थः [ना देवाच्छोडषोत्पन्नं ना रुद्राद् रुद्रमर्चयेत् । नानृषिः कुरुते काव्यं । ना विष्णुः पृथिवीपतिः–हे०] ।

(१७.) पतिरेव देवता यासां ताः पतिदेवताः पतिव्रताः । मगधाश्च कोशलाश्च केकयाश्च ताञ्जनपदाञ्छासतीति तच्छासिनः । तेषां राज्ञां दुहितरः पुत्र्यः । सुमित्राकौशल्याकैकेय्य इत्यर्थः । अत्र क्रमो न विवक्षितः । अहितरोपितमार्गणं शत्रुनिखातशरम् । " कदम्बमार्गणशराः " इत्यमरः । तं दशरथं शिखरिणां क्ष्माभृतां दुहितरः । आ समन्तादपगच्छन्तीति । अथवा । " आपेनाप्संबन्धिना वेगेन गच्छन्तीत्यापगाः " इति क्षीरस्वामी । नद्यः सागरमिव । पतिं भर्तारमलभन्त प्रापुः ।

(१८.) अरीन्घ्नन्तीत्यरिहणो रिपुघ्नाः । हन्तेः क्विप् । "ब्रह्मभ्रूणवृत्रेषु क्विप्" । इति नियमस्य प्रायिकत्वात् । यथाह न्यासकारः—" प्रायिकश्चायं नियमः। क्वचिदन्यस्मिन्नप्युपपदे दृश्यते मधुहा [उक्तं च वामनेन । ब्रह्मादिषु हन्तेर्नियमाद्यसिद्धिः। केचित्तु ब्रह्मादिष्वेव हन्तेरकमेव नियममंगीकुर्वते । तमपि च भूते मन्यते। ततः कालसामान्यविवक्षायामरीन् हन्तीत्यरिहा रिपुहा मित्रहा इत्यादि सिध्यति हे० चा०] प्रायिकत्वं च वक्ष्यमाणस्य बहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यते " इति । तेषु योगेषूपायेषु विचक्षणो दक्षः । " योगः संनहनोपायध्यानसंगतियुक्तिषु " इत्यमरः । इन्द्रेऽपि योज्यमेतत् । असौ दशरथस्तिसृभिः प्रियतमाभिः सह । प्रजा विनिनीषुर्विनेतुमिच्छुस्तिसृभिः शक्तिभिः प्रभुमन्त्रोत्साहशक्तिभिरेव सह भुवमुपगतो हरिहय इन्द्र इव । बभौ ।

(१९.) महारथः स दशरथः संयुगमूर्ध्नि रणाङ्गणे (रणाग्रे) मघवत इन्द्रस्य सहायतां (साहाय्यं) प्रतिपद्य प्राप्य शरैः (बाणैः) अवधूतभयाः(अवधूतं नाशितं भयं यासां ताः) निवर्तितत्रासाः । [असुरहननान्निर्भया इत्यर्थः–हे० चा० सु०] सुरवधूः । (देवरमणीः)

(17.) Daughters of the rulers of Magadhas, the Kos'alas and the Kekayas, who looked upon their husband as their God, obtained him for their husband who had levelled his darts against his enemies, as streams of mountains obtain the ocean.

(18.) The king with his three beloved wives, himself skilful in divising means (or in the art) of destroying his enemies, appeared like Indra, the God with the bay horses, come down to the earth incarnate accompanied only by the three powers, as if with the desire of ruling over the subjects (world).

स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः।
स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः ॥ १९ ॥
क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसुना कृताः।
कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसासरयूतटाः ॥ २० ॥

उच्छ्रितं (उन्नतं) स्वभुजवीर्यं (निजबाह्वोर्बलं) अगापयत्किल खलु। गायतेः शब्दकर्मत्वात् " गतिबुद्धि-" इत्यादिना सुरवधूनामपि कर्मत्वम्।

(२०.) क्रतुष्वश्वमेधेषु विसर्जितमौलिनावरोपितकिरीटेन [त्यक्तकेशेन। दीक्षितेन मुण्डितेन भाव्यं। त्यक्तमुकुटेन वा। भूपा हि यज्ञेषु वपनस्थाने मौलं विसर्जयन्ति-हे० "आधाने काले सोमे च वपनं" इत्यादिस्मरणान्मुण्डितशिरस्त्वं-चा०]। "यावद्यज्ञमध्वर्युरेव राजा भवति" इति राज्ञश्चिह्नत्यागविधानादित्यभिप्रायः। " मौलि किरीटे धम्मिल्ले" इति विश्वः। भुजसमाहृतदिग्वसुना भुजार्जितदिगन्तसंपदा। [अनेन पवित्रत्वोक्तिः-हे०] अनेन क्षत्रियस्य विजितत्वमुक्तम्। नियमार्जितधनत्वं सद्विनियोगकारित्वं च सूच्यते। वितमसा तमोगुणरहितेन तेन दशरथेन। तमसा च सरयूश्च नद्यौ। तयोस्तटाः कनकयूपानां (काञ्चनयज्ञस्तम्भानां) समुच्छ्रयेण समुन्नमनेन शोभिनः (स्वर्णयूपच्छायारम्याः) कृताः। "कनकमयत्वं च यूपानां शोभार्थं विध्यभावात्। " हेमयूपस्तु शोभिकः" इति यादवः।

(२१.) ईश्वरो भगवानष्टमूर्तिरजिनं कृष्णाजिनं दण्डमौदुम्बरं बिभर्तीति तामजिनदण्डभृतम्। " कृष्णाजिनं दीक्षयति। औदुम्बरं दीक्षितदण्डं यजमानाय प्रयच्छति" इति वचनात् [दीक्षितमीश्वरोऽनुप्रविशेदित्यागमः-हे०]। कुशमयी मेखला (काञ्ची) यस्यास्तां कुशमेखलाम्। शरमयी मौञ्जी वा मेखला। तया यजमानं दीक्षयतीति विधानात्। प्रकृते कुशग्रहणं क्वचित्प्रतिनिधिदर्शनात्कृतम्। यतगिरं वाचंयमाम्। " वाचं यच्छति" इति श्रुतेः। मृगशृङ्गं परिग्रहः (अङ्गीकारः) कण्डूयनसाधनं यस्यास्ताम् (गृहीतमृगशृङ्गाम्)। [यथा रामायणे कुशलवोपाख्याने। " मृतशेषास्तु ये योधास्ते गत्वा राममब्रुवन्। समासीनं दीक्षितञ्च मृगशृङ्गपरिग्रहं। त्वचं रुरोर्वसानञ्च दण्डधारं सुमेखलं" इति-हे०] " कृष्णविषाणया कण्डूयते" इति श्रुतेः। अध्वरदीक्षितां संस्कारविशेषयुक्तां तनुं दाशरथीमधिवस-

(19.) It is said that this chariot-hero, having got to the position of the associate of Indra in the van of battle, relieved (shook away the fear of) the celestial damsels their fears by means of his arrows, and thus led them to (made them) chant the sublime prowess of his arms.

(20.) During the sacrifices leaving aside his crown he who had taken away (amassed) the wealth of quarters by (dint of) his arms, and who was destitute of the quality of Tamas (ignorance) made the banks of the Tamasa and the Sarayu embellished by erecting golden sacrificial columns (on them).

अजिनदण्डभृतं कुशमेखलां यतगिरं मृगशृङ्गपरिग्रहाम् ।
अधिवसंस्तनुमध्वरदीक्षितामसमभासमभासयदीश्वरः ॥ २१ ॥
अवभृथप्रयतो नियतेन्द्रियः सुरसमाजसमाक्रमणोचितः ।
नमयति स्म स केवलमुन्नतं वनमुचे नमुचेररये शिरः ॥ २२ ॥
असकृदेकरथेन तरस्विना हरिहयाग्रसरेण धनुर्भृता ।
दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषाम् ॥ २३ ॥

न्नधितिष्ठन्सन् । असमा भासो दीप्तयो यस्मिन्कर्मणि तद्यथा तथा (उत्कृष्टदीप्ति) । अभासयद्भासयति स्म ।

(२२.) अवभृथेन (यज्ञान्तस्नानेन) प्रयतः [नियमतत्परः–हे०] नियतेन्द्रियः सुरसमाजसमाक्रमणोचितो देवसभाधिष्ठानार्हः । [" समाजः परिषत्सदः " इत्यभिधानचिन्तामणिः–चा० सु०] । स दशरथ उन्नतं (उच्चैस्तरं) शिरः (मस्तकं) वनमुचे जलवर्षिणे । " जलं नीरं वनं सत्त्वम् " इति शाश्वतः नमुचेः (न मुञ्चति रणमिति नमुचिस्तस्य दैत्यस्य) अरये केवलमिन्द्रायैव नमयति स्म [लोकरक्षार्थं वृष्टेरपेक्षितत्वादिन्द्रमेवानमच्छिरः इत्यर्थः–चा० सु०] । न कस्मैचिदन्यस्मै मानुषायेत्यर्थः ।

(२३.) एकरथेनाद्वितीयरथेन तरस्विना बलवता हरिहयस्येन्द्रस्याग्रसरेण धनुर्भृता (धानुष्केण) दशरथनामकरुद्रहृशो दिनकरस्य (सूर्यस्य) अभिमुखाः (सन्मुखाः) । अभिमुखस्थिता इत्यर्थः । रणरेणव (सुरासुरसैन्योत्थापितधूलयः) सुरद्विषां दैत्यानां रुधिरेण (अस्ना) रुरुधिरे निवारिताः ।

(२४.) अथ यमकुबेरजलेश्वरवज्रिणां धर्मराजधनदवरुणामरेन्द्राणां समा धूर्भारः [कार्यनिर्वाहकत्वं–हे०] यस्य स समधुरः । माध्यस्थवितरणसंनियमनैश्वर्यैस्तुल्यकक्ष इत्यर्थः । " ऋक्पूरब्धूः –" इत्यादिना समासान्तोऽच्प्रत्ययः । तं समधुरम् । अञ्चितविक्रम पूजितपराक्रम [प्रशस्तपौरुष–हे० चा०] एकनराधिपं (सार्वभौमं) तं दशरथं सेवितुमिव ।

(21) The god S'iva presiding over (lit. dwelling in) his body that had undergone the initiative ceremony of the sacrifices, with speech restrained, holding the antelope hide and a staff, wearing a waist-band of Kus'a-grass and furnished with the horn of a deer, made it shine with matchless splendour.

(22.) He who was purified by the ablutions at the end of the sacrifices, who had controlled his senses, who was worthy to move in the assembly of the gods, bowed his high head only to the enemy of Namuchi, the showerer of rains (pourer of waters).

(23) By that single-chariot-hero, the mighty bowman, taking the lead of Indra, the dust raised in the battle-field facing the sun was suppressed more than once (often) with the blood of the enemies of the gods.

**अथ समावबृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम्।
यमकुबेरजलेश्वरवज्रिणां समधुरं मधुरञ्चितविक्रमम्॥ २४॥
जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः।
दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयं नगमत्यजत्॥ २५॥
कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितम्।
इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीम्॥ २६॥**

मधुर्वसन्तः। "अथ पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च मधु" इति विश्वः। नवैः (प्रत्यग्रैः) कुसुमैः (पुष्पैः) उपलक्षितः सन्समावबृते समागतः। "रिक्तहस्तेन नोपेयाद्राजानं देवतां गुरुम्" इति वचनात्पुष्पसमेतो राजानं सेवितुमागत इत्यर्थः।

(२५.) धनदाध्युषितां कुबेराधिष्ठितां दिशं (उत्तरां आशां) जिगमिषुर्गन्तुमिच्छुः। रथयुजा (रथं युनक्तीति रथयुक् तेन) सारथिनारुणेन परिवर्तितवाहनो निवर्तिताश्वो रविः। हिमस्य (तुषारस्य) निग्रहैर्निराकरणैर्दिनमुखानि प्रभातानि विमलयन्विशदयन्। मलयं नगं मलयाचलमत्यजत् (अतीत्य गतः)। दक्षिणां दिशमत्याक्षीदित्यर्थः।

(२६.) आदौ कुसुमजन्म। ततो नवपल्लवाः। तदनु। "अनुर्लक्षणे" इति कर्मप्रवचनीयत्वाद्द्वितीया। यथासंख्यं तदुभयानन्तरं षट्पदानां (भ्रमराणां) कोकिलानां (पिकानां) च कूजितम्। इत्येवंप्रकारेण यथाक्रमं क्रममनतिक्रम्य [पुष्पप्रियो भृङ्गः पल्लवप्रियः पिकः इति क्रमोक्तेरयमभिप्रायः। यद्वा। शाल्मलीमधुककिंशुकाद्याः प्रथमं पुष्पन्ति—हे० चा०] द्रुमवतीं (प्रशस्ता द्रुमाः वृक्षाः सन्त्यस्यामिति तां तथोक्तां) द्रुमभूयिष्ठां वनस्थलीमवतीर्य मधुर्वसन्त आविरभूत् (प्रादुरासीत्)। केषांचिद्द्रुमाणां पल्लवप्राथम्यात्केषांचित्कुसुमप्राथम्यान्नोक्तक्रमस्य दृष्टविरोधः [पूरणगुणेति समासनिषेधात्। तदनुशब्दः समासे महाकविप्रयोगादेवसाधुः। यथात्रैव।" विश्वं तदनु बिभ्रते" इति। मेघदूतेपि। "संदेशं

(24.) And now with fresh flowers returned the Spring to do honour (lit to serve), as it were, to that Sole Sovereign of the people (Universal Emperor) of adorable prowess and having equal burden (of governing and dignity) with Yama, Kubera, Varuna and Indra

(25.) Desirous of going to (the north) the quarter presided over (lit resided in) by the Lord of wealth (Kubera), the Sun, having his horses turned back by his Charioteer, left the Malaya mountain, brightening (lit clearing) the dawns (the begining of the day) by the removal of frost.

(26.) There was first the blowing (lit. birth) of flowers, then there were sprouts of young leaves; then there were heard the humming of bees and then the notes of the cuckoos: in this order did Madhu (the vernal season) exhibit himself descending incarnate to the wood, abounding in trees.

नयगुणोपचितामिव भूपतेः सदुपकारफलां श्रियमर्थिनः ।
अभियुः सरसो मधुसंभृतां कमलिनीमलिनीरपतत्रिणः ॥ २७ ॥
कुसुममेव न केवलमार्तवं नवमशोकतरोः स्मरदीपनम् ।
किसलयप्रसवोऽपि विलासिनां मदयिता दयिताश्रवणार्पितः ॥ २८ ॥
विरचिता मधुनोपवनश्रियामभिनवा इव पत्त्रविशेषकाः ।
मधुलिहां मधुदानविशारदाः कुरबका रवकारणतां ययुः ॥ २९ ॥

मे तदनु जलद श्रोष्यसि श्रोत्रपेयं " इति । पञ्चमीसमासोत्र साहचर्यात्कृतेऽव्ययेन समासो निषिध्यते इति वा-हे०] ।

(२७.) नयो नीतिरेव गुणः । तेन । अथवा नयेन गुणैः शौर्यादिभिः [सन्ध्यादिषड्गुणैः'-हे०] चोपचिताम् । सतामुपकारः फलं यस्यास्तां सदुपकारफलां ।(उपकारपात्रवितरणप्रयोजनामित्यर्थः)। भूपतेर्दशरथस्य श्रियमर्थिनः (असंनिहितोऽर्थो येषां ते अर्थिनः) इव । मधुना वसन्तेन संभृतां सम्यक्पुष्टां (मकरन्दनिर्भरां) सरसः (तडागस्य) सबन्धिनीं कमलिनीं पद्मिनीमलिनीरपतत्रिण । अलयो भृङ्गाः । नीरपतत्रिणो जलपतत्रिणो हंसादयश्च । अभियुः [नीरपतत्रिणोऽल्पमकरन्दां स्थलकमलिनीं नाभिलषन्ति । अतः सरोग्रहणं -हे० चा०] ।

(२८.) ऋतुरस्य प्राप्त आर्तवम् । " ऋतोरण् " इत्यण् । नवं प्रत्यग्रमशोकतरोः [तरुशब्देन अशोकस्य प्रौढत्वं । मध्यमपदलोपीसमासः-हे० चा०] केवलं कुसुममेव स्मरदीपनं उद्दीपनं न । किंतु विलासिनां (कामिनां । कर्मणि षष्ठी) मदयिता मदजनको दयिताश्रवणार्पितः (दयितानां रमणीनां श्रवणेषु कर्णेषु अर्पितः दत्तः) किसलयप्रसवोऽपि स्मरदीपनोऽभवत् ।

(२९.) मधुना वसन्तेन विरचिता उपवनश्रियामभिनवाः पत्त्रविशेषकाः पत्त्ररचना इव स्थिता मधूनां मकरन्दानां दाने विशारदाश्चतुराः कुरबकास्तरवो मधुलिहां मधुपानां रवकारणतां ययुः [यन्मुनिः । " माक्षिकं तैलवर्णं स्यात् घृतवर्णं तु पौतिकं । विज्ञेयं भ्रमरं श्वेतं

(27.) As the needy flock about (lit. come near) the King's wealth which is come at by proper course of action in politics, and is purposed for (whose fruit is) benevolence to the virtuous, so did the bees and the water-fowls repair to the cluster of lotuses of the lake full blown on account of the Spring (or laden with honey).

(28.) Not only the fresh vernal flower of the As'oka tree became the inflamer of love, but also the shooting of tender sprouts, the maddener of lovers, placed on the ears of their beloveds.

(29.) The Kurabakas, which appeared like ornamental leaves painted in amatory sports on the person of the Vernal Beauty by her lover the Spring, and which were liberal in giving nectar (to the bees), became the cause of their humming.

सुवदनावदनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः ।
मधुकरैरकरोन्मधुलोलुपैर्बकुलमाकुलमायतपङ्क्तिभिः ॥ ३० ॥
उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके ।
प्रणयिनीव नखक्षतमण्डनं प्रमदया मदयापितलज्जया ॥ ३१ ॥
व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलम् ।
न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान्हिमम् ॥ ३२ ॥

क्षौद्रं तु कपिलं मतं " इति–हे०] । भृङ्गाः कुरबकाणां मधूनि पीत्वा जगुरित्यर्थः । दानशौण्डानर्थिजनाः स्तुवन्तीति भावः ।

(३०.) सुवदनावदनासवेन कान्तामुखमद्येन संभृतोजनितः । तत्तस्य दोहदमिति प्रसिद्धिः । तस्यासवस्यानुवादी सदृशो गुणो यस्य तदनुवादिगुणः कुसुमोद्गमः (पुष्पोत्पत्तिः) । कर्ता । मधुलोलुपैरायतपङ्क्तिभिर्दीर्घपङ्क्तिभिर्मधुकरैर्मधुपैः । करणैः । [बकुलो ह्यङ्गनानां मद्यगण्डूषेण पुष्पति–हे०] । बकुलवृक्षमाकुलमकरोत् [अनुप्रासयमकं–हे०] ।

(३१.) शिशिरापगमश्रिया वसन्तलक्ष्म्या किंशुके पलाशवृक्षे । " पलाशः किंशुकः पर्णः " इत्यमरः । उपहितं दत्तं मुकुलजालं कुड्मलसंहतिः (जालवत्सर्वतः आवरणीभूतः कुसुमप्रकरः) । मदेन यापितलज्जयापसारितत्रपया प्रमदया (कामिन्या) प्रणयिनि प्रियतम उपहितं नखक्षतमेव मण्डनं तदिव [अनेन पुरुषायितमुक्तं–हे०] अशोभत [प्रमदयो मदयापितलज्जया इति पुनरुक्तप्रायमिति व्यक्तिविवेकः–हे०] ।

(३२.) व्रणैर्दन्तक्षतैर्गुरुभिर्दुर्धरैः प्रमादानामधरैरधरोष्ठैर्दुःसह हिमस्य व्यथाकरत्वादसह्यम् [प्रायेण हेमन्ते मुक्तादिरत्नशैत्यान्मेखलां न बिभ्रति इति प्रसिद्धिः–हे० चा० सु०] । जघनेषु निर्विषयीकृता निरवकाशीकृता मेखला (क्षुद्रघंटिका) येन तत् । शैत्यात्त्याजितमेखलमित्यर्थः । एवंभूतं हिमं (तुहिनं) रविस्तावदा वसन्तादशेषं निःशेषं यथा तथापोहितुं निर

(30.) The shooting up of flowers caused by wine from the mouths of ladies wearing beautiful faces, and having the like quality, made the Bakula tree annoyed by (filled with) bees in long rows ardently longing for honey.

(31.) The net-like cover of opening buds with which the Palás'a tree was vested by the Vernal Beauty at the departure of winter, shone like the ornament of nail-scratches of a young woman whose bashfulness has been removed by intoxication, on the body of her lover.

(32.) Although the sun could but lessen the frost then unbearable to the lower lip of young women, sore with marks of teeth and by reason of which the waist-band found no place on their loins, he was indeed not thoroughly able as yet to dissipate it entirely.

अभिनयान्परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा ।
अमदयत्सहकारलता मनः सकलिका कलिकामजितामपि ॥ ३३ ॥
प्रथममन्यभृताभिरुदीरिताः प्रविरला इव मुग्धवधूकथाः ।
सुरभिगन्धिषु शुश्रुविरे गिरः कुसुमितासु मिता वनराजिषु ॥ ३४ ॥

मितुं नालं खलु ["निषेधवाक्यालंकारजिज्ञासानुनये खलु" - चा०] न शक्तो हि (" अलं तु भूषणे शक्तौ पर्याप्तौ विनिवारणे " इति वैजयन्ती) । किंतु विरलं (अल्पं) कृतवांस्तनूचकार ।

(३३.) अत्र चूतलतायां नर्तकीसमाधिरभिधीयते । अभिनयानर्थव्यञ्जकान्व्यापारान् [नृत्यविशेषान्—हे०] । " व्यञ्जकाभिनयौ समौ " इत्यमरः । परिचेतुमभ्यासितुमुद्यतेव स्थिता । कुतः । मलयमारुतेन (मलयाचलवायुना) कम्पितपल्लवा । पल्लवशब्देन हस्तो गम्यते [अपरापि सुन्दरी हस्ताद्यभिनयान्हृदयसूचकान्व्यापारान् प्रकटयन्ती यतिचित्तान्युन्मादयतीति छायार्थः—हे० चा] । सकलिका सकोरका । " कलिका कोरकः पुमान् " इत्यमरः । सहकारलता (चूतशाखा वा) । कलिः कलहो द्रूप उच्यते । " कलिः स्यात्कलहे शूरे कलिरन्त्ययुगे युधि " इति विश्वः । कामो रागः । ताञ्जितामपि [यद्वा । कलौ कलियुगे कामं जयन्तीति कलिकामजितः तेषां । कलिना कलहेन कामं जयन्तीति वा—हे० चा०] । जितरागद्वेषाणाम् [मुनीश्वराणां - चा० सु०] अपीत्यर्थः । मनोऽमदयत् ।

(३४.) सुरभिर्गन्धो यासां तासु सुरभिगन्धिषु (सुरभिगन्धयुक्तेषु) । " गन्धस्य— " इत्यादिनेकारः । कुसुमान्यासां संजातानि कुसुमिताः । तासु वनराजिषु वनपङ्क्तिषु । अन्यभृताभिः कोकिलाभिः प्रथमं प्रारम्भेषूदीरिता उक्ता अतएव मिताः परिमिता गिर आलापाः । प्रविरला मौग्ध्यात्स्तोकोक्ता मुग्धवधूनां कथा वाच इव । शुश्रुविरे श्रुताः ।

(३५.) श्रुतिसुखाः कर्णमधुरा भ्रमरस्वना एव गीतयः (गानानि) यासां ताः । कुसुमान्येव कोमलाः (रम्याः) दन्तरुचो दन्तकान्तयो यासां ताः [कुसुमकोमलैर्दन्तरुगिति वा—हे०] । अनेन सस्मितत्वं विवक्षितम् । उपवनान्तलताः [उद्यानमध्यवल्ल्यः । अन्तशब्दः स्वरूपवाची- हे०] पवनेन (वायुना) आहतैः कम्पितैः किसलयैः सलयैः साभिनयैः । लयशब्देन लयानुगतोऽभिनयो लक्ष्यते । उपवनान्ते पवनाहतैरिति सक्रियत्वाभिधानात् । पाणिभिरिव बभुः [रेजुः । नर्तक्योपीदृश्यो भवन्तीति छायार्थः—चा०] । अनेन लतानां नर्त-

(33.) The new-budded mango creeper, whose sprouts were shaken by the breeze from the mountain Malaya, being prepared, as it were, to practise theatrical gesticulations, fascinated the minds even of those who had conquered rage and love.

(34.) The measured (few) cooings first uttered by the cuckoos were heard, like moderate expressions of bewitching bashful females, in the rows of forests, fragrant with sweet scent and abounding in flowers.

श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदन्तरुचो बभुः ।
उपवनान्तलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः ॥ ३५ ॥
ललितविभ्रमबन्धविचक्षणं सुरभिगन्धपराजितकेसरम् ।
पतिषु निर्विविशुर्मधुमङ्गनाः स्मरसखं रसखण्डनवर्जितम् ॥ ३६ ॥
शुशुभिरे स्मितचारुतराननाः स्त्रिय इव श्लथशिञ्जितमेखलाः ।
विकचतामरसा गृहदीर्घिका मदकलोदकलोलविहंगमाः ॥ ३७ ॥

कीसाम्यं गम्यते [गेये हि दन्तभासा साकाराभिनयेन भाव्यं । नृत्यगीतरागाद्यैः समा हस्तक्रिया लया लयसाम्य यथा स्त्रियां । स्त्रीणामपि श्लेषः–हे०] ।

(३६.) अङ्गनाः [प्रशस्तं अंगं यासां ताः–चा०] ललितविभ्रमबन्धविचक्षण मधुरविलासघटनापटुतरम् [उक्तश्च माघे । "हावहारि हसितं वचनानाम्" इति-चा०] । सुरभिणा मनोहरेण गन्धेन पराजितकेसरं निर्जितबकुलपुष्पम् । "अथ केसरे । बकुलः" इत्यमरः ["बकुलः केसरोऽशोकः" इत्यभिधानचिन्तामणिः–चा० सु०] । स्मरस्य सखायं स्मरसखम् । स्मरोद्दीपकमित्यर्थः । मधु मद्यम् ["मधु मद्यं वसन्त वा"–हे० चा०] । " अर्धर्चाः पुंसि च " इति पुंलिङ्गता । उक्तं च—" मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः । अर्धर्चादिगणे पाठात्पुंनपुंसकयोर्मधु " इति । पतिषु (रमणेषु) विषये रसखण्डनवर्जितमनुरागभङ्गरहितं यथा तथा निर्विविशुः । परस्परानुरागपूर्वकं पतिभिः सह पपुरित्यर्थः ।

(३७.) विकचतामरसा विकसितकमलाः । मदेन कला अव्यक्तमधुरं ध्वनन्त उदकलोलविहंगमा जलप्रियपक्षिणो हंसादयो यासु ताः [मदकलाः मदोत्कटाः उदके लोलाश्चपला विहंगमाः हंसादयो यासु ताः–हे०] मदकलोदकलोलविहंगमाः । ["ध्वनौ तु मधुरास्फुटे कलः " इत्यमरकारः–हे०] । गृहेषु दीर्घिका वाप्यः [क्रीडावाप्यः–चा०] । स्मितेन चारुतराण्याननानि यासां ताः [स्मितलक्षणमुक्तश्च नाट्यलोचने । " ईषद्विकसितैर्ग-

(35.) With songs consisting of the humming of bees charming to the ear, and having the splendour of teeth in the form of tender flowers, the creepers at the borders of groves shone with their sprouts shaken by the wind, as if they were hands gesticulating (in consonance with the song).

(36.) The women enjoyed (the drink of) wine, the friend (the helper) of the god of Love, which surpassed the Bakula flower in sweet smell and which highly tended to produce graceful amorous actions without interrupting their love towards their husbands.

(37.) The artificial house-ponds with lotuses full blown, with birds fond of water and uttering indistinct notes through intoxication, looked beautiful like women having faces the more bewitching by their smiles, and zones jingling because loosened.

उपययौ तनुतां मधुखण्डिता हिमकरोदयपाण्डुमुखच्छविः ।
सदृशमिष्टसमागमनिर्वृतिं वनितयानितया रजनीवधूः ॥ ३८ ॥
अपतुषारतया विशदप्रभैः सुरतसङ्गपरिश्रमनोदिभिः ।
कुसुमचापमतेजयदंशुभिर्हिमकरो मकरोर्जितकेतनम् ॥ ३९ ॥
हुतहुताशनदीप्ति वनश्रियः प्रतिनिधिः कनकाभरणस्य यत् ।
युवतयः कुसुमं दधुराहितं तदलके दलकेसरपेशलम् ॥ ४० ॥

ण्डैः कटाक्षैः सौष्ठवान्वितैः । अलक्षितं द्विजद्वारं सूत्तमानां स्मितं भवेत् " इति—चा०] । श्लथाः सिञ्जिता मुखरा मेखला यासां ताः । सिञ्जितेति कर्तरि क्तः । स्त्रिय इव (योषित इव) । शुशुभिरे [इयं कलितोपमा—सु०] ।

(३८.) मधुना मधुसमयेन [चैत्रेण—चा०] खण्डिता ह्रासं गमिता । क्षीयन्ते खलूत्तरायणे रात्रयः । खण्डिताख्या च नायिका ध्वन्यते । हिमकरोदयेन चन्द्रोदयेन पाण्डुः (धवला) मुखस्य प्रदोषस्य वक्त्रस्य च छविः (कान्तिः) यस्याः सा रजन्येव वधूः (रात्रिकामिनी) । इष्टसमागमनिर्वृतिं (इष्टेन वल्लभेन यः समागमः संयोगः तस्य निर्वृतिः सुखम्) प्रियसंगमसुखमनितयाप्राप्तया । " इण्गतौ " इति धातोः कर्तरि क्तः । वनितया (स्त्रिया) सदृशं तुल्यं तनुतां न्यूनतां कार्श्यं चोपययौ । [अपरापि तत्र खण्डितवल्लभा पाण्डुवदना क्षीणा च स्यात् तथा चैत्रेण मुक्ता रजन्यपीत्यर्थः—चा० सु०]।

(३९.) हिमकरः (हिमाः कराः यस्य स) चन्द्रः । अपतुषारतयापगतनीहारतया विशदप्रभैर्निर्मलकान्तिभिः सुरतसङ्गपरिश्रमनोदिभिः सुरतसङ्गखेदहारिभिरंशुभिः किरणैः [उक्तश्च रतिरहस्ये । " चन्दनं मृदुनालानि हरंति सुरतश्रमं " इति—हे०] । मकरोर्जितकेतनम् मकरेणोर्जितं केतनं ध्वजो यस्य तम् । [अनया उक्त्या स्मरस्य साम्राज्यध्वनिः—हे०] । लब्धावकाशत्वादुच्छ्रितध्वजमित्यर्थः । कुसुमचापं काममतेजयदशातयत् । " तिज निशाने " इति धातोर्ण्यन्ताल्लङ् । सहकारित्वाभात्कामोऽपि तीक्ष्णोऽभूदित्यर्थः ।

(४०.) हुतहुताशनदीप्त्याज्यादिप्रज्वलिताग्निप्रभं यत्कुसुमम् । कर्णिकारमित्यर्थः ।

(38.) The Night-damsel (the night itself personified as a damsel) the luster of whose face (front part i. e. first part) was rendered pale on account of the rise of the cool-rayed (moon) being cut short by the Spring, grew thin (became lean i. e. short), like a female that is denied the happiness of her wished-for lover's company.

(39.) The cool-rayed moon caused the god of Love (distinguished by the banner of Fish) to sharpen his flowery bow by means of his rays which relieve the fatigue of sexual enjoyment and whose light was (now) clear on account of the removal of the frosty weather.

(40.) The young ladies wore that flower having tender petals and filaments, (which was) stuck (by their lovers) in their hair, which was to Vernal Beauty in the place of an ornament made of gold, and which was as bright as fire blazing with oblations.

अलिभिरञ्जनबिन्दुमनोहरैः कुसुमपङ्क्तिनिपातिभिरङ्कितः ।
न खलु शोभयति स्म वनस्थलीं न तिलकस्तिलकः प्रमदामिव ॥ ४१ ॥
अमदयन्मधुगन्धसनाथया किसलयाधरसंगतया मनः ।
कुसुमसंभृतया नवमल्लिका स्मितरुचा तरुचारुविलासिनी ॥ ४२ ॥

वनश्रिय उपवनलक्ष्म्याः कनकाभरणस्य (सुवर्णभूषणस्य) प्रतिनिधिः । अभूदिति शेषः । दलेषु केसरेषु च पेशलम् (चारुसुंदरं) । सुकुमारपत्त्रकिञ्जल्कमित्यर्थः । आहितम् । प्रियैरिति शेषः । तत्कुसुमं युवतयः (स्त्रियः) अलके कुन्तले दधुः ।

(४१.) अञ्जनबिन्दुमनोहरैः (अञ्जनस्य कज्जलस्य बिन्दुवन्मनोहरैः) कज्जलकणसुन्दरैः । कुसुमपङ्क्तिषु निपतन्ति ये तैः । अलिभिः (भ्रमरैः) अङ्कितश्चिह्नितास्तिलकः श्रीमान्नाम वृक्षः । "तिलकः क्षुरकः श्रीमान्" इत्यमरः । वनस्थलीम् । तिलको विशेषकः । "तमालपत्त्रतिलकचित्रकाणि विशेषकम् । द्वितीयं च तुरीयं च न स्त्रियाम्" इत्यमरः । प्रमदामिव । न शोभयति स्मेति न खलु । अपि त्वशोभयदेवेत्यर्थः [मस्तके कृतः तिलकः स्त्रियं शोभयति तथा सोपि तिलकवृक्षो अञ्जनबिन्दुवन्मनोहरो भवति-सु० चा०] । "लट् स्मे" इति स्मशब्दयोगाद्भूतार्थे लट् । [तिलकेष्वञ्जनबिन्दवः शोभार्थं क्रियन्ते । तिलकशब्दस्य द्विरुपादाने भिन्नार्थतया न दोषः । तिलकप्रमदयोरेकतरस्मिन्वाक्ये यदुभयोर्वचनं न दोष इति व्यक्तिविवेकः-हे०]।

(४२.) तरुचारुविलासिनी तरोः पुंसश्च चारुविलासिनी नवमल्लिका सप्तलाख्या लता । "सप्तला नवमल्लिका" इत्यमरः । मधुनो मकरन्दस्य मद्यस्य च गन्धेन सनाथया (युक्तया) । गन्धप्रधानयेत्यर्थः । किसलयमेवाधरस्तत्र संगतया । प्रसृतरागयेत्यर्थः । कुसुमै संभृतया संपादितया । कुसुमरूपयेत्यर्थः । स्मितरुचा हासकान्त्या मनः । पश्यतामिति शेषः । अमदयत् [कामिनीस्मितमपि मद्यगन्धसनाथं अधरसंगतरागञ्च-हे०] ।

(४३.) विलासिनो विलसनशीलाः पुरुषाः । "वीकषलस-" इत्यादिना घिनुण्प्रत्ययः । अरुणस्याम्बरो रागमारुण्यं निषेधन्ति तिरस्कुर्वन्तीत्यरुणरागनिषेधिनः । तैः । कुसुम्भादिरञ्जनात्तत्सदृशैरित्यर्थः । "तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति । तस्येवानुकरोतीति शब्दाः सादृश्यवाचकाः" इति दण्डी । अंशुकैरम्बरैः [वस्त्रैः । कौसुम्भादिभिः । वसन्ते हि रक्तवस्त्रधारणं । "वासो वसाना तरुणार्करागम्" इति कुमारसंभवे-हे०] । श्रवणेषु कर्णेषु

(41.) Verily it is not that the Tilaka tree did not decorate the sylvan site marked as it was with bees charming like spots of collyrium and alighting on rows of flowers, as the mark of musk-painting decorates a young woman.

(42.) The creeper Navamalliká, the pretty consort of trees, gladdened the mind (of beholders) by her smiling beauty put forth by the (blooming) flowers, spreading over the sprouts as her lower lip, and accompanied by the fragrance of honey as her wine.

अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः ।
परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ॥ ४३ ॥
उपचितावयवा शुचिभिः कणैरलिकदम्बकयोगमुपेयुषी ।
सदृशकान्तिरलक्ष्यत मञ्जरी तिलकजालकजालकमौक्तिकैः ॥ ४४ ॥
ध्वजपटं मदनस्य धनुर्भृतश्छविकरं मुखचूर्णमृतुश्रियः ।
कुसुमकेसररेणुमलिव्रजाः सपवनोपवनोत्थितमन्वयुः ॥ ४५ ॥

लब्धपदैः (कर्णस्थैः) । निवेशितैरित्यर्थः । यवाङ्कुरैः (यवप्ररोहैः) च । परभृताविरुतैः कोकिलाकूजितैश्च । इत्येतैः स्मरबलैः कामसैन्यैः । अबलास्वेक एव (मुख्य एव) रसो रागो येषां तेऽबलैकरसाः स्त्रीपरतन्त्राः कृताः ।

(४४.) शुचिभिः शुभ्रैः कणै रजोभिरुपचितावयवा पुष्टावयवा । अलिकदम्बकयोगम् (भृंगवृन्दसंयोगं) उपेयुषी प्राप्ता । तिलकजा तिलकवृक्षोत्था मञ्जरी [कणिशं–हे०] । अलकेषु यज्जालकमाभरणविशेषस्तस्मिन्मौक्तिकैः [केशसमूहमुक्ताभिः–हे०] सदृशकान्तिः । अलक्ष्यत [मुक्ते च मुक्तैव मौक्तिक इति विनयादिः । स्वार्थिकत्वाल्लिङ्गातिक्रमः । यद्वा । मुक्तानां समूहो मौक्तिकं । " अचित्तहस्तीति ढक् "–हे०] । भृङ्गसङ्गिनी शुभ्रा तिलकमञ्जरीनीलालकसक्तमुक्ताजालमिवालक्ष्यतेति वाक्यार्थः । ।

(४५.) अलिव्रजाः षट्पदनिवहा धनुर्भृतो धानुष्कस्य मदनस्य कामस्य ध्वजपटं पताकाभूतम् । ऋतुश्रियो वसन्तलक्ष्म्याश्छविकरं शोभाकरं मुखचूर्णं मुखालंकारचूर्णभूतं [मुखवासार्थं कर्पूरादिचूर्णं । " चूर्णं निवासयोगे स्युः " इत्यमरः । रूपकं । " उपमानेन यत्तत्वमुपमेयस्य रूप्यते । गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः " इति–हे० आननपरिमलार्थं सुगन्धद्रव्यविशेषं-चा० मु०] । सपवनोपवनोत्थितं सपवनं पवनेन सहितं यदुपवनं तस्मिन्नुत्थितं (उद्भूतं) । कुसुमानां केसरेषु किञ्जल्केषु यो रेणुः (मकरन्दः) तम् । अन्वयुरन्वगच्छन् । यातेर्लङ् ।

(४६.) नवा दोला प्रेङ्खा यस्मिंस्तं नवदोलमृतूत्सवं वसन्तोत्सवमनुभवन्नबलाजनः (स्त्री-

---

(43.) By garments surpassing the red colour of Aruna, by shoots of Yava-grass having secured a position on the ear, and by the cooings of cuckoos, by such troops of the God of Love, the voluptuous (gallants) were made subject to the all pervading (sole) sentiment of love for young women (whose sole feeling consisted in thinking of young women).

(44.) Clusters of blossoms (born) of Tilaka-tree, fully developed in their parts by white pollens and coming in contact with swarms of bees, appeared equal in beauty with the net-like ornament of pearls worn in the hair.

(45.) Swarms of bees flew after the dust of the filaments of flowers raised from the pleasure-gardens (shaken) by the wind (lit. full of wind), the dust —(being as it were) the banner-cloth of Madana armed with his bow, or the beautifying face-wash (or powder) of the Vernal Beauty.

अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकण्ठजिघृक्षया।
अनयदासनरज्जुपरिग्रहे भुजलतां जलतामबलाजनः॥ ४६॥
त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः।
परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः॥ ४७॥
अथ यथासुखमार्तवमुत्सवं समनुभूय विलासवतीसखः।
नरपतिश्चकमे मृगयारतिं स मधुमन्मधुमन्मथसंनिभः॥ ४८॥

लोकः) पटुरपि निपुणोऽपि प्रियकण्ठस्य जिघृक्षया ग्रहीतुमालिङ्गितुमिच्छया (वल्लभकण्ठावलम्बनस्पृहया) आसनरज्जुपरिग्रहे पीठरज्जुग्रहणे भुजलतां बाहुलतां जलतां शैथिल्यम् [अपाटवम्–हे०]। डलयोरभेदः [यमकश्लेषचित्रेषु बवयोर्डलयोर्न भित्–हे०]। अनयत्। दोलाक्रीडासु पतनभयनाटितकेन प्रियकण्ठमाश्लिष्यदित्यर्थः।

(४७.) बतेत्यामन्त्रणे। "खेदानुकम्पासंतोषविस्मयामन्त्रणे बत" इत्यमरः। बत अङ्गना मानं कोपं त्यजत। तदुक्तम्–"स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये" इति। विग्रहैर्विरोधैरलम्। विग्रहो न कार्य इत्यर्थः। गतमतीतं चतुरमुपभोगक्षमं वयो यौवनं पुनर्नैति नागच्छति। इत्येवंरूपे स्मरमते स्मराभिप्राये [कामसिद्धान्ते–हे० कामतन्त्रे–चा० सु०]। नपुंसके भावे क्तः। परभृताभिः कोकिलाभिर्निवेदिते (अभिहिते) सतीव वधूजनः (स्त्रीसमूहः) रमते स्म रेमे। कोकिलाकूजितोद्दीपितस्मरः स्त्रीजनः कामशासनभयादिवोच्छृङ्खलमखेलदित्यर्थः।

(४८.) अथानन्तरम्। मधुं (दैत्यं) मथ्नातीति मधुमाद्विष्णुः। संपदादित्वात्क्विप्। मधुर्वसन्तः। मथ्नातीति मथः। पचाद्यच्। मनसो मथो मन्मथः कामः। तेषां संनिभः सदृशो मधुमन्मधुमन्मथसंनिभः स नरपतिर्दशरथो विलासवतीसखः स्त्रीसहचरः सन्। ऋतुः प्रा-

(46.) Enjoying the festivals (or sports) of the Season (the spring) consisting of (swinging in) new swings, the ladies though skilful (in sports of the swing) yet in their eagerness to embrace the necks of their lovers, feigned (lit. gave slackness to their arms i. e slackened) weakness of their tender arms (lit. creeper-like-arms) in catching hold of the ropes of their seats (in the swings).

(47.) "Give up, ye damsels, your anger excited through jealousy away with your quarrels, the age (youth) so fit for enjoyment once gone will never reappear," the intention of the God of Love being in these words communicated to them by the cuckoos, the ladies resumed their sports (mirths).

(48.) Having enjoyed to his heart's satisfaction the festivities of the Season in company with his wives, the King resembling (lit. whose lustre was like that of) the destroyer of the Madhu (Vishnu), the Spring and the mind-tormenting god of Love, longed for the pleasure of hunting.

परिचयं चललक्ष्यनिपातने भयरुषोश्च तदिङ्गितबोधनम् ।
श्रमजयात्प्रगुणां च करोत्यसौ तनुमतोऽनुमतः सचिवैर्ययौ ॥ ४९ ॥
मृगवनोपगमक्षमवेषभृद्विपुलकण्ठनिषक्तशरासनः ।
गगनमश्वखुरोद्धतरेणुभिर्नृसविता स वितानमिवाकरोत् ॥ ५० ॥

मोऽस्यार्तवः । तमुत्सवं वसन्तोत्सवं यथासुखं समनुभूय (उपभुज्य) मृगयारतिं मृगयाविहारं (आखेटकक्रीडां) चकम आचकाङ्क्ष । व्यसनासङ्गदोषं परिहरन्नाह—

(४९.) असौ मृगया । चललक्ष्याणि मृगगवयादीनि । तेषां (वेध्यानां) निपातने परिचयमभ्यासं करोति । भयरुषोर्भयक्रोधयोस्तदिङ्गितबोधनं तेषां चललक्ष्याणामिङ्गितस्य चेष्टितस्य भयादिलिङ्गभूतस्य बोधनं ज्ञानं च करोति ["जितश्रमत्वं व्यायामः आमभेदः कफक्षयः । चलस्थिरेषु लक्ष्येषु बाणसिद्धिरनुत्तमा । मृगयायां गुणानेतान् वदन्ति नयवित्तमाः " इति कामन्दके–हे०] । तनुं शरीरं श्रमस्य जयान्निरासात्प्रगुणां प्रकृष्टलाघवादिगुणवतीं च करोति । अतो हेतोः सचिवैः (अमात्यैः) अनुमतोऽनुमोदितः सन्ययौ (अगमत् । मृगयामिति शेषः)। सर्वं चैतद्युद्धोपयोगीत्यतस्तदपेक्षया मृगयाप्रवृत्तिः। न तु व्यसनितयेति भावः ।

(५०.) मृगाणां वनं तस्योपगमः प्राप्तिः । तस्य क्षममर्हं वेषं [लघुकृष्णकञ्चुकादिस्तं–चा०] बिभर्ति (धारयति) इति स तथोक्तः । मृगयाविहारानुगुणवेषधारीत्यर्थः [दीर्घवस्त्राद्धावनं न स्यात् । शुक्लवस्त्रावलोकनेन मृगादयो दूरत एव पलायन्ते । अतस्तथावेषरचनमेवाकरोत्–चा०] । विपुलकण्ठे (विस्तीर्णगले) निषक्तशरासनो लग्नधन्वा [अनेन धनुर्धरजातिः । वधकाले विलम्बो मा भूदिति–हे०चा०] । ना सवितेव नृसविता [नृषु सविता सूर्यो वा–हे०] पुरुषश्रेष्ठः । उपमितसमासः । स राजाश्वखुरोद्धतरेणुभिः (तुरगखुरोत्थापितरजोभिः) गगनं वितानं तुच्छमसदिवाकरोत् । गगनं नालक्ष्यतेत्यर्थः । " वितानं तुच्छमन्दयोः " इति विश्वः । अथवा सवितानमित्येकं पदम् । सवितानमुल्लोचसहितमिवाकरोत् (चकार) । "अस्त्री वितानमुल्लोचः " इत्यमरः ।

(49) It (hunting) makes one intimate with the art of shooting down the moving mark : it gives an understanding of their signs of fear and ferocity (or rage) ; and it makes the body endowed with excellent qualities (such as agility and nimbleness &c.) on account of a conquest over fatigue ; being for this reason allowed by the ministers he went out.

(50.) That sun of men (the mighty prince) clad in a dress fitted for approaching a forest abounding in game (in beasts of prey &c.) with a bow hung (or attached) to his full neck, adorned the sky, as it were, with a ceiling (canopy) by means of the dust raised by the hoofs of horses.

ग्रथितमौलिरसौ वनमालया तरुपलाशसवर्णतनुच्छदः।
तुरगवल्गनचञ्चलकुण्डलो विरुरुचे रुरुचेष्टितभूमिषु ॥ ५१ ॥
तनुलताविनिवेशितविग्रहा भ्रमरसंक्रमितेक्षणवृत्तयः।
ददृशुरध्वनि तं वनदेवताः सुनयनं नयनन्दितकोशलम् ॥ ५२ ॥
श्वगणिवागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः।
स्थिरतुरंगमभूमि निपानवन्मृगवयोगवयोपचितं वनम् ॥ ५३ ॥

(५१) वनमालया वनपुष्पस्रजा [पल्लवपुष्पवत्या स्रजा–हे०] ग्रथितमौलिर्बद्धधम्मिल्लः [" वनमाला विधातव्या पल्लवैः कुसुमैः फलैः " इति विष्णुरहस्ये–हे० " पत्रपुष्पमयी माला वनमाला प्रकीर्तिता "–चा०]। तरूणां पलाशैः पत्रैः सवर्णः समानस्तनुच्छदो वर्म यस्य स तथोक्तः। इदं च वर्मणः पलाशसावर्ण्याभिधानं मृगादीनां विश्वासार्थम् (एतदेव हेमाद्रिः)। तुरगस्य वल्गनेन [अश्वपरिवर्त्तनेन–हे० अश्वनर्तनेन–चा० सु०] गतिविशेषेण चञ्चलकुण्डलोऽसौ दशरथो रुरुभिर्मृगविशेषैश्चेष्टिताश्चरिता या भूमयस्तासु विरुरुचे विदिद्युते।

(५२.) तनुषु (सूक्ष्मासु) लतासु विनिवेशितविग्रहाः संक्रामितदेहाः। भ्रमरेषु संक्रमिताः (अर्पिताः) ईक्षणवृत्तयो दृग्व्यापारा यासां ता वनदेवताः सुनयनं सुलोचनं नयेन नीत्या नन्दितास्तोषिताः [समृद्धिं नीताः–सु०] कोशलाः [अयोध्या वा–चा०] येन तं दशरथमध्वनि (मार्गे) ददृशुः (अद्राक्षुः)। प्रसन्नपावनतया तं देवता अपि गूढवृत्त्या ददृशुरित्यर्थः [किं तु लताः एव वनदेवता भृङ्गरूपैः नेत्रैः कृत्वा दशरथं पश्यन्ति स्मेति भावः–सु०]।

(५३.) स दशरथः। शुनां गणः (कुक्करसमूहः) स एषामस्तीति श्वगणिनः श्वग्राहिणः। तैः। वागुरामृगबन्धनरज्जुः। " वागुरा मृगबन्धनी " इत्यमरः। तया चरंतीति वागुरिका जालिकाः। " चरति" इति ठक्प्रत्ययः। " द्वौ वागुरिकजालिकौ " इत्यमरः। तैश्च

(51.) He, with his hair tide up with a sylvan garland, having an armour on his body of the same colour with leaves of trees, and with the ear-rings set in motion (lit. trembling) by the gallop of his horse, shone forth on those grounds (or sites) which were trodden by the deer.

(52.) The dryads with their bodies entered into slender creepers, with their function of sight transferred to bees, saw on the path, that beautiful-eyed prince who by his just rule, was giving joy to the people of Kos'ala.

(53.) He then entered a forest which was already (lit. first) occupied by persons who carried with them nets and packs of dogs, which was cleared of fire and robbers, in which the ground was solid for horses, which possessed many pools of water and which abounded in antelopes, birds and the Gayals (or the yaks).

अथ नभस्य इव त्रिदशायुधं कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी ॥ ५४ ॥

तस्य स्तनप्रणयिभिर्मुहुरेणशावै-
र्व्याहन्यमानहरिणीगमनं पुरस्तात् ।
आविर्बभूव कुशगर्भमुखं मृगाणां
यूथं तदग्रसरगर्वितकृष्णसारम् ॥ ५५ ॥

[भूमिङ्गत्वात्–हे०] प्रथममास्थितमधिष्ठितम् । व्यपगता अनला दावाग्नयो दस्यवस्तस्कराश्च यस्मात्तथोक्तम् । " दस्युतस्करमोषकाः " इत्यमरः । " कारयेद्वनविशोधनमादौ मातुरन्तिकमपि प्रविविक्षुः । आप्तशस्त्र्यनुगतः प्रविशेद्वा संकटे च गहने च न तिष्ठेत् " इति कामन्दकः । स्थिरा दृढा पङ्कादिरहिता तुरंगमयोग्या भूमिर्यस्य तत् । निपानवदाहावयुक्तम् । " आहावस्तु निपानं स्यादुपकूपजलाशये " इत्यमरः । मृगैर्हरिणादिभिर्वयोभिः पक्षिभिर्गवयैर्गोसदृशैररण्यपशुविशेषैश्चोपाचितं समृद्धं [व्याप्तं । एतेन मृगयाचारिणामक्लेशत्वं सूचितं –चा०] वनं विवेश प्रविष्टवान् ।

(५४.)अथानाधिर्मनोव्यथारहितः(एतेनाभीरुत्वं सूच्यते) नरवरो नरश्रेष्ठः।रवेण धनुष्टंकारेण [सिंहनादेन–चा० सु०] रोषिताः केसरिणः सिंहा येन स राजा । कनकमिव पिङ्गः पिशङ्गो यस्तडिदेव गुणो मौर्वी तेन संयुतं त्रिदशायुधमिन्द्रचापं नभस्यो भाद्रपदमास इव । " स्युर्नभस्यप्रौष्ठपद्भाद्रभाद्रपदाः समाः " इत्यमरः । अधिज्यमधिगतमौर्वीकं धनुरुपाददे जग्राह ।

(५५.) स्तनप्रणयिभिः स्तनपायिभिरेणशावैर्हरिणशिशुभिः । "पृथुकः शावकः शिशुः" इत्यमरः । व्याहन्यमानं तद्वत्सलतया तद्गमनानुसारेण मुहुर्मुहुः प्रतिषिध्यमानं हरिणीनां गमनं गतिर्यस्य तत् । कुशा गर्भे येषां तानि मुखानि यस्य तत्कुशगर्भमुखम् । तस्य यूथस्याग्रेसरः पुरःसरो गर्वितो दृप्तश्च कृष्णसारो यस्य तत् [इति जात्योक्तिः । कृष्णसार इति दन्त्यमध्यं पठन्ति तन्न । कृष्णेन शारः शबल इति क्षीरस्वामी । " शारः शबलवातयोः " इति विश्वः । तथा व्यवस्था तालव्येषु शब्दभेदप्रकाशे । " शौरिर्मुरारिः शिव एव शर्वः शूरः समर्थे रुष एव शालः शमः प्रशान्तौ शकलं च खण्डे शकृत्पुरीषे शबले च शारः "

(54.) Then that excellent prince, sound in health (lit. without any mental pain), took up his strung bow whose twangs made the lion ferocious (irritated the lions), as the month of Bhâdra-pada takes up the weapon of the thrice-ten gods (i. e. the rainbow of Indra) set with the string of lightning as yellow as gold.

(55.) Before him appeared a herd of deer the motion of hinds in which was now and then impeded by the fawns eager to suck (or fond of) their udders, with mouths, having Kus'a-grass in them, and at the head of which was a proud black-antelope.

तं प्रार्थितं जवनवाजिगतेन राज्ञा
तूणीमुखोद्धृतशरेण विशीर्णपङ्क्ति।
श्यामीचकार वनमाकुलदृष्टिपातै-
र्वातेरितोत्पलदलप्रकरैरिवार्द्रैः ॥ ५६ ॥
लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः
प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम्।
आकर्णकृष्टमपि कामितया स धन्वी
बाणं कृपामृदुमनाः प्रतिसंजहार ॥ ५७ ॥

इति–हे०]। मृगाणां यूथं कुलम्। " सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकम् " इत्यमरः। तस्य दशरथस्य पुरस्तादग्र आविर्बभूव (प्रकट्यभूत्)। वसन्ततिलकं वृत्तम्। (" अस्यान्तिकमायान्ती। शिशुना स्तनपायिना मृगी रुद्धा। तामयमनन्यदृष्टिः। भग्नग्रीवो विलोकयति " इत्येवं समार्थः श्लोकांशः)।

(५६.) जवनो जवशीलः [इति मृगानुसारणे शक्तिः। अतिशीघ्रवाहगतिविशेषश्च। तथा च वसन्तराजः। " हीनाधिकांगं क्षुधितां विनीतैरनाशुगव्याधितबालवृद्धैः। यानैर्न यायात् गमनानभिज्ञैस्तथाखरैर्गोमहिषोष्ट्रकैश्च " इति–हे०]। " जुचंक्रम्य—" इत्यादिना युच्प्रत्ययः।"तरस्वी त्वरितो वेगी प्रजवी जवनो जवः"इत्यमरः। तं वाजिनमश्वं गतेनारूढेन। तूणीषुधिः। " बह्वादिभ्यश्च " इति स्त्रियां ङीष्। तस्या मुखाद्विवरादुद्धृतशरेण राज्ञा प्रार्थितमभियातम्। " याच्ञायामभियाने च प्रार्थना कथ्यते बुधैः " इति केशवः। अत एव विशीर्णा (भग्ना) पङ्क्तिः (श्रेणिरर्थात्) संघीभावो यस्य तत्। मृगयूथम्। कर्तृ। आर्द्रैर्भयादश्रुसिक्तैराकुला भयचकिता ये दृष्टिपातास्तैः (भयचकितनेत्रप्रसरैः)। वातेरितोत्पलदलप्रकरैः पवनकम्पितेन्दीवरदलछन्दैरिव। वनं श्यामीचकार।

(५७.) हरिरिन्द्रो विष्णुर्वा। तस्येव प्रभावः सामर्थ्यं यस्य स तथोक्तः। धन्वी (धनुरस्यास्तीति) धनुष्मान्स नृपः। लक्ष्यीकृतस्य वेद्धुमिष्टस्य (शरव्यतां नीतस्य) हरिणस्य स्वप्रेयसो देहं व्यवधायानुरागादन्तर्धाय स्थिताम्। सह चरतीति सहचरी। पचादिषु

---

(56) Pursued by the king who rode on a fleet horse and who had drawn an arrow out of the mouth of his quiver, that herd the lines of which were broken (dispersed over the plain), blackened the forest with the casting of their frightened eyes wet (with tears), as if with clusters of petals of blue-lotuses scattered by the wind.

(57.) That skilful bowman resembling Hari (Indra or Vishnu) in prowess, having seen the mate of the antelope that was aimed at, standing so as to come between his body (and the king), being softened (in mind) with compassion by reason of his being himself a lover, withdrew his arrow though drawn to the ear.

तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः
कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः ।
त्रासातिमात्रचटुलैः स्मरयत्सु नेत्रैः
प्रौढप्रियानयनविभ्रमचेष्टितानि ॥ ५८ ॥
उत्तस्थुषः शिशिरपल्वलपङ्कमध्या-
न्मुस्ताप्ररोहकवलावयवानुकीर्णम् ।
जग्राह स द्रुतवराहकुलस्य मार्गं
सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः ॥ ५९ ॥

चरतेष्टित्करणान्ङीप् । यथाह वामनः—"अनुचरीति चरेष्टित्त्वात्" इति । तां सहचरीं हरिणीं प्रेक्ष्य कामितया (साभिलाषया) स्वयं कामुकत्वात् । कृपामृदुमनाः करुणार्द्रचित्तः सन् । आकर्णकृष्टमपि । दुष्प्रतिसंहरमपीत्यर्थः । बाणं (शरं) प्रतिसंजहार । नैपुण्यादित्यर्थः । पुण्यं तु धन्वीत्यनेन गम्यते ।

(५८.) त्रासाद्भयादतिमात्रचटुलैरत्यन्तचञ्चलैः नेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि प्रगल्भकान्ताविलोचनविलासव्यापारान्सादृश्यात्स्मरयत्सु । अपरेष्वपि मृगेषु शरान्मुमुक्षोर्मोक्तु-मिच्छोस्तस्य नृपस्य निबिडो दृढोऽपि मुष्टिः कर्णान्तमेत्य प्राप्य बिभिदे । स्वयमेव भिद्यते स्म । भिदेः कर्मकर्तरि लिट् । कामिनस्तस्य प्रियाविभ्रमस्मृतिजनितकृपातिरेकान्मुष्टिभेदः । न त्वनैपुण्यादिति तात्पर्यार्थः ।

(५९.) स नृपः । मुस्ताप्ररोहाणां मुस्ताङ्कुराणां कवला ग्रासाः। तेषामवयवैः श्रमविवृत-मुखभ्रंशिभिः शकलैरनुकीर्णं व्याप्तम् [क्रोडा हि मुस्ताप्रियाः । तथाभिज्ञानशाकुन्तले । "गाहन्तां महिषानिपानसलिलं शृङ्गैर्मुहुस्ताडितं । छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्य-स्यतां । विश्रब्धैः क्रियतां वराहततिभिर्मुस्ताः क्षतिः पल्वले । विश्रामं लभतामिदश्च शिथि-लज्याबन्धमस्मद्धनुः" इति–हे० । पंकावगाहनं मुस्ताभक्षणं च दंष्ट्रिणां जातिस्वभावः–चा० सु०] । आयताभिर्दीर्घाभिरार्द्रपदपाङ्क्तिभिः (आर्द्रचरणमुद्राप्रकरैः) सुव्यक्तम् । शिशिर पल्वलपङ्कमध्यात् (शिशिरः शीतश्चासौ पल्वलपङ्कश्च पल्वलकर्दमश्च तस्य मध्यात्) उत्त-

---

(58.) Though desirous of levelling darts against other antelopes also, his fist (grasp) though firm, having come up to the end of the ear, loosened of its own accord, for their eyes excessively trembling (swimming or tremulous) through fear put him in mind of (reminded) the sportive plays (or lovely movements) of the eyes of his youthful (or clever) beloved (bold or confident mistress.).

(59.) He took the way, which was strewn with the bits of the mouthfuls of Mustâ-blades, and clearly indicated by the long line of wet foot-prints of a running herd of boars issuing forth from the midst of the damp mire of pools.

तं वाहनादवनतोत्तरकायमीष-
द्विध्यन्तमुद्धृतसटाः प्रतिहन्तुमीषुः ।
नात्मानमस्य विविदुः सहसा वराहा
वृक्षेषु विद्धमिषुभिर्जघनाश्रयेषु ॥ ६० ॥
तेनाभिघातरभसस्य विकृष्य पत्त्री
वन्यस्य नेत्रविवरे महिषस्य मुक्तः ।
निर्भिद्य विग्रहमशोणितलिप्तपुङ्ख-
स्तं पातयां प्रथममास पपात पश्चात् ॥ ६१ ॥

स्थुष उत्थितस्य हृतवराहकुलस्य पलायितवराहयूथस्य मार्गं (पन्थानं) जग्राहानुससार [जिघांसया तदीयपदवीमनुययावित्यर्थः । ते हि शूकराः पंके आसते । तथा प्रागुक्तं "सपल्वलोत्तीर्णवराहयूथान्" इति–हे०] ।

(६०.) वराहाः । वाहनादश्वादीषदवनतोत्तरकायं किंचिदानतपूर्वकायं विध्यन्तं प्रहरन्तं तं नृपम् । उद्धृतसटा ऊर्ध्वकेसराः सन्तः । " सटा जटाकेसरयोः " इति केशवः । प्रतिहन्तुमीषुः प्रतिहर्तुमैच्छन् । अस्य नृपस्येषुभिः (बाणैः) सहसा [झटिति । अतर्किते तु सहसा–हे०] जघनानामाश्रयेष्ववष्टम्भेषु वृक्षेषु विद्धम् (स्यूतं) आत्मानं न विविदुः (नाज्ञासिषुः) । [शूकरा हि तरुषु जघनं घर्षयन्ति–चा०] एतेन वराहाणां मनस्वित्वं नृपस्य हस्तलाघवं चोक्तम् ।

(६१.) अभिघाते रभस औत्सुक्यं यस्य तस्य । अभिहन्तुमुद्यतस्येत्यर्थः । वन्यस्य वने भवस्य महिषस्य नेत्रविवरे नेत्रमध्ये तेन नृपेण विकृष्याकृष्य मुक्तः पत्त्री शरो विग्रहं माहिषदेहं निर्भिद्य विदार्य । शोणितालिप्तो न भवतीत्यशोणितलिप्तः पुङ्खो यस्य स तथोक्तः सन् । तं महिषं प्रथमं पातयामास । स्वयं पश्चात्पपात । " कृञ्चानुप्रयुज्यते लिटि " इत्यत्रानुशब्दस्य व्यवहितविपर्यस्तप्रयोगनिवृत्त्यर्थत्वात् " पातयां प्रथममास " इत्यपप्रयोग इति पाणिनीयाः यथाह वार्तिककारः–"विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं च" इति [पातयामित्यत्र । "कास्प्रत्ययादाममन्त्रे लिटि" इति आम । "कृञ्चानुप्रयुज्यते लिटि" इत्यत्र आमप्रत्ययस्यैव पश्चात्कृञनुप्रयुज्यते इत्यवधारणत्वमिहाश्रितं । तेन व्यवधाने प्रयोगं निराकरोत् ।

60. The boars with bristles erect wished to attack him in return when he was piercing them with the fore-part of his body a little bent downwards from the horse; but they did not know themselves (so) suddenly transfixed (pierced through) by his arrows to the trees against which their loins were resting (leaning).

(61.) He drew and shot an arrow at the hollow (i. e. cavity) of the eye of a wild buffalo eager to attack him ; which (arrow) having broken through his body with its feathers unsoiled with blood, first threw him down and then dropped itself

प्रायो विषाणपरिमोक्षलघूत्तमाङ्गा-
न्खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः ।
शृङ्गं स दृप्तविनयाधिकृतः परेषा-
मत्युच्छ्रितं न ममृषे न तु दीर्घमायुः ॥ ६२ ॥

" न हि व्यवधाने कृञनुप्रयुज्यमानः आम प्रत्ययस्यैवानुप्रयुक्तो भवति । यथैवं कृभ्वस्तयः क्रियासामान्यवाचकास्तथा विद्यतिरपीति तस्यानुप्रयोगः स्यात् । तस्मात्तन्निवृत्त्यर्थमिदमारब्धव्यम् । व्यवहितप्रयोगनिवृत्त्यर्थं वारब्धव्यम् । याचयां देवदत्तश्चकारेत्यत्र मा भूदिति । व्यवहितनिवृत्तिस्तु अवधारणाल्लभ्यते । अवधारणं तु चकारस्यावधारणार्थत्वात् । विपर्ययनिवृत्त्यर्थं वारब्धव्यम । विपर्ययस्त्वनेनः पश्चादर्थत्वाल्लभ्यते " इति न्यासकृत् । कालिदासश्चेच्छति व्यवधानं । यथात्र त्रयोदशे सर्गे । " प्रभ्रंशयां यो नहुषं चकार " । षोडशे सर्गे च । " संयोजयां विधिवदास समेतबन्धुः " इति । सारस्वतटीकायां कामामित्यामन्तमव्ययं । " क्राद्यन्तश्च " इत्यत्रामन्तमव्ययमित्युक्तत्वात् । पृथक्पदाश्चक्रे इति त्वनुप्रयोगः । तेन व्यवधानेऽपि प्रयोगो घटते । " यस्य येनान्वययोग्यता तस्य तेन दूरस्थेनापि भवति " इति न्यायात् । तत प्रभ्रंशयां यो नहुष चकारेत्यादि न विरुध्यते । केचित्तु पातं यातीति पातयाः तं पातयां विग्रहं आस चिक्षेप ।असु क्षेपणे । पातयाः सोमपावत् । "आतोमनिन्क्वनिब्वनिपश्च" इति चकाराद्विजामन्तः–हे० । " कृञ्चानुप्रयुज्यते लिटि " इत्यत्र अनुशब्दस्य व्यवहितविपर्यस्तप्रयोगनिवृत्त्यर्थत्वात् प्रभ्रंशयां यो नहुषं चकार पातयां प्रथममास संयोजयां विधिवदास ईक्षाम्प्रचक्रुरित्यादयः अपप्रयोगा इति पाणिनीयाः । यथाह वार्तिककारः । " विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थञ्च " इति । " भ्वसुक्रन्वाम " इति सूत्रे आम इति पञ्चम्यैवेष्टसिद्धौ अनुग्रहणं उपसर्गक्रियाविशेषणव्यवधानेपि तदनुप्रयोगज्ञापनार्थमिति मुग्धबोधटीकाकृता रामानन्दाचार्येण व्याख्यातम् । क्रमदीश्वरेण तु " सप्रादिकृभ्वस्तिभिश्च " इति सूत्रं कृतम्–ध० । पातयां प्रथममासेति व्यवहितानुप्रयोगः कविप्रमादः । यद्वा । पातं यातीति पातयाश्छान्दसो विच् । तं पातयां । पातं गच्छन्तं महिषं शरः आस प्राप्तवान् । " असगतिदीप्त्यादानेषु " । यद्वा चिक्षेप । " अध्वर्युक्रतुरनपुंसकं " इति यजुरिति वाच्ये "क्याच्छन्दसि" इत्युप्रत्ययान्तेनाध्वर्युग्रहणेनाज्ञापितभाषायामपि छान्दसाः प्रयोगाः प्रयुज्यन्ते इति । यद्यप्येव केचन समादधते तथापि कवेरियं रीतिस्तु न भवति । प्रथममित्यस्य क्रियाविशेषणत्वान्न व्यवधायकत्वमिति । यथोक्तं प्रचक्रुरिति भट्टिकाव्ये । सत्यमुपसर्गोऽव्यवधानमिति सुबोधकारः जयमङ्गलायां । उक्ष्यत इत्युक्षा कर्मणि घञिरात्रेन व्याख्यातं । महाभाष्येपि व्यवहितप्रयोगनिरासार्थं तादित्युक्तत्वात् असावसाधुरेव वन्यस्येति दिगादित्वाद्भवार्थे यत् साध्वर्थे वा । नद्यादित्वाड्ढवार्थे वानेयस्येति स्यात्–चा०] ।

(६२.) नृपतिर्निशितैः (तीक्ष्णैः) क्षुरप्रैः शरविशेषै [चंद्रार्धबाणैः । " इषुकाण्डं

(62.) The King by means of his sharp arrows made the rhinoceroses mostly lighter in the head by relieving them of (the burden of) their horns; (for) he, engaged as he was in submitting the haughty, could not put up with the tower-

व्याघ्रानभीरभिमुखोत्पतितान्गुहाभ्यः
फुल्लासनाग्रविटपानिव वायुरुग्णान् ।
शिक्षाविशेषलघुहस्ततया निमेषा-
त्तूणीचकार शरपूरितवक्त्ररन्ध्रान् ॥ ६३ ॥
निर्घातोग्रैः कुञ्जलीनाञ्जिघांसुर्ज्यानिर्घोषैः क्षोभयामास सिंहान् ।
नूनं तेषामभ्यसूयापरोऽभूद्वीर्योदग्रे राजशब्दे मृगेषु ॥ ६४ ॥

क्षुरप्रं च " इति धनंजयः । " शफे खुरं कवर्गीयपकारश्च क्षुरप्रके । नापितस्योपकरणे कस्य संयोग इष्यते " इति शब्दभेदप्रकाशे–हे० । खड्गान्खड्गाख्यान्मृगान् । " गण्डके खड्गखड्गिनौ " इत्यमरः । प्रायो बाहुल्येन [प्रायः उत्प्रेक्षायां वा । तथा काव्यादर्शे । "मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः"–हे०] विषाणपरिमोक्षेण शृङ्गभङ्गेन लघून्यगुरूण्युत्तमाङ्गानि शिरांसि येषां तांश्चकार । न त्ववधीदित्यर्थः । कुतः । दमविनयाधिकृतो दुष्टनिग्रहनियुक्तः स राजा परेषां प्रतिकूलानामत्युच्छ्रितमुन्नतं शृङ्गं विषाणं प्राधान्यं च । " शृङ्गं प्राधान्यसान्वोश्च " इत्यमरः । न ममृषे न सेहे । दीर्घमायुर्जीवितकालम् । " आयुर्जीवितकालो ना " इत्यमरः । न ममृष इति न । किंतु ममृष एवेत्यर्थः [महान्तस्तु शत्रूणां जीवनेप्यालवा न किन्तून्नतत्वं न सहन्ते–चा०]।

(६३.) अभीर्निर्भीकः स धन्वी गुहाभ्य (पर्वतगुम्फाभ्य) अभिमुखमुत्पतितान् (सन्मुखमागतान्) । वायुना (वातेन) रुग्णान् भग्नान् । फुल्ला विकसिता । "अनुपमशोभाफुल्लाक्षी-वक्त्रशोल्लाघाः " । इति निष्ठातकारस्य लत्वनिपातः । असनस्य सर्जवृक्षस्य । " सर्जकासनबन्धूकपुष्पप्रियकजीवकाः " इत्यमरः । अग्रविटपाः (अग्रशाखाः) तानिव स्थितान् । इषुधिभूतानित्यर्थः । व्याघ्राणां चित्ररूपत्वादुपमाने फुल्लविशेषणम् । शरैः पूरितानि वक्त्ररन्ध्राणि येषां तान्व्याघ्रान् । शिक्षाविशेषणाभ्यासातिशयेन लघुहस्ततया क्षिप्रहस्ततया निमेषात्(क्षणात्)तूणीचकार । तूर्णं शरैः पूरितवानित्यर्थः [शरैः पूरितमुखाः पतिता व्याघ्रजीवाः प्रफुल्लितबीजकवृक्षस्य शाखाग्रा इव शोभन्ते स्म–सु०] ।

(६४.) कुञ्जेषु लीनान् । " निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे " इत्यमरः ।

---

ing horns (or supremacy) of others (or enemies) , but it is not that he did not bear their long life.

(63) By reason of the activity of hand acquired by long practice the fearless King made the tigers the quivers (for his arrows) by filling in a moment the hollows of their mouths with arrows, like the fore-branches of the flowering Asana trees broken down by the wind, as they rushed against him out of caves.

(64) Desirous of killing the lions lurking in their arbour-caves, the King chafed them by means of the twangs, sounding as terrible as the hurricane, of his bow-string. (In doing so) doubtless he was actuated by jealousy of their title of king among the beasts, dignified by their excessive valour (or strength).

तान्हत्वा गजकुलबद्धतीव्रवैरान्काकुत्स्थः कुटिलनखाग्रलग्रमुक्तान् ।
आत्मानं रणकृतकर्मणां गजानामानृण्यं गतमिव मार्गणैरमंस्त ॥ ६५ ॥
चमरान्परितः प्रवर्तिताश्वः क्वचिदाकर्णविकृष्टभल्लवर्षी ।
नृपतीनिव तान्वियोज्य सद्यः सितबालव्यजनैर्जगाम शान्तिम् ॥ ६६ ॥

सिंहाञ्जिघांसुर्हन्तुमिच्छु । निर्घातो व्योमोत्थित औत्पातिकः शब्दविशेषः [यदाह नारदीयसंहितायां । " वायुनाभिहतो वायुर्गगनात्पतितः क्षितौ । यदा दीप्तः खगरुतः सनिर्घातोऽतिदोषकृत् " इति–हे०] । तद्वदुग्रै रौद्रैर्ज्यानिर्घोषैर्मौर्वीशब्दैः क्षोभयामास । अत्रोत्प्रेक्षते—तेषां सिंहानां सम्बन्धिनि वीर्येणोदग्र उन्नते मृगेषु विषये यो राजशब्दस्तस्मिन्नभ्यसूयापरोऽभून्नूनम् । अन्यथा कथमेतानन्विष्य हन्यादित्यर्थः [" नाभिषेको न संस्कारः (सत्कारः) सिंहस्य क्रियते मृगैः (वने) । विक्रमार्जितचित्तस्य (सत्त्वानां) स्वयमेव मृगेन्द्रता " इति–हे०] । शालिनीवृत्तम्—" शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः " इति लक्षणात् ।

(६५.) काकुत्स्थो दशरथः । गजकुलेषु (हस्तिसमूहेषु) बद्धं तीव्रं वैरं यैस्तान् । कुटिलेषु नखाग्रेषु लग्ना मुक्ता [करिकुम्भविदारणात् । करिकुम्भेषु हि मौक्तिकानि सन्ति तथा रत्नपरीक्षायां । " करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि । मुक्ताफलानि प्रथितानि लोके तेषां हि शुक्त्युद्भवमेव भूरि " इति–हे०]गजकुम्भमौक्तिकानि येषां तान्सिंहान्हत्वा । आत्मानं रणेषु कृतकर्मणां कृतोपकाराणां गजानामानृण्यमनृणत्वं मार्गणैः शरैः । " मार्गणो याचके शरे " इति विश्वः [" रोपः कलम्बशरमार्गणचित्रपुंखाः " इति हैमः–चा०] । गतं प्राप्तवन्तमिवामंस्त मेने ।

(६६.) क्वचित् (प्रदेशे) चमरान् (मृगविशेषान् । " चमरं चामरे प्राहुर्मञ्जरीमृगभेदयोः " इति विश्वः) । परितः । " अभितःपरितःसमया—" इत्यादिना द्वितीया । प्रवर्तिताश्वः प्रधाविताश्वः । आकर्णविकृष्टभल्लानिषुविशेषान्वर्षतीति तथोक्तः स नृपः । नृपतीनिव [ते हि सितकेशव्यजनवन्तः–हे०] । तांश्चमरान्सितवालव्यजनैः शुभ्रचामरैर्वियोज्य विरहय्य सद्यः (शीघ्रं) शान्तिं जगाम [ययौ । पुच्छानि चिच्छेदेत्यर्थः–हे०] । शूराणां परकीयमैश्वर्यमेवासह्यम् । न तु जीवितमिति भावः । औपच्छन्दसिकं वृत्तम् ।

---

(65) Having killed them who bore an implacable animosity towards the race of elephants and in the fore-points of whose crooked claws stuck the pearls (severed from the elephants heads), the descendant of Kakutstha considered himself to have paid off with his arrows the debt of elephants that served him in the battle-fields.

(66) In some place, spurring his horses round the yaks and showering Bhalla-arrows (upon them) drawn to the ear, having deprived them (yaks) like kings, of their white chowry-tails, he immediately became content.

अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्ष्यीचकार।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः॥ ६७॥
तस्य कर्कशविहारसंभवं स्वेदमाननविलग्नजालकम्।
आचचाम सतुषारशीकरो भिन्नपल्लवपुटो वनानिलः॥ ६८॥
इति विस्मृतान्यकरणीयमात्मनः सचिवावलम्बितधुरं धराधिपम्।
परिवृद्धरागमनुबन्धसेवया मृगया जहार चतुरेव कामिनी॥ ६९॥

(६७.) स नृपस्तुरगसमीपात् (अश्वपार्श्वात्) उत्पतन्तमपि (उड्डयमानमपि)। सु-प्रहारमपीत्यर्थः। रुचिरकलापं भासुरबर्हम्। मह्यामतिशयेन रौतीति मयूरो बर्ही। पृषोदरादित्वात्साधुः। तं चित्रेण माल्येनानुकीर्णे (व्याप्ते) रतौ (सुरते संभोगावसरे) विगलितबन्धे (विगलितश्छुटितो बन्धो रचना यस्य तादृशे) प्रियायाः (स्वकामिन्याः) केशपाशे सपदि (शीघ्रं) गतमनस्कः (गतं मनो यस्य सः) प्रवृत्तचित्तः [प्रियासम्बधानुकारेपि प्रिय एव–हे०]। “ उरःप्रभृतिभ्यः कप् ” इति कप्प्रत्ययः। न बाणलक्ष्यीचकार। न प्रजहारेत्यर्थः [स्त्रीकेशपाशे मनो गतं·अतः मयूर नृपः न जघानेति भावः–सु०]।

(६८.) कर्कशविहारादतिव्यायामात्संभवो यस्य तम्। आनने (मुखे) विलग्नजालकं बद्धकदम्बकं तस्य नृपस्य स्वेदम्। सतुषारशीकरः शिशिराम्बुकणसहितः (अत एव) भिन्ना निर्दलिताः पल्लवानां पुटाः कोशा येन सः [इति मांद्यसौरभ्योक्तिः–चा० सु०]। वनानिलः (अरण्यपवनः) आचचाम (अशोषयत्)। जहारेत्यर्थः। रथोद्धतावृत्तमेतत्।

(६९.) इति पूर्वोक्तप्रकारेणात्मनो विस्मृतमन्यत्करणीयं कार्यं येन तम्। विस्मृतात्मकार्यान्तरामित्यर्थः। सचिवैरवलम्बिता धृता धूः (कार्यभारः) यस्य तम् [एतेन राज्ये विपक्षाभाव उक्तः–हे०]। “ ऋक्पूरब्धूः पथामानक्षे ” इति समासान्तोऽच्प्रत्ययः। अनुबन्धसेवया संततसेवया [अत्यन्ताभ्यासेन–हे०] परिवृद्धो रागो यस्य तं धराधिपम्। मृग्यन्ते

(67.) He did not aim his arrow at the peacock wearing a beautiful plumage, though hopping about (near or close to) his horse, having that very moment been put in mind of the braided hair of his beloved, interspersed with variegated flowers and the knot of which was loosened in amorous sports.

(68.) The forest-breeze charged with drops of dew, which had opened the folds of the sprouting leaves, kissed away the sweat which was produced by his hard exercise and which collected in drops on his face.

(69.) Hunting, like an artful damsel, thus captivated that Lord of the earth, forgetful of other regal duties, who had entrusted the burden of administration of his kingdom to his ministers and whose love (or passion for hunting) had increased by its constant enjoyment.

स ललितकुसुमप्रवालशय्यां ज्वलितमहौषधिदीपिकासनाथाम् ।
नरपतिरतिवाहयांबभूव क्वचिदसमेतपरिच्छदस्त्रियामाम् ॥ ७० ॥
उषसि स गजयूथकर्णतालैः पटुपटहध्वनिभिर्विनीतनिद्रः ।
अरमत मधुराणि तत्र शृण्वन्विहगविकूजितबन्दिमङ्गलानि ॥ ७१ ॥
अथ जातु रुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरलक्ष्यमाणः ।
श्रमफेनमुचा तपस्विगाढां तमसां प्राप नदीं तुरंगमेण ॥ ७२ ॥

यस्यां मृगा इति मृगया । (" आखेटो मगया स्त्रियां " इत्यमरः) । " परिचर्यापारिसर्यामृगयाटाट्यादीनामुपसंख्यानम् " इति शप्रत्ययान्तो निपातः । चतुरा विदग्धा कामिनीव । जह्राराचकर्ष [व्यसनेषु हि सेवापरोग उपगीयते । चतुरालक्षणं तु रसाकरे । " स्निग्धैरीक्षित एव दृष्टवनितैः कोकाशिताकुञ्चितैः । लज्जाकेकरविस्मितैर्मुकुलितैरालोकनैर्नायकं । प्रौढैर्नागरिकं वयोभिरखिलैराभाषते पल्लवं । दृष्टं मोहनदक्षिणैश्च चतुरावक्त्रादिभिश्चापरान् " (?)-हे० । " यस्या रतिगुणाकृष्टः प्रियः पार्श्वं न मुञ्चति । विचित्राभरणासक्ता स्वाधीनपतिका स्मृता " इति रुद्रटः-चा०] । " न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते " इति भावः [सुमंगला.नाम वृत्तं-चा० सु०] । [यथानुबन्धसेवया रमण्यामुपरि रागो वर्द्धते तथा नृपस्य नित्यं गमनात् मृगयायां रागो वर्द्धितः-सु०] ।

(७०.) स नरपतिः । ललितानि (मनोहराणि) कुसुमानि प्रवालानि पल्लवानि (च) शय्या (शयनीयं) यस्यां ताम् । ज्वलिताभिर्महौषधिभिरेव दीपिकाभिः सनाथाम् (अलंकृतां) । तत्प्रधानामित्यर्थः । त्रियामां (त्रयो यामाः यस्याः तां तथोक्तां) रात्रिं क्वचित् (प्रदेशे) असमेतपरिच्छदः (असमेतः अमीलितः परिच्छदः परीवारः यस्य सः) । परिहृतपरिजनः सन्नित्यर्थः । अतिवाहयांबभूव गमयामास । पुष्पिताग्रावृत्तम् ।

(७१.) उषसि प्रातः पटूनां पटहानामिव ध्वनिर्येषां तैर्गजयूथानां (हस्तिमुख्यसमूहानां) कर्णैरेव तालैर्वाद्यप्रभेदैर्विनीतनिद्रः स नृपस्तत्र वने मधुराणि विहगानां विहंगानां (विशिष्टानि) विकूजितान्येव बन्दिनां (वैतालिकानां) मङ्गलानि मङ्गलगीतानि शृण्वन्नरमत(चिक्रीड)।

(७२.) अथ जातु कदाचित् [" कदाचिज्जातु सार्धं तु साकं सत्रा समं सह । आनु-

(70.) Somewhere, without any attendants did that king pass away the night furnished with lights of luminous herbs of wonderful power, and with beddings of tender leaves and flowers.

(71.) Being roused at dawn from his slumbers by the flappings of the ears of an elephant-herd resembling the sound of loud-sounding drums, he amused himself there with listening to the agreeable notes of birds (supplying the place of) the auspicious verses of bards.

(72.) Then once upon a time taking the path of a deer in the forest unob-

कुम्भपूरणभवः पटुरुच्चैरुच्चचार निनदोऽम्भसि तस्याः ।
तत्र स द्विरदबृंहितशङ्की शब्दपातिनमिषुं विससर्ज ॥ ७३ ॥
नृपतेः प्रतिषिद्धमेव तत्कृतवान्पङ्क्तिरथो विलङ्घ्य यत् ।
अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः ॥ ७४ ॥

कल्यार्थकं प्राध्वं व्यर्थके तु वृथा मुधा " इत्यमरः-हे०]। रुरोर्मृगस्य गृहीतवर्त्मा स्वीकृतरुरुमार्गो विपिने वने पार्श्वचरैः (अनुचरैः) अलक्ष्यमाणः। तुरगवेगादित्यर्थः । श्रमेण फेनमुचा सफेनं स्विद्यतेत्यर्थः । तुरंगमेण तपस्विभिर्गाढामवगाढां सेवितां [मुनिजनप्रविष्टामिति वक्ष्यमाण ऋषिसुतकथाबीजं-हे० चा०] तमसां नाम नदीं सरितं प्राप [" स तु तीरं समासाद्य तमसाया मुनिस्तदा " इति बालरामायणे-हे०] [औपच्छन्दसिका वृत्त-चा०] ।

(७३.) तस्यास्तमसाया अम्भसि (जले) कुम्भपूरणेन भव उत्पन्नः । पश्चाद्यत् । पटुर्मधुरः । उच्चैर्गम्भीरो निनदो ध्वनिरुच्चचारोदियाय । तत्र (प्रदेशे) निनदे स नृपः । द्विरदबृंहितं शङ्कत इति द्विरदबृंहितशङ्की सन् ["बृंहितं करिगर्जितं " इत्यमरः " गजचीत्कृतबृंहिते " इत्यमरशेषे-हे०] । शब्देन शब्दानुसारेण पततीति शब्दपातिनमिषुं (शब्दवेधिनं बाणं) विससर्ज । स्वागता वृत्तम् ।

(७४.) तत्कर्म नृपतेः क्षत्रियस्य प्रतिषिद्धमेव निषिद्धमेव यदेतत्कर्म गजवधरूपं पङ्क्तिरथो दशरथो विलङ्घ्य (अविचार्य) । " लक्ष्मीकामो युद्धादन्यत्र करिवधं न कुर्यात् " [इति चाक्षुषः-हे०]। इत्येवं शास्त्रमुल्लङ्घ्य कृतवान् । ननु विदुषस्तस्य कथमीदृग्विचेष्टितमत आह—अपथ इति । श्रुतवन्तोऽपि विद्वांसोऽपि रजोनिमीलिता रजोगुणावृताः सन्तः । न पन्था इत्यपथम् । " पथो विभाषा " इति वा समासान्तः । " अपथ नपुंसकम्" इति नपुंसकत्वम् । " अपन्थास्त्वपथं तुल्यम् " इत्यमरः । तस्मिन्नपथेऽमार्गे पदं (चरणं) अर्पयन्ति हि निक्षिपन्ति हि । प्रवर्तन्त इत्यर्थः । वैतालीयं वृत्तम् ।

(७५.) हेत्यार्तो । तातो जनकः । " हा विषादशुगर्तिषु " इति । " तातस्तु जनकः पिता " इति चामरः । हा तातेति [अत्र न्यासकृत् " अपिशब्दो विकल्पार्थः । अपिशब्दो न दृश्यते " तेन हा पितः हा मातः इत्यादि सिद्धं । हे तातेति । "उभसर्वतसोः" इत्यभितः परितः इत्यादावपिशब्दस्य विकल्पार्थत्वात् द्वितीयाभावः । तथाहि । " विभूषणं किं कुचमण्डलानां कीदृश्युमा चान्द्रमसी कुतो भा । सीता कथं रौति दशास्यभीत्या हा राम हा

served by his side-walkers, he got to the river Tamasá crowded by ascetics, with his horse foaming through fatigue.

(73.) From the waters of that river arose a deep agreeable sound produced by the filling of a jar ; there (in the direction of that sound) he discharged a dart that traced the sound, suspecting it to be the roar of an elephant.

(74.) What Das'aratha did transgressing the rule was strictly forbidden to a king ; for even learned men when blinded by passion step into a wrong path.

हा तातेति क्रन्दितमाकर्ण्य विषण्ण-
स्तस्यान्विष्यन्वेतसगूढं प्रभवं सः।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं
तापादन्तःशल्य इवासीत्क्षितिपोऽपि ॥ ७५ ॥
तेनावतीर्य तुरगात्प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भनिषण्णदेहः।
तस्मै द्विजेतरतपस्विसुतं स्खलद्भि-
रात्मानमक्षरपदैः कथयांबभूव ॥ ७६ ॥

देवर तात मातः" । तातेत्यत्र "दूराद्धूते च" इति प्लुतत्वेप्यप्लुतवदुपस्थिते इत्यतिदेशात् सुश्लोकेति इतिवत् प्रकृतिभावो न । तथा श्रीभागवते । "पुत्रेतितन्मयतया तरवोभिनेदुः" इति । उपस्थितो नाम अवैदिक इतिशब्दः-हे०] । क्रन्दितं क्रोशनमाकर्ण्य (श्रुत्वा) विषण्णो भग्नोत्साहः सन् । तस्य क्रंदितस्य वेतसैः (तरुभेदैः) गूढं छन्नम् । प्रभवत्यस्मादिति प्रभवः कारणम् । तमन्विष्यन् [गवेषयन् । "गवेषस्तत्त्वमार्गणे" इति कामधेनुः-हे०] । शल्येन शरेण प्रोतं स्यूतम् (विद्ध) । "शल्यं शङ्कौ शरे वंशे" इति विश्वः । सकुम्भं (घटसहितं) मुनिपुत्रं प्रेक्ष्य (दृष्ट्वा) स क्षितिपोऽपि तापादुःखादन्तःशल्यं यस्य सोऽन्तःशल्य इवासीत् । मत्तमयूरं वृत्तम् ।

(७६.) प्रथितान्वयेन प्रख्यातवंशेन । एतेन पापभीरुत्वं सूचितम् । तेन राज्ञा तुरगात् (अश्वात्) अवतीर्य पृष्टान्वयो ब्रह्महत्याशङ्कया पृष्टकुलः । जलकुम्भनिषण्णदेहः (जलसहिते कुंभे घटे निषण्णः पतितः देहो यस्य) स मुनिपुत्रस्तस्मै राज्ञे स्खलद्भिः। अशक्तिवशादर्धोच्चारितैरित्यर्थः। अक्षरप्रायैः पदैरक्षरपदैरात्मानं द्विजेतरश्चासौ तपस्विसुतश्च तं द्विजेतरतपस्विसुतं [ब्राह्मणक्षत्रियवैश्येतरतपस्विपुत्रं करणजातीयं श्रवणाख्यं-हे०चा०सु०]कथयांबभूव। न तावत्त्रैवार्णिक एवाहमस्मि किंतु करणः ["विप्रक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः" इति-हे०] "वैश्यात्तु करणः शूद्रायाम्" इति याज्ञवल्क्यः ["शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः" । "शूद्रायां करणो वैश्याद्वित्रास्वेष विधिः स्मृतः" इति-हे०] । कुतो ब्रह्महत्येत्यर्थः । तथा च रामायणे—"ब्रह्महत्याकृतं पापं हृदयादपनीयताम् । न द्विजातिरहं राजन्मा भूत्ते मनसो व्यथा । शूद्रायामस्मि वैश्येन जातो जनपदाधिप" इति (एतदेव हेमाद्रिचारित्रवर्द्धनौ) ।

(75.) (Immediately) hearing a cry, " Oh father " being alarmed and seeking its cause concealed among the reeds, and finding a son of a Muni pierced with his arrow, with a jar (by his side), the king also became like one with an arrow (fixed) in his heart from grief, (his heart also was wounded).

(76.) Being asked his race by him (the king) of a celebrated lineage who had got down from the horse, he, with his body resting on the water jar, declared himself in faltering syllables to be the son of an ascetic belonging to a caste other than the twice-born one.

तच्चोदितश्च तमनुद्धृतशल्यमेव
पित्रोः सकाशमवसन्नदृशोर्निनाय।
ताभ्यां तथागतमुपेत्य तमेकपुत्र-
मज्ञानतः स्वचरितं नृपतिः शशंस ॥ ७७॥
तौ दंपती बहु विलप्य शिशोः प्रहर्त्रा
शल्यं निखातमुदहारयतामुरस्तः।
सोऽभूत्परासुरथ भूमिपतिं शशाप
हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥ ७८ ॥

(७७.) तच्चोदितस्तेन पुत्रेण चोदितः (प्रेरितः) पितृसमीपं प्रापयेत्युक्तः स नृपतिरनुद्धृतशल्यमनुत्पाटितशरमेव तं मुनिपुत्रम्। अवसन्नदृशोर्नष्टचक्षुषोः। अन्धयोरित्यर्थः। पित्रोर्मातापित्रोः। "पिता मात्रा" इत्येकशेषः। सकाशं समीपं निनाय। इदं च रामायणविरुद्धम्। तत्र—"अथाहमेकस्तं देशं नीत्वा तौ भृशदुःखितौ। अस्पर्शयमहं पुत्रं तं मुनिं सह भार्यया" इति नदीतीर एव मृतं पुत्रं प्रति पित्रोरानयनाभिधानात् [अपि तु नदीतीर एव शरोद्धरणान्मृत इत्युक्तं—हे०]। तथागतं [तथावस्थां प्राप्तं—हे०] वेतसगूढम् एकश्चासौ पुत्रश्चैकपुत्रस्तम्। एकग्रहणं पित्रोरनन्यगतिकत्वसूचनार्थम्। तं मुनिपुत्रमुपेत्य [उद्दिश्य—चा० सु०। ज्ञापयित्वा—व०] संनिकृष्टं गत्वा [उपेत्येति बाधितोक्तिः—हे०]। अज्ञानतः करिभ्रान्त्या स्वचरितं स्वकृतं ताभ्यां मातापितृभ्याम्। क्रियाग्रहणाच्चतुर्थी। शशंस कथितवान्।

(७८.) तौ जाया च पतिश्च दंपती। राजदन्तादिषु जायाशब्दस्य दम्भावो जम्भावश्च विकल्पेन निपातितः। "दंपती जंपती जायापती भार्यापती च तौ" इत्यमरः। बहु विलप्य भूरि परिदेव्य। "विलापः परिदेवनम्" इत्यमरः। शिशोरुरस्तो वक्षसः। "पञ्चम्यास्तसिल्"। निखातं शल्यं शरं प्रहर्त्रा राज्ञोदहारयतामुद्धारयामासतुः। स शिशुः परासुर्गतप्राणोऽभूत्। अथ वृद्धो हस्तार्पितैः (करपतितैः) नयनवारिभिरेव (अश्रुभिरेव) शापदानस्य जलपूर्वकत्वात्तैरेव भूमिपतिं (राजानं) शशाप।

(77.) And being urged by him the King carried him even with the arrow unextracted (from his bosom) to his parents who had lost their sight, and told them his deed as done through ignorance, with respect to (according to Mallináth,—after having gone up to him so as to bring him within the reach of his arrow) their only son in that condition (Malli.-concealed in the thicket).

(78.) That couple, having lamented bitterly, bade the murderer of their young son extract the infixed arrow from his bosom; (on which) he became lifeless. Then the old man cursed that Lord of the earth with the very waters from his eyes gathered in his hands,

दिष्टान्तमाप्स्यति भवानपि पुत्रशोका-
दन्त्ये वयस्यहमिवेति तमुक्तवन्तम् ।
आक्रान्तपूर्वमिव मुक्तविषं भुजंगं ।
प्रोवाच कोशलपतिः प्रथमापराद्धः ॥ ७९ ॥
शापोऽप्यदृष्टतनयाननपद्मशोभे ।
सानुग्रहो भगवता मयि पातितोऽयम् ।
कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो
बीजप्ररोहजननीं ज्वलनः करोति ॥ ८० ॥

(७९.) हे राजन् । भवानप्यन्त्ये वयसि (वार्द्धके) अहमिव पुत्रशोकाद्दिष्टान्तं कालावसानम् । मरणमित्यर्थः । "दिष्टः काले च दैवे स्याद्दिष्टम्" इति विश्वः (" स्यात्पंचता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः " इत्यमरः) । आप्स्यति प्राप्स्यति । इत्युक्तवन्तम् - आक्रान्तः पादाहतः पूर्वमाक्रान्तपूर्वः । सुप्सुपेति समासः [पूर्वं आक्रान्तः आक्रान्तपूर्वः । "राजदन्तादिषु परम् -हे०] । तम् (तापसम्) । प्रथमम् अपकृतमित्यर्थः । मुक्तविषमपकारस्य पश्चादुत्सृष्टविषं भुजंगमिव (सर्पमिव) स्थितं तं वृद्धं प्रति प्रथमापराद्धः प्रथमापराधी । कर्तरि क्तः । इदं च महतः कारणमुक्तम् । कोसलपतिर्दशरथः शापदानात्पश्चादप्येनं मुनिं प्रोवाच (अवादीत) ।

(८०.) अदृष्टा तनयाननपद्मशोभा (पुत्रमुखकमलश्रीः) येन तस्मिन्नपुत्रके मयि भगवता (पूज्येन) पातितः । पक्षे नापत्यत्वात्पातित इत्युक्तम् । अयं पुत्रशोकान्म्रियस्वेत्येवंरूपः शापोऽपि सानुग्रहः । वृद्धकुमारीवरन्यायेनेष्टावाप्तेरन्तरीयकत्वात्सोपकार एव । निग्राहकस्याप्यनुग्राहकत्वमर्थान्तरन्यासेनाह—कृष्यामिति । इन्धनैः काष्ठैरिद्धः प्रज्वलितो ज्वलनोऽग्निः कृष्यां कर्षणार्हाम् । " ऋदुपधाच्चाक्लृपिचृतेः " इति क्यप् । क्षितिं दहन्नपि बीजप्ररोहाणां बीजाङ्कुराणां जननीमुत्पादनक्षमां करोति [शालिक्षेत्रभूमौ हि दाहं विना किंचिन्नोत्पद्यते इति कोंकणेषु प्रसिद्धिः -हे० ना० मु०] ।

(८१.) इत्थंगते प्रवृत्ते सति । वसुधाधिपेन राज्ञा । गतघृणो निष्करुणः । हन्तृत्वा-

(79.) The Lord of the Kosalas who was the first to offend thus addressed him who, like a snake that on being first trodden under foot emits poison, uttered (the curse) 'thou shalt also like myself meet a death in thy old age through grief for thy son.'

(80.) To me who have not yet seen the beauty of a son's lotus-like face, even the curse itself inflicted by your divine self is attended with a blessing. Certainly fire inflamed by fuel makes the arable soil the producer of shoots from seed while burning it (lit. though it burns the soil).

इत्थंगते गतघृणः किमयं विधत्तां
वध्यस्तवेत्यभिहितो वसुधाधिपेन ।
एधान्हुताशनवतः स मुनिर्ययाचे
पुत्रं परासुमनुगन्तुमनाः सदारः ॥ ८१ ॥
प्राप्तानुगः सपदि शासनमस्य राजा
संपाद्य पातकविलुप्तधृतिर्निवृत्तः ।
अन्तर्निविष्टपदमात्मविनाशहेतुं
शापं दधज्ज्वलनमौर्वमिवाम्बुराशिः ॥ ८२ ॥

निष्कृप इत्यर्थः । अत एव तव वध्यो वधार्होऽयं जनः (मल्लक्षणो जनः) । अयमिति राज्ञो निर्वेदादनादरेण स्वात्मनिर्देशः । किं विधत्तामित्यभिहित उक्तः । मया किं विधेयमिति विज्ञापित इत्यर्थः [" पुरुषवधे स्तेये भूम्यादाने चर्तुर्विधाभत्र ब्राह्मणस्य " इति आपस्तम्बवचनात् । ब्राह्मणस्यैवापकृष्टवर्णवधे (शूद्रवधे) वधनिषेधः इति वध्यस्तवेति-हे०] । स मुनिः सदारः सभार्यः।("भार्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी" इत्यमरः)। परासुं गतासुं पुत्रमनुगन्तुं मनो यस्य सोऽनुगन्तुमनाः सन्। "तुं काममनसोरपि" इति मकारलोपः। हुताशनवतः साग्नीनेधान्काष्ठानि ययाचे (नृपतिमिति शेषः) । न चात्रात्मवधातदोषः- " अनुष्ठानासमर्थस्य वानप्रस्थस्य जीर्यतः । भृग्वग्निजलसंपातमरणं प्रविधीयते " इत्युक्तेः ।

(८२.) प्राप्तानुगः प्राप्तानुचरो राजा सपद्यस्य मुनेः शासनं काष्ठसंभरणरूपं प्रागेकोऽपि संप्रति प्राप्तानुचरत्वात्संपाद्य पातकेन मुनिवधरूपेण विलुप्तधृतिर्नष्टोत्साहः सन् । (नष्टमृगयाभिलाषः इत्यर्थः) । अन्तर्निविष्टपदमन्तर्लब्धस्थानमात्मविनाशहेतुं शापम् । अम्बुराशिरौर्वज्वलनं वडवानलमिव । " और्वस्तु वाडवो वडवानलः " इत्यमरः । दधद्धृतवान्सन् । निवृत्तः वनादिति शेषः ।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये मृगयावर्णनो नाम नवमः सर्गः ।

(81) The matters standing thus that sage, being addressed by the Lord of the earth in the following words—" what shall this cruel man, who deserves death at thy hands, do for thee ? " begged for fuel kindled by fire wishing in company with his wife to follow his deceased son.

(82.) The King who (by this time) got his followers, having immediately executed his order, returned (to his capital) the peace of his mind being destroyed by the sinful act, carrying with him the curse, the cause of his own destruction that had stepped into his heart, like the ocean (lit. the store of waters) bearing the Urva-born fire.

दशमः सर्गः ।

पृथिवीं शासतस्तस्य पाकशासनतेजसः ।
किंचिदूनमनूनर्द्धेः शरदामयुतं ययौ ॥ १ ॥
न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनम् ।
सुताभिधानं स ज्योतिः सद्यः शोकतमोपहम् ॥ २ ॥

आशंसे नित्यमानन्दं रामनामकथामृतम्
सद्भिः स्वश्रवणैर्नित्यं पेयं पापं प्रणोदितुम् ॥

(१.) पृथिवीं (भुवं) शासतः पालयतः पाकशासनतेजसः [पाको नाम कश्चिद्दैत्यस्तस्य शासनः इन्द्रस्तस्य तेज इव तेजो यस्य—हे० पाकान् बालान् शास्तीति । शासिमृषीति यु । पृ-रुहूतोऽदितेर्गर्भं प्रविश्याछिनदिति कथा प्रसिद्धा—चा०] इन्द्रवर्चसः। अनूनर्द्धेः(न ऊना अधिका ऋद्धिर्यस्य तथोक्तस्य अखिलसंपदः। कालापगमेऽपि अन्यून विभवस्येतिभावः) महासमृद्धस्तस्य दशरथस्य किंचिदूनमीषन्न्यून शरदां वत्सराणाम् । "स्याद्दतौ वत्सरः शरत्" इत्यमरः। अयुतं दशसहस्रं ययौ ।"एकदशशतसहस्राण्ययुतं लक्षं तथा प्रयुतम्।कोटयर्बुदं च पद्मं स्थानात्स्थानं दशगुण स्यात्" इत्यार्यभट्टः । इदं च मुनिशापात्परं वेदितव्यं न तु जननात् । "षष्टिवर्षसहस्राणि जातस्य मम कौशिक । दुःखेनोत्पादितश्चाय न रामं नेतुमर्हसि " इति रामायणविरोधात् । नाप्यभिषेकात्परं तस्यापि " सम्यग्विनीतमथ वर्महरं कुमारमादिश्य रक्षणविधौ विधिवत्प्रजानाम् " इति कौमारानुष्ठितत्वाभिधानात्स एव विरोध इति ।

(२.) स दशरथ पूर्वेषां पितॄणामृणनिर्मोक्षसाधनम् (ऋणान्निर्मोक्षस्तस्य साधनम्) । " एष वा अनृणो यः पुत्री " इति श्रुतेः । पितॄणामृणविमुक्तिकारणम् । सद्यः शोक एव तमस्तदपहन्तीति शोकतमोपहम् । अत्राभयङ्कर इतिवदुपपदेऽपि तदन्तविधिमाश्रित्य " अपेक्लेशतमसो " इति डप्रत्ययः। सुताभिधानं (सुत इत्यभिधानं यस्य तत्) सुताख्यं (सुतापरनामकं) ज्योतिर्नोपलेभे न प्राप च [एवं पुत्रार्थं दूयमानचित्तस्य तस्य बहुकालेनापि पुत्रो नाजनि येन स पितृऋणविमुक्तो भवेत् । सुतस्य आनन्दकत्वेन शोकान्धकारनाशकत्वात् ज्योतिषा साम्यं । न च इति समुदाये निषेधे वा—चा०] ।

(1.) While he (the king Das'aratha) whose lustre (prowess or valour) was like that of the chastiser of the demon Páka (i.e. Indra) and whose wealth was never less (ever increased) was ruling over the earth, a little less than a myriad of autumns passed away.

(2.) And yet he did not obtain that light whose (another) name is so (which comes in the shape of a son) which is the means of relieving himself of (or freeing himself from) the debt of his forefathers and which instantly dispels the darkness of sorrow.

अतिष्ठत्प्रत्ययापेक्षसंततिः स चिरं नृपः ।
प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥ ३ ॥
ऋष्यशृङ्गादयस्तस्य सन्तः संतानकाङ्क्षिणः ।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥ ४ ॥
तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम् ।
अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः ॥ ५ ॥

(३.) प्रत्ययं हेतुमपेक्षत इति प्रत्ययापेक्षा संततिर्यस्य स तथोक्तः [प्रत्ययो हेतुः पुत्रकामेष्ट्यादिः तादृशः–हे० चा० सु०] ।" प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु " इत्यमरः । स नृपः । मन्थात्प्राङ्मन्थनात्पूर्वमनभिव्यक्ताऽदृष्टा रत्नोत्पत्तिर्यस्य सोऽर्णव इव [अनेन पुत्रबाहुल्यं अस्य राज्ञः सूचितं । राज्ञो गांभीर्यं सन्ततेश्च रत्नरूपत्वं–हे० चा०] । चिरमतिष्ठत् । सामग्र्यभावाद्विलम्बो न तु वन्ध्यत्वादिति भावः ।

(४.) ऋष्यशृङ्गादयः [ऋष्यस्य मृग (शृङ्ग) भेदस्य शृङ्गमिव शृङ्गं यस्य । तदादयः आदिशब्दात्कात्यायनजाबालीवामदेवाः गोकर्णप्रपतैणप्यौः सन्तो बुधाः–हे०] ऋष्यशृङ्गो नाम कश्चिदृषिः । तदादयः । ऋतुमृतौ वा यजन्तीत्यृत्विजो याज्ञिकाः । " ऋत्विग्दधक्–" इत्यादिना क्विबन्तो निपातः । जितात्मानो जितान्तःकरणाः [समस्तयज्ञशास्त्रकर्माधिकारिणः–चा०] सन्तः [तस्य राज्ञः-हे०] संतानकाङ्क्षिणः पुत्रार्थिनस्तस्य दशरथस्य पुत्रीयां पुत्रनिमित्ताम् (पुत्रप्राप्तिनिमित्तभूतां) । " पुत्राच्छ च " इति छप्रत्ययः । इष्टिं यागम् ("वचिस्वपीति संप्रसारणं ") आरेभिरे प्रचक्रमिरे (अथर्ववेदोक्तैर्मंत्रैः कल्पसूत्रोक्तविधानेन इति शेषः) ।

(५.) तस्मिन्नवसरे पुत्रकामेष्टिप्रवृत्तिसमये देवाः । पुलस्त्यस्य गोत्रापत्यं पुमान्पौलस्त्यो रावणः । तेनोपप्लुताः पीडिताः सन्तः । निदाघार्ता घर्मातुराः । अध्वानं गच्छन्तीत्यध्वगाः पान्थाः।"अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः" इति डप्रत्ययः। छायाप्रधानं वृक्षं छायावृक्षमिव । शाकपार्थिवादित्वात्समासः (शाकप्रियः पार्थिवः शाकपार्थिवः इतिवत् मध्यमपदलोपः) । हरिं विष्णुमभिजग्मुः (यथा घर्माक्रान्ताः जनाः सर्यातपक्लेशशान्तये छायया प्रचुरं वृक्षमाश्रयन्ते तथा दशास्यपरित्रस्ताः सुराः स्वपा दुःखस्य निवारणार्थं विष्णुं शरणं वव्रजुः)।

(3.) That King remained long, with his progeny waiting for some formal cause (collateral cause), as did the Ocean before the churning, the birth of whose gems was yet undisplayed (or like the ocean the production of the gems in which remained unmanifested before its being churned)

(4.) (Then) Rishyas'ringa and other holy priests of controlled minds commenced the son-securing sacrifice for him who longed for offspring.

(5.) Just at that time, the gods being tormented by the descendant of Pulastya (Râvana), went to Hari (Vishnu), as do travellers oppressed by heat to a shady tree.

ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ।
अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ॥ ६ ॥
भोगिभोगासनासीनं ददृशुस्तं दिवौकसः ।
तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम् ॥ ७ ॥
श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥ ८ ॥

(६.) ते देवाश्चोदन्वन्तं समुद्रम् । " उदन्वानुदधौ च " इति निपातः । प्रापुः । आदिपूरुषो विष्णुश्च बुबुधे (प्राबुध्यत) । योगनिद्रां जहावित्यर्थः । गमनप्रतिबोधयोरविलम्बार्थौ चकारौ । तथाहि । अव्याक्षेपो गम्यस्याप्रमादः । अविलम्ब इति यावत् । भविष्यन्त्याः कार्यसिद्धेर्लक्षणं लिङ्गं हि । उक्तं च — " अनन्यपरता चास्य कार्यसिद्धेस्तु लक्षणम् " इति (दिवौकसां तत्रोपस्थितेः समकालमेव परमात्मनो योगनिद्रापगमात् कार्यसिद्धिरदूरवर्तिनीति अनुमेयं) ।

(७.) द्यौरोको येषां ते दिवौकसो देवाः । पृषोदरादित्वात्साधुः । यद्वा दिवशब्दोऽदन्तोऽप्यस्ति । तथा च बुद्धचरिते—" न शोभते तेन हि नो विना पुरं मरुत्वता वृत्रवधे यथा दिवम् " इति । तत्र " दिवु क्रीडादौ " इति धातोः " इगुपध— " इति कः । दिवमोक एषामिति विग्रहः । भोगिनः शेषस्य भोगः शरीरम् । " भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः " इत्यमरः । स एवासनं सिंहासनम् । तत्रासीनमुपविष्टम् । आसेः शानच् । " ईदासः " इतीकारादेशः । तस्य भोगिनः फणामण्डले (फणानां समूहे । सहस्रशीर्षत्वात्) य उदर्चिष उद्गरश्मयो मणयस्तैर्द्योतितविग्रहं (प्रकाशितकायं । ननु स्वयंप्रकाशस्य कुतः परेणप्रकाशनम्) तं विष्णुं ददृशुः (शेषशायिनो भगवतो हरेर्देहालङ्काररूपेण परिणतस्तत्फणामणिरभूत्) ।

(८.) कीदृशं विष्णुम् । पद्मे (कमले) निषण्णाया उपविष्टायाः श्रियः (लक्ष्म्याः) क्षौमान्तरिता (क्षुमायाः विकारः क्षौमं दुकूलं तेन अन्तरिता) दुकूलव्यवहिता (दुकूले विलुप्ता अत एव अदृश्या) मेखला (काञ्ची) यस्य तस्मिन् । आस्तीर्णौ करपल्लवौ पाणिपल्लवौ यस्मिन् । विशेषणद्वयेनापि चरणयोः सौकुमार्यात्कटिमेखलास्पर्शासहत्वं सूच्यते । तस्मिन्नङ्के (उत्सङ्गे) निक्षिप्तौ चरणौ येन तम् [लक्ष्म्या विष्णोश्चरणसंवाहनं—चा०] ।

(6.) No sooner did they reach the ocean than the primeval Person awoke Absence of delay is certainly the sign of future success in an undertaking (the coming successful attainment of one's object)

(7.) The denizens of heaven saw him, reclining on a seat (or throne) made up of the body of the serpent, and whose person was illuminated by the luminous gems on his expansive hood (lit. the expance of his hood)—

(8.) Him who had his feet resting on the thigh (lap) of the goddess Lak-

प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥ ९॥
प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा॥ १०॥
बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः।
आविर्भूतमपां मध्ये पारिजातमिवापरम्॥ ११॥

(९.) पुनः कीदृशम्। प्रबुद्धे विकसिते पुण्डरीके (श्वेतकमले) इवाक्षिणी यस्य तम्। दिवसे तु पुण्डरीकमेवाक्षि यस्येति विग्रहः। बालातपनिभमंशुकं यस्य तम् [अन्यत्र। बाला कन्याराशिस्तत्र तपतीत्यातपो बालातपः कन्याराशिस्थस्यादित्यस्य नितरां भासो दीप्तयस्ता एव अंशुकं वस्त्रं यस्य तं इति वा–हे० चा० सु०]। पीताम्बरधरमित्यर्थः। अन्यत्र बालातपव्याजांशुकमित्यर्थः।" निभो व्याजसदृक्षयोः" इति विश्वः। प्रकृष्ट आरम्भो योगः [विष्णुसाक्षात्कारविषयः–हे०] येषां ते प्रारम्भा योगिनः [अन्यत्र प्रभाताः–हे०]। तेषां [सनकसनन्दनादीनां–हे०] सुखदर्शनम् (प्रारम्भानां सुखेन यथा स्यात्तथा दर्शनं)। अन्यत्र प्रारम्भ आदौ सुखदर्शनं शारदं शरत्संबन्धिनं दिवसमिव स्थितम्।

(१०.) पुनः किंविधम्। प्रभयानुलिप्तमनुरंजितं [श्रीर्वसति यस्मिन् तत्–हे०] श्रीवत्सं नाम लाञ्छनं येन तम्। लक्ष्म्या विभ्रमदर्पणं (ललितमण्डनस्य मुखप्रसाधनस्य वा यदुपयुज्यं दर्पणं) कौस्तुभ इत्याख्या यस्य तम् [कुं भूमिं स्तुभ्नाति व्याप्नोति इति कुस्तुभः समुद्रस्तस्माज्जात–चा०]। अपां समुद्राणां सारं स्थिरांशम्। अम्मयमणिमित्यर्थः। बृहतोरसा (विशालवक्षःस्थलेन) बिभ्राणम् (दधानं)।

(११.) विटपाकारैः शाखाकारैः। (दीर्घपीवरैरित्यर्थः)। दिव्याभरणभूषितैः (दिवि भव्यैराभरणैरलंकारैर्भूषितास्तैः) बाहुभिः (कारणभूतैः) उपलक्षितम् [स हि स्वर्णाभरणः बाहुभिरिति चतुर्भुजत्वं–हे०]। अत एवापां सिन्धूनां (समुद्रस्य क्षारवारिणां) मध्ये आविर्भूतं (प्रकटीभूतं) अपरं द्वितीयं पारिजातं [पारिण्यब्धौ जात–हे०] इव स्थितम्।

shmi seated as she was on a lotus,—the thigh which had its zone covered by the silk-woven garment, and on which were spread her tendril-like palms—

(9.) Him whose eyes were like a full-blown lotus (open), whose garment resembled the young sun, and who was easily to be seen by those who concentrated their minds on him, like autumnal day whose blooming lotuses are its eyes whose morning sun is its garment and which is agreeable to look at in its beginning—

(10) Him wearing on his broad breast the essence of the waters named Kaustubha, which was the mirror for Lakshmi's toilet (lit graces of her face) and which enveloped in its lustre the S'ri-Vatsa mark—

(11.) Him who was, as it were, another Párijáta that had appeared in the midst of waters by reason of his arms, adorned with celestial ornaments, being like the branches of a tree—

दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः ।
हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम् ॥ १२ ॥
मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥ १३ ॥
योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ॥ १४ ॥

(१२.) दैत्यस्त्रीगण्डलेखानामसुराङ्गनागण्डस्थलीनां यो मदरागस्तं विलुम्पन्ति हरन्तीति मदरागविलोपिनः (मदरागः क्षीवत्वं लोपितुं भर्तृघातेन शीलं येषां) तैश्चेतनावद्भिः सजीवैर्हेतिभिः सुदर्शनादिभिः शस्त्रैः । " रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः " इत्यमरः । उदीरितजयस्वनम् (उदीरितः अभिधीयमानः जयस्वनः जयशब्दः यस्य तं तथोक्तं)। जयशब्दमुदापयन्तीभिर्मूर्तिमतीभिरस्त्रदेवताभिरुपास्यमानमित्यर्थः ।

(१३.) मुक्तो भगवत्संनिधानात्त्यक्तः शेषणाहीश्वरेण सह विरोधः सहजमपि [कृष्णनैकट्यवर्तित्वात्—चा०] वैरं येन तेन । कुलिशव्रणाः (वज्रव्रणाः) अमृताहरणकाल इन्द्रयुद्धे ये वज्रप्रहारास्त एव लक्ष्माणि यस्य स तेन [सुधाहरणकाले इन्द्रेण सह कृतयुद्धत्वात्—हे० । इति वीर्योक्तिः । " एष पत्र त्यजाम्येकं यस्यान्तो नोपलप्स्यसे । न हि मे वज्रपातेन वेदनाप्यस्ति काचन " इति महाभारते—चा०] । प्रबद्धोऽञ्जलिर्येन तेन प्राञ्जलिना । प्रबद्धाञ्जलिनेत्यर्थः। [विष्णुना शिक्षितत्वात्—हे०] विनीतेनानुद्धतेन गरुत्मता (गरुडेन) उपस्थितमुपासितम् । पुरा किल मातलिप्रार्थितेन भगवता तद्दुहितुर्गुणकेश्याः पत्युः कस्यचित्सर्पस्य गरुडाद्भयप्रदाने कृते स्वविपक्षरक्षणक्षुभितं पक्षिराजं त्वद्वोढाहं त्वत्तो बलाच्च इति गर्वितं स्ववामतर्जनीभारेणैव भङ्क्त्वा भगवान्विनिनायेति महाभारतीयां कथां सूचयति विनीतेनेत्यनेन ।

(१४.) योगो मनसो विषयान्तरव्यावृत्तिः [ध्यानं आत्मारामत्वं—हे०] । तद्रूपा या निद्रा तस्या अन्तेऽवसाने विशदैः प्रसन्नैः पावनैः (अनुग्रहप्रवणैर्वा) शोधनैरवलोकनैः (दृष्टिपातैः) । सुखशयनं पृच्छन्तीति सौखशायनिकास्तान् । " पृच्छतौ सुस्नातादिभ्यः " इत्युपसंख्यानाट्ठक्प्रत्ययः । भृग्वादीनृषीन् [आदिग्रहणान्मरीचिपुलहस्त्यत्रयः—हे०] अनुगृह्णन्तम् (अनुग्रहं कुर्वाणं) ।

(12.) Him whose victory was proclaimed by his sentient arms (weapons) destroying the ruddy flush caused by wine, on the surface of the cheeks of the wives of the demons—

(13.) Him who was waited on with folded arms by the humble Garuda, who bore (on his person) the scars of the wounds made by the thunder-bolt, and who had left the natural antipathy to the serpent Shesha—

(14.) Him who was favouring Bhrigu and other Munis who had been there to enquire about his pleasant (sound) sleep, with his purifying glances that looked bright at the end of the contemplation-sleep.

प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥ १५ ॥
नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥ १६ ॥
रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ १७ ॥

(१५.) अथ दर्शनानन्तरं सुराः सुरद्विषामसुराणां । (कर्मणि षष्ठी) । शमयित्रे विनाशकाय तस्मै विष्णवे ।(इति क्रियायोगे चतुर्थी)। प्रणिपत्य स्तुत्यं स्तोत्रार्हम् । " एतिस्तुशास्वृदृजुषः क्यप् " इति क्यप्प्रत्ययः । वाक्च मनश्च वाङ्मनसे । " अचतुर-" इत्यच्प्रत्ययान्तो निपातः । तयोर्गोचरो विषयो न भवतीत्यवाङ्मनसगोचरः [वाङ्मनसपथानां विषयातीतः। यदाह । " यतो वाचो निवर्तन्ते अप्राप्य मनसा सह " इति श्रुतिदर्शनात्-चा०] । तमेनं विष्णुं तुष्टुवुरस्तुवन् ।

(१६.) पूर्वमादौ विश्वसृजे विश्वस्रष्ट्रे । [" यतो वा इमानि भूतानि जायन्ते " इति श्रुतिदर्शनात्-चा०] । तदनु सर्गानन्तरं विश्वं बिभ्रते पुष्णते । अथ विश्वस्य संहर्त्रे । एवं त्रेधा सृष्टिस्थितिसंहारकर्तृत्वेन स्थित आत्मा स्वरूपं यस्य तस्मै ब्रह्मविष्णुहरात्मने तुभ्यं नमः [" ब्रह्मत्वे सृजते लोकान् विष्णुत्वे पालयत्यपि रुद्रत्वे संहरत्येव तिस्रोवस्थाः स्वयंभुवः " इति-हे०] । ननु कूटस्थस्य कथं त्रैरूप्यमित्याशङ्क्यौपाधिकमित्याह—

(१७.) एकरसं मधुरैकरसं दिवि भवं दिव्यं पयो वर्षोदकं देशे देश ऊषरादिदेशेऽन्यान्रसान्रसान्तराणि लवणादीनि (भिन्नरुचित्वं) यथाश्नुते प्राप्नोति । [" असङ्गो ह्ययं पुरुषः " इत्यादिश्रुतिदर्शनात्-चा०] । एवमविक्रियो निर्विकारः । एकरूप इत्यर्थः । त्वं गुणेषु सत्त्वादिष्ववस्थाः [विष्णुब्रह्मारुद्रलक्षणाः सुखदुःखमोहरूपा वा-हे०] स्रष्टृत्वादिरूपा अश्नुषे [तत्त्वतो निरुपाधिकस्वरूपेपि त्वयि स्रष्टृत्वादिव्यवहारो गुणोपाधिनिबन्धनः इति भावः-चा०] ।

(15.) Then the gods having bowed to him the destroyer of their enemies, offered prayers unto Him who is worthy of praise and who does not come within the scope of either words or mind (conception).

(16.) A bow to thee who remainest in three forms ; (to thee) as the Creator first, afterwards the Protector and then the Destroyer, of the Universe.

(17.) As the water from heaven (rain-water) which has but originally one savour (or taste) obtains a diversity of flavours (assumes different tastes) in different parts of the countries ; so thou who art immutable, assumest different conditions in ifferent qualities (of Satva, Rajas and Tamas).

अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥ १८ ॥
हृदयस्थमनासन्नमकामं त्वां तपस्विनम् ।
दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥ १९ ॥

(१८.) हे देव त्वममेयः (नास्ति मेयं यस्य स तथोक्तः) लोकैरियत्तया न परिच्छेद्यः। मितलोकः (मिताः लोका येन) परिच्छिन्नलोकः [तदुक्तं। अव्यक्ताद्व्यक्तयः सर्वाः प्रभ- (हरं) वंत्यहरागमे " इति–हे०] । अनर्थी निःस्पृहः । आवहतीत्यावहः । पचाद्यच् । प्रार्थनानामावहः [प्रार्थनामावहति सम्पादयतीति–हे०चा०] कामदः अजितोऽन्यैर्न जितः । जिष्णुर्जयशीलः । अत्यन्तमव्यक्तोऽतिसूक्ष्मरूपः । व्यक्तस्य स्थूलरूपस्य [प्रपञ्चस्य–हे०] कारणम् (हेतुः) । [" व्यक्तस्फुटमनीषिणोः " इति विश्वः–हे०] ।

(१९.) हे देव त्वां त्वद्दयस्थं सर्वान्तर्यामितया नित्यसंनिहितं तथाप्यनासन्नमगम्यरूपत्वाद्विप्रकृष्टं च विदुः। संनिकृष्टस्यापि विप्रकृष्टत्वमिति विरोधः। तथाकामम् । न कामोऽभिलाषोऽस्य तं (निरभिलाषं) परिपूर्णत्वान्निःस्पृहत्वाच्च निष्कामम् । तथापि तपस्विनं प्रशस्ततपोयुक्तं विदुः । यो निष्कामः स कथं तपः कुरुत इति विरोधः [परिपूर्णत्वादकामो लोकयात्रार्थं तपस्यति । तदुक्तं गीतासु । " न मे पार्थास्ति कर्तव्यं । त्रिषु लोकेषु किंचन । नानवाप्तमवाप्तव्यं । प्रवर्तेऽपि च कर्मणि " इति–हे०]। परिहारस्तु ऋषिरूपेण दुस्तरं तपस्तप्यते । दयालुं (कृपावन्तं । " यत्नादपि परिक्लेशं हर्तुं या त्वदि जायते । इच्छा भूमिसुरश्रेष्ठ सा दया परिकीर्तिता " इत्युक्तलक्षणात्) परदुःखप्रहरणपरं तथाप्यनघस्पृष्टं नित्यानन्दस्वरूपत्वाददुःखिनं विदुः । " अघं दुरितदुःखयोः " इति विश्वः । दयालुरदुःखी चेति विरोधः । " ईर्ष्यी घृणी त्वसंतुष्टः क्रोधनो नित्यशङ्कितः । परभाग्योपजीवी च षडेते नित्यदुःखिताः " इति महाभारते । पुराणमनादिमजरं (न विद्यते जरा यस्य तं तथोक्तं) निर्विकारत्वादक्षरं विदुः । चिरंतनं न जीर्यत इति विरोधालंकारः । उक्तं च–" आभासत्वे विरोधस्य विरोधालंकृतिर्मता " इति । विरोधेन चालौकिकमहिमत्वं व्यज्यते ।

(२०.) त्वं सर्वं जानातीति सर्वज्ञः [सर्वेश्वरत्वात्–हे०] । " इगुपध–" इति कप्रत्ययः । अविज्ञातः । न केनापि विज्ञात इत्यर्थः । त्वं सर्वस्य योनिः कारणम् [योनीरित्य-

(18.) O Lord ! immeasurable as thou art, thou hast measured all the worlds ; indifferent to all the desires, thou grantest the desires of all ; unconquered thyself, thou art conquering ; thyself imperceptible, thou art the cause of the perceptible world.

(19) O Lord ! the sages declare thee to be present in the heart (of all) and yet not near (to the comprehension) ; free from desires yet thou art an ascetic, compassionate yet not affected by grief, old, yet not subject to decay.

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥ २० ॥
सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम्॥ २१ ॥

सम्यत्वं–हे०] त्वमात्मन एव भवतीत्यात्मभूः (स्वयंभूः)। न ते किंचित्कारणमस्तीत्यर्थः। त्वं सर्वस्य प्रभुः [सर्गस्थितिप्रलयत्वात्–हे०]। त्वमनीशः (न विद्यते ईशो यस्य स तथोक्तः)। त्वमेकः सर्वरूपभाक् [सर्वेषां रूपाणि भजतीति। विश्वात्मकत्वात्–हे०]। त्वमेक एव सर्वात्मना वर्तस इत्यर्थः।

(२१.) हे देव त्वां सप्तभिः सामभी रथंतरादिभिरुपगीतम् [सूक्तैः स्तुतं। "रथंतरं। बृहद्रथंतरं। वामदेव्यं। वैरूप्यं। पावमान्यं। वैजयं। चान्द्रमसं" इति सप्त सामानि गजोत्पत्तिकारणानि। "सूर्यस्याण्डकपाले द्वे समानीय प्रजापतिः। हस्ताभ्यां परिगृह्याथ सप्त सामान्यगायत। जपतो ब्रह्मणस्तस्मात्समुत्पन्ना मतंगजाः" इति पालकाव्यः–हे०]। "तद्धितार्थ–" इत्युत्तरपदसमासः। सप्तानामर्णवानां जलं सप्तार्णवजलम् [क्षारेक्षुरससुरादधिघृतक्षीरपूर्णाः सप्तार्णवाः–हे०]। पूर्ववत्समासः। तत्र शेते यः स सप्तार्णवजलेशयः। तम्। "शयवासवासिष्वकालात्" इत्यलुक्। सप्तार्चिर्मुखं यस्य तम् [सप्तार्चिषो यस्य सोऽग्निमुखं यस्य। "काली कराली धूम्रा च लोहिता च मनोजवा। स्फुलिङ्गिनी विश्वरूपा सप्त जिह्वाः प्रकीर्तिताः" इति गर्गः। यद्वा। "भवति हिरण्या कनका रक्ता कृष्णा च सुप्रभा चान्या। अतिरक्ता बहुरूपेति सप्त सप्तार्चिषो जिह्वाः" इति हलायुधः–हे० चा०]। "अग्निमुखा वै देवाः" इति श्रुतेः। सप्तानां लोकानां भूर्भुवःस्वरादीनामेकसंश्रयम् [संश्रयत्येनमिति संश्रयः सप्तानां लोकानां एकश्चासौ संश्रयश्च तं तथोक्तं। "भूर्भुवःस्वर्महर्जनस्तपःसत्यं" इति सप्त लोकाः। "भुवनानि च बध्नीयात्त्रीणि सप्त चतुर्दश" इति वाग्भटः–हे०] ["क्षीरोदो लवणोदश्च दध्योदश्च घृतोदकः। स्वादूदकः सुरोदश्च तथैवेक्षुरसोदधिः" इति वायुपुराणे–चा०हे०]। एवंभूतमाचख्युः।

(२२.) चतुर्णां धर्मार्थकाममोक्षाणां वर्गश्चतुर्वर्गः। "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इत्यमरः। तत्फलकं यज्ज्ञानम्। [ज्ञानमन्तरेण धर्मादिप्रवृत्त्यभावात्–चा०]।

(20.) Though omniscient thou art thyself unknown, though the source of all thou art self-existent (born in thyself), thou the Lord of all, art thyself without any superior, thou art alone and yet assumest all forms.

(21.) They have declared thee O lord ! to be the sole refuge (or one support) of the seven worlds, resting in the waters of seven oceans : thou hast been sung in (by) the seven Sâmans and hast (seven-flamed) fire for thy mouth (introduction to thee is through Agni alone).

चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥ २२ ॥
अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ॥ २३ ॥
अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥ २४ ॥

चत्वारि युगानि कृतत्रेतादीनि यासु ताश्चतुर्युगाः कालावस्थाः कालपरिमाणम् । चत्वारो वर्णाः प्रकृता उच्यन्ते यस्मिन्निति चतुर्वर्णमयः । चातुर्वर्ण्यप्रचुर इत्यर्थः [" ब्रह्मक्षत्रियविट्शूद्रा वर्णाः " इति याज्ञवल्क्यः–चा०] । तत्प्रकृतवचने मयट् । " तद्धितार्थ–" इत्यादिना तद्धितार्थे विषये तत्पुरुषः । स लोकः । इत्येवरूपं सर्वं चतुर्मुखाच्चतुर्मुखरूपिणस्त्वत्तः । जातमिति शेषः । " इदं सर्वमसृजत यदिदं किंचित् " इति श्रुतेः ।

(२३.) अभ्यासेन [अभ्यस्यत इत्याभ्यासो योगः तेन–हे०] निगृहीतं विषयान्तरेभ्यो निवर्तितम् (बाह्योपाधिभ्यः पराङ्मुखमर्थाज्जितं) । तेन मनसा योगिनः (सनकादयः) हृदयाश्रयं हृत्पद्मस्थं ज्योतिर्मयं त्वां [" अयं पुरुषः स्वयंज्योतिः" इति श्रुतेः–चा०] विमुक्तये मोक्षार्थं विचिन्वन्त्यन्विष्यन्ति [विषया यस्मिंश्चैव निलीयन्ते हृदयं तद्विजानीयादिति हृदयमनसोर्भेदः–हे०] । ध्यायन्तीत्यर्थः (बहुकालव्यापिना योगसमाधिना भवत्साक्षात्काराय मुनयः प्रयतन्ते तत्त्वज्ञानस्य संसारविनिवृत्तेः कारणत्वात्) ।

(२४.) न जायत इत्यजः ।" अन्येष्वपि दृश्यते " इति डप्रत्ययः । तस्याजस्य जन्म शून्यस्यापि जन्म गृह्णतः । मत्स्यादिरूपेण जायमानस्य । निरीहस्य चेष्टारहितस्य [निर्व्यापारस्य–हे० निःस्पृहस्य–चा० रागद्वेषादिरहितस्य–सु०] अपि हतद्विषः शत्रुघातिनो जागरूकस्य सर्वसाक्षितया नित्यप्रबुद्धस्यापि स्वपतो योगनिद्रामनुभवतः । इत्थं विरुद्धचेष्टस्य तव याथार्थ्यं (यथार्थस्वरूपं) को वेद वेत्ति । " विदो लटो वा " इति णलादेशः ।

(२५.) किंच । कृष्णादिरूपेण शब्दादीन्विषयान्भोक्तुम् । नरनारायणादिरूपेण दुश्चरं तपश्चरितुम् । तथा दैत्यमर्दनेन प्रजाः पातुम् । औदासीन्येन (उदास्ते असौ उदासी-

(22) From thee, having four mouths, spring the know-ledge resulting in the four ends (purposes) of life, the arrangement (division) of time into the four cycles, and the people consisting of the four castes.

(23) With minds restrained by the practice of contemplation, the Yogins (or devotees) seek thee for emancipation (release from life), who thou full of light abidest in their hearts.

(24.) Who knows thy real nature ? Though unborn thou takest birth. Though without action yet thou hast destroyed the enemies, and though sleeping (enjoying the contemplation-sleep) thou art wide awake.

शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः ।
पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्तितुम् ॥ २५ ॥
बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः ।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥ २६ ॥
त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम् ।
गतिस्त्वं वीतरागाणामभूयःसंनिवृत्तये ॥ २७ ॥

नः तस्य भावः औदासीन्यं तेन) ताटस्थ्येन वर्तितुं च पर्याप्तः समर्थोऽसि । भोगतपसोः पालनौदासीन्ययोश्च परस्परविरुद्धयोराचरणे त्वदन्यः कः समर्थ इत्यर्थः ।

(२६.) आगमैस्त्रयीसांख्यादिभिर्दर्शनैर्बहुधा भिन्ना अपि सिद्धिहेतवः पुरुषार्थसाधकाः पन्थान उपायाः । जाह्नव्या इमे जाह्नवीया गाङ्गाः । " वृद्धाच्छः " इति छप्रत्ययः । ओघाः प्रवाहाः । तेऽप्यागमैरागतिभिर्बहुधा भिन्नाः सिद्धिहेतवश्च । अर्णव इव । त्वय्येव निपतन्ति प्रविशन्ति । येन केनापि रूपेण त्वामेवोपयान्तीत्यर्थः । यथाहुराचार्याः—" किं बहुना कारवोऽपि विश्वकर्मेत्युपासते " इति (विभिन्नेष्वपि श्रुतिवचनेषु मुनिमतेषु च तेषां प्रतिपाद्यस्त्वमेवैकः) ।

(२७.) त्वय्यावेशितं निवेशितं चित्तं (मनः) यैस्तेषाम् । तुभ्यं समर्पितानि कर्माणि यैस्तेषाम् । " मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि कौन्तेय प्रतिजाने प्रियोऽसि मे " इति भगवद्वचनात् । वीतरागाणां (वीतः निवृत्तः रागो विषयाभिलाषो येषां तथोक्तानां गताभिलाषाणां) विरक्तानामभूयःसंनिवृत्तयेऽपुनरावृत्तये । मोक्षायेत्यर्थः । त्वमेव गतिः साधनम् [उपायः—हे० प्राप्यः—चा० सु०] । " तमेवं विदित्वातिमृत्युमेति । नान्यः पन्था विद्यतेऽयनाय " इति श्रुतेरित्यर्थः ।

(२८.) प्रत्यक्षः प्रत्यक्षप्रमाणगम्योऽपि तव मह्यादिः पृथिव्यादिर्महिमैश्वर्यमपरिच्छेद्यः । इयत्तया नावधार्यः । आप्तवाग्वेदः । " यतो वा इमानि भूतानि जायन्ते " इत्यादिश्रुतेः । अनुमानं क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवदित्यादिकम् । ताभ्यां साध्यं [साध-

---

(25.) Thou art (alone) able to enjoy the objects of sense (such as) sound and others, and also practise austere penance (or asceticism). (Thou art able) to protect the people and (all the while) stand in indifference.

(26.) The ways which are the cause of supreme felicity (or the four aims of man's life) though in many ways different in different S'ástras all meet in thee alone, as the streams of the Jáhnavî, though running in different courses, fall (at last) into the ocean.

(27) To those who have placed (devoted) their minds into thee and who have consigned all their actions to thee, whose desires of worldly enjoyments have vanished, thou (to all these) art the refuge to avoid coming back again (lit: to return never more).

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥ २८ ॥
केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ॥ २९ ॥
उदधेरिव रत्नानि तेजांसीव विवस्वतः ।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥ ३० ॥

यितुं शक्यं-हे० प्रतिपाद्यं-चा०] गम्यं त्वां प्रति का कथा [अतिशयेन ज्ञातुं न समर्थः इत्यर्थः-चा०] प्रत्यक्षमपि त्वत्कृतं जगदपरिच्छेद्यम् । तत्कारणमप्रत्यक्षस्त्वमपरिच्छेद्य इति किमु वक्तव्यमित्यर्थः [यः प्रत्यक्षप्रमाणेनापि गृहीतुमशक्यः । तदा प्रमाणान्तरैः कथं ज्ञातव्यो भवेत्-सु०] (प्रत्यक्षप्रमाणगम्यानां मह्यादीनां त्वत्कृतीनां महिम्नः अपरिच्छेद्यत्वे प्रसिद्धे तेषां सर्वेषां कारणीभूतस्य तव वेदप्रमाणैरनुमानैश्च कल्पनाघटितैः प्रमाणैः सम्यक्परिच्छेदः सुतरामसंभाव्यो दुरासदो वेतिकिमु वक्तव्यमिति लक्ष्यम्) ।

(२९.) स्मरणेन केवलं कृत्स्नम् । "केवलः कृत्स्न एकश्च" इति शाश्वतः । पुरुषं स्मर्तारं जनं पुनासि । यतः । यदित्यर्थः । अनेन स्मृतिकार्येणैव त्वयि त्वद्विषये याः शेषा अवशिष्टा वृत्तयः [स्नपनचंदनाद्याः-हे० त्वदर्चनस्मरणादयः दर्शनस्पर्शनादीन्द्रियवृत्तयो वा-चा० सु०] दर्शनस्पर्शनादयो व्यापारास्ता निवेदितफला (निवेदितानि फलानि यासां ताः तथोक्ताः) विज्ञापितकार्याः । तव स्मरणस्यैवैतत्फलम् । दर्शनादीनां तु कियदिति नावधारयाम इति भावः। ("यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः" इति स्मरणेनैव पुण्यतामापादयतस्तव दर्शनस्पर्शनभाषणादयः सुतरां पावना इति किमु वक्तव्यम्) ।

(३०.) उदधेः (उदकं धीयते इति उदधिस्तस्य) रत्नानीव [इति रम्यतानन्तता च-हे०]। विवस्वतस्तेजांसीव [इति तेजस्वितानन्तता च-हे०] । दूराण्यवाङ्मनसगोचराणि ते चरितानि (चरित्राणि) स्तुतिभ्यो व्यतिरिच्यन्ते (अधिकानि भवन्ति) । निःशेषं स्तोतुं न शक्यन्त इत्यर्थः [एतेन श्रेष्ठत्वमूर्जस्वित्वमानंत्यं चोक्तं-चा०] ।[इदानीं स्तुत्युपसंहारेणैव पूर्ववर्णनशंकां निरस्यति-हे०] ।

(३१.) अनवाप्तमप्राप्तम् । अवाप्तव्यं प्राप्तव्यं ते तव किंचन किंचिदपि न विद्यते ।

(28.) Thy greatness, which consists in Earth and others, though visible can not be defined ; how can then one talk of thee as being inferrible (knowable) by inference and reliable words (the Vedas) ?

(29.) Since thou purifiest a person simply when he remembers thee, the remaining functions of senses in thee, by this act, do declare their effects (how better or more desirable would the effects be if men would see thee or touch thee &c.)

(30.) Thy incomprehensible deeds transcend our praises, like the far-extending jewels of the ocean or rays of the sun.

अनवाप्तमवाप्तव्यं न ते किंचन विद्यते ।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः ॥ ३१ ॥
महिमानं यदुत्कीर्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥ ३२ ॥
इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ ३३ ॥

नित्यपरिपूर्णत्वादिति भावः । तर्हि किंनिबन्धने जन्मकर्मणी । तत्राह—लोकेति । एको लोकानुग्रहः [प्रजारक्षणं—चा० सु०] एव ते तव जन्मकर्मणोर्हेतुः [धर्मत्राणाय ते शरीरग्रहणं। उक्तञ्च गीतायां । " यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं " इति—चा०] । परमकारुणिकस्य ते परार्थैव प्रवृत्तिः । न स्वार्थेत्यर्थः ।

(३१.) तव महिमानमुत्कीर्त्य (उच्चार्य) वचः संह्रियत इति यत् । तद्वचःसंहरणं श्रमेण वाग्व्यापारश्रान्त्या । अशक्त्या कार्त्स्न्येन वक्तुमशक्यत्वाद्वा । गुणानामियत्तया [इदं परिमाणं अस्य इयान् तस्य भावः इयत्ता तया—हे०] एतावन्मात्रतया न [परिच्छिन्नतया न यावन्तो गुणास्तावन्तो वर्णिता इति वाक्यनिवृत्तिर्नास्तीति भावः—चा० सु०] । तेषामानन्त्यादिति भावः ।

(३२.) इति ते सुरास्तमधोभूतमक्षजमिन्द्रियजं ज्ञानं यस्मिंस्तमधोक्षजम् [अधःकृतानि जितानि अक्षाणि इन्द्रियाणि यैस्ते अधोक्षजाः वसुदेवादयः तेभ्यो जायते कृष्णादिरूपेणेति । यद्वा । अधःकृतं अक्षजं इन्द्रियजं ज्ञानं येन सः । तत्परोक्षप्रियो हरिरिति पुराणं । परोक्षप्रियो हि देवः इति श्रुतिश्च—हे०] । विष्णुं प्रसादयामासुः प्रसन्नं चक्रुः । हि यस्मात्परमेष्ठिनः सर्वोत्तमस्य तस्य देवस्य सा देवैः कृता भूतार्थव्याहृतिर्भूतस्य सत्यस्यार्थस्य व्याहृतिरुक्तिः । " युक्ते क्ष्मादावृते भूतम् " इत्यमरः। न स्तुतिर्न प्रशंसामात्रम् । महान्तो हि यथाकथंचिन्न सुलभा इति भावः । परमे स्थाने तिष्ठतीति परमेष्ठी । " परमे कित् " इत्युणादिसूत्रेणतिष्ठतेरिनिः । " तत्पुरुषे कृति बहुलम् " इति सप्तम्या अलुक् । "स्थास्थिन्स्थृणाम्" इति वक्तव्यात्षत्वम् ।

(31.) There is nothing unattained by thee which is yet to be obtained, the sole (lit. one) object of thy birth and thy actions is only to oblige the world (or people).

(32.) That the speech is cut short after having praised thy greatness—is due to exhaustion or inability and not to the limitation of thy qualities.

(33.) Thus those gods propitiated Him who baffles the perception of senses, for it was no praise of the Supreme Being but a mere exposition of truth.

तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतये सुराः ।
भयमप्रलयोद्वेलादाचख्युर्नैर्ऋतोदधेः ॥ ३४ ॥
अथ वेलासमासन्नशैलरन्ध्रानुनादिना ।
स्वरेणोवाच भगवान्परिभूतार्णवध्वनिः ॥ ३५ ॥
पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता ।
बभूव कृतसंस्कारा चरितार्थैव भारती ॥ ३६ ॥

(३४.) सुरा देवाः । कुशलस्य संप्रश्नेन व्यञ्जिता प्रकटीकृता प्रीतिर्यस्य तस्मै । लक्षितप्रसादायेत्यर्थः । अन्यथा अनवसरविज्ञप्तिर्मुखराणामिव निष्फला स्यादिति भावः । तस्मै विष्णवेऽप्रलये प्रलयाभावेऽप्युद्वेलादुन्मर्यादात् । नैर्ऋतो [ऋगतौ । निऋच्छतीति निऋतिः निर्ऋतिरेव नैर्ऋतिः नैर्ऋतेरलक्ष्म्या वा अपत्यं । "स्यादलक्ष्मीस्तु नैर्ऋतिः" इति-हे०] राक्षसः । स एवोदधिः । तस्माद्भयमाचख्युः कथितवन्तः [अब्धिस्तु प्रलयोद्वेलात् स तु सदैव-हे०] । (प्रलयकालोदधयो वेलामुत्तीर्य जगदाप्लावयन्ति अयं निशाचरसमुद्रस्तु तद्व्यतिरिक्तेऽपि काले परित्यक्तमर्यादः सन् जनान् भीतिमुत्पादयतीति भावः) ।

(३५.) अथ वेलायामब्धिकूले समासन्नानां संनिकृष्टानां शैलानां रन्ध्रेषु गह्वरेष्वनुनादिना प्रतिध्वनिमता स्वरेण परिभूतार्णवध्वनिः (परिभूतः पराभवं प्रापितः अर्णवस्य समुद्रस्य ध्वनिरुद्घोषो येन सः) तिरस्कृतसमुद्रघोषो भगवान् (भगः ऐश्वर्यं अस्यास्तीति भगवान् हरिः) उवाच (समुद्रघोषादपि गम्भीरतरेण स्वरेण वाचमाददे) ।

(३६.) पुराणस्य चिरंतनस्य कवेः (वेदकर्तुः) तस्य भगवतो वर्णस्थानेषूरःकण्ठादिषु समीरिता सम्यगुच्चारिता ["अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च"-हे०] । अत एव कृतः संपादितः संस्कारः [प्रकृतिप्रत्ययनिर्वचनं संवृतादिर्वा-हे० विहितव्याकरणालंकारादिसंस्कारः-चा०] साधुत्वस्पष्टतादिप्रयत्नो यस्याः सा भारती वाणी चरितार्था कृतार्था बभूवैव (भगवन्मुखोच्चारिततया वाग्देवी कृतार्थाऽहमित्यमंस्तेवेति भावः) । एवकारस्त्वसंभावनाविपरीतभावनाव्युदासार्थः ।

(34.) The gods mentioned to him whose favour was clearly manifested) (expressed) by his enquiry after their welfare, the danger arising from the ocean (in the form) of the Rākshasas that had over-flowed (transgressed) its limits though it was not the time of final dissolution.

(35.) Then the Divine Being spoke in a voice that resounded in the caverns of the mountains near the shores (of the ocean) and drowned (overcame, exceeded) the roar of the ocean.

(36) The Goddess of speech purifid by being pronounced through the places of letters (the several vocal organs) of that Primeval Poet, did, as it were, gain the object of her being.

बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता ।
निर्यातशेषा चरणाद्गङ्गेवोर्ध्वप्रवर्तिनी ॥ ३७ ॥
जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ ।
अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ ॥ ३८ ॥
विदितं तप्यमानं च तेन मे भुवनत्रयम् ।
अकामोपनतेनेव साधोर्हृदयमेनसा ॥ ३९ ॥
कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा ।
स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ॥ ४० ॥

(३७.) विभोर्विष्णोर्वदनादुद्गता निःसृता । सदशनज्योत्स्ना दन्तकान्तिसहिता । इदं च विशेषणं धावल्यातिशयार्थम् । अत एव सा भारती । चरणादङ्घ्रेर्निर्याता चासौ शेषा च निर्यातशेषा [निर्यातः शेषः यस्याः सा–चा०] । निःसृतावशिष्टेत्यर्थः । " स्त्रियाः पुंवत्–" इत्यनुवर्त्य " पुंवत्कर्मधारयः–" इति पुंवद्भावः । निर्यातशब्दस्य या निर्याता सावशेषा सा गङ्गेवेति सामानाधिकरण्यनिर्वाहः । निर्यातायाः शेषेति विग्रहे पुंवद्भावो दुर्घट एव । ऊर्ध्वप्रवर्तिनी ऊर्ध्ववाहिनी गङ्गेव (" गंगा विष्णुपदा जह्नुतनया देवनिम्नगा " इति विश्वः) । बभौ (बभासे)। इत्युत्प्रेक्षा । यदाह भगवांस्तदाह—

(३८.) हे देवा वो युष्माकमनुभावपराक्रमौ महिमपुरुषकारौ रक्षसा रावणेन । अङ्गिनां शरीरिणां प्रथममध्यमावुभौ गुणौ सत्वरजसी तमसेव तमोगुणेनेव । (" राहौ ध्वान्ते गुणे तमः " इत्यमरः) । आक्रान्तौ जाने । वाक्यार्थः कर्म ।

(३९.) किंच । अकामेनानिच्छयोपनतेन प्रमाद्दागतेनैनसा पापेन-साधोः सज्जनस्य हृदयमिव । तेन रक्षसा तप्यमानं संतप्यमानम् । तपेर्भौवादिकात्कर्मणि शानच् । भुवनत्रयं च मे विदितम् । मया ज्ञायत इत्यर्थः ["ते मे शब्दौ निपातेषु त्वयामयेति तस्मिन्नर्थे " इति वामनः–हे०] । " मतिबुद्धि–" इत्यादिना वर्तमाने क्तः । " क्तस्य च वर्तमाने " इति षष्ठी ।

(४०.) किंच । एककार्यत्वात् (एकं कार्यं ययोस्तौ तयोर्भावः तस्मात्) आवयोरेक-

---

(37.) That speech proceeding from the mouth of the Lord mixed with the lustre of his teeth appeared like a stream of the Gangá flowing upwards, the remainder of what had flown from his feet.

(38.) I know your greatness and prowess to have been superseded by the demon (Rávana), as the first and the middle (i. e. second) qualities (Satva and Rajas) of embodied beings (animals) are assailed by the quality of darkness (the third or Tamas).

(39.) And it is known to me that the three worlds have been oppressed by him, as the heart of a pious man by the sin unconsciously committed.

(40.) Owing to the sameness of business no request to me in these affairs

स्वासिधारापरिहृतः कामं चक्रस्य तेन मे ।
स्थापितो दशमो मूर्धा लभ्यांश इव रक्षसा ॥ ४१ ॥
स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः ।
अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः ॥ ४२ ॥

कार्यैकत्वाद्धेतोः । कार्येषु कर्तव्यार्थेषु विषयेषु वज्रिणेन्द्रेणाभ्यर्थ्यः । इदं कुर्विति प्रार्थनीयः । नास्मि । तथा हि । वातः (वायुः) स्वयमेवाग्नेः सारथ्यं साहाय्यं प्रतिपद्यते प्राप्नोति । न तु वह्निप्रार्थनया [तथा कुमारसंभवे । " समीरणः प्रेरयिता भवेति । व्यादिश्यते केन हुताशनस्य " इति-हे०] । इत्यवक्रारार्थः । प्रेक्षावतां हि स्वार्थेषु स्वत एव प्रवृत्तिः । न तु परप्रार्थनया । स्वार्थश्चाय ममार्पीत्यर्थः । पुरा किल त्रिपुरारिप्रीणनाय स्वशिरांसि छिन्दता दशकन्धरेण यद्दशमं शिरोऽवशेषितं तन्मच्चक्रार्थमित्याह—

(४१.) स्वासिधारया स्वखड्गधारया परिहृतः । अच्छिन्न इत्यर्थः । दशमो मूर्धा मे मम चक्रस्य कामं पर्याप्तः [स्वेच्छया हे०] लभ्यांशः छेद्यभाग इव तेन रक्षसा स्थापितः [चन्द्रहासः नवशिरांसि अछिनत् दशमं यन्नाछैत्सीत्तन्नूनं मे चक्रभागः इत्युत्प्रेक्षा-चा० पुरा महादेवस्याग्रे स्वस्य नवशिरांसि छित्वा पूजां कृत्वा यद्दशमं शिरो न छिन्नं तन्मया छेद्यं-सु० । अत्र हि रामायणं । "दशवर्षसहस्रं तु निराहारो दशाननः । पूर्णे वर्षसहस्रे तु शिरश्चाग्नौ जुहाव सः । एवं वर्षसहस्राणि गतानि नियतात्मनः । दशवर्षसहस्रं तु निराहारो दशाननः । पूर्णे वर्षसहस्रे तु दशमे दशमं शिरः । छेत्तुकामे दशग्रीवे प्राप्तस्तत्र पितामहः । पितामहस्तु सुप्रीतः सार्द्धं देवैरुपस्थितः । तव तावद्दशग्रीव प्रीतोस्मीत्यभ्यभाषत] । तन्मवैथा तमहं हनिष्यामीत्यर्थः । तर्हि किं प्रागुपेक्षितमत आह—

(४२.) किंतु स्रष्टुर्ब्रह्मणो वरातिसर्गाद्वरदानाद्धेतोः । मया तस्य दुरात्मनः (जाल्मस्य) रिपो रावणस्यात्यारूढमत्यारोहणम् [आक्रमोत्कर्षः-हे०सु०] । अतिवृद्धिरित्यर्थः । नपुंसके भावे क्तः । भोगिनः सर्पस्यात्यारूढं [दौष्ट्यं-चा० सु०] चन्दनेनेव । सोढम् । चन्दनद्रुमस्यापि तथा सहनं स्रष्टुर्नियतेरिति द्रष्टव्यम् [यथा चन्दनेन सर्पस्यारोहणं सह्यते तथा मयापि-सु०] । संप्रति वरस्वरूपमाह—

---

on the part of Indra is needed For the wind, of itself, assumes the office of a helper to fire.

(41.) The tenth head of the demon which has been spared by (from) the edge of his own sword has been, as it were, reserved by him as a worthy (i. e. sufficient) tribute to my disk (as a full portion fit to be severed by my quoit).

(42.) I have borne the audacious insolence of that wicked enemy in consequence of a boon granted to him by Brahmá, as a sandal tree bears annoyance caused by a snake.

धातारं तपसा प्रीतं ययाचे स हि राक्षसः।
दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ॥ ४३ ॥
सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम्।
करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम् ॥ ४४ ॥
अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः।
मायाविभिरनालीढमादास्यध्वे निशाचरैः ॥ ४५ ॥
वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि।
पुष्पकालोकसंक्षोभं मेघावरणतत्पराः ॥ ४६ ॥

(४३.) स राक्षसस्तपसा प्रीतं संतुष्टं धातारं ब्रह्माणम्। मर्त्येषु (मनुष्येषु) विषये आस्थापराङ्मुखः [आस्थायां पराङ्मुखः। आस्था तात्पर्य संभावना वा–हे०] आदरविमुखः सन्। मर्त्यानगणयन्नित्यर्थः। दैवादष्टविधात्सर्गाद्दैवसृष्टेरवध्यत्वं ययाचे हि (याचिर्द्विकर्मकः अतः कर्मद्वयं)। तर्हि का गतिरित्याशङ्क्य मनुष्यावतारेण हनिष्यामीत्याह–

(४४.) सोऽहम्। दशरथस्यापत्यं पुमान्दाशरथिः। "अत इञ्" इति इञ्प्रत्ययः। रामो भूत्वा तीक्ष्णैः शरैस्तस्य रावणस्य शिरांस्येव कमलानि तेषामुच्चयं राशिं रणभूमेः (समरभुवः) बलिक्षमं पूजार्हं करिष्यामि। पुष्पविशदा हि पूजेति भावः।

(४५.) हे देवाः। यज्वभिर्याज्ञिकैः (विधिमर्हतीति) विधिवत्कल्पितमुपहृतं भागं हविर्भागं मायाविभिर्मायावद्भिः। "अस्मायामेधास्रजो विनिः" इति विनिप्रत्ययः। निशाचरै रक्षोभिरनालीढमनास्वादितं यथा तथाचिरात्पुनरादास्यध्वे ग्रहीष्यध्वे [मया रावणे हते सति लोके यज्ञा भविष्यन्ति–हे०]।

(४६.) मरुतां देवानां [यद्वा वायूनां। "द्यौः खं नभोऽन्तरिक्षं च मेघवायुपथो यथा" इति धनञ्जयः–हे० वायूनामेवेति देवानामिति व्याख्यायाम् मेघाच्छादनं न संभवति इति–चा०] पथि व्योम्नि। ("अनन्तं सुरवर्त्म खं" इत्यमरः)। वैमानिका विमानैश्चरन्तः।

(43.) That demon averse to any regard (regardless) for mortals asked of the Creator (Brahmā), who was pleased with his penance, immunity from death at the hands of the Divine Creation.

(44.) Such a one as I am, having become the son of Daśaratha, I shall make the heap of his lotous-like heads a fit oblation to the battle-field with my sharp arrows.

(45.) In a short time, O Gods, you shall again receive the portion (of the offerings) properly offered to you by the sacrificers and untasted (or undefiled) by the night-rangers possessing magical powers.

(46.) Let the gods (i. e. the Punyakṛtas), riding on their heavenly balloons, (hitherto) driven to conceal themselves in the clouds lay aside (lit. give up) their dread at the sight of the Pushpaka in the path of the winds (i. e. the sky).

स्वर्गबन्दीनां वेणीबन्धानदूषितान् ।
शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः ॥ ४७ ॥
रावणावग्रहक्लान्तमिति वागमृतेन सः ।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥ ४८ ॥
पुरुहूतप्रभृतयः सुरकार्योद्यतं सुराः ।
अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ॥ ४९ ॥

" चरति " इति ठक्प्रत्ययः । मेघावरणतत्परा रावणभयान्मेघेष्वन्तर्धानतत्पराः पुण्यकृतः सुकृतिनः प-[illegible]केन यदृच्छया रावणविमानदर्शनेन यः संक्षोभो भयचकितं तं त्यजन्तु । " संक्षोभो भयच[illegible]तम् " इति शब्दार्णवः ।

(४७.) हे देवाः । यूयं शापेन नलकूबरशापेन यन्त्रिताः प्रतिबद्धाः पौलस्त्यस्य रावणस्य बलात्कारेण ये कचग्रहाः केशाकर्षास्तैरदूषितानुपहतान्स्वर्गबन्दीनां हृतस्वर्गाङ्गनानां वेणीबन्धान्मोक्ष्यध्वे । पुरा किल नलकूबरेणात्मानमभिसरन्त्या रम्भाया बलात्कारेण संभोगात्क्रुद्धेन दुरात्मा रावणः शप्तः । स्त्रीणां बलाद्ग्रहणे मूर्धा ते शतधा भविष्यतीति भारतीया कथानुसंधेया [अनिच्छंत्याः नार्याः पातिव्रत्यभंगात् तव मूर्धा शतधा विशीर्णः स्यादिति नलकूबरस्य शापः । तथा राघवाभ्युदये । " जोषमासुरमृयोसि बलाच्चेन्मामहन् कथय कोऽत्र नियन्ता । पुण्यपाक इव सर्वसतीनां अस्ति पाप नलकूबरशापः" –हे० पुरा कुबेरपुत्रं नलकूबरमभिसरन्ती रंभामवेक्ष्य काम मोहितरावणो निजमदग्रहिलोग्रत एव केशेषु जग्राह ततः साशपत् । अरे अद्यारभ्य ह्यकामयमानां कामपि स्त्रियं गृह्णासि ततस्तव मूर्द्धा शतधा दालिष्यतीति–चा०] ।

(४८.) स कृष्णः (श्यामवर्णः) विष्णुः स एव मेघो नीलमेघश्च । विश्रवसोऽपत्यं पुमानिति विग्रहे रावणः । विश्रवःशब्दाच्छिवादित्वादणि विश्रवसो " विश्रवणरवणौ " इत्यन्तर्गणसूत्रेण विश्रवःशब्दस्य वृत्तिविषये रवणादेशे रावण इति सिद्धम् । स एवावग्रहो वर्षप्रतिबन्धः । तेन क्लान्तं म्लानं मरुतो देवा एव सस्यं तत् । इत्येवंरूपेण वागमृतेन (वाग्गीरेवामृतं तेन) वाक्सलिलेन । "अमृतं यज्ञशेषे स्यात्पीयूषे सलिलेऽमृतम्" इति विश्वः । अभिवृष्याभिषिच्य तिरोदधेऽन्तर्दधे [मेघो हि अवग्रहेण क्लान्तं शस्यं अमृतेन जलेन अभिवृष्य अन्तर्दधाति–हे० चा०] ।

(४९.) पुरुहूतप्रभृतयः [पुरु भूयिष्ठं हुतं यस्य यज्ञेष्वाह्वानात् पुरुहूतः इन्द्रः प्रभृति-

---

(47.) You shall, O gods, set free the braids of hair of the captive women of heaven—the braids undefiled by the forcible seizing of the hair by Paulastya fettered by the curse (of Nalakúbara).

(48.) He like a dark watery cloud disappeared after having showered the water of speech on the crop-like gods dried up by the draught of Rávana.

(49.) The gods Indra and others followed Vishnu who was about to do

अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः ।
पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम् ॥ ५० ॥
हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम् ।
अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम् ॥ ५१ ॥
प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः ।
वृषेव पयसां सारमाविष्कृतमुदन्वता ॥ ५२ ॥

रादिर्येषां ते–हे०] इन्द्राद्याः सुरा सुरकार्ये रावणवधरूप उद्यतं विष्णुमंशैमात्राभिः । द्रुमाः पुष्पैः स्वांशैर्वायुमिव । अनुययुः [प्रभृतयत आदौ क्रियते इति प्रभृतिः अनव्ययं– हे०] । सुग्रीवादिरूपेण वानरयोनिषु जाता इत्यभिप्रायः (एतदेव हेमाद्रिचारित्रवर्द्धनसुमति- विजयादयः) ।

(५०.) अथ तस्य विशांपत्युर्दशरथस्य संबन्धिनः काम्यस्य [कामयितुमर्हस्यार्था- त्पुत्रार्थं वांछितस्य–हे०सु०] कर्मणः पुत्रकामेष्टेः । (किमप्युद्देश्यमभिसंधाय यत्कार्यं क्रियते तत्काम्यमित्यभिधीयते) । अन्तेऽवसानेऽग्नेः पावकात्पुरुषः कश्चिद्दिव्यः पुमानृत्विजां (याज्ञि- कानां) विस्मयेन सह प्रबभूव प्रादुर्बभूव । तदाविर्भावात्तेषामपि विस्मयोऽभूदित्यर्थः ।

तमेव पुरुषं विशिनष्टि—

(५१.) आद्यस्य पुंसो विष्णोरनुप्रवेशादधिष्ठानाद्धेतोस्तेन दिव्यपुरुषेणापि दुर्वहम् । चतुर्दशभुवनोदरस्य भगवतो हरेरतिगरीयस्त्वाद्वोढुमशक्यम् । हेमपात्रगतं (सुवर्णभाजने स्थापितं) पयसि पक्वं चरुं पयश्चरुं पायसान्नं दोर्भ्याम् [कराभ्यां । द्विवचनेनातिगुरुत्वं सूच्यते–चा०] आदधानो वहन् । " अनवस्त्रावी निरुष्मपक्व ओदनश्चरुः " इति याज्ञिकाः [" हव्यपाके चरुः पुमान् " इत्यमरः । " हव्यपाकयुतश्चरुः " इत्यभिधानचिन्तामणिः –हे० सु०] ।

(५२.) नृपो दशरथः प्राजापत्येन प्रजापतिसंबन्धिना पुरुषेण [प्रजापत्यो यज्ञपुरुषः

(undertake) the commission of the gods (a work for the interest of the gods) with their portions, as trees follow the wind with flowers (their own portions).

(50.) Then arose out of the fire a being (along) with wonder of the sacrificial priests, at the close of the sacrifice of that Lord of men, which was performed for a particular object (viz. that of obtaining a son).

(51.) That being held in his hands some food consisting of rice boiled in milk, put in a golden vessel, difficult to be borne even by him by reason of its being charged with the portion of the First Being (lit. on account of the entrance of the Primeval Being into it).

(52.) The King accepted that food presented to him by that being of Prajàpati, as Indra took the essence of waters (i. e. ambrosia) disclosed by the ocean.

अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः ।
प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवोऽपि यत् ॥ ५३ ॥
स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम् ।
द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् ॥ ५४ ॥
अर्चिता तस्य कौसल्या प्रिया केकयवंशजा ।
अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः ॥ ५५ ॥

वशिष्ठो वा तेन–हे० प्रजापतिर्ब्रह्मा तस्यापत्यं वशिष्ठः तेन–चा० वशिष्ठेन दिव्यपुरुषेण वा–सु०] उपनीतं ननु वशिष्ठेन । " प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप " इति रामायणात् । तदन्न [अद्यते इत्यन्नं–हे०] पायसान्नम् । उदन्वतोदधिनाविष्कृतं प्रकाशितं पयसां (जलानां) सारममृतं वृषा वासव इव । " वासवो वृत्रहा वृषा " इत्यमरः । प्रत्यग्रहीत्स्वीचकार ।

(५३.) तस्य राज्ञो दशरथस्यान्यैर्दुर्लभा असाधारणा गुणा अनेन कथिता व्याख्याताः । यद्यस्मात्त्रयो लोकास्त्रैलोक्यम् [त्रय एव लोकाः–हे०] । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् । तस्य प्रभवः (प्रभवत्यस्मादिति) कारणं [उत्पत्तिस्थानं–चा० सु०] विष्णुरपि तस्मिन्राज्ञि प्रसूतिमुत्पत्तिं चकमे कामितवान् [अयादय आर्धधातुके–हे०] । त्रिभुवनकारणस्यापि कारणमिति परमावधिर्गुणसमाश्रय इत्यर्थः ।

(५४.) स नृपः । चरुसंज्ञास्य संजाता चरुसंज्ञितम् । वैष्णवं तेजः पत्न्योः कौसल्याकैकेय्योः [इति दानस्य विवक्षया षष्ठी–चा०] । द्यौश्च पृथिवी च द्यावापृथिव्यौ । " दिवसश्च पृथिव्याम् " इति चकाराद्दिवशब्दस्य द्यावादेशः । तयोर्द्यावापृथिव्योः । अह्नः पतिरहर्पतिः (सूर्यः) । " अहरादीना पत्यादिषु वा रेफः " इत्युपसंख्यानाद्वैकल्पिको रेफस्य रेफादेशो विसर्गापवादः । प्रत्यग्रम् (नूतनं) आतपं (घर्मः) बालातपमिव । विभेजे । विभज्य ददावित्यर्थः । पत्नीत्रये सति द्वयोरेव विभागे कारणमाह—

(५५.) तस्य राज्ञः । कौ पृथिव्यां सलति गच्छतीति कोसलः । " सल गतौ " । पचाद्यच् । कुशब्दस्य पृषोदरादित्वाद्गुणः । कोसलस्य राज्ञोऽपत्यं स्त्री कौसल्या । " वृद्धे-

(53.) The virtues of that king were shown as unattainable by others by the fact that even the Source of the three worlds wished his birth from him (lit. in him i. e. the king).

(54.) He divided the lustre (energy) of Vishnu called by the name चरु between his two wives, as the Lord of the day (the sun) divides his morning rays between the earth and the sky.

(55.) To him Kausalyá was one whom he honoured (being the elder) and the other who was born of the family of Kekaya was his beloved hence the Lord wished Sumitrá to be honoured (with a share) by them both.

ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः ।
चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ॥ ५६ ॥
सा हि प्रणयवत्यासीत्सपत्न्योरुभयोरपि ।
भ्रमरी वारणस्येव मदनिस्यन्दरेखयोः ॥ ५७ ॥

त्कोसलाजाद्ञ्यङ्" इति ञ्यङ् । "यङश्चाप्" इति चाप् । अत एव सूत्रे निर्देशात्कोसलशब्दो दन्त्यसकारमध्यमः । अर्चिता ज्येष्ठा मान्या । केकयवंशजा कैकेयी प्रियेष्टा [इति प्रेमास्पदं–चा०]। अतो हेतोरीश्वरो भर्ता नृपः सुमित्रां ताभ्यां कौसल्याकैकेयीभ्यां संभावितां भागदानेन मानितामैच्छदिच्छति स्म [कौसल्याकैकेय्यौ क्षत्रियसुते । सुमित्रा सकरजा इति भट्टिकाव्ये जयमङ्गलकारः–हे०] । एवं च सामान्यं तिसृणां च भागप्रापणामिति राज्ञ्युचितज्ञता कौशलं च लभ्यते ।

(५६.) बहुज्ञस्य सर्वज्ञस्य । उचितज्ञस्येत्यर्थः । पत्युर्महीक्षितः क्षितीश्वरस्य । विशेषणत्रयेण राज्ञोऽनुसरणीयतामाह । चित्तज्ञे अभिप्रायज्ञे ते उभे पत्न्यौ कौसल्याकैकेय्यौ । चरोरर्धार्धभागौ समभागौ तयोरर्धौ तौ च तौ भागौ चेत्यर्धभागावेकदेशौ । ताभ्यामर्धार्धभागाभ्याम् । "पुंस्यर्धोऽर्धं समेंऽशके" इत्यमरः । तां सुमित्रामयोजयतां युक्तां चक्रतुः [निजान्नस्यार्द्धमर्द्धं सुमित्रायै दत्तवत्याविति भावः–हे० चा० सु०] । अयं च विभागो न रामायणसंवादी । तत्र चरोरर्धं कौसल्यायै अवशिष्टार्धं कैकेय्यै शिष्टं पुनः सुमित्राया इत्यभिधानात् । किंतु पुराणान्तरसंवादो द्रष्टव्यः । उक्तं च नारसिंहे—"ते पिण्डप्राशने काले सुमित्रायै महीपतेः । पिण्डाभ्यामल्पमल्पं तु स्वभगिन्यै प्रयच्छतः" इति । एवमन्यत्रापि विरोधे पुराणान्तरात्समाधातव्यम् । नचैवं सत्यपीर्ष्या स्यादित्याह—

(५७.) सा सुमित्रोभयोरपि । समान एकः पतिर्ययोस्तयोः सपत्न्योः । "नित्यं सपत्न्यादिषु" इति ङीप् । नकारादेशश्च । भ्रमरी भृङ्गाङ्गना । [" जातेरस्त्रीति ङीप् "–चा०]। वारणस्य गजस्य मदनिस्यन्दरेखयोरिव (दानक्षरणरेखयोरिव) । गण्डद्वयगतयोरिति भावः। प्रणयवती प्रेमवत्यासीत् । सपत्न्योरित्यत्र समासान्तर्गतस्य पत्युरुपमानं वारणस्येति ।

(५८.) ताभिः कौसल्यादिभिः प्रजानां [संततीनां लोकानां वा–हे०] भूत्या अभ्युदयाय । देवस्य विष्णोरंशः संभवः कारणं यस्य स गर्भः । सूर्यस्येमाः सौर्यः । ताभिः सौरीभिः । "सूर्यतिष्य–" इत्युपधायकारस्य लोपः । अमृता इत्याख्या यासां ताभिः । जलवहनसाम्यान्नाडीभिरिव । नाडीभिर्वृष्टिविसर्जनीभिर्दीधितिभिरपां विकारोऽम्मयो जलमयो गर्भ इव । दध्रे धृतः। जातावेकवचनम् । गर्भा दधिर इत्यर्थः। अत्र यादवः—"तासां शतानि

(56.) Both the wives of that Lord of the earth who knew all (that was proper) knowing the intention of their husband, gave her each a half of her own portion of that Charu (pudding).

(57.) She too was tenderly attached even to both of her rivals (the fellow-wives of the King), as a female black-bee loves both the streams of temporal juice of an elephant.

ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः ।
सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः ॥ ५८ ॥
सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः ।
अन्तर्गतफलारम्भाः सस्यानामिव संपदः ॥ ५९ ॥
गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः ।
जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्तिभिः ॥ ६० ॥
हेमपक्षप्रभाजालं गगने च वितन्वता ।
उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा ॥ ६१ ॥

चत्वारि रश्मीनां वृष्टिसर्जने । शतत्रय हिमोत्सर्गे तावद्गर्भस्य सर्जने । आनन्दाश्च हि मेध्याश्च नूतनाः पूतना इति । चतुःशत वृष्टिवाहास्ताः सर्वा अमृताः स्त्रियः" इति [जलोपमया गर्भाणां लोकानन्दस्य कारण–हे०] । ["सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः" इत्यमरः–हे०]।

(५९.) सम युगपदापन्ना गृहीताः सत्त्वाः प्राणिनो याभिस्ताः [सम एककालं आपन्नं प्राप्तं सत्त्व गर्भो याभिस्ताः–हे० । " प्राप्तापन्ने च द्वितीयया " इत्यनेन आपन्ना' सत्त्वं आपन्नसत्त्वाः इति विग्रहो द्रष्टव्यः] आपन्नसत्त्वा गर्भिण्यः । " आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी " इत्यमरः । अतएवापाण्डुरत्विषः (आपाण्डुरा त्विट् कान्तिर्यासां तास्तथोक्ताः) ईषत्पाण्डुरवर्णास्ता राजपत्न्यः अन्तर्गता गुप्ताः फलारम्भाः फलप्रादुर्भावा यासां ताः । सस्यानां सपद इव रेजुर्बभुः । [सस्यसंपदोप्यापाण्डुरत्विषः–हे०] । संप्रति तासां स्वप्नदर्शनमित्याह—

(६०.) सर्वास्ताः स्वप्नेषु । जलजः शङ्खः । जलजासिगदाशार्ङ्गचक्रैः [नंदकपाञ्चजन्यकौमोदकीशार्ङ्गधनुःसुदर्शनैः–हे०] लाञ्छिताः (चिह्निताः) मूर्तयो येषां तैर्वामनैर्ह्रस्वैः पुरुषैर्गुप्त रक्षितमात्मान [जातावेकवचनं–हे०] स्वरूप ददृशुः ।

(६१.) किंचेति चार्थः । हेम्नः सुवर्णस्य पक्षाणां प्रभाजालं कान्तिपुञ्जं वितन्वता विस्तारयता । वेगेनाकृष्टाः पयोमुचो मेघा येन तेन । सुपर्णेन गरुत्मता गगने ताः (कौसल्यादयो राजपत्न्यः) उह्यन्ते स्मोढाः । (स्वप्नेष्वित्यर्थः) ।

(58.) A fœtus sprung from the portion of the Supreme Being was borne (in their womb) by them for the welfare of the people, as a watery embryo by the name Amrita is borne by the solar rays.

(59.) Those (wives of the King) who had become pregnant at one and the same time and whose appearance (therefore) was pale, shone like the thriving crop (lit. the thriving of the crop) with the appearance of the fruits hidden within.

(60.) They all saw in dreams their own persons protected by dwarfs whose persons were furnished with (lit. marked with) conches, swords, maces, S'ārnga-bows and quoits (Chakras).

(61.) (They also saw that) they were being borne in the sky by Garuda displaying (lit. spreading) the mass of splendour of his golden wings and dragging the clouds with him by his speed.

बिभ्रत्या कौस्तुभन्यासं स्तनान्तरविलम्बिनम् ।
पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया ॥ ६२ ॥
कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः ।
ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ॥ ६३ ॥
ताभ्यस्तथाविधान्स्वप्नाञ्छ्रुत्वा प्रीतो हि पार्थिवः ।
मेने परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥ ६४ ॥

(६२.) किंच । स्तनयोरन्तरे मध्ये विलम्बिनं [विलग्नं-चा०] लम्बमानम् । न्यस्यत इति न्यासः । कौस्तुभ एव न्यासस्तम् [आलिंगनवशात् कौस्तुभमणिमुद्राबिम्बं इति-चा०] । पद्मा कौतुकाद्व्यस्तम् । [भूलोकं गच्छता विष्णुना भूलोकं प्रयोजनार्थमितिश्रियो वक्षसि स्थापित इत्यागमः-हे०] । कौस्तुभमित्यर्थः । बिभ्रत्या पद्ममेव व्यजनं हस्ते यस्यास्तया लक्ष्म्या पर्युपास्यन्तोपासिताः ।

(६३.) किंच । दिवि भवायां दिव्यायां [दिव्याशब्देन मंदाकिनी उच्यते-हे०] त्रिस्रोतस्याकाशगङ्गायाँ कृताभिषेकैः कृतावगाहैः । परं ब्रह्म वेदरहस्यं गृणद्भिः पठद्भिः [उत्कृष्टं ब्रह्म परमात्मानं स्तुवद्भिरिति-चा० सु०] सप्तभिर्ब्रह्मर्षिभिः कश्यपप्रभृतिभिः [“ मरीचिरंगिरा अत्रिः पुलस्त्यः पुलहः क्रतुः वशिष्ठश्चेति सप्तर्षीनाहुश्चित्रशिखण्डिनः ” इति प्रतापमार्तण्डः-हे०] उपतस्थिर उपासांचक्रिरे ।

(६४.) पार्थिवो दशरथस्ताभ्यः पत्नीभ्यः । “ आख्यातोपयोगे ” इत्यपादानत्वात्पञ्चमी । तथाविधानुक्तप्रकारान्स्वप्नाञ्छ्रुत्वा प्रीतः सन् । आत्मानं जगद्गुरोर्विष्णोरपि गुरुत्वेन [जगन्ति गच्छन्ति तेषां जगतां गुरुः जगद्गुरुः तस्य भावः गुरुत्वं तेन-सु०] पितृत्वेन हेतुना परार्ध्यं सर्वोत्कृष्टं मेने हि (अहो मे सुभाग्यं यद् ब्रह्माण्डगुरोरपि गुरुरहमिदानीं संजात इत्यात्मनि बहुमानं चक्राण आत्मानं कृतिनममंस्त) ।

(६५.) एक एकरूपो विभुर्विष्णुस्तासां राजपत्नीनां कुक्षिषु गर्भेषु । प्रसन्नानां निर्मलानामपां (अम्भसां) कुक्षिषु (अभ्यन्तरेषु) प्रतिमाचन्द्रः (प्रतिमा चासौ चन्द्रश्च) प्रति-

---

(62.) (They saw that) they were waited upon by Lakshmî with a fan of lotus in her hand and bearing the Kaustubha-jewel (placed there by Vishnu), hanging between her breasts.

(63.) (They saw that) they were worshipped by the seven Brahmanical sages who had performed their oblations in the celestial triple-streamed river and who were reciting the essence of the Vedas (lit. The Great Brahma).

(64.) Having heared from them, dreams such as these, the King being greatly pleased, thought himself supreme on account of his being (in the position of) the father of the Lord of the Universe.

38

विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा ।
उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ॥ ६५ ॥
अथाग्र्यमहिषी राज्ञः प्रसूतिसमये सती ।
पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ॥ ६६ ॥
राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥ ६७ ॥

बिम्बचन्द्र इव । (" प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया " इत्यमरः) । अनेकधा (अनेकैः प्रकारैरर्थाच्चतुर्धा) विभक्तात्मा सन् । उवास (तस्थौ) ।

(६६.) अथ राज्ञो दशरथस्य सती पतिव्रता [प्रशस्ता वा-हे०] । अग्र्या (मुख्या) चासौ महिषी चाग्र्यमहिषी । कौसल्या प्रसूतिसमये प्रसूतिकाले (दशमे मासि) । ओषधिः [उषो दाहो धीयते इति ओषधिः इति जगद्धितत्वं देव्याः-हे०] नक्तं रात्रिसमये । (अव्ययं) । तमोऽपहन्तीति तमोपहम् [ओषधिषु तेजः स्थापयित्वा रविरस्तं यातीत्यागमः-सु०] । " अपे क्लेशतमसोः " इति डप्रत्ययः । ज्योतिरिव । [अपुत्रस्य लोका न सन्त्येवंरूपं तमोऽपहन्तीति-चा०] तमोपहं तमोनाशकरं पुत्रं लेभे प्राप ।

(६७.) अभिरमतेऽत्रेत्यभिरामं मनोहरम् । अधिकरणार्थे घञ्प्रत्ययः । तेन वपुषा चोदितः प्रेरितो गुरुः पिता दशरथः [वशिष्ठो वा-हे०] तस्य पुत्रस्य जगतां प्रथमं मङ्गलं सुलक्षणं [प्रथमोक्त्या पश्चाद्रावणादिवधान्मंगलान्तरमपि । अन्वर्था चेयं संज्ञा । तथा शृङ्गारप्रकाशे । " कर्मव्यति (व्यव) हारे हेतुसंज्ञा । सा चतुर्धा । अन्वर्थिकी, परिभाषिका, नैमित्तिकी, यादृच्छिकी चेति । अर्थमनुगता अन्वर्थिकी । यथा । परन्तपो नाम यथार्थनामेति । अनपेक्षितसंज्ञा परिभाषिका । यथा । प्रतीप इत्यागमवृद्धसेवीति निमित्तापेक्षा नैमित्तिकी । यथा । तां पार्वतीत्याभिजनेन नाम्ना इति । अविद्यमानव्युत्पत्तिर्यादृच्छिकी । यथा । लाङ्गलोल्लिख्यमानायाः । यज्ञभूमेः समुद्गता । सीतेयमूर्मिलेयं तु । द्वितीया जनकात्मजा " इति-हे० जगत्प्रथममंगलमित्युक्त्या पश्चाद्दशग्रीवादिवधेन मंगलानांतरं सूच्यते-चा०] राम इति नामधेयं (नामैव नामधेयं) चक्रे । अभिरामत्वमेव रामशब्दप्रवृत्तिनिमित्तमित्यर्थः ।

(65.) The all-pervading-Being, himself one, lived in their wombs dividing his self into manifold forms, as the reflected image of the moon displays itself (in manifold forms) in clear waters.

(66.) Then the King's principal queen who was virtuous, obtained at the proper time of delivery, a son that removed the darkness (of sorrow), as herbs obtain at night the light that dispels darkness.

(67.) Induced by his charming form the father gave him the name of Ráma the most auspicious name for the world.

रघुवंशप्रदीपेन तेनाप्रतिमतेजसा ।
रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥ ६८ ॥
शय्यागतेन रामेण माता शातोदरी बभौ ।
सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ॥ ६९ ॥
कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
जनयित्रीमलंचक्रे यः प्रश्रय इव श्रियम् ॥ ७० ॥
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ ।
सम्यगागमिता विद्या प्रबोधविनयाविव ॥ ७१ ॥

(६८.) रघुवंशस्य प्रदीपेन प्रकाशकेन । अप्रतिमतेजसा (अप्रतिममतुल्यं तेजो यस्य) तेन रामेण रक्षागृहगताः सूतिकागृहगता दीपाः प्रत्यादिष्टाः प्रतिबद्धा इवाभवन् [प्रत्यादेशो निराकृतिः–हे०] । महादीपसमीपे नाल्पाः स्फुरन्तीति भावः [ते तु दीपाः अयं तु प्रदीपः इत्युत्कर्षः–हे०] । [अरिष्टशय्यां परितः इत्यत्रोक्तेः परार्थाभावान्न चौर्य-दोषः–हे०] ।

(६९.) शातोदरी (शातं कृशं उदरं यस्याः सा) गर्भमोचनात्कृशोदरी माता शय्यागतेन रामेण । सैकते (सिकताः अस्मिन्सन्तीति सैकतं तस्मिन्) पुलिने योऽम्भोजबलिः पद्मोपहारस्तेन शरदि कृशा जाह्नवी गङ्गेव । बभौ [सैकतोपमया शय्याप्रच्छदस्य धवलत्वसौभाग्यं । अम्भोजबल्युपमया शिशोः सौकुमार्यं । गंगोपमया देव्याः स्वच्छता पवित्रता च–हे०] ।

(७०.) केकयस्य राज्ञोऽपत्यं स्त्री कैकेयी । " तस्यापत्यम् " इत्यणि कृते " केकयमित्रयुप्रलयानां यादेरियः इतीयादेशः । तस्या भरतो नाम शीलवांस्तनयो जज्ञे जातः । यस्तनयः । प्रश्रयो विनयः श्रियमिव । जनयित्रीं मातरमलंचक्रे [विनयोपमया भरतस्य जनवशीकरणत्वं । संपदुपमया भरतेन कैकेय्याः श्लाघ्यताम् । अलंचक्रे इत्यसभ्यं–हे० जनयित्रीमलंचक्रे इति दुष्प्रतीतिकरं चिन्त्यं–चा०] ।

(७१.) सुमित्रा लक्ष्मणशत्रुघ्नौ नाम यमौ युग्मजातौ सुतौ पुत्रौ । [" यमो दंडधरे

(68.) By him who was the light of the race of Raghu and of unrivalled lustre, the lamps in the lying-in-chember were, as it were, despised (were eclipsed or out-shone).

(69.) The thin-waisted mother appeared beautiful on account of Râma lying in her bed, as does the stream of the Janhavi reduced in autumn, with the offering of the lotuses on the sandy bank.

(70.) A son Bharata by name of transcending qualities was born to Kaikeyî, who adorned his mother (her who gave him birth) as humility does riches.

(71.) Sumitrà gave birth to (brought forth) two twin sons named Laksh-

निर्दोषमभवत्सर्वमाविष्कृतगुणं जगत् ।
अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम् ॥ ७२ ॥
तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः ।
विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥ ७३ ॥
कृशानुरपधूमत्वात्प्रसन्नत्वात्प्रभाकरः ।
रक्षोविप्रकृतावास्तामपविद्धशुचाविव ॥ ७४ ॥

स्वांशे संयमे मनेपि च " इति विश्वः–हे०] । सम्यगागमिता [आगमोऽस्या जातः इति आगमिता । अभ्यस्ता कृताभ्यासा–सु०] स्वभ्यस्ता विद्या प्रबोधविनयौ तत्त्वज्ञानेन्द्रियजयाविव । सुषुवे ।

(७२.) सर्वं जगद्लोको निर्दोषं दुर्भिक्षादिदोषरहितम् । आविष्कृतगुणं (आविष्कृताः गुणाः यस्मिंस्तत्) प्रकटीकृतारोग्यादिगुणं चाभवत् । अत्रोत्प्रेक्ष्यते—गां भुवं गतमवतीर्णं पुरुषोत्तमं (पुरुषेषु उत्तमस्तम्) विष्णुं स्वर्गोऽप्यन्वगादिव । स्वर्गो हि गुणवान्निर्दोषश्चेत्यागमः । स्वर्गतुल्यमभूदित्यर्थः ।

(७३.) चतुर्मूर्तेः रामादिरूपेण चतूरूपस्य सतस्तस्य हरेरुदये सति । पौलस्त्याद्रावणाच्चकिता भीता ईश्वरा नाथा इन्द्रादयो यासां ता दिशश्चतस्रो विरजस्कैः (विगतं रजो येभ्यः । शेषाद्विभाषेति कप्) अपधूलिभिर्नभस्वद्भिर्वायुभिः । मिषेण । उच्छ्वसिता इव । इत्युत्प्रेक्षा । श्वसेः कर्तरि क्तः । स्वनाथशरणलाभसंतुष्टानां दिशामुच्छ्वासवाता इव वाता ववुरित्यर्थः । चतुर्दिगीशरक्षणं मूर्तिचतुष्टयप्रयोजनमिति भावः ।

(७४.) रक्षसा रावणेन विप्रकृतावपकृतौ । पीडितावित्यर्थः । कृशानुरग्निः प्रभाकरः सूर्यश्च यथासंख्यमपधूमत्वात् (अपगतो धूमो यस्मात् तस्य भावः तस्मात्) प्रसन्नत्वाच्चापविद्धशुचौ (अपविद्धा शुक् ययोस्तौ) निरस्तदुःखाविवास्तामभवताम् ।

(७५.) तत्क्षणं तस्मिन्क्षणे रामोत्पत्तिसमये राक्षसश्रियोऽश्रुबिन्दवो दशाननकिरीटेभ्यो

---

mana and S'atrughna, as does science well studied to knowledge and humility (restraint over the senses).

(72) The whole world became free from calamities and displayed its virtues; for heaven itself, as it were, followed the Supreme Being (lit. best of men) who had come to the earth.

(73.) At the advent (birth or rise) of that four-fold incarnation (i. e. with four forms) the (four) quarters, whose tutelary deities were made to tremble by Paulastya, breathed freely, as it were, by means of the breezes that were free from dust.

(74) Fire and the Sun who were oppressed by the Rákshasa, became, as it were, freed from their grief—the one on account of his being smokeless and the other on account of his clearness.

दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः।
मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥ ७५ ॥
पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः।
आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि ॥ ७६ ॥
संतानकमयी वृष्टिर्भवने चास्य पेतुषी।
सन्मङ्गलोपचाराणां सैवादिरचनाभवत् ॥ ७७ ॥
कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः ॥ ७८ ॥

मणीनां व्याजेन मिषेण पृथिव्यां पर्यस्ताः पतिताः। रामोदये सति तद्वध्यस्य रावणस्य किरीटमणिभ्रंशलक्षणं दुर्निमित्तमभूदित्यर्थः [रक्षोलक्ष्मी रुरोदेति भावः–हे० चा० सु०]।

(७६.) पुत्रिणो जातपुत्रस्य तस्य दशरथस्य पुत्रजन्मनि प्रवेश्यानां प्रवेशयितव्यानाम्। वादनीयानामित्यर्थः। तूर्याणां वाद्यानामारम्भमुपक्रमं प्रथमं दिवि (स्वर्गे) देवदुन्दुभयः (देवानां भेर्यः) चक्रुः। साक्षात्पितुर्दशरथादपि देवा अधिकं प्रहृष्टा इत्यर्थः। ("सुखस्वना मंगलतूर्यनिस्वनाः। प्रमोदनृत्यैः सह वारयोषितां। न केवलं सद्मनि मागधीपतेः। पथि व्यजृम्भन्त दिवौकसामपि। गंभीरशंखध्वनिमिश्रमुच्चैः। दिवि ध्रुवा दुंदुभयः प्रणेदुः। दिवौकसां व्योम्नि विमानसंघाः। विमुञ्चतां पुष्पचयान् प्रसस्रुः" एतौ अनुरूपार्थकौ श्लोकौ)।

(७७.) अस्य राज्ञो भवने (प्रासादे) संतानकानां कल्पवृक्षकुसुमानां विकारः संतानकमयी (कल्पवृक्षपुष्पप्रकरप्रचुरा) वृष्टिश्च पेतुषी पपात। "क्वसुश्च" इति क्वसुप्रत्ययः। "उगितश्च" इति ङीप्। सा वृष्टिरेव सन्तः पुत्रजन्मन्यावश्यका ये मङ्गलोपचारास्तेषामादिरचना [प्रशस्तानि मङ्गलानि तेषां उपचाराणां सामग्रीणां आदिरचना–हे० सद्भिः विद्वद्भिः क्रियमाणानां मंगलानां सन्मंगलानां ये उपचाराश्चूर्णधवलनादयस्तेषां प्रथमरचना–चा० सु०] प्रथमक्रियाभवत्।

(७८.) कृताः संस्कारा जातकर्मादयो येषां ते। धात्रीणामुपमातॄणां स्तन्यानि पयांसि

(75.) At that moment the Fortune of the demon shed on earth drops of tears in the form of jewels from the diadems of the ten-mouthed demon (Râvana).

(76.) First in the heavens, the drums of the gods made a beginning of the musical instruments that were to be sounded at the time of the birth of a son to him who (now) got a son.

(77.) There fell in his palace a shower of the flowers of the Santânaka (all-yielding-tree), that itself became the first of the articles (necessary for) the auspicious ceremonies (to be performed i. e. auspicious rejoicings that followed).

(78.) The princes whose birth (or natal) ceremonies were performed and who were sucking the breasts of their nurses, grew up with their father's delight which was, as it were, the first born (eldest child).

स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा ।
मुमूर्छ सहजं तेजो हविषेव हविर्भुजाम् ॥ ७९ ॥
परस्पराविरुद्धास्ते तद्रघोरनघं कुलम् ।
अलमुद्द्योतयामासुर्देवारण्यमिवर्तवः ॥ ८० ॥
समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ ।
तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः ॥ ८१ ॥

पिबन्तीति तथोक्ताः ते कुमाराः (दारकाः) [धात्रीणां स्तनान् पातुं शीलं येषां ते इति वा—हे०] अग्रे जातेनाग्रजेन ज्येष्ठेनेव स्थितेन पितुरानन्देन समं वव्रधिरे । कुमारवृद्ध्या पिता महान्तमानन्दमवापेत्यर्थः । कुमारजन्मनः प्रागेव जातत्वादग्रजत्वोक्तिरानन्दस्य ।

(७९.) तेषां कुमाराणां संबन्धि स्वाभाविकं सहजं विनीतत्वं विनयकर्मणा शिक्षया । हविर्भुजाम् (हवींषि भुञ्जन्ते ते हविर्भुजस्तेषां) अग्नीनां सहजं तेजो हविषाज्यादिकेनेव मुमूर्छ ववृधे । निसर्गसंस्काराभ्यां विनीता इत्यर्थः [स्वाभाविकमित्यनेनैव प्रतीतत्वात् । यद्वा । अर्थावृत्त्यलंकाराभिप्रायेण कविनोक्तं । यथा काव्यादर्शे । “ अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरित्यपि । दीपिकास्थान एवेष्टमलंकारत्रयं यथा । विकसन्ति कदम्बानि । स्फुटन्ति कुटजोद्गमाः । उन्मीलन्ति च कुंदानि दलन्ति ककुभानि च ” इति—हे०] ।

(८०.) परस्परमविरुद्धा अविद्विष्टाः । सौभ्रात्रगुणवन्त इत्यर्थः । ते कुमाराः (रामाद्याः) तत्प्रसिद्धमनघं निष्पापं रघोः कुलम् । ऋतवो वसन्तादयो देवारण्यं नन्दनमिव । सहजविरोधानामप्यृतूनां सहावस्थानसंभावनार्थं देवविशेषणम् । अलमत्यन्तमुद्द्योतयामासुः प्रकाशयामासुः । सौभ्रात्रवन्तः कुलभूषणायन्त इति भावः [ऋतूपमया सर्वजनानन्दकरत्वं वृन्दावनोपमया बहुजनाधारत्वं—हे०] ।

(८१.) शोभनाः स्निग्धा भ्रातरो येषां ते सुभ्रातरः । “ नद्यृतश्च ” इति कप भवति । वन्दिते भ्रातुरिति निषेधात् । तेषां भावः सौभ्रात्रम् । युवादित्वादण् । तस्मिन्समाने चतुर्णां तुल्येऽपि यथोभौ रामलक्ष्मणौ प्रीत्या (स्नेहेन) द्वन्द्वं बभूवतुः । तथा (तेनैव प्रकारेण)

(79.) The natural modesty of these (princes) was increased by means of the process of education (or discipline which they under-went), as the natural splendour of fire is augmented by the oblations (thrown into it).

(80.) Those brothers who were well-disposed towards one another, greatly illuminated that illustrious and unblemished (pure) family of Raghu, as the seasons adorn the forest of the gods (the Nadana forest).

(81.) Though the fraternal love (in all the brothers) was equal, still as Râma and Lakshmana formed a pair (became constant companions) with affection so did Bharata and S'atrughna.

तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन ।
यथा वायुविभावस्वोर्यथा चन्द्रसमुद्रयोः ॥ ८२ ॥
ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ।
मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥ ८३ ॥
स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः ।
धर्मार्थकाममोक्षाणामवतार इवाङ्गवान् ॥ ८४ ॥

भरतशत्रुघ्नौ प्रीत्या (स्नेहेन) द्वन्द्वं द्वौ द्वौ साहचर्येणाभिव्यक्तौ बभूवतुः [एकपिण्डोत्पन्नत्वात्–चा०] । " द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु " इत्यभिव्यक्तार्थे निपातः । कचित्कस्यचित्स्नेहो नातिरिच्यत इति भावः । (अनेन " व्यतिषजति पदार्थानान्तरः कोपि हेतुः " इति तात्पर्यं व्यज्यते) ।

(८२.) तेषां चतुर्णां मध्ये द्वयोर्द्वयोः । रामलक्ष्मणयोर्भरतशत्रुघ्नयोश्चेत्यर्थः । यथा वायुविभावस्वोर्वातवह्न्योरिव [यत्राग्निस्तत्र वायुरिति सहचरत्वं–हे०] चन्द्रसमुद्रयोरिव च [चन्द्रदर्शने समुद्रस्यैव हर्षः इत्यर्थः–हे०] ऐक्यमैकमत्यं कदाचन न बिभिदे । (कर्मकर्तरि) । एककार्यत्वं समानसुखदुःखत्वं च क्रमादुपमाद्वयाल्लभ्यते । सहजः सहकारी हि वह्नेर्वायुः । चन्द्रवृद्धौ हि वर्धते सिन्धुस्तत्क्षये च क्षीयत इति ।

(८३.) प्रजानाथाः (लोकेश्वराः) ते कुमारास्तेजसा प्रभावेण [प्रतापेन–चा०] प्रश्रयेण विनयेन [प्रीत्या–चा०] च । निदाघान्ते ग्रीष्मान्ते । श्यामान्यभ्राणि मेघा येषां ते श्यामाभ्राः । नातिशीतोष्णा इत्यर्थः । दिवसा इव । प्रजानां (लोकानां) मनः (चित्तं) जह्रुः (हरन्ति स्म) ।

(८४.) स चतुर्धा (चतुर्भिः प्रकारैः) । " संख्याया विधार्थे धा " इत्यनेन धाप्रत्ययः । व्यस्तो विभक्तः पृथिवीपतेर्दशरथस्य प्रसवः संतानः । चतुर्धाङ्गवान्मूर्तिमान्धर्मार्थकाममोक्षाणामवतार इव बभौ [अनेन तेषां चतुर्विधपुरुषार्थसाधकत्वं–हे०] ।

(८५.) गुरुवत्सलाः पितृभक्तास्ते कुमारा गुणैर्विनयादिभिर्गुरुं पितरम् । चतुर्णामम्भसानां दिगन्तानामीशं चतुरन्तेशम् [चत्वारः अन्ताः यस्याः सा भूस्तस्या ईशं स्वामिनं–चा० एतेन

(82.) The unity between the members of the two pairs of brothers was never broken like that between fire and wind or the moon and the ocean.

(83.) Those lords of people attracted the minds of their subjects with their valour (prowess or lustre) and humility (good discipline), like the dark cloudy days at the close of the summer (the hot season).

(84.) The issue of the Lord of the earth divided as it was into four parts, appeared like the embodied incarnation of (the four objects of man), viz. discharge of duty, acquirement of wealth, gratification of desire, and final emancipation.

गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः ।
तमेव चतुरन्तेशं रत्नैरिव महार्णवाः ॥ ८५ ॥
सुरगज इव दन्तैर्भग्नदैत्यासिधारै-
र्नय इव पणबन्धव्यक्तयोगैरुपायैः ।
हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयैः
पतिरवनिपतीनां तैश्चकाशे चतुर्भिः ॥ ८६ ॥

सार्वभौमत्वं सूच्यते–हे०] । "तद्धितार्थ–" इत्यादिनोत्तरपदसमासः । तं दशरथमेव महार्णवाश्चत्वारो रत्नैरिव । आराधयामासुरानन्दयामासुः ।

(८६.) भग्ना दैत्यानाम् [हिरण्यकशिप्वादीनां–हे०] असिधारा यैस्तैश्चतुर्भिर्दन्तैः सुरगज ऐरावत इव [ऐरावतश्चतुर्दन्तः–हे०] पणबन्धेन फलसिद्ध्या व्यक्तयोगैः [पणस्य धनस्य बन्धः तस्मै व्यक्तो योगो येषां तैः । "पणो द्यूतादिषुत्सृष्टे भृतौ मूल्ये धनेपि च" इत्यमरः । यद्वा । पणबन्धः सन्धिः तत्र व्यक्तयोगैः–हे०] अनुमितप्रयोगैरुपायैश्चतुर्भिः सामादिभिर्नयो नीतिरिव । युगवद्दीर्घैश्चतुर्भिर्भुजैर्हरिर्विष्णुरिव । ["यानाद्यङ्गेषु युगः पुंसि युगं युग्मे कृतादिषु" इत्यमरः–हे०] । तदीयैर्हरिसंबन्धिभिरंशैरंशभूतैश्चतुर्भिस्तैः पुत्रैरवनिपतीनां पती राजराजो दशरथश्चकाशे विदिद्युते [आदौ उपमानान्युक्त्वा पश्चाद्राज्ञां पतिरित्यादि वक्तव्यं । नोचेत्तच्छन्दस्य पूर्वापरामर्शित्वात्तदीयैरिति न घटते । ऐरावतोपमया राज्ञो बलत्वं । दन्तोपमया तेषां अभग्नत्वं–हे०] । [मालोपमालंकारः । मालिनी वृत्तं–चा०] ।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये रामावतारो नाम दशमः सर्गः ।

(85) Those princes who were devoted to their sire propitiated him by their qualities (virtues) as the four (lit. great) oceans did that same Lord of the extremities of the four quarters by their jewels.

(86.) The Lord of the lords of the earth shone by them (his sons) who were the four portions of Vishnu, like Vishnu himself with arms long as a chariot-yoke (yuga) like the political craft with its expedients the application of which is manifested for the achievement of an end, (or according to Malli:— is to be inferred from the success achieved), and like the celestial elephant with his four tusks which blunted the edges of the swords of the demons.

एकादशः सर्गः ।

कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ॥ १ ॥
कृच्छ्रलब्धमपि लब्धवर्णभाक्तं दिदेश मुनये सलक्ष्मणम् ।
अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता ॥ २ ॥

रामचन्द्रचरणारविन्दयोरन्तरङ्गचरभृङ्गलीलया ।
तत्र सन्ति हि रसाश्चतुर्विधास्तान्यथारुचि सदैव निर्विश ॥

(१.) कौशिकेन [अनुष्ठानार्थं कुशाः अस्य सन्तीति कुशिकः तेन–हे०] कुशिकापत्येन विश्वामित्रेणैत्याभ्यागत्य स क्षितीश्वरो दशरथः । अध्वरविघातशान्तये यज्ञविघ्नविध्वंसाय । काकपक्षधरं बालकोचितशिखाधरम् [राजकुमाराणां हि पञ्च शिखा भवन्ति इति बहुवचनं । यदुक्तं रामायणे । "चूडापञ्चकमण्डनौ क नु शिशू खण्डः क चायं मुनिः"इति–हे०] " बालानां तु शिखा प्रोक्ता काकपक्षः शिखण्डकः " इति हलायुधः । रामं याचितः किल प्रार्थितः खलु । याचेर्द्विकर्मकादप्रधाने कर्मणि क्तः । अप्रधाने दुहादीनामिति वचनात् । नायं बालाधिकार इत्याशङ्क्याह–तेजसां तेजस्विनां वयो बाल्यादि नच समीक्ष्यते हि । अप्रयोजकमित्यर्थः (गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः इत्येवं समार्थः श्लोकांशः)। अत्र सर्गे रथोद्धतावृत्तम् । उक्तं च–" रान्नराविह रथोद्धता लगौ " इति [ननु क्षितीश्वरः इत्यत्र प्रतिपदविधाना च षष्ठी न समस्यते । इति वक्तव्यात् षष्ठ्या न समासः । स्वामीश्वरेतिविशेषलक्षणेन विहितत्वान्नैष दोषः । अत्र हि विशेषलक्षणैव षष्ठी । न हि स्वाम्यादिसूत्रेण षष्ठी विधीयते किं तर्हि सप्तमी । सा तु षष्ठीमबाधिष्टेति चकारेण षष्ठ्याः प्रतिप्रसवः क्रियते इति न्यासकृत् । अप्रधानेदुहादीनां इति अप्रधानकर्मणि दशरथे द्वितीयाऽभावः । अप्रधानकर्मणस्त्वनभिहितत्वाद्राममिति भवत्येव–हे०] ।

(२.) लब्धा वर्णाः प्रसिद्धयो यैस्ते लब्धवर्णा विचक्षणाः । " लब्धवर्णो विचक्षणः " इत्यमरः । तान्भजत इति लब्धवर्णभाक् । विद्वत्सेवीत्यर्थः । स राजा कृच्छ्रलब्धम् [बहुका-

---

(1.) Once upon a time the son of Kus'ika went to the Lord of the Earth and begged of him Ràma who (yet) wore his side-locks of hair, for the removal of the obstacles to (his) sacrifice ; for age is of no consideration in the case of the illustrious.

(2.) He who was the patronizer of the learned, made him over to the Muni together with Lakshmana though obtained with difficulty ; never was a petition even of those who desired their (the Raghus') life, vain in the family of the Raghus (lit. being a suitor was never vain in the family &c.).

यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसत्क्रियाम् ।
तावदाशु विदधे मरुत्सखैः सा सपुष्पजलवर्षिभिर्घनैः ॥ ३ ॥
तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः ।
भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिन्दवः ॥ ४ ॥

लेन कष्टसाध्येन पुत्रेष्ट्यादिक्लेशेन च लब्धं–चा०]अपि सलक्ष्मणं तं रामं मुनये दिदेशातिसृष्टवान् [कृच्छ्रशब्दात् करणे च स्तोकाल्पेति तृतीयापञ्चम्यौ कृच्छ्रलब्धमिति स्तोकान्तिकाद्दूरार्थे पंचमी । समासे पंचम्याः स्तोकादिभ्य इत्यलुक् स्यात्–हे०] । तथा हि । असुप्रणयिनां प्राणार्थिनामप्यर्थिता याच्ञा रघोः कुले कदाचिदपि न व्यहन्यत न विहता । न विफलीकृतेत्यर्थः । यैरर्थिभ्यः प्राणा अपि समर्प्यन्ते तेषां पुत्रादित्यागो न विस्मयावह इति भावः । (पुत्रेष्ट्यादिना प्राप्तमत एव नितरां प्रियमपि रामं लक्ष्मणेन सह मुनेः साहाय्यार्थं गन्तुमनुमेने । दिलीपवंशजाः प्राणव्ययेनापि अर्थिनां प्रणयभंगं कदापि न कृतवन्त इति प्रसिद्धिः) ।

(३.) पार्थिवः पृथिवीश्वरस्तयो रामलक्ष्मणयोर्निर्गमाय निष्क्रमणाय पुरमार्गसत्क्रियां धूलिसंमार्जनगन्धोदकसेचनपुष्पोपहाररूपसंस्कारं यावदादिशत्याज्ञापयति । तावन्मरुत्सखैः (मरुतः वायोः सखायः तैः । राजाहःसखिभ्यष्टच्) वायुसखैः । अनेन धूलिसंमार्जनं गम्यते । सपुष्पजलवर्षिभिः पुष्पसहितजलवर्षिभिर्घनैः सा मार्गसत्क्रियाशु विदधे विहिता । एतेन देवकार्यप्रवृत्तयोर्दैवानुकूल्यं सूचितम् ।

(४.) निदेशकरणोद्यतौ [निदेशस्य आज्ञायाः करणे संपादने उद्यतौ तत्परौ । " अववादस्तु निर्देशो निदेशः शासनं च सः "–हे०] पित्राज्ञाकरणोद्युक्तौ धन्विनौ धनुष्मन्तौ तौ कुमारौ पितुश्चरणयोर्निपेततुः । प्रणतावित्यर्थः । भूपतेरपि [अपिशब्दस्त्वेककालसूचनार्थः–हे०] बाष्पबिन्दवः प्रवत्स्यतोः प्रवासं करिष्यतोः । अत एव नम्रयोः प्रणतयोः । " नमिकम्पि–" इति रप्रत्ययः । तयोरुपरि निपेतुः पतिताः । (स्नेहादिति शेषः) ।

(५.) पितुर्नयनजेन (नेत्रोत्थेन) वारिणा (बाष्पेण) किंचिदुक्षितशिखण्डकावीषत्सिक्तचूडौ । " शिखा चूडा शिखण्डः स्यात् " इत्यमरः । "शेषाद्विभाषा " इति कप्प्रत्ययः । धन्विनौ तावुभौ । पौरदृष्टिभिः कृतानि मार्गतोरणानि [" बुधैर्वन्दनमाला तु तोरणं परिकीर्त्यते " इति हलायुधः–हे०] संपाद्यानि कुवलयानि ययोस्तौ तथोक्तौ । संघशो निरीक्ष्यमाणावित्यर्थः । तमृषिमन्वगच्छताम् । (" तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूह-

(3.) No sooner had the King ordered the decorations of the streets of the city for their departure than were they instantly done by the clouds, assisted by the winds, raining down water together with flowers.

(4.) Those two (brothers) armed with bows and ready to do the bidding of their Sire, fell at his feet ; the tear-drops of the King also dropped upon them who were about to go abroad (about to travel) as they knelt (before him).

तौ पितुर्नयनजेन वारिणा किंचिदुक्षितशिखण्डकावुभौ ।
धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ ॥ ५ ॥
लक्ष्मणानुचरमेव राघवं नेतुमैच्छदृषिरित्यसौ नृपः ।
आशिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयोः क्षमा ॥ ६ ॥
मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजसः ।
रेजतुर्गतिवशात्प्रवर्तिनौ भास्करस्य मधुमाधवाविव ॥ ७ ॥
वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत ।
तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम् ॥ ८ ॥

लानाम् विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् " । " कुवलयितगवाक्षां लोचनैरङ्गनानां " इत्यादीनां अनुरूपार्थत्वं द्रष्टव्यं) ।

(६.) ऋषिर्लक्ष्मणानुचरमेव लक्ष्मणमात्रानुचरं तं राघवं नेतुमैच्छदिति हेतोरसौ नृप आशिषं प्रयुयुजे प्रयुक्तवान् । वाहिनीं सेनां न प्रयुयुजे न प्रेषितवान् । हि यस्मात्साशीरेव तयोः कुमारयो रक्षणविधौ क्षमा शक्ता ।

(७.) मातृवर्गस्य चरणान्स्पृशत इति मातृवर्गचरणस्पृशौ । कृतमातृवर्गनमस्कारावित्यर्थः । " स्पृशोऽनुदके क्विन् " इति क्विन्प्रत्ययः । तौ महौजसो मुनेः पदवीं [मार्गं । " पदव्येकपदी पद्या पद्धतिर्वर्त्मवर्त्तनी " इत्यभिधानचिन्तामणिः-सु०] प्रपद्य । महौजसो भास्करस्य (सूर्यस्य) गतिवशान्मेषादिराशिसंक्रान्त्यनुसारात् [इति तेजस्वितोक्तिः-हे०] प्रवर्तिनौ मधुमाधवाविवचैत्रवैशाखाविव रेजतुः [वसन्ते हि सूर्यगतिवशात् स्वचिह्नान्वितौ तौ वर्तेते-हे०] । " फणां च सप्तानाम् " इति वैकल्पिकावेत्वाभ्यासलोपौ । " स्याच्चैत्रे चैत्रिको मधुः " इति । " वैशाखे माधवो राधः " इति चामरः ।

(८.) वीचिलोलभुजयोः (वीचिरिव लोलौ भुजौ ययोस्तौ तयोः) तरंगचञ्चलबाह्वोः ।

(5.) Both with their bows by them having their locks a little (partially) wet with the water produced (flowing) from the eyes of their father (their father's tears), and whom the eyes of the citizens served as decoration-arches of the street, went after that sage.

(6.) Seeing that the sage wished to take (with him) Rághava with Lakshma*n*a alone as a follower, that King sent (lit. employed) a blessing and not an army (to accompany them); for that (blessing) was quite efficient for the task of their protection.

(7.) The two princes, who had touched the feet of their mothers, having taken (or followed) the track of the Muni of great powers, shone like the months Chaitra and Vais'ákha moving in obedience to the course of the sun of great lustre.

(8.) Like the workings of the rivers Uddhya and Bhidya suitable to their names at the advent of the rainy season, the gait of walking of the two whose

तौ बलातिबलयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः ।
मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्तिनाविव ॥ ९ ॥
पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः ।
उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत् ॥ १० ॥
तौ सरांसि रसवद्भिरम्बुभिः कूजितैः श्रुतिसुखैः पतत्त्रिणः ।
वायवः सुरभिपुष्परेणुभिश्छायया च जलदाः सिषेविरे ॥ ११ ॥

इदं विशेषणं नदोपमानसिद्ध्यर्थं वेदितव्यम् । तयोश्चपलं चञ्चलमपि गतं गतिः शैशवात् (बाल्यात्) हेतोरशोभत । किमिव । तोयदागमे वर्षासमये । उज्झत्युदकमित्युज्झ्यः । भिनत्ति कूलमिति भिद्यः । " भिद्योद्ध्यौ नदे " इति क्यबन्तौ निपातितौ । उद्ध्यभिद्ययोर्नदविशेषयोर्नामधेयसदृशं (नामैव नामधेयं तत्सदृशं) नामानुरूपं विचेष्टितमिव । उदकोज्झनकूलभेदनरूपव्यापार इव । समयोत्पन्नं चापलमपि शोभत इति भावः ।

(९.) मणिकुट्टिमोचितौ मणिबद्धभूमिसंचारोचितौ [" कुट्टिमो रत्ननिबद्धा भूमिः " इति क्षीरस्वामी–हे०] तौ मुनिप्रदिष्टयोः कौशिकेनोपदिष्टयोर्बलातिबलयोर्विद्ययोर्बलातिबलाख्ययोर्मन्त्रयोः प्रभावतः सामर्थ्यान्मातृपार्श्वपरिवर्तिनौ मातृसमीपवर्तिनाविव पथि न मम्लतुः । न म्लानावित्यर्थः । अत्र रामायणश्लोकः—" क्षुत्पिपासे न ते राम भविष्येते नरोत्तम । बलामतिबलां चैव पठतः पथि राघव " इति ।

(१०.) वाहनोचितः सानुजो राघवः । पुराविदः पूर्ववृत्ताभिज्ञस्य पितृसखस्य मुनेः पूर्ववृत्तकथितैः पुरावृत्तकथाभिरुह्यमान इव वाहनेन प्राप्यमाण इव । वहेर्धातोः कर्मणि शानच् । पादचारमपि न व्यभावयन्न ज्ञातवान् [विश्वामित्रसमुदीर्यमाणकथाश्रवणतत्परत्वेन अतिक्रान्तमपि पंथानं न बुबुधाते–हे० चा० सु०] ।

(११.) तौ राघवौ । कर्मभूतौ । सरांसि । कर्तृणि । रसवद्भिर्मधुरैरम्बुभिः (जलैः) सिषेविरे । पतत्त्रिणः पक्षिणः । सुखयन्तीति सुखानि । पचाद्यच् । श्रुतीनां सुखानि । तैः

---

arms were as unsteady as the waves, though quick appeared beautiful on account of their boy-hood.

(9.) By the power of the two magical lores (spells) called Balà and Atibalá which they were taught by the Muni, the two princes did not fade on the way (i.e. felt no fatigue of the journey); accustomed as they were to a pavement set with precious stones, they had been, as it were, moving by the side of their mothers.

(10.) Ràghava accustomed to move about (to drive) in vehicles, with his brother, did not feel (the fatigue of) the journey though on foot, being borne onwads, as it were, by the narrations of events of old by him who was versed in ancient lore and who was their father's friend.

(11.) The lakes served them with their sweet waters, the birds with their notes charming to the ear, the breezes with the pollen of fragrant flowers, and the clouds with their shade.

नाम्भसां कमलशोभिनां तथा शाखिनां च न परिश्रमच्छिदाम् ।
दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः ॥ १२ ॥
स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः ।
विग्रहेण मदनस्य चारुणा सोऽभवत्प्रतिनिधिर्न कर्मणा ॥ १३ ॥

कूजितैः । वायवः सुरभिपुष्परेणुभिः (सुगन्धिपरागैः) । जलदाः (मेघाः) छायया (छायादानेन) च । सिषेविर इति सर्वत्र संबध्यते ।

(१२.) तप एषामस्तीति तपस्विनः । " तपःसहस्राभ्यां विनीनी " इति विनिप्रत्ययः । लघुनेष्टेन । "त्रिष्विष्टेऽल्पे लघुः" इत्यमरः (" लघुर्मनोज्ञे निःसारे:" । इति विश्वः) । तयोरुभयोः । कर्मभूतयोः । दर्शनेन यथा प्रीतिमापुः । तथा कमलशोभिनाम्भसां (जलानां) दर्शनेन नापुः । परिश्रमच्छिदां शाखिनां (तरूणां) दर्शनेन च नापुः ।

(१३.) स आत्तकार्मुकः (आत्तं गृहीतं कार्मुकं धनुर्येन स गृहीतधन्वा) । दशरथस्यापत्यं पुमान्दाशरथी रामः । " अत इञ् " इतीञ्प्रत्ययः । स्थाणुर्हरः । " स्थाणुः कीले हरे स्थिरे " इति विश्वः । तेन दग्धवपुषो मदनस्य तपोवनं प्राप्य चारुणा विग्रहेण कायेन । " विग्रहः समरे काये " इति विश्वः । प्रतिनिधिः प्रतिकृतिः सदृशोऽभवत्कर्मणा न पुनः । देहेन मदनसुन्दर इति भावः (" कन्दर्पो मूर्तिमानासीत्काम इत्युच्यते बुधैः । तपस्यंतमिह स्थाणुं नियमेन समाहितं । कृतोद्वाहं तु देवेशं गच्छंतं समरुद्गणं । धर्षयामास दुर्मेधा हुंकृतश्च महात्मना । अवध्यातश्च रुद्रेण चक्षुषा रघुनन्दन । व्यशीर्यन्त शरीरात्स्वात् सर्वगात्राणि दुर्मतेः । तत्र गात्रं हतं तस्य निर्दग्धस्य महात्मनः । अशरीरः कृतः कामः क्रोधाद्देवेश्वरेण ह । अनंग इति विख्यातस्तदाप्रभृति राघव । स चांगविषयः श्रीमान्यत्रांगं स मुमोच ह " इति रामायणे) ।

(१४.) अत्र रामायणवचनम्—" अगस्त्यः परमः क्रुद्धस्ताडकामभिशप्तवान् । पुरुषादी महायक्षी विकृता विकृतानना । इदं रूपमपाहाय दारुणं रूपमस्तु ते " इति । तदेतदाह—विदितशापयेति । कौशिकादाख्यातुः । " आख्यातोपयोगे " इत्यपादानात्पञ्चमी विदितशापया (विदितः शापो यस्याः तया) सुकेतुसुतया [सुकेतुर्नाम यक्षः तत्सुता अगस्त्यशापेन राक्षसीरूपा तया—हे०] ताडकया खिलीकृते (शून्यीकृते) पथि । " खिल-

(12.) The ascetics did not feel so much delight (took no delight) at the sight of waters rendered beautiful by lotuses or trees lessening the fatigue (of journey), as they did at the wished for sight of them both.

(13.) Having got to the penance-grove of Madana whose body had been burnt by Sthâ*nu*, that son of Das'aratha with a bow in his hand became his representative in (lit. by means of) his captivating form (lit. body) and not in (lit. by) his actions.

तौ सुकेतुसुतया खिलीकृते कौशिकाद्विदितशापया पथि ।
निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यताम् ॥ १४ ॥
ज्यानिनादमथ गृह्णती तयोः प्रादुरास बहुलक्षपाछविः ।
ताडका चलकपालकुण्डला कालिकेव निबिडा बलाकिनी ॥ १५ ॥

मप्रहतं स्थानम् " इति हलायुधः । तौ रामलक्ष्मणौ । स्थले निवेशिते अटनी धनुःकोटी याभ्यां तौ तथोक्तौ [इति धानुष्कजातिः—हे० चा०] । " कोटिरस्याटनिः " इत्यमरः । लीलयैव [इति "एवेचानियोगे" इति पररूपता स्यात् तथा रूपमालायां । " वृद्धिप्रयोगस्तु प्रमादाल्लोकस्य " इति । मुग्धबोधप्रदीपे तु । नियोगो नियमो वचःकरण मिति यावत् । अनियोगे नियोगादन्यस्मिन्नर्थे वर्तमाने एवशब्दे परे इत्यर्थः। अथवेति नात्रावधारणं विवक्षितं । किन्तु तदभावः । अथैवेति प्रत्युदाहरणं दृष्ट्वा प्रियनियोगार्थमाहुस्तन्मते "यदैव पूर्वेज्वलने" इत्यादयो विरुध्यन्ते इति—हे०] धनुषी । अधिकृते ज्ये मौर्वी ययोस्ते अधिज्ये । "ज्या मौर्वीमातृभूमिषु" इति विश्वः । तयोर्भावस्तत्तामधिज्यतां (आरोपितगुणत्वं) निन्यतुर्नीतवन्तौ । नयतिर्द्विकर्मकः ।

(१५.) अथ तयोर्ज्यानिनादं (ज्यायाः प्रत्यञ्चायाः निनादं टणत्कारं) गृह्णती जानती । शृण्वतीत्यर्थः । बहुलक्षपाछविः कृष्णपक्षरात्रिवर्णा । " बहुलः कृष्णपक्षे च " इति विश्वः । चले कपाले एव कुण्डले यस्याः सा तथोक्ता ताडका । निबिडा सान्द्रा बलाकिनी बलाकावती । " व्रीह्यादिभ्यश्च " इतीनिः । कालिकेव घनावलीव । " कालिका योगिनीभेदे कार्ष्ण्ये गौर्यां घनावलौ " इति विश्वः । प्रादुरास प्रादुर्बभूव [आसेत्याख्यातप्रतिरूपकं अव्ययं । आस्तेर्भूभावविधानात् पाणिनीयमतदर्पणे । अस्यस्मिभन्येशंकेब्रूह्यासाहाश्च लक्षणार्थका इति । कारयामासेत्यत्र तु विधानसामर्थ्यादस्तेर्भूभावो न । वामनस्तु । आसेत्यसतेरूपं। "असगतिकांतिदीप्त्यादानेषु" इत्यस्य धातुप्रदीपेऽप्ययमेव धातुरुक्तः । सारस्वतकारमते तु भूभावस्याभावादासेत्यस्तेरेव । तथा । असभुवि इत्यत्र आसेत्युदाहृतं । सारस्वतस्य नरेन्द्रटिप्पणे । श्वेतकेतुर्ह्यारुणे य आसेत्यादिश्रुतिपुराणयोः बहुशः प्रयोगदर्शनात् । कुमारसंभवेपि । " लावण्य उत्पाद्य इवास यत्नः " । रघुवंशे । " प्रादुरास बहुलक्षपाच्छ-

---

(14) On the road that had been turned into a desert (devasted) by the daughter of Suketu (Tà*d*akà), (the story of) whose curse was made known to them by Kaus'ika, those two (little) warriors easily strung their bows (lit. brought to the state of being strung) having rested their ends on the ground.

(15.) Then catching the twanging sound of their bow-string, Tà*d*akà whose complexion resembled the appearance of a night of the dark-fortnight and whose ear-rings made of human skulls were dangling,appeared before them like a thick row of clouds interspersed with flocks of (black) cranes (flying beneath it).

तीव्रवेगधुतमार्गवृक्षया प्रेतचीवरवसा स्वनोग्रया ।
अभ्यभावि भरताग्रजस्तया वात्ययेव पितृकाननोत्थया ॥ १६ ॥
उद्यतैकभुजयष्टिमायतीं श्रोणिलम्बिपुरुषान्त्रमेखलाम् ।
तां विलोक्य वनितावधे घृणां पत्त्रिणा सह मुमोच राघवः ॥ १७ ॥

विः " । " प्रादुरास किल वाहिनीमुखे " । " निष्प्रभश्च रिपुरास तत्क्षणं " । " तेनास लोकः पितृमान्विनेत्रा " इति च असतेस्तद्रूपमिति चेन्न अर्थासंगतेः । अस्ति चादेशविधेरनियतत्वं इति । यथा चक्षीङ्ख्याञादेशोऽसार्वधातुके विहितः । तस्य विचक्षणः इति युच्प्रत्यये व्यभीचारः । तथा ब्रुवो वचिरादेशस्य ब्राह्मणब्रुव इत्यत्राभावः । अजतेर्व्यादेशस्य समज्येत्यादाविति सारस्वतटीकायां । नन्वस्तेर्भूरसार्वधातुक इति शर्ववर्मणोक्तं सत्यं "लोकाच्छेषस्य सिद्धिः" इति सूत्रेण तदप्यस्माभिरंगीक्रियते एव । तथाप्यदेशविधेरनियतत्वं तैरेवांगीकृतं विचक्षण इत्यादाविति । "जातिमात्रोपजीवी च कथ्यते ब्राह्मणब्रुवः " इति हलायुधः-हे०] ।

(१६.) तीव्रवेगेन धुताः कम्पिता मार्गवृक्षा यया तथोक्तया । प्रेतचीवराणि (प्रेतानां मृतकानां चीवराणि वस्त्रखण्डानि) वस्ते (परिधत्ते) इति प्रेतचीवरवाः । तया प्रेतचीवरवसा । वसतेराच्छादनार्थात्क्विप् । स्वनेन सिंहनादेनोग्रया तया ताडकया । पितृकानने श्मशान उत्थोत्पन्ना । " आतश्चोपसर्गे " इत्युत्पूर्वात्तिष्ठतेः कर्तरि कप्रत्ययः । तया वात्ययेव वातसमूहेनेव । (" वात्या वातस्य मण्डली " इति हलायुधः) । " पाशादिभ्यो यः " इति यः [वात्यापक्षे प्रेतानां चीवरैः वसया मांसस्नेहेन स्वनेन च उग्रया । " त्वन्मेदस्तु वपा वसा " इत्यमरः-हे०] । भरताग्रजो रामोऽभ्यभाव्यभिभूतः । कर्मणि लुङ् । तीव्रवेगेत्यादिविशेषणानि वात्यामपि योज्यानि ।

(१७.) उद्यतोन्नमितैको भुज एव यष्टिर्यस्यास्ताम् । आयतीमायान्तीम् । इणो धातोः शतरि " उगितश्च " इति ङीप् । श्रोणिलम्बिनी (कटिपश्चाद्भागपर्यस्ता) पुरुषाणामन्त्राण्येव मेखला यस्यास्ताम् [अनेन पुरुषवधात् अवश्यवध्यत्वं सूचितं । " पुरुषघ्न्यः स्त्रियो वध्याः " इति कात्यायनः-हे० चा० पुरुषपदेन तद्वृत्तशक्त्या पराक्रमातिशयः-चा०] । इति विशेषणद्वयेनाप्याततायित्वं (वधोद्यतत्वं) सूचितम् [आततायिनमाह वशिष्ठः। " अग्निदो गर-

---

(16.) The elder brother of Bharata was attacked by her screaming terribly who wore the rags of dead bodies and who shook the trees on the road by her furious speed, as if by (as if she were) a whirlwind rising from a cremation-ground.

(17.) Rághava having looked at her who had raised her one staff-like arm and had worn a zone of human intestines (entrails) pendant on her hips, let go an arrow (shot a dart at her) together with the remorse at (i. e. the feeling of compassion in) killing a woman (and at the same time he left off his compassion &c).

यच्चकार विवरं शिलाघने ताडकोरसि स रामसायकः ।
अप्रविष्टविषयस्य रक्षसां द्वारतामगमदन्तकस्य तत् ॥ १८ ॥
बाणभिन्नहृदया निपेतुषी सा स्वकाननभुवं न केवलाम् ।
विष्टपत्रयपराजयस्थिरां रावणश्रियमपि व्यकम्पयत् ॥ १९ ॥

दश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः । उद्यतासिविषाग्निं च शापोद्यतकरं तथा आथर्वणेन हंतारं पिशुनं चैव राजसु । भार्यातिक्रमिणं चैव विद्यात्सप्तातताथिन इति विष्णुकात्यायनौ हे० चा०] । अत एव तां विलोक्य राघवो वनितावधे स्त्रीवधनिमित्ते घृणां जुगुप्सां करुणां वा [घृणां बाणं च मुमोचेत्यर्थः–हे०] । " जुगुप्साकरुणे घृणे " इत्यमरः । पत्रिणेषुणा सह । " पत्नी रोप इषुर्द्वयोः " इत्यमरः । मुमोच मुक्तवान् [" न स्त्रीं हन्यात् " इति धर्मशास्त्रात् । स्त्रीवधे पराङ्मुखीबुद्धिं । बाणमोचनादेवाकरोदित्यर्थः चा०] । आततायिवधे मनुः—" आततायिनमायान्तं हन्यादेवाविचारयन् । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् । नाततायिवधे दोषो हन्तुर्भवति कश्चन " इति (एतदेव हेमाद्रिचारित्रवर्द्धनयोः) ।

(१८.) स रामसायकः (बाणः । " शरे खड्गे च सायकः " इत्यमरः) । शिलावद्घने सान्द्रे [कठिने–हे०] ताडकोरसि (सुकेतुसुतायाः हृदये) यद्विवरं रन्ध्रं चकार तद्विवरं रक्षसामप्रविष्टविषयस्य । अप्रविष्टरक्षोदेशस्येत्यर्थः । सापेक्षत्वेऽपि गमकत्वात्समासः । " विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि च " इति विश्वः । अन्तकस्य यमस्य द्वारतामगमत् [लृदित्वादङ् । द्वौ प्रवेशनिर्गमौ रातीति द्वारं । " पृषोदरादित्वादात्वं "–हे०] । इयं प्रथमा रक्षोमृतिरिति भावः [पुराद्बहिरेव भ्रान्तो यमः साम्प्रतं प्राप्तद्वारो जातः देशविषयो रूपवर्णनं । कथमन्यथा तदा एते मृत्युवशमाययुरिति भावः–हे० चा०] ।

(१९.) बाणभिन्नहृदया (बाणेन भिन्नं हृदयं यस्याः सा) निपेतुषी निपतिता सती । " क्वसुश्च " इति क्वसुप्रत्ययः । " उगितश्च " इति ङीप् । सा केवलामेकाम् । " निर्णीते केवलमिति । त्रिलिङ्गं त्वेककृत्स्नयोः " इत्यमरः । स्वकाननभुवं न व्यकम्पयत् । किंतु विष्टपत्रयस्य लोकत्रयस्य । ("विष्टपं भुवनं जगत् " इत्यमरः) । पराजयेन स्थिरां (निश्चलां) रावणश्रियमपि (लङ्केश्वरस्य लक्ष्मीमपि) व्यकम्पयत् । ताडकावधश्रवणेन रावणस्यापि भयमुत्पन्नमिति भावः । अत्र ताडकाया अभिसारिकायाः समाधिरभिधीयते—

(18.) That hole (passage or hollow) which the dart of Ráma made in Tád*a*ká's breast hard (lit. thick) like a stone, became an entrance (lit. got to the position of being an entrance) to Death who had not (yet) penetrated the territories of the Rákshasas.

(19.) When she dropped (on the ground) with her heart split (torn or splintered) by the arrow, she not only shook the land (sites) of her own forest but also the Goddess of Fortune of Rávan*a*, who was (**hitherto**) stable by the conquest of the three worlds.

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥ २० ॥

(२०.) सा । निशासु चरतीति निशाचरी राक्षसी । अभिसारिका च (तथा साहित्यदर्पणे । "अभिसारयते कान्तं या मन्मथवशंवदा । स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका । अनभिज्ञास्तमिस्त्राणां दुर्दिनेष्वभिसारिकाः ") । दुःसहेन सोढुमशक्येन । राम एव मन्मथः । अन्यत्राभिरामो मन्मथः । तस्य शरेण हृदय उरसि मनसि च । " हृदयं मनउरसोः " इति विश्वः । ताडिता विद्धाङ्गा गन्धवद्दुर्गन्धि यद्रुधिरमसृक्तदेव चन्दनं तेनोक्षिता लिप्ता । अपरत्र गन्धवती सुगन्धिनी ये रुधिरचन्दने कुङ्कमचन्दने ताभ्यामुक्षिता [यद्वा । गन्धवत् रुधिरमिव चन्दनं हरिचन्दनं इत्यर्थः–हे०] । " रुधिरं कुङ्कुमासृजोः " इत्युभयत्रापि विश्वः । जीवितेशस्यान्तकस्य प्राणेश्वरस्य च वसतिं जगाम [केचिदलंकारज्ञास्त्वेतन्न मन्यन्ते । अन्योन्यविरुद्धयोः शृङ्गाररसजुगुप्साभावयोः श्लिष्टत्वात् । " शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः । बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः " । एषां स्थायिभावाः । " रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा जुगुप्सा विस्मयशमाः स्थायिभावाः प्रकीर्तिताः " । काव्यप्रकाशे विरुद्धत्वं तु शृङ्गारतिलके । " रसौ शृङ्गारबीभत्सौ तथा वीरभयानकौ । रौद्राद्भुतौ तथा हास्यकरुणौ वरुणौ मिथः" इति औचित्यालंकारे च। "तथा मधुरतिक्ताद्याः रसाः कुशलयोजिताः । विचित्राः (विषयाः) स्वादितां यान्ति शृङ्गाराद्यास्तथा मिथः" इति । " तेषां परस्परश्लेषे कुर्यादौचित्यलक्षणं । अनौचित्येन संसृष्टः कस्येष्टो रससंकरः " । अत्र बीभत्से शृङ्गारस्यांगभावान्न दोषः । तथा काव्यप्रकाशे । " अंगिन्यंगत्वमाप्तौ यौ तौ न दुष्टौ परस्परं " इति । यथा क्षेमेन्द्रस्यौचित्यालंकारे । " क्षीवस्येवाचलस्याहृतहृदयतया जम्बुकी कण्ठसक्ता रक्ताभिव्यक्तकामा किमपि नखनखोल्लेखमासूत्रयन्ती । आस्वाद्यास्वाद्य यूनः क्षणमधरदलं दन्तदत्तव्रणाङ्कं लग्नानङ्गक्रियायामविरतरसोत्कर्षमाविष्करोति " । अत्र श्लेषोपमया तुल्यकक्षारूढयोरपि परस्परं विरुद्धयोरर्थयोरंगागिभावः । इयं जम्बुकी तरुणशवस्य आसवक्षीवस्येव निश्चलस्थितेः आहृतहृदयपद्मतयाकृष्टचित्ततया वा कण्ठे सक्ता शोणितेभिव्यक्तस्पृहा रक्ताभिव्यक्तकामा च नखनखोल्लेखं आसूत्रयन्ती । दत्तव्रणमधरं आस्वाद्यांगछेदक्रियायां अनंगभोगक्रियायां वा लग्ना । अविरतरसेन उत्कर्षणं रतकौशलोत्कर्षणं वा प्रकाशयतीति समानयोर्बीभत्सशृङ्गारयोः कामिनीपदत्यागेन न केवलं

(20.) Being smitten in the heart by the insufferable dart of Ráma the night-roaming demoness weltering in (sprinkled over with) stinking blood went to the residence of death (lit. lord of life) as an Abhisáriká (a woman that goes to her lover at an appointed place at night) struck by the unbearable arrow of Cupid and annointed with fragrant saffron and sandle pigment goes to the residence of her lover (lit. the lord of her life).

नैर्ऋतघ्नमथ मन्त्रवन्मुनेः प्रापदस्त्रमवदानतोषितात् ।
ज्योतिरिन्धननिपाति भास्करात्सूर्यकान्त इव ताडकान्तकः ॥ २१ ॥
वामनाश्रमपदं ततः परं पावनं श्रुतमृषेरुपेयिवान् ।
उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः ॥ २२ ॥

जम्बुक्याः कर्तृत्वेन बीभत्सस्यैव प्राधान्ये शृङ्गारेऽङ्गतामुपागते नितंबिनीरतिविडम्बनमौचित्यरुधिरतामादधातीति । ननु यद्यष्टौ रसास्तर्हि शान्ताख्योऽप्यस्ति रसः । तथा " नव नाट्ये रसाः स्मृताः " इति हलायुधः । उदाहरणं चेदमेवास्य । "किं सा रतिर्भवति नन्दनभूमिकासु । स्वर्गांगनाजघनघृष्टशिलातलासु । या वाश्रमस्य हरिणीगणसेवितासु । निःसंगवाससुभगासु वनस्थलीषु " । इह शान्तेः प्रकर्षेणावस्थानात् । उच्यते। वीरे चास्यान्तर्भावः । उत्साहप्रकृतित्वात्"उत्साहवर्द्धनो वीरः"। यदाहुः ।" युद्धवीरो धर्मवीरो दानवीर इति त्रिधा । वीरस्यैव च भेदोयं कथ्यते सूरिभिः परः " इति । तथा । " अर्थिनां मित्रवर्गस्य द्विषतां च पराङ्मुखः । यो न याति स वीरोत्र तेन माता स वीरसूः " इति–हे०] ।

(२१.) अथानन्तरं ताडाकान्तको रामः । अवदानं पराक्रमः । " पराक्रमोऽवदानं स्यात् " इति भागुरिः । तेन [ताडकामारणरूपेण–सु०] तोषितान्मुनेः । नैर्ऋतान्राक्षसान्हन्तीति नैर्ऋतघ्नम् । " अमनुष्यकर्तृके च " इति टक् । मन्त्रवन्मन्त्रयुक्तमस्त्रम् । सूर्यकान्तो मणिविशेषो भास्करात् (सूर्यात्) इन्धनानि निपातयतीतीन्धननिपाति [इन्धनानि निपातयितुं भस्मीकर्तुं शीलमस्येति–हे०] काष्ठदाहकं ज्योतिरिव [तेजोऽग्निमिव–चा०] । प्राप-त्प्राप्तवान् ।

(२२.) ततः परं राघवः [परमित्याश्रमविशेषणं–हे] । ऋषेः कौशिकादाख्यातुः श्रुतं पावनं शोधनं वामनस्य स्वपूर्वावतारविशेषस्याश्रमपदमुपेयिवानुपगतः सन् [तथानर्घ्यराघवे । "इह वनेषु सकौतुकवामनो मुनिरतप्त तपांसि पुरातनः । तमिव वामवलोक्य तपस्विनो नयनमद्य मनागुदनीमिलन् " इति–हे०] । " उपेयिवाननाश्वाननूचानश्च " इति निपातः । प्रथमजन्मचेष्टितानि रामवामनयोरैक्यात्स्मृतियोग्यान्यपि रामस्याज्ञानावतारत्वेन संस्कारदौर्बल्यादस्मरन्नपि । उन्मना उत्सुको बभूव (" रम्याणि वीक्ष्य मधुरांश्च निशम्य

(21.) Then the destroyer of Táḍaká obtained from the Muni who was pleased with his heroic deeds a missile destructive of Rákshasas together with its Mantras (spells), as the sun-glass receives from the sun the flame that destroys fuel (wood).

(22.) After that the descendant of Raghu having reached the purifying hermitage of Vàmana (the dwarf, the fifth incarnation of Vishnu) of which he had heard from the sage, became excited in mind even though recollecting not the acts done in his former life

आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणम् ।
बद्धपल्लवपुटाञ्जलिद्रुमं दर्शनोन्मुखमृगं तपोवनम् ॥ २३ ॥
तत्र दीक्षितमृषिं ररक्षतुर्विघ्नतो दशरथात्मजौ शरैः ।
लोकमन्धतमसात्क्रमोदितौ रश्मिभिः शशिदिवाकराविव ॥ २४ ॥
वीक्ष्य वेदिमथ रक्तबिन्दुभिर्बन्धुजीवपृथुभिः प्रदूषिताम् ।
संभ्रमोऽभवदपोढकर्मणामृत्विजां च्युतविकङ्कतस्रुचाम् ॥ २५ ॥

शब्दान् । पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः । तच्चेतसा स्मरति नूनमबोधपूर्वं । भावस्थिराणि जननान्तरसौहृदानि ” इत्येवं समार्थः श्लोकांशः) ।

(२३.) ततो मुनिः (कौशिकः) । शिष्यवर्गेण परिकल्पिता सज्जितार्हणा पूजासामग्री [“ सपर्यार्चार्हणाः समाः” इत्यमरः–हे०] यस्मिंस्तत्तथोक्तम् । बद्धाः पल्लवपुटाः (पल्लवानां किशलयानां संश्लेषाः) एवाञ्जलयो यैस्ते तथाभूता द्रुमा (वृक्षाः) यस्मिंस्तत्तथोक्तम् । दर्शनेन मुनिदर्शनेनोन्मुखाः (उन्मुकाः) मृगा यस्मिंस्तत् [दर्शनोन्मुखमृगमिति शान्तिः । अचेतनाः अपि अञ्जलिं बध्नन्तीत्यादरः–हे० चा०] । आत्मनस्तपोवनमाससाद (प्राप)। एतेन विशेषणत्रयेणातिथिसत्कारताच्छील्यविनयशान्तयः सूचिताः ।

(२४.) तत्र तपोवने [आश्रमे–हे०] दशरथात्मजौ दीक्षितं दीक्षासंस्कृतमृषिं शरैः (बाणैः) विघ्नतो विघ्नेभ्यः । क्रमेण पर्यायेण रात्रिदिवमयोरुदितौ शशिदिवाकरौ रश्मिभिः (किरणैः) अन्धतमसाद्गाढध्वान्तात् [अन्धकारोपमया शशिसूर्योपमया च रामलक्ष्मणयोर्निरतं राक्षसवैरम् । “ अवसमन्धेभ्यश्च ” इति तमसः अच्–हे० चा०] । “ध्वान्ते गाढेऽन्धतमसम् ” इत्यमरः । “ अवसमन्धेभ्यस्तमसः ” इति समासान्तोऽच्प्रत्ययः । लोकमिव । ररक्षतुः । रक्षणप्रवृत्तावभूतामित्यर्थः ।

(२५.) अथ बन्धुजीवपृथुभिर्बन्धुजीवकुसुमस्थूलैः । “ रक्तकस्तु बन्धूको बन्धुजीवकः” इत्यमरः । रक्तबिन्दुभिः (रुधिरबिन्दुभिः) प्रदूषितामुपहतां वेदिं (यज्ञवेदिं) वीक्ष्य

(23.) Then the Muni got to his own penance-grove where the provisions of worship had been collected by the groups of his disciples, where the trees formed cavities (in the shape) of the folds of leaves (to do him and the guests, that might come, reverence) and where the deer had been standing with their faces raised up for the sight of him.

(24.) There the two sons of Das'aratha protected (each in his turn) from obstacles the sage who had entered upon the initiatory ceremonies of a sacrifice by means of their arrows, like the Sun and the Moon rising in turns and relieving the world from deep darkness by means of their rays.

(25.) Then having seen the sacrificial altar polluted with drops of blood as large as the flowers of Bandhujîva, a confusion took place among the holy priests who left their sacrificial work and from whose (hands) dropped the Vikankata ladles,

उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाश्रयमुखात्समुद्धरन् ।
रक्षसां बलमपश्यदम्बरे गृध्रपक्षपवनेरितध्वजम् ॥ २६ ॥
तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत्स नेतरान् ।
किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते ॥ २७ ॥

(विलोक्य) । अपोढकर्मणां त्यक्तव्यापाराणाम् (त्यक्तयज्ञकर्मणां) च्युताः विकङ्कतस्रुचः (यज्ञपात्राणि) येभ्यस्तेषामृत्विजां याजकानां संभ्रमः (त्वराभयम्) अभवत् । विकङ्कतग्रहणं खदिराद्युपलक्षणम् । स्रुगादिनां खदिरादिप्रकृतिकत्वात् । स्रुगादिपात्रस्यैव विकङ्कतप्रकृतिकत्वात् । " विकङ्कतः स्रुचां वृक्षाः " इत्यमरः । यद्वा स्रुक्पात्रस्य विकङ्कतप्रकृतिकत्वमस्तु । उभयत्रापि शास्त्रसंभवात् । यथाह भगवानापस्तम्बः—" खादिरस्रुचः पर्णमयीर्जुहुयाद्वैकङ्कतीः स्रुचो वा " इति [" हव्यकव्ये दैवपित्र्ये अन्ने पात्रं स्रुवादिकम् । ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः " इत्यमरः-हे०] । [वैकङ्कतो लोके वेळ् इति प्रसिद्धं-हे०]।

(२६.) सपदि लक्ष्मणाग्रजो रामो बाणमाश्रयमुखात्तूणीरमुखात्समुद्धरन् । उन्मुख ऊर्ध्वमुखोऽम्बरे (आकाशे । " अम्बरं वसनाकाशे" इत्यमरः) । गृध्रपक्षपवनैरीरिताः कम्पिता ध्वजा यस्य तत्तथोक्तम् । रक्षसां दुर्निमित्तसूचनमेतत् [इति रक्षसामुत्पातः-हे० चा०] । तदुक्तं शकुनार्णवे—" आसन्नमृत्योर्निकटे चरन्ति गृध्रादयो मूर्ध्नि गृहोर्ध्वभागे " इति (एतदेव चारित्रवर्द्धनस्य) । रक्षसां (निशाचराणां) बलम् (सैन्यं) अपश्यत् ।

(२७.) स रामस्तत्र रक्षसां बले यौ मखद्विषां (मखं यज्ञं द्विषन्ति ये ते अध्वरविघातकाः तेषां) अधिपती तौ सुबाहुमारीचौ शरव्यं लक्ष्यमकरोत् । " वेध्यं लक्ष्यं शरव्यं च " इति हलायुधः । इतरान्नाकरोत् । तथा हि । महोरगविसर्पिविक्रमः (महोरगेषु महासर्पेषु वासुकिप्रभृतिषु विसर्पी प्रसरणशीलः विक्रमः पौरुषातिरेकः यस्य सः) गरुडो गरुत्मान्राजिलेषु जलव्यालेषु प्रवर्तते किम् । न प्रवर्तत इत्यर्थः । [" द्विमुखो निर्विषः सर्पो राजिलः " इति क्षीरस्वामी । आदिपर्वणि रुरोराख्याने च । " अन्ये ते भुजगा विप्र ये दशन्तीह मानवान् । डुण्डुभानहिगन्धेन न त्वं हिंसितुमर्हसि " इति-हे०] । " अलगर्दो

(26.) Instantly the elder brother of Lakshma*n*a, taking out an arrow from the mouth of the quiver with his face turned upwards saw in the sky a legion of demons whose flags were shaken by the wind (set in motion) by the wings of vultures.

(27.) Then he made the aim of his arrows those two (only) who were the chiefs of the haters of the sacrifices and not others. Does Garu*d*a whose prowess affects (lit. extends over) large serpents go (or engage himself) against the water-
' ।?

सोऽस्त्रमुग्रजवमस्त्रकोविदः संदधे धनुषि वायुदैवतम् ।
तेन शैलगुरुमप्यपातयत्पांडुपत्त्रमिव ताडकासुतम् ॥ २८ ॥
यः सुबाहुरिति राक्षसोऽपरस्तत्र तत्र विससर्प मायया ।
तं क्षुरप्रशकलीकृतं कृती पत्त्रिणां व्यभजदाश्रमाद्बहिः ॥ २९ ॥
इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनन्द्य विक्रमम् ।
ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन्क्रियाः ॥ ३० ॥

जलव्यालः समौ राजिलडुण्डुभौ " इत्यमरः (असदृशाः खलु अपरे पिशिताशनाः तयोः कुमारयोः वज्रसाराणां पत्त्रिणां शरव्यविषया भवितुमित्यर्थः) ।

(२८.) अस्त्रकोविदोऽस्त्रज्ञः स राम उग्रजवमुत्कटजवं (तीव्रवेगं) वायुदैवतं वायुर्देवता यस्य तद्वायव्यमस्त्रं धनुषि संदधे संहितवान् । कर्तरि लिट् । तेनास्त्रेण शैलवद्गुरुमपि ताडकासुतं मारीचम् । पाण्डुपत्त्रमिव । परिणतपर्णमिवेत्यर्थः । अपातयत्पातितवान् [न तु जघान । तस्य किञ्चिद्धर्मज्ञत्वात्–हे० । अनेनानायासोक्तिः–चा०] । (परिणतपर्णशातनं यथा नातिश्रमसाध्यं तथा मारीचविद्रावणं तस्य धनुर्भृतः नातिसुदुष्करं बभूवेत्यर्थः) ।

(२९.) सुबाहुरिति योऽपरो राक्षसस्तत्र तत्र मायया शम्बरविद्यया विससर्प संचचार । क्षुरप्रैः (शरविशेषैः) शकलीकृतं खण्डीकृतं तं सुबाहुं कृती (कृतमनेनेति कृती विचक्षणः) कुशलो रामः । " कृती च कुशलः समौ " इत्यमरः । आश्रमाद्बहिः पत्त्रिणां पक्षिणाम् । " पत्त्रिणौ शरपक्षिणौ " इत्यमरः । व्यभजत् । विभज्य दत्तवानित्यर्थः [यदि न हन्येत मायित्वादन्यत्रापि प्रसरेत् । यदि न खंड्येत पक्षिणामसौकर्यं स्यात् । यदि आश्रमाद्बहिर्न विभज्येत यज्ञियद्रव्यादुष्टता स्यात् । इत्येतच्चातुर्यं कृती पदेन सूच्यते । " शफ खुरः कवर्गीयः क्षकारश्च क्षुरप्रके । नापितस्योपकरणे कषसंयोग इष्यते " इति शब्दभेदप्रकाशे–हे०] ।

(३०.) इत्यपास्तमखविघ्नयोः (अपास्तः निरस्तः मखस्य यज्ञस्य विघ्नः प्रत्यूहः याभ्यां) तयो राघवयोः । संयुगे रणे साधुः सांयुगीनस्तम् । " प्रतिजनादिभ्यः खञ् " इति

(28.) He, proficient in the use of missiles, fixed on his bow a missile of furious speed whose presiding deity was the god of Wind ; by that he brought down (felled) the son of Tá*d*aká though heavy as a mountain as if he were a faded (lit. white) leaf.

(29.) The skilful warrior cut and distributed to the birds outside the hermitage the other demon (i. e. his body) named Subáhu who through magical powers moved now here and now there and who was made into pieces by his Kshurapra weapon.

(30.) The priests, having expressed their rejoicings at the chivalrous exploits of those two who had thus removed the obstacles to the sacrifice, completed in due order the sacrificial rites of that Lord of his clan who had restrained his tongue (observed silence).

तौ प्रणामचलकाकपक्षकौ भ्रातरावबभृथाप्लुतो मुनिः ।
आशिषामनुपदं समस्पृशद्दर्भपाटिततलेन पाणिना ॥ ३१ ॥
तं न्यमन्त्रयत संभृतक्रतुर्मैथिलः स मिथिलां व्रजन्वशी ।
राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलम् ॥ ३२ ॥
तैः शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत ।
येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ ॥ ३३ ॥

खञ्प्रत्ययः । "सांयुगीनो रणे साधुः" इत्यमरः । विक्रमं (पौरुषं) अभिनन्द्य (सत्कृत्य)। ऋत्विजः (अध्वर्युप्रभृतयः) याज्ञिकाः । वाचि यतो वाग्यतो मौनी तस्य कुलपतेर्मुनिकुलेश्वरस्य ("मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् । अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः" इत्युक्तलक्षणस्य) क्रियाः क्रतुक्रिया यथाक्रमं निरवर्तयन्निष्पादितवन्तः [तत्र ब्रह्मा पश्यति । अध्वर्युः प्रचरति । होता मंत्रान् पठति । उद्गाता सामानि गायति इति यथाक्रमंशब्दार्थः–हे०] ।

(३१.) अवभृथे दीक्षान्त आप्लुतः स्नातो मुनिः । "दीक्षान्तोऽवभृतो यज्ञः" इत्यमरः । प्रणामेन चलकाकपक्षकौ (चलाः चञ्चलाः काकपक्षाः शिखण्डकाः ययोस्तौ) चञ्चलचूडौ तौ भ्रातरावाशिषामनुपदमन्वक् । ("अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययं" इत्यमरः)। दर्भपाटिततलेन (कुशविशीर्णतलेन) कुशक्षतान्तःप्रदेशेन [इति सदाचारता–हे०]। पवित्रेणेत्यर्थः । पाणिना (करेण) समस्पृशत्संस्पृष्टवान् । संतोषादिति भावः ।

(३२.) संभृतक्रतुः [संभृतः आरब्धः क्रतुर्यज्ञो येन सः–हे०] संकल्पितसंभारो मिथिलायां भवो मैथिलो जनकस्तं विश्वामित्रं न्यमन्त्रयताहूतवान् । वशी [वशः इच्छा अस्यास्तीति वशी स्वतंत्रः जितेंद्रियो वा–हे०] स मुनिर्मिथिलां जनकनगरीं व्रजंस्तस्य जनकस्य यद्धनुस्तच्छ्रवणजं कुतूहलं बिभ्रतौ राघवावपि निनाय नीतवान् [क्रतुशब्देन क्रतुसमुत्पन्ना क्रियोच्यते । क्रतोर्विनश्वरत्वात्–चा०] ।

(३३.) गताध्वभिः (अतिक्रान्तमार्गैः) तैस्त्रिभिः सायं (दिनान्ते) शिवेषु रम्येष्वा-

---

(31.) The Muni who had finished his Avabhṛta ablutions (necessary at the end of a sacrifice) touched, after (giving them) blessings, with his hand wounded (made rough) by the Darbha-grass, those two brothers whose side-locks of hair were moving in the act of bowing down to him.

(32.) The Lord of Mithilá who had made preparations for a sacrifice invited him (Vis'vàmitra). That self-restrained hermit who was going to Mithilà also took with him those descendants of Raghu full of (lit. having a) wonder caused by hearing (reports) about the bow.

(33.) A halt (lit. place of residence) was made (lit. taken up) by them who had travelled (some) way in the evening under those auspicious trees of the

प्रत्यपद्यत चिराय यत्पुनश्चारु गौतमवधूः शिलामयी ।
स्वं वपुः स किल किल्बिषच्छिदां रामपादरजसामनुग्रहः ॥ ३४ ॥
राघवान्वितमुपस्थितं मुनिं तं निशम्य जनको जनेश्वरः ।
अर्थकामसहितं सपर्यया देहबद्धमिव धर्ममभ्यगात् ॥ ३५ ॥
तौ विदेहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू ।
मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वञ्चनां मनः ॥ ३६ ॥

श्रमतरुषु वसतिः स्थानमगृह्णत । ["वसतिस्तु निशि स्थित्यां जैनानामाश्रये गृहे" इति वैजयन्ती–चा०] । येष्वाश्रमतरुषु दीर्घतपसो गौतमस्य [अत्र दीर्घतपाः सान्तः बौद्धायनीये महाप्रवरे गौतमगणे दीर्घतमसानां पंचार्षे यः प्रवरो भवतीति कात्यायनीये दीर्घतमानां आर्षः (आर्षे यः) प्रवरः (प्रश्नो) भवतीति । आश्वलायनीयेषु दीर्घतमसामिति पाठः । त्रयमपि प्रमाणमार्षत्वात् । प्रवरमंजर्यां भृगुगणव्याख्याने पुरुषोत्तमपण्डितश्च । एकदेशविकृतमन्यद्भवतीति न्यायात्–हे०] परिग्रहः पत्नी । " पत्नीपरिजनादानमूलशापाः परिग्रहः " इत्यमरः । अहल्येति यावत् । वासवस्येन्द्रस्य क्षणकलत्रतां (क्षणमात्रं भार्यात्वं) ययौ (प्राप)।

(३४.) शिलामयी भर्तृशापाच्छिलात्वं प्राप्ता गौतमवधूरहल्या चारु स्वं (आत्मीयं) वपुः (कायं) चिराय (चिरात्) पुनः प्रत्यपद्यत प्राप्तवती यत् । स किल्बिषच्छिदां पापहारिणाम् । " पापं किल्बिषकल्मषम् " इत्यमरः । रामपादरजसाम् (रामभद्रचरणरेणूनां) अनुग्रहः किल प्रसादः किलेति श्रूयते [रामदर्शनेन शापात् मुक्तासीदित्यर्थः–चा०] ।

(३५.) राघवाभ्यामन्वितं युक्तमुपस्थितमागतं तं मुनिं जनको जनेश्वरो निशम्य (आकर्ण्य) । अर्थकामाभ्यां सहितं देहबद्धं [बद्धो देहो येन तं देहेन बद्धं वा–हे०] बद्धदेहम् । मूर्तिमन्तमित्यर्थः । वाहिताग्न्यादित्वात्साधुः । धर्ममिव । सपर्यया [पूजया करणभूतया–हे०] अभ्यगात्प्रत्युद्गतवान् ।

(३६.) दिवः सुरवर्त्मन आकाशात् । " द्यौः स्वर्गसुरवर्त्मनोः इति विश्वः । गां भुवं

---

hermitage in which the wife of Gautama of long penance went for a moment to (assume) the position of the wife of Vàsava.

(34.) It is said (किल) that it was the favour of the dust of Ràma's feet destroying sin, that the wife of Gautama changed to stone, did after a long time again obtain (was restored to) her own beautiful form.

(35.) Having heard that the Muni had come with the descendants of Raghu, Janaka the Lord of the people came forward with offerings to receive him who was, as it were, virtue incarnate accompanied by Wealth and Desire.

(36.) The minds of the citizens of Videha who were drinking with their eyes those two (princes) who appeared like the two (stars of) Punarvasus gone down to earth from heaven, considered even the twinkling (of their eyes) to be an interruption (lit. a deception).

यूपवत्यवसिते क्रियाविधौ कालवित्कुशिकवंशवर्धनः ।
राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयांबभूव सः ॥ ३७ ॥
तस्य वीक्ष्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः ।
स्वं विचिन्त्य च धनुर्दुरानमं पीडितो दुहितृशुल्कसंस्थया ॥ ३८ ॥

गतौ । " स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः " इत्यमरः । पुनर्वसू इव [पुनर्वसू अदितिभेदे इत्यमरशेषे । एकस्यैव स्वरूपस्य व्द्यवयवत्वादित्थमुत्प्रेक्षा व्द्यवयवत्वात्पुनर्वसू इति द्विवचनं । तथा अमरवेदभेद्यां । तस्या दाक्षायण्या द्वावयवौ अतो द्विर्वचनमिति । "छंदसि पुनर्वस्वोः" इति ज्ञापकात् । पुनर्वसू नक्षत्रे अदितिर्देव-तेति श्रुतेश्च । ज्योतिःशास्त्रे च तत्प्रसिद्धास्तारकाः । तथा नारदीयसंहिता-यां । " रामाग्निऋतुबाणाग्निभूवेदाग्निशरेषवः " इति–हे०] तन्नामकनक्षत्राधिदेवते इव [इव शब्द उत्प्रेक्षाया । तथा काव्यादर्शे । " मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः " इति । " अन्यथैव स्थिता वृत्तिश्चेतनस्ये तरस्य वा । अन्यथोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुर्बुधाः–हे०] स्थितौ । तौ राघवौ विलोचनैः पिबताम् (सादरं पश्यतां । " सादर विलोकनं पानमुच्यते ") । अत्यास्थया पश्यतामित्यर्थः । विदेहनगरी मिथिला । तन्निवासिनां [मिथिलापुरीवास्तव्यानां जनानां । " विदेहो देह-शून्ये स्यात् । विदेहा मैथिले स्मृतः " इति विश्वः–हे०] । मनः । कर्तृ । पक्ष्मपातं निमेषम-पि तद्दर्शनप्रतिबन्धकत्वाद्वञ्चनां विडम्बनां मन्यते स्म मेने । " लट् स्मे " इति भूतार्थे लट् ।

(३७.) यूपवति [खादिरौदुम्बरादिनि यूपयुक्ते–चा०] क्रियाविधौ कर्मानुष्ठाने ["क्रि-याकर्मणि चेष्टायां करणे संप्रधारणे । आरंभोपाय शिक्षार्थचिकित्सानिष्कृतिष्वपि " इति विश्वः–चा०] । कृतावित्यर्थः । अवसिते समाप्ते सति कालविदवसरज्ञः कुशिकवंशवर्धनः स मुनी रामम् । अस्यतेऽनेनेत्यसनम् । इषूणामसनमिष्वसनं (माहेषं) चापम् । तस्य दर्शन उत्सुकं मैथिलाय जनकाय कथयांबभूव कथितवान् ।

(३८.) पार्थिवः (पृथिव्याः ईश्वरः) जनकः । प्रथितवंशे जन्म यस्य तस्य तथोक्त-स्य । एतेन वरसंपत्तिरुक्ता । शिशोस्तस्य रामस्य ललितं कोमलं वपुर्वीक्ष्य । स्वं स्वकीयं दुरानममानमयितुमशक्यम् । नमेर्ण्यन्तात्खल् । धनुर्विचिन्त्य च । दुहितृशुल्कं कन्यामूल्यं जा-

---

(37.) When the sacrificial rites consisting of (the use of) posts were completed that exalter of the race of Kus'ika knowing the (proper) occasion, told the king of Mithilā about Rāma's being eager to behold the bow (lit. that with which arrows are discharged).

(38.) The king seeing the delicate form of that child born in a celebrated family and considering his own bow (as one) difficult to bend down, was distressed for (his having fixed) the condition of S'ulka (or bride money) for his daughter.

अब्रवीच्च भगवन्मतंगजैर्यद्बृहद्भिरपि कर्म दुष्करम् ।
तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम् ॥ ३९ ॥
ह्रेपिता हि बहवो नरेश्वरास्तेन तात धनुषा धनुर्भृतः ।
ज्यानिघातकठिनत्वचो भुजान्स्वान्विधूय धिगिति प्रतस्थिरे ॥ ४० ॥
प्रत्युवाच तमृषिर्निशम्यतां सारतोऽयमथवा कृतम् गिरा ।
चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव ॥ ४१ ॥

मातृदेयम् । “ शुल्कं घट्टादिदेये स्याज्जामातुर्बन्धकेऽपि च ” इति विश्वः । तस्य धनुर्भङ्गरूपस्य संस्थया स्थित्या । “ संस्था स्थितौ शरे नाशे ” इति विश्वः । पीडितो बाधितः । शिशुना रामेण दुष्करमिति दुःखित इति भावः [जनकमनुजाधिपेन किल प्रागेवं प्रत्यज्ञायि यो रोहिणीरमणचूडामणेर्बाणासनं खलु भंत्स्यति तस्मै सीतां दास्यामीत्येवं रूपः शुल्कः । अयं चेन्न परिणीतः स्यात्तर्हि रूपवंशवयःप्रमुखाणां गुणानां समुदायात् दातुं शक्यते(अतः) वृथापणः कृतः इति चिन्तागतः इत्यर्थः–चा०] ।

(३९.) अब्रवीच्च । मुनिमिति शेषः । किमिति । हे भगवन्मुने । [“ तत्रभवान् भगवानिति शब्दो वृद्धैः प्रयुज्यते पूज्ये । पादा इति नामान्ते देवो भट्टारकोवापि” इति हलायुधः–हे०] । बृहद्भिर्मतंगजैर्महागजैरपि दुष्करं यत्कर्म तत्र कर्मणि कलभस्य बालगजस्य । “ कलभः करिशावकः ” इत्यमरः । मोघवृत्ति व्यर्थव्यापारं चेष्टितं साहसमनुमन्तुमहं नोत्सहे ।

(४०.) हे तात । [“पुत्रे पितरि पूज्ये च तातशब्दो बुधैः स्मृतः” इति केशवः-हे०] । तेन धनुषा बहवो धनुर्भृतः (धानुष्काः) नरेश्वरा ह्रेपिता ह्रियं प्रापिता हि । जिह्रतेर्धातोर्ण्यन्तात्कर्मणि क्तः । “ अर्तिह्री–” इत्यादिना पुगागमः । ते नरेश्वरा ज्यानिघातैः कठिनत्वचः स्वान्भुजान्धिगिति विधूयावमत्य [कम्पयित्वा–हे०] प्रतस्थिरे प्रस्थिताः [अतो रामेण धनुर्नामनं नोररीकरोमीति भावः–चा०] ।

(४१.) ऋषिस्तं (नृपं) प्रत्युवाच । किमिति । अयं रामः सारतः [वीर्यबलविषये–हे०वीर्यतः चा० सु०] बलेन निशम्यतां श्रूयताम् (त्वयेति शेषः) । अथवा गिरा सारवर्णनया कृतमलम् । गीर्न वक्तव्येत्यर्थः । “युगपर्याप्तयोः कृतम् ” इत्यमरः । अव्ययं चैतत् । “कृतं निवारण-

(39.) And replied to the sage, saying, O venerable sage, I can not give my consent to the futile attempt of a cub of an elephant in an undertaking which is difficult to be accomplished even by huge elephants.

(40.) For, many kings, O Father, who wield bows, being put to shame by that bow, have gone away despising their arms, the skin on which was hardened by the (constant) smart friction of bow-strings, crying ‘ Shame upon us ! ’

(41.) The sage replied to him, listen O King, this (boy) by his strength,— or no heed of words ; he will manifest his power to you on the bow itself as the thunder-bolt on a mountain.

एवमाप्तवचनात्स पौरुषं काकपक्षकधरेऽपि राघवे ।
श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृष्णवर्त्मनि ॥ ४२ ॥
व्यादिदेश गणशोऽथ पार्श्वगान्कार्मुकाभिहरणाय मैथिलः ।
तैजसस्य धनुषः प्रवृत्तये तोयदानिव सहस्रलोचनः ॥ ४३ ॥
तत्प्रसुप्तभुजगेन्द्रभीषणं वीक्ष्य दाशरथिराददे धनुः ।
विद्रुतक्रतुमृगानुसारिणं येन बाणमसृजद्वृषध्वजः ॥ ४४ ॥

निषेधयोः " इति गणव्याख्याने । गिरेति करणे तृतीया । निषेधक्रियां प्रति करणत्वात् । किंत्वशनिर्वज्रो गिराविव । चापे धनुष्येव भवतस्तव व्यक्तशक्तिर्दृष्टसारः (प्रकटसामर्थ्यः) भविष्यति [रामो धनुर्भंगं करिष्यतीति वाक्यार्थः—हे०] ।

(४२.) एवमाप्तस्य [यथादृष्टश्रुतवादिनः—चा०] मुनेर्वचनात्स जनकः काकपक्षकधरे बालेऽपि राघवे पुरुषस्य कर्म पौरुषं पराक्रमम् । " हायनान्तयुवादिभ्योऽण् " इति युवादित्वादण् । " पौरुषं पुरुषस्योक्तं भावे कर्मणि तेजसि " इति विश्वः । त्रिदशगोप इन्द्रगोपकीटः [वार्षिको लोहितः कीटविशेषः—हे०] प्रमाणमस्य त्रिदशगोपमात्रः । " प्रमाणे द्वयसच्—" इत्यादिना मात्रच्प्रत्ययः । ततः स्वार्थे कप्रत्ययः । तस्मिन्कृष्णवर्त्मनि वह्नौ दाहशक्तिमिव । श्रद्दधे विश्वस्तवान् ।

(४३.) अथ मैथिलः पार्श्वगान्पुरुषान्कार्मुकाभिहरणाय कार्मुकमानेतुम् । "तुमर्थाच्च—" इति चतुर्थी । सहस्रलोचन इन्द्रस्तैजसस्य तेजोमयस्य धनुषः प्रवृत्तय आविर्भावाय तोयदान्मेघानिव गणान्गणशः । " संख्यैकवचनाच्च वीप्सायाम् " इति शस्प्रत्ययः । व्यादिदेश प्रजिघाय ।

(४४.) दाशरथी रामः प्रसुप्तभुजगेन्द्रः (शेषः) इव भीषणं भयंकरं तद्धनुर्वीक्ष्याददे जग्राह । वृषो ध्वजश्चिह्नं यस्य स शिवो येन धनुषा । क्रतुरेव मृगः । विद्रुतं पलायितं क्रतुमृगमनुसरति । ताच्छील्ये णिनिः । तं विद्रुतक्रतुमृगानुसारिणं (विद्रुतं पलायमानं क्रतु-

---

(42.) From these words of the sage, who could be relied on, he believed that power in (became assured of) the descendant of Raghu though wearing side-locks of hair, as one can believe burning power in (a spark of) fire (lit. one that leaves behind a black path) though as small as an Indragopa worm.

(43.) Then the King of Mithilá deputed his side-walkers (attendants) in groups to fetch the bow, as the thousand-eyed god (Indra) directs clouds to manifest the bow made up of light.

(44.) Having seen that bow terrible like the King of serpents in his sleep —the bow with which the bull-bannered God (S'iva) discharged the dart that followed the sacrifice in the form of a running (fleet) antelope, the son of Dasáratha took it up.

आततज्यमकरोत्स संसदा विस्मयस्तिमितनेत्रमीक्षितः।
शैलसारमपि नातियत्नतः पुष्पचापमिव पेशलं स्मरः॥ ४५॥
भज्यमानमतिमात्रकर्षणात्तेन वज्रपरुषस्वनं धनुः।
भार्गवाय दृढमन्यवे पुनः क्षत्रमुद्यतमिव न्यवेदयत्॥ ४६॥
दृष्टसारमथ रुद्रकार्मुके वीर्यशुल्कमभिनन्द्य मैथिलः।
राघवाय तनयामयोनिजां रूपिणीं श्रियमिव न्यवेदयत्॥ ४७॥

रूपं मृगं अनुसरतीति तादृशं) बाणमसृजन्मुमोच [विध्वंसनभयात् पलायमानं दक्षयज्ञान्ते येन च धनुषा हरो विध्यादित्यागमः–हे०]।

(४५.) स रामः संसदा सभया विस्मयेन स्तिमिते (निश्चले) नेत्रे यस्मिन्कर्मणि तद्यथा स्यात्तथेक्षितः सन्। शैलस्येव सारो यस्य तच्छैलसारमपि धनुः। स्मरः पेशलं कोमलं पुष्पचापमिव [इत्यल्पक्लेशः–हे०]। नातियत्नतो नातियत्नात् (अनायासात्)। नञर्थस्य नशब्दस्य सुप्सुपेति समासः। आततज्यमधिज्यमकरोत्।

(४६.) तेन रामेणातिमात्रकर्षणाद्भज्यमानमतएव वज्रपरुषस्वनम्। वज्रमिव परुषः स्वनो यस्य तत्। धनुः। कर्तृ। दृढमन्यवे दृढक्रोधाय। "मन्युः क्रोधे क्रतौ दैन्ये" इति विश्वः। भार्गवाय (परशुरामाय) क्षत्रं क्षत्रकुलं पुनरुद्यतं (भूयोप्युत्पन्नं बाहुजन्यं) न्यवेदयदिव ज्ञापयामासेव [प्राङ्निःशेषीकृताः बाहुजन्याः क्षत्रियाः। पुनरुद्यद्विक्रमाः इति तेन चापेन निवेदितमिति भावः–चा०]।

(४७.) अथ मैथिलो जनको रुद्रकार्मुके (शंकरशरासने) दृष्टः सारः स्थिरांशो यस्य तद्दृष्टसारम् (विलोकितविक्रमं)। "सारो बले स्थिरांशे च" इति विश्वः। वीर्यमेव शुल्कम्। धनुर्भङ्गरूपमित्यर्थः। अभिनन्द्य (संस्तूय) राघवाय रामायायोनिजां देवयजनसंभवां तनयां सीतां रूपिणीं श्रियमिव साक्षाल्लक्ष्मीमिव न्यवेदयदर्पितवान्। वाचेति शेषः। उक्तमेवार्थं सोपस्कारमाह—

(45.) He strung that bow with no great effort even though it possessed the strength of a mountain, as the God of Love strings his delicate bow of flowers, being gazed at by the assembled people with their eyes steady in astonishment.

(46.) The bow while breaking on account of its being drawn too much by him and (hence) producing a noise (sound) as shrill as the crash of a thunderbolt, as it were, proclaimed to Bhàrgava of inveterate hatred, that the Kshatriya race had again risen up.

(47.) Then the Lord of Mithilà having expressed his rejoicings at finding the S'ulk (bride money) in the form of valour whose essence was tested (lit. seen) on the bow of Rudra (S'iva), promised to the descendant of Raghu his daughter not born of the womb, as if she were the visible goddess of Fortune (i. e. Lakshmi),

मैथिलः सपदि सत्यसंगरो राघवाय तनयामयोनिजाम्।
संनिधौ द्युतिमतस्तपोनिधेरग्निसाक्षिक इवातिसृष्टवान्॥ ४८॥
प्राहिणोच्च महितं महाद्युतिः कोसलाधिपतये पुरोधसम्।
भृत्यभावि दुहितुः परिग्रहाद्दिश्यतां कुलमिदं निमेरिति॥ ४९॥
अन्विरेष सदृशीं स च स्नुषां प्राप चैनमनुकूलवाग्द्विजः।
सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि काङ्क्षितम्॥ ५०॥

(४८.) सत्यसंगरः सत्यप्रतिज्ञः। "अथ प्रतिज्ञाजिसंविदापत्सु संगरः" इत्यमरः। मैथिलो राघवायायोनिजां (देवयजनसंभवां) तनयां द्युतिमतस्तेजस्विनस्तपोनिधेः कौशिकस्य संनिधौ। अग्निः साक्षी यस्य सोऽग्निसाक्षिकः। "शेषाद्विभाषा" इति कप्प्रत्ययः। स इव। सपद्यतिसृष्टवान्दत्तवान्।

(४९.) महाद्युतिर्जनको महितं पूजितं[अलंकृतं-हे०]पुरोधसं पुरोहितं (शतानन्दाभिधं) कोसलाधिपतये दशरथाय प्राहिणोत्प्रहितवांश्च। किमिति। निमिर्नाम जनकानां पूर्वजः कश्चित्। इदं निमेः कुलं दुहितुः सीतायाः परिग्रहात्स्नुषात्वेन स्वीकाराद्धेतोः। भृत्यस्य भावो भृत्यत्वम्। सोऽस्यास्तीति भृत्यभावि दिश्यतामनुमन्यतामिति (त्वयेति शेषः)।

(५०.) स दशरथश्च सदृशीमनुरूपां स्नुषामन्विरेष। रामविवाहमाचकाङ्क्षेत्यर्थः। अनुकूलवाक्स्नुषासिद्धिरूपानुकूलार्थवादी द्विजो जनकपुरोधाः (शतानन्दः) चैनं दशरथं प्राप। तथा हि। कल्पवृक्षफलस्य [कल्पपूरणो वृक्षः कल्पवृक्षः कल्पवृक्षफलस्येव-हे०] यो धर्मः (स्वभावः) सद्यःपाकरूपः सोऽस्यास्तीति कल्पवृक्षफलधर्मि [अनेन कालानपेक्षितत्वं। तथा कर्णामृते। "कल्पद्रुमोऽपि कालेन भवेद्यदि फलप्रदः। को विशेषस्तदा तस्य वन्यैर्महीरुहैरिति"-हे०]। अतः सुकृतां पुण्यकारिणां काङ्क्षितं मनोरथः सद्य एव पच्यते हि। कर्मकर्तरि लट्। स्वयमेव पक्व भवतीत्यर्थः [यथा कल्पवृक्षफलं कालाद्यनपेक्षमेव पक्वं एवं पुण्यात्मनामपीष्टमिति भावः-चा०]। "कर्मवत्कर्मणा तुल्यक्रियः" इति कर्मवद्भावात् "भावकर्मणोः" इत्यात्मनेपदम्।

(48.) The King of Mithilá, true to his promise, (veracious) instantly gave his daughter not born of the womb to the descendant of Raghu in the presence of the resplendent sage who was a treasure of penance (thus) having, as it were, the God of fire for his witness (to the marriage).

(49.) And the resplendent King deputed his revered family-priest to the Lord of the Kosálas, requesting,—"Please to consent to this family of Nimi becoming subservient to you by your accepting my daughter (for your daughter-in-law)."

(50.) As soon as he thought (lit. desired) of a suitable daughter-in-law a twice-born (Bráhmana) came to him with a message favourable (to Dasáratha); for the desire of the virtuous which partakes of the nature of the fruit of an all-yielding tree, is ripe (attains fulfilment) quite at once.

तस्य कल्पितपुरस्क्रियाविधेः शुश्रुवान्वचनमग्रजन्मनः ।
उच्चचाल बलभित्सखो वशी सैन्यरेणुमुषितार्कदीधितिः ॥ ५१ ॥
आससाद मिथिलां स वेष्टयन्पीडितोपवनपादपां बलैः ।
प्रीतिरोधमसहिष्ट सा पुरी स्त्रीव कान्तपरिभोगमायतम् ॥ ५२ ॥
तौ समेत्य समयस्थितावुभौ भूपती वरुणवासवोपमौ ।
कन्यकातनयकौतुकक्रियां स्वप्रभावसदृशीं वितेनतुः ॥ ५३ ॥

(५१.) [परमार्थतया रक्षोवधात्–हे०] बलभित्सख इन्द्रसहचरो वशी स्वाधीनतावान् [इन्द्रशासनो वा–हे०] । " वश आयत्ततायां च " इति विश्वः । कल्पितपुरस्क्रियाविधेः कृतपूजाविधेस्तस्याग्रजन्मनः [गौतमस्य–चा०] द्विजस्य । [" आश्रमोऽस्त्री द्विजात्यग्रजन्मभूदेववाडवाः" इत्यमरः–हे०] । वचनं जनकेन संदिष्टं शुश्रुवाञ्छ्रुतवान् । शृणोतेः क्वसुः सैन्यरेणुमुषितार्कदीधितिः (सैन्यरेणुभिः चमूधूलिभिः मुषिताश्छादिताः अर्कदीधितयो रविरश्मयः येन तादृशः) सन्नुच्चचाल प्रतस्थे ।

(५२.) स दशरथो बलैः सैन्यैः [गजादिबन्धनात्–हे०] पीडितोपवनपादपां (पीडिताः भग्नाः उपवनानाम् बाह्योद्यानानां पादपाः तरवः यस्याः तां तथोक्तां) मिथिलां वेष्टयन्परिधीकुर्वन् । आससाद । सा पुरी । स्त्री युवतिरायतमतिप्रसक्तं कान्तपरिभोगं प्रियसंभोगमिव । प्रीत्या रोधं [गाढाश्लेषनखक्षतादिप्रचुरं–चा०] प्रीतिरोधमसहिष्ट सोढवती । द्वेषरोधं तु न सहत इति भावः ।

(५३.) समयस्थितौ (समये शिष्टाचारे स्थितौ) आचारनिष्ठौ । " समयाः शपथाचारकालसिद्धान्तसंविदः " इत्यमरः । वरुणवासवावुपमोपमानं ययोस्तौ तथोक्तौ । तावुभौ भूपती जनकदशरथौ समेत्य स्वप्रभावसदृशीमात्ममहिमानुरूपां कन्यकानां सीतादीनां तनयानां रामादीनां च कौतुकक्रियां विवाहोत्सवं । [" कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः " इति विश्वः–हे०] वितेनतुर्विस्तृतवन्तौ [विवाहे राशिकूटादौ कन्यायाः प्रथमं गणनत्वेन

(51.) That self-restrained friend of India having heard the words of him the first-born (Bráhma*n*a) the rite of hospitality towards whom had been (already) performed, set out eclipsing (lit. stealing) the rays (splendour) of the sun by the (clouds of) dust raised by his forces (on their march).

(52) He reached Mithilá surrounding it, the trees in the outer gardens of which were crushed by his forces. That city endured the siege of love as a woman suffers the coveted sexual enjoyment of her lover.

(53.) The two Lords of the Earth who conformed to usages and customs and who were like Varu*n*a and Vásava (the guardians of the East and West) having come together, celebrated the marriage ceremonies of their sons and daughters in accordance with their dignity.

पार्थिवीमुदवहद्रघूद्वहो लक्ष्मणस्तदनुजामथोर्मिलाम् ।
यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे ॥ ५४ ॥
ते चतुर्थसहितास्त्रयो बभुः सूनवो नववधूपरिग्रहाः ।
सामदानविधिभेदनिग्रहाः सिद्धिमन्त इव तस्य भूपतेः ॥ ५५ ॥
ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन्कृतार्थताम् ।
सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगसन्निभः ॥ ५६ ॥

प्राधान्यात् पूर्वं निपातः । "प्रत्यङ्मुखाः वरयन्ति प्रतिगृह्णन्ति प्राङ्मुखाः" इत्युक्तत्वात् वरुणवासवयोरित्यत्र । "देवताद्वन्द्वे च" इत्यानङोभावो 'यमपुण्यजनेश्वरौ' इत्यत्र व्याख्यातः–हे०]। तनोतेर्लिट् । (यादृशः स्वेषां प्रभावः तादृशीं विवाहक्रियां विस्तृतवद्भिस्तैर्द्रविणव्यये न कापि विचारणा कृतेति अभिप्रायः) ।

(५४.) उद्वहतीत्युद्वहः । पचाद्यच् । रघूणामुद्वहो रघूद्वहो रामः । पृथिव्या अपत्यं स्त्री पार्थिवी । "तस्यापत्यम्" इत्यणि "टिड्ढा–" इति ङीप् । तां सीतामुदवहत्परिणीतवान् । अथ लक्ष्मणस्तस्याः सीताया अनुजां जनकस्यौरसीमूर्मिलामुदवहत् । यौ वरौजसौ तयो रामलक्ष्मणयोरवरजावनुजातौ भरतशत्रुघ्नौ तौ सुमध्यमे कुशध्वजस्य जनकानुजस्य सुते कन्यके माण्डवीं श्रुतकीर्तिं चोदवहताम् । नात्र व्युत्क्रमविवाहदोषो भिन्नोदरत्वात् । तदुक्तम्—"पितृव्यपुत्रे सापत्न्ये परनारीसुतेषु च । विवाहाधानयज्ञादौ परिवेत्ताद्यदूषणम्" इति ।

(५५.) ते चतुर्थसहितास्त्रयः । चत्वार इत्यर्थः । वृत्तानुसारादेवमुक्तम् । सूनवो नववधूपरिग्रहाः । सिद्धिमन्तः फलसिद्धियुक्तास्तस्य भूपतेर्दशरथस्य सामदानविधिभेदनिग्रहाश्चत्वार उपाया इव । बभुः । विधीयत इति विधिः । दानमेव विधिः । निग्रहो दण्डः । सूनूनामुपायैर्वधूनां सिद्धिभिश्चौपम्यमित्यनुसंधेयम् ।

(५६.) ता नराधिपसुता जनककन्यका नृपात्मजैर्दशरथपुत्रैः कृतार्थतां कुलशीलवयो-

---

(54.) The leader of the family of Raghu married the daughter of the Earth and then Lakshmana married Urmilà her younger sister (lit. born after her). The other two powerful ones who were younger brothers of them (two) accepted the two daughters of Kus'adhvaja, of beautiful waist.

(55.) The three sons, accompained by the fourth, on account of their accepting new brides, appeared like the four political crafts (means) of that Lord of the Earth, viz : Sáman (peace-making), Dánavidhi (act of bribing), Bheda (attempt to produce civil dissension) and Nigraha (punishing, war) accompained by Siddhi (success).

(56.) Those daughters of the Lord of people in company with the sons of the King and they (the sons) with them (the daughters) attained their end (object or success). That union of the brides and bride-grooms was like the union of Pratyaya (terminations, affixes) and Prakriti (base).

एवमात्तरतिरात्मसंभवांस्तान्निवेश्य चतुरोऽपि तत्र सः ।
अध्वसु त्रिषु विसृष्टमैथिलः स्वां पुरीं दशरथो न्यवर्तत ॥ ५७ ॥
तस्य जातु मरुतः प्रतीपगा वर्त्मसु ध्वजतरुप्रमाथिनः ।
चिक्लिशुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः स्थलीम् ॥ ५८ ॥
लक्ष्यते स्म तदनन्तरं रविर्बद्धभीमपरिवेशमण्डलः ।
वैनतेयशमितस्य भोगिनो भोगवेष्टित इव च्युतो मणिः ॥ ५९ ॥

रूपादिसाफल्यमगमन् । ते (राघवाद्याः) च ताभिः (सीताद्याभिः) तथा । किंच । स वराणां वधूनां च समागमः । प्रत्ययानां प्रकृतीनां च योग इव । संनिभातीति संनिभः । अभवत् । पचाद्यच् । प्रत्ययाः सामादयो येभ्यो विधीयन्ते ताः प्रकृतयः [अमात्यादयः—चा०] यथा प्रकृतिप्रत्यययोः सहैकार्थसाधनत्वं तद्वदत्रापीति भावः [प्रक्रियते आदौ क्रियते इति प्रकृतिः । प्रतीयते अर्थः अनेन इति प्रत्ययः । प्रकृतियुताः प्रत्यया इव सार्थकत्वमीयुरिति वाक्यार्थः । इयानित्यत्र प्रकृतिलोपे प्रत्यय एवार्थमाह । वेत्तीति विदित्यत्र प्रत्ययलोपे प्रकृतिरेवार्थमाह । उभयत्रापि प्रयोगसद्भाव एव—हे०] ।

(५७.) एवमात्तरतिः (आत्ता धृता रतिः प्रीतिर्येन) अनुरागवान्स दशरथस्तांश्चतुरोऽप्यात्मसंभवान्पुत्रांस्तत्र मिथिलायां निवेश्य विवाह्य । " निवेशः शिबिरोद्वाहविन्यासेषु प्रकीर्तितः " इति विश्वः । त्रिष्वध्वसु प्रयाणेषु सत्सु विसृष्टमैथिलः सन् । स्वां पुरीं न्यवर्तत [निवर्तनं प्रतिगमनमित्युक्तत्वात्सकर्मकत्वं । " निवेशः स्याद्विवाहेपि निवेश इति भागुरिः" —चा०] । उद्देशक्रियापेक्षया कर्मत्वं पुर्याः ।

(५८.) जातु कदाचिद्वर्त्मसु (मार्गेषु) ध्वजा एव तरवस्तान्प्रमथ्नन्ति ये ते ध्वजतरुप्रमाथिनः प्रतीपगाः प्रतिकूलगामिनो मरुतः । उत्तटा नदीरयाः स्थलीमकृत्रिमभूमिमिव । " जानपदकुण्ड–" इत्यादिना ङीप् । तस्य वरूथिनीं सेनां भृशतया भृशं चिक्लिशुः क्लिश्यन्ति स्म [पुरो भावियुद्धसूचकं–हे० । इतश्चतसृभिः श्लोकैः प्रतिकूलादिदुःशकुनवर्णनं परशुरामागमनं सूच्यते–चा० सु०] ।

(५९.) तदनन्तरं प्रतीपपवनानन्तरं बद्धं भीमं (बिभेत्यस्मादिति भीमं भयानकं) प-

(57.) The King Daśaratha having thus married all those four sons there (at Mithilâ), and having dismissed the King of Mithilâ after three journeys (at the third stage) returned with great pleasure to his own capital.

(58.) Now it so happened that (strong gusts of) wind blowing in an opposite direction and destroying the tree-like-banners on the roads, harassed his army in a great degree, as the swelling currents of a river overflowing the banks devastate the dry-land (the country lying along the banks).

(59.) After that the sun with a formidable ring formed around it, appeared like the gem of a cobra dropped down (from his hood) and encircled by his body, when killed by the son of Vinatâ (Garuda).

श्येनपक्षपरिधूसरालकाः सांध्यमेघरुधिरार्द्रवाससः ।
अङ्गना इव रजस्वला दिशो नो बभूवुरवलोकनक्षमाः ॥ ६० ॥
भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववासिरे ।
क्षत्रशोणितपितृक्रियोचितं चोदयन्त्य इव भार्गवं शिवाः ॥ ६१ ॥
तत्प्रतीपपवनादि वैकृतं प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् ।
अन्वयुङ्क्त गुरुमीश्वरः क्षितेः स्वन्तमित्यलघयत्स तद्व्यथाम् ॥ ६२ ॥

रिवेशस्य परिधेर्मण्डलं यस्य सः । "परिवेशस्तु परिधिरुपसूर्यकमण्डले" इत्यमरः । रविः (सूर्यः) । वैनतेयशामितस्य गरुडहतस्य भोगिनः सर्पस्य भोगेन कायेन । " भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः " इत्यमरः । वेष्टितश्च्युतः शिरोभ्रष्टो मणिरिव । लक्ष्यते स्म ।

(६०.) श्येनपक्षा एव परिधूसरा अलका यासां तास्तथोक्ताः सांध्यमेघा एव रुधिरार्द्राणि वासांसि यासां तास्तथोक्ताः [स्त्रीपक्षे श्येनपक्षा इव । सांध्यमेव तत्-हे०] । रजो धूलिरासामस्तीति रजस्वलाः । " रजःकृष्यासुतिपरिषदो वलच् " इति वलच्प्रत्ययः । दिशः (ककुभः) । रजस्वला ऋतुमत्योऽङ्गना इव । " स्याद्रजः पुष्पमार्तवम् " इत्यमरः । अवलोकनक्षमा दर्शनार्हा नो [अमानोना प्रतिषेधे-हे०] बभूवुः [न जाताः । रजस्वला हि दर्शनयोग्या न स्युः-हे० चा० । " मलवद्वाससा न संवदेत् " इत्यादिनिषेधात् रजासि अवलोकनमनायुष्यं । ता अपि धूसरालका रुधिरार्द्रवासश्च स्युः-चा०] । एकत्राद्दष्टदोषादपरत्र शास्त्रदोषादिति विज्ञेयम् । अत्र रजोवृष्टिरुत्पात उक्तः ।

(६१.) भास्करो यां दिशमध्युवास च यस्यां दिश्युषितः । " उपान्वध्याङ्वसः " इति कर्मत्वम् । तां (पूर्वां) दिशं श्रिताः शिवा गोमायवः । " स्त्रियां शिवा भूरिमायुगोमायुमृगधूर्तकाः " इत्यमरः । क्षत्रशोणितेन या पितृक्रिया पितृतर्पणं तत्रोचितं भार्गवं (जामदग्न्यं) चोदयन्त्य इव प्रतिभयं भयंकरं ववासिरे रुरुवुः ["फूत्कारयुक्ता यदि पूर्वभागे प्रदोषकाले नृपतिप्रकोपः । शिवा न शस्ता नलसंविभागे नरेशवार्त्ता दिशि दक्षिणस्यां " इति वसन्तराजः -हे०] । " वाशृ शब्दे " इति धातोर्लिट् । " तिरश्चां वाशितं रुतम् " इत्यमरः ।

(६२.) तत्प्रतीपपवनादि (प्रतीपः प्रतिकूलः पवनो वायुरादिर्यस्य तत् तथोक्तं) वैकृ-

---

(60.) The quarters full of dust wearing (dirty) grey tresses (in the form) of the wings of hawks and putting on garments steeped in (wet with) blood (in the form) of evening clouds were not pleasant to the sight (lit could not be seen) like women in their menses (who wear dirty locks of hair and garments wet with blood &c).

(61.) And resorting to the quarter, which the sun occupied, the female jackals began to howl terribly, urging, as it were, the son of Bhrigu who was accustomed to give oblations (Tarpana) of Kashtriya blood to his father.

(62) Having seen the ill-omen of the gales of winds blowing in opposite directions and of such other things, the Lord of the Earth knowing what was proper to be done (under such circumstances) asked the spiritual adviser regarding its pacification, when he lightened his anxiety by assuring him that it would result in good.

तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे ।
यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात् ॥ ६३ ॥
पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत् ।
यः ससोम इव घर्मदीधितिः सद्विजिह्व इव चन्दनद्रुमः ॥ ६४ ॥
येन रोषपरुषात्मनः पितुः शासने स्थितिभिदोऽपि तस्थुषा ।
वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही ॥ ६५ ॥

तं [विकृतिरेव वैकृतं।"प्रतिज्ञादिः"इति वामनः स्वार्थिकत्वाल्लिङ्गातिक्रमः–हे०]दुर्निमित्तं प्रेक्ष्य कृत्यवित्कार्यज्ञः [कृत्यवित् इति गुरुविशेषणं वा–हे०] क्षितेरीश्वरः शान्तिमनर्थनिवृत्तिमधिकृत्योद्दिश्य गुरुं वशिष्ठमन्वयुङ्क्तापृच्छत् । " प्रश्नोऽनुयोगः पृच्छा च " इत्यमरः । स गुरुः स्वन्तं (सुखेन अन्तः यस्य तत्) शुभोदर्कं भावीति तस्य राज्ञो व्यथामलघयल्लघूकृतवान् ।

(६३.) सपद्युत्थितस्तेजसो राशिर्वाहिनीमुखे सेनाग्रे प्रादुरास किल (आविर्बभूव) खलु [किलेति अरुचौ आगमे वा–चा०] । यः सैनिकैर्नयनानि प्रमृज्य चिराल्लक्षणीया भावनीया पुरुषाकृतिर्यस्य स तथोक्तः । अभूदिति शेषः ।

(६४.) उपवीतं (यज्ञसूत्रं) लक्षणं चिह्नं यस्य तम् । पितुरयं पित्र्यः । " वाय्वृतुपित्रुषसो यत् " इति यत्प्रत्ययः । तमंशम् । धनुषोर्जितं धनुरूर्जितम् । मातुरयं मातृकः । " ऋतष्ठञ् " इति ठञ्प्रत्ययः । तमंशं च दधद्यो भार्गवः । ससोमश्चन्द्रयुक्तो घर्मदीधितिः सूर्य इव । सद्विजिह्वः ससर्पश्चन्दनद्रुम इव । स्थितः [सूर्योपमया तेजस्विता । सोमोपमया उपवीतेन च प्रसन्नत्वं सर्पोपमया धनुषो भीषणत्वं चन्दनोपमया द्विजस्य तरुवच्छान्तिः–हे०] ।

(६५.) रोषपरुषः (कोपनिष्ठुरः) आत्मा बुद्धिः [स्वभावः–हे०] यस्य सः । "आत्मा जीवो धृतिर्बुद्धिः " इत्यमरः । तस्य रोषपरुषात्मनः स्थितिभिदोऽपि मर्यादालंघिनोऽपि

(63.) It is said that a heap (or mass) of splendour arose and appeared in front of the army all on a sudden ; which after a long time became visible in a human form to the soldiers when they had rubbed their eyes (lit. they having rubbed their eyes).

(64.) Bearing a father's portion characterised by an Upavîta (sacred thread) and also his mother's portion powerful on account of the bow, he appeared like the sun (hot-rayed) united with the moon or like a sandal tree with a two-tongued-animal (a snake) on it.

(65.) By whom acting up to the command of his father (lit. abiding by the command of his father), whose mind had become stern on account of rage, and who violated the limits of propriety of conduct, first was subdued the feeling of kindness (aversion for sinful deeds) in cutting off the head of his trembling mother and then the Earth (i. e. after the earth was brought under his sway).

अक्षबीजवलयेन निर्बभौ दक्षिणश्रवणसंस्थितेन यः ।
क्षत्रियान्तकरणैकविंशतेर्व्याजपूर्वगणनामिवोद्वहन् ॥ ६६ ॥
तं पितुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितम् ।
बालसूनुरवलोक्य भार्गवं स्वां दशां च विषसाद पार्थिवः ॥ ६७ ॥
नाम राम इति तुल्यमात्मजे वर्तमानमहिते च दारुणे ।
हृदयमस्य भयदायि चाभवद्रत्नजातमिव हारसर्पयोः ॥ ६८ ॥

पितुः शासने (आज्ञायां) तस्थुषा स्थितेन वेपमानजननीशिरश्छिदा (मरणभयात् वेपमानायाः कंपमानायाः जनन्याः रेणुकायाः शिरः छिनत्ति) येन प्राग्घृणाजीयत (कारूण्येन इह हृदयं सिक्तमिवार्द्रं भवतीति तस्य तथात्वं अर्थात् कार्याकार्य विवेकशीलता घृणा । " दौर्मनस्यं घृणा प्रोक्ता घृणाच करुणामना " इत्यनेकार्थः) । ततोऽनन्तरं मह्यजीयत । मातृहन्तुः क्षत्त्रवधात्कुतो जुगुप्सेति भावः ।

(६६.) यो भार्गवो दक्षिणश्रवणे (अपसव्यकर्णे) संस्थितेन (निक्षिप्तेन) अक्षबीजवलयेनाक्षमालया क्षत्रियान्तकरणानां क्षत्रियवधानामेकविंशतेरेकविंशतिसंख्याया व्याजोऽक्षमालारूपः पूर्वो यस्यास्तां गणनामुद्वहन्निव निर्बभौ (रेजे) ।

(६७.) पितुर्जमदग्नेर्वधभवेन क्षत्रियकर्तृकवधोद्भवेन मन्युना कोपेन राजवंशानां (क्षत्रियवंशानां) निधनाय नाशार्थम् । " निधनं स्यात्कुले नाशे " इति विश्वः । दीक्षितम् । (कृतसंकल्पं) । प्रवृत्तमित्यर्थः । तं भार्गवं स्वां (वृद्धत्वलक्षणां) दशां चावलोक्य बालाः (अप्रगल्भाः) सूनवः (पुत्राः) यस्य स पार्थिवो विषसाद (विव्यथे) । स्वस्यातिदौर्बल्याच्छत्रोश्चातिक्रोधात्कांदिशीकः (किंकर्तव्यविमूढः) अभवदित्यर्थः [अयं क्रूरो दृश्यते, अहं वृद्धः, एते खलु बालाः इति खिन्नः–हे०] ।

(६८.) आत्मजे पुत्रे दारुणे घोरेऽहिते शत्रौ च तुल्यमविशेषेण वर्तमानं राम इति नाम । हारसर्पयोर्वर्तमानं रत्नजातं रत्नजातिरिव । ("जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता " इत्यमरः) । अस्य दशरथस्य हृद्यं हृदयंगमं । (" अभीष्टेऽभीप्सितं हृद्यं " इत्यमरः)। भयदायि (भयं ददाति तच्छीलं) भयंकरं चाभवत् ।

(66.) Who by reason of the rosary of Rudràksha seeds placed on his right ear (hanging from his right ear), appeared bearing, as it were, in a disguised form the number twenty one, expressive of the times of his destroying the Kshatriyas.

(67.) The King whose sons were yet of a tender age, having seen that son of Bhrigu who had taken the Dikshà (the initiatory vow of a sacrifice i. e. who was resolutely bent on &c.) for the destruction of the families of the kings in consequence of his anger created (aroused or excited) by the death (murder) of his father and having thought of his own condition (at the time), became dejected.

(68.) The name Ràma equally abiding in his own son and that formidable foe, became to him dear to heart (pleasing) and at the same time fear-inspiring, as a jewel in a necklace and that on the hood of a serpent inspire joy and fear respectively.

अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः ।
क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ॥ ६९ ॥
तेन कार्मुकनिषक्तमुष्टिना राघवो विगतभीः पुरोगतः ।
अङ्गुलीविवरचारिणं शरं कुर्वता निजगदे युयुत्सुना ॥ ७० ॥
क्षत्रजातमपकारवैरि मे तन्निहत्य बहुशः शमं गतः ।
सुप्तसर्प इव दण्डघट्टनाद्रोषितोऽस्मि तव विक्रमश्रवात् ॥ ७१ ॥

(६९.) स भार्गवः । अर्घ्यमर्घ्यमिति वादिनं (वदन्तं) नृपमनवेक्ष्य (अवगणय्य) । यतो यत्र भरताग्रजस्ततस्तत्र । " इतराभ्योऽपि दृश्यन्ते " इति सार्वविभक्तिकस्तसिः। क्षत्त्रे क्षत्त्रकुले विषये यः कोपदहनो रोषाग्निस्तस्यार्चिषं ज्वालामिव [भस्महेतुत्वात्–हे०] स्थिताम् । " ज्वालाभासोर्नपुंस्यर्चिः " इत्यमरः । उदग्रा तारका कनीनिका यस्यास्ताम् । " तारकाक्ष्णः कनीनिका " इत्यमरः । दृशं संदधे ।

(७०.) कार्मुकनिषक्तमुष्टिना (धनुर्लग्नमुष्टिना) शरमङ्गुलीविवरचारिणं कुर्वता [बाणविनिक्षेपोद्यतेन । इति धानुष्कजातिः–चा०] । योद्धुमिच्छता युयुत्सुना । तेन भार्गवेण । कर्त्रा । विगतभीर्निर्भीकः सन् । पुरोगतोऽग्रगतो राघवो निजगद उक्तः । कर्मणि लिट् ।

(७१.) क्षत्त्रजातं क्षत्त्रजातिर्मेऽपकारेण पितृवधरूपेण वैरि द्वेषि । तत्क्षत्त्रजातं बहुश एकविंशतिवारान्निहत्य शमं (शांति) गतोऽस्मि । तथापि सुप्तसर्पो दण्डघट्टनात् (यष्टिप्रहरणात् लगुडमारणाद्वा) इव तव विक्रमस्य श्रवादाकर्णनाद्रोषितो रोषं प्रापितोऽस्मि [अनेन दुःसहत्वं–हे० चा०] ।

(७२.) अन्यैः पार्थिवैः । अनमितपूर्वं पूर्वमनमितम् । सुप्सुपेति समासः ["वाहिताग्न्यादि "-हे०] । अस्य मैथिलस्य धनुस्त्वमक्ष्णोः क्षतवान् । किलेति वार्तायाम् । "वार्ता संभाव्ययोः किल " इत्यमरः । तद्धनुर्भग्नं निशम्याकर्ण्य भवतात्मनो मम वीर्यमेव शृङ्गं [वीर्येण शृंगं प्राधान्यं । " शृंगं प्राधान्यसान्वोश्च " इत्यमरः–हे०] भग्नमिव समर्थये मन्ये ।

(69.) Not minding the king who cried ' offering oh! offering ', (who ordered his servants with haste to produce अर्घ्य), he fixed his eyes which contained terrible pupils there where was the eldest brother of Bharata,—eyes that looked like a flame of that fire of anger (which burned) against Kshatriyas.

(70.) By him who desirous of fighting had placed his fist round a bow (held in his fist) and who was making an arrow enter the interval between his fingers, was addressed the descendant of Raghu who was standing before him undaunted.

(71.) " The whole race of the Kshtriyas is my enemy for the injury it has done to me. Pacified as I was having destroyed it many a time, I am incensed by the report of your exploits as a sleeping snake at being stirred with a club (or by receiving a blow from a club).

मैथिलस्य धनुरन्यपार्थिवैस्त्वं किलानमितपूर्वमक्षणोः।
तन्निशम्य भवता समर्थये वीर्यशृङ्गमिव भग्नमात्मनः ॥ ७२ ॥
अन्यदा जगति राम इत्ययं शब्द उच्चरित एव मामगात्।
व्रीडमावहति मे स संप्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि ॥ ७३ ॥
बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितं द्वौ रिपू मम मतौ समागसौ।
धेनुवत्सहरणाच्च हैहयस्त्वं च कीर्तिमपहर्तुमुद्यतः ॥ ७४ ॥

[यथा भग्नशृंगो महिषादिरकिंचित्करस्तद्वदहमपीत्यर्थः–हे० चा० आत्मनः पौरुषाभिमानं खण्डितमिव संभावयामि]।

(७३.) अन्यदान्यस्मिन्काले जगति राम इत्ययं शब्द उच्चरितः सन्मामेवागात् [अगमत्। यद्वा। उच्चारित एव मामगात्–हे०]। संप्रति त्वय्युदयोन्मुखे सति व्यस्तवृत्तिर्विपरीतवृत्तिः [विभक्तवृत्तिः–हे०]। अन्यगामीति यावत्। स शब्दो मे व्रीडमावहति लज्जां करोति [व्रीडशब्दोऽकारान्तोऽपि। "व्रीडायाश्च भवेद्व्रीड" इति शब्दभेदप्रकाशे। बाहुलकात् व्रीड इति क्षीरतरंगिण्यां। वामनोऽपि अविधौ गुरोः स्त्रियां बहुलं विवक्षा। अकारविधौ। "गुरोश्च हल" इति स्त्रियां। भवेद्व्रीड इति बहुलं विवक्षेति। तथा माघकाव्ये। "व्रीडमेति न तव प्रियं वदन्" इति–हे० व्रीडमिति वासरूपविधिना घञन्तः पुंसीति महाभाष्यकारः–चा०]।

(७४.) अचले क्रौञ्चादावप्यकुण्ठितमस्त्रं बिभ्रतो मम द्वौ समागसौ तुल्यापराधौ रिपू मतौ ["आगोऽपराधो मन्तुश्च" इत्यमरः। "मतिबुद्धि—" इति क्तः क्तस्य चेति षष्ठी–हे०] धेनोः पितृहोमधेनोर्वत्सस्य हरणाद्धेतोर्हैहयः कार्तवीर्यश्च। कीर्तिमपहर्तुमुद्यत उद्युक्तस्त्वं च [धेनुहरणमपराधमहत्वार्थं। जीवन्मातृको हि वत्सां ह्रियमाणो धेनुं प्रभुं च दुःखीकरोति–हे०]। वत्सहरणे भारतश्लोकः—"प्रमत्तश्चाश्रमात्तस्य होमधेन्वास्ततो बलात्। जहार वत्सं क्रोशन्त्या बभञ्ज च महाद्रुमान्" इति (एतदेव हेमाद्रेः) [एतेनैव परश्वधेन कार्त्तवीर्यमार्गं नेष्यामीत्यर्थः–चा०]।

(72.) It is reported that thou hast broken the bow of the Lord of Mithilà, a bow which was never before bent by other kings. Hearing this I consider that my supremacy in (lit. horn of) prowess has, as it were, been destroyed (lit. broken) by thee.

(73.) At other times the word Ràma being pronounced in the world did apply to me alone. Now that you are rising to importance the same word with its signification changed (meaning divided) puts me to shame !

(74.) To me bearing a missile unimpeded even in the mountain of Krauncha there are two enemies of equal offence, the one is the Lord of the Haihayas on account of his having carried the calf of my (father's sacred) cow and the other yourself ready to deprive me of my fame (glory).

क्षत्रियान्तकरणोऽपि विक्रमस्तेन मामवति नाजिते त्वयि।
पावकस्य महिमा स गण्यते कक्षवज्ज्वलति सागरेऽपि यः॥ ७५॥
विद्धि चात्तबलमोजसा हरेरैश्वरं धनुरभाजि यत्त्वया।
खातमूलमनिलो नदीरयैः पातयत्यपि मृदुस्तटद्रुमम्॥ ७६॥
तन्मदीयमिदमायुधं ज्यया संगमय्य सशरं विकृष्यताम्।
तिष्ठतु प्रधनमेवमप्यहं तुल्यबाहुतरसा जितस्त्वया॥ ७७॥

(७५.) तेन कारणेन। क्रियते येनासौ करणः। क्षत्रियान्तस्य करणोऽपि विक्रमः। त्वय्यजिते। मां नावति न प्रीणाति। तथा हि। पावकस्याग्नेर्महिमा स गण्यते यः कक्षवत्कक्ष इव। "तत्र तस्येव" इति सप्तम्यर्थे वतिः। सागरेऽपि ज्वलति (यावत् शौर्यशाली प्रबलक्षत्रियस्त्वं न निर्जितस्तावत्कुतो मे शौर्योत्कर्षः इत्यर्थः)।

(७६.) किंच। (ईश्वरस्य इदं) ऐश्वरं धनुर्हरेर्विष्णोरोजसा बलेनात्तबलं हृतसारं च विद्धि [पूर्वं किल विश्वकर्मणा दैत्यवधाय द्वे धनुषी कृत्वा हरिहरयोः दत्तौ तयोः स्वबलजिज्ञासया अन्योन्यं युध्यमानयोर्विष्णुना हूंकारेण शांभवं धनुर्निवीर्यं कृतं इत्यागमः। हरेः सूर्यस्य तेजसेति वा–हे०] यद्धनुस्त्वयाभाज्यभञ्जि। "भञ्जेश्च चिणि" इति विभाषया नलोपः। तथा हि। नदीरयैः (वेगैः) खातमूलमेवदारितपादं तटद्रुमं मृदुरप्यनिलः (वायुः) पातयति [न तु वातस्य सामर्थ्यं–चा०] ततः शिशुरपि रौद्रं धनुरभाङ्क्षमिति मा गर्वीरिति भावः।

(७७.) तत्तस्मान्मदीयमिदमायुधं कार्मुकं ज्यया (मौर्व्या) संगमय्य संयोज्य। "ल्यपि लघुपूर्वात्" इति णेरयादेशः। सशरं (सबाणं) यथा तथा त्वया विकृष्यताम्। प्रधनं रणस्तिष्ठतु। प्रधनं तावदास्तामित्यर्थः। "प्रधनं मारणे रणे" इति विश्वः। एवमपि मद्धनुःकर्षणेऽप्यहं तुल्यबाहुतरसा समबाहुबलेन। "तरसी बलरंहसी" इत्यमरः। त्वया जितः [युद्धं विनापि धनुराकर्षणेन मे भंगः इत्यर्थः–हे० चा०]।

(७८.) यदि वोद्गतार्चिषोद्गतत्विषा मम परशुधारया तर्जितः कातरोऽसि भीतोऽसि। वृथा ज्यानिघातेन (मौर्वीसंघट्टनेन) कठिना अङ्गुलयो यस्य स तथोक्तोऽभययाचनाञ्ज-

---

(75.) Therefore as long as you are not subdued, my prowess, even though it has brought about the destruction of the Kshatriyas, does not please me (is not conducive to my pleasure) ; for that only is accounted to be the true greatness of fire, when it can burn in the watery ocean, as in a heap of dry-grass.

(76.) Know that the bow of Is'vara that has been broken by thee, was deprived of its strength by the power of Hari ; for even a gentle breeze throws down a tree on the bank whose roots are undermined by the (forcible) currents of a river.

(77.) Therefore having fastened (lit. united) this weapon (bow) of mine by the string and having applied an arrow to it draw it ; let fighting be set aside,

कातरोऽसि यदि वोद्गतार्चिषा तर्जितः परशुधारया मम ।
ज्यानिघातकठिनाङ्गुलिर्वृथा बध्यतामभययाचनाञ्जलिः ॥ ७८ ॥
एवमुक्तवति भीमदर्शने भार्गवे स्मितविकम्पिताधरः ।
तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरम् ॥ ७९ ॥
पूर्वजन्मधनुषा समागतः सोऽतिमात्रलघुदर्शनोऽभवत् ।
केवलोऽपि सुभगो नवाम्बुदः किं पुनस्त्रिदशचापलाञ्छितः ॥ ८० ॥
तेन भूमिनिहितैककोटि तत्कार्मुकं च बलिनाधिरोपितम् ।
निष्प्रभश्च रिपुरास भूभृतां धूमशेष इव धूमकेतनः ॥ ८१ ॥

लिरभयप्रार्थनाञ्जलिर्बध्यताम् [एतेन दाशरथेः कोपोद्दीपनं–चा०]। " तौ युतावञ्जलिः पुमान् " इत्यमरः [शत्रुपराभवो ह्यायुधाभ्यां सफलं । ऊर्जस्व्याख्यालंकारः । तथा काव्यादर्शे । " ऊर्जस्वि रूढाहंकारं " इति–हे०]।

(७९.) भीमदर्शने भार्गव एवमुक्तवति सति । राघवः स्मितेन (ईषद्धसितेन) हासेन विकम्पिताधरः सन् । तद्धनुर्ग्रहणमेव समर्थमुचितमुत्तरं प्रत्यपद्यताङ्गीचकार । (धनुर्ग्रहणे-त्यर्थः) । [स्मितविकंपिताधर इत्यनेन धीरोदात्तत्वमुक्तं–चा०] ।

(८०.) पूर्वजन्मनि नारायणावतारे यद्धनुस्तेन समागतः संगतः स रामोऽतिमात्रम् [मात्रां मर्यादां अतिक्रान्तं अतिमात्रं–हे०] अत्यन्तं लघुदर्शनः (लघु मनोज्ञं दर्शनं यस्य सः । "लघु मनोज्ञे निःसारे" इति विश्वः) प्रियदर्शनोऽभवत् । तथा हि । नवाम्बुदः केवलो रिक्तोऽपि सुभगः (शोभावान्) । त्रिदशचापेनेन्द्रधनुषा लाञ्छितश्चि तः किं पुनः । सुभग एवेति भावः [नीलनीररुहः श्यामो रामस्तद्धनुषा सेन्द्रचापो मेघ इव शुशुभे इत्यर्थः–चा०] ।

(८१.) बलिना तेन रामेण भूमिनिहितैका कोटिर्यस्य तत् । कर्मणे प्रभवतीति कार्मुकं

Even if you do this I shall consider myself defeated by you (lit. I shall be defeated &c) possessed (as you shall then appear) of the strength of the arms equal to that of mine.

(78.) Or if you have lost heart (lit. become timid) being terrified by the edge of my axe which puts forth a flame of lustre, then form a cavity of your hands in request of safety and protection—the cavity of hands whose fingers have in vain been hardened by the strokes of the bow-string.

(79.) When the son of Bhrigu who was terrible (or gigantic) in appearance spoke thus, the descendant of Raghu whose lower lip was quivering in smiles, considered the very taking up of the bow the fit reply.

(80.) Coming in contact with the bow of his former birth (life) he became exceedingly charming in appearance ; if a fresh cloud is charming to the sight even when alone (or simple) how much more then when it is marked with the bow of Indra (lit. the gods) ?

(81.) The moment that bow, the one end of which was placed on the

तावुभावपि परस्परस्थितौ वर्धमानपरिहीनतेजसौ ।
पश्यति स्म जनता दिनात्यये पार्वणौ शशिदिवाकराविव ॥ ८२ ॥
तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि ।
स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसंनिभः ॥ ८३ ॥
न प्रहर्तुमलमस्मि निर्दयं विप्र इत्यभिभवत्यपि त्वयि ।
शंस किं गतिमनेन पत्रिणा हन्मि लोकमुत ते मखार्जितम् ॥ ८४ ॥

धनुश्च । " कर्मण उकञ् " इत्युकञ्प्रत्ययः । अधिरोपितम् । भूभृतां रिपुर्भार्गवश्च । धूमशेषो धूमकेतनोऽग्निरिव । निष्प्रभो निस्तेजस्क आस बभूव (निर्वापितो वह्निरिव हततेजा अभूदित्यर्थः) । आसेति तिङन्तप्रतिरूपकमव्ययं दीप्त्यर्थकस्यास्तेरूपं वा ।

(८२.) परस्परस्थितावन्योन्याभियुक्तौ [अन्योन्यसंप्रतिज्ञौ । " स्थितमूर्ध्वं विजानीयात्संप्रतिज्ञो भवेत्स्थितः " इति शाश्वतः–हे० चा०] । वर्धमानं च परिहीनं चेति द्वन्द्वः । वर्धमानपरिहीने तेजसी ययोस्तावुभौ राघवभार्गवावपि [वर्द्धमानतेजसं रामं परिहीनतेजसं भार्गवं–हे०] । दिनात्यये सायंकाले पर्वणि भवौ पार्वणौ शशिदिवाकराविव (सूर्यचन्द्रमसाविव) । जनता जनसमूहः । " ग्रामजनबन्धुसहायेभ्यस्तल् " इति तल्प्रत्ययः । पश्यति स्मापश्यत् । अत्र राघवस्य शशिना भार्गवस्य भानुनौपम्यं द्रष्टव्यम् ।

(८३.) हरसूनुसंनिभः स्कन्दसमः कृपामृदू राघवः । आत्मनि विषये स्खलितवीर्यं (हतपौरुषं) कुण्ठितशक्तिं तं भार्गवं (जामदग्न्यं) स्वं स्वकीयं संहितं (कार्मुके संयोजितं) अमोघं (सफलं) आशुगं बाणं चावेक्ष्य (दृष्ट्वा) । व्याजहार बभाषे । [कारुण्यान्मुनिं न जघानेत्यर्थः । " द्विः शरं नाभिसंधत्ते । द्विः स्थापयति नाश्रितान् । द्विर्ददाति न चार्थिभ्यो रामो द्विर्नाभिभाषते " इति । स्खलितवीर्यमित्यसभ्यं–हे०] ।

(८४.) अभिभवत्यपि त्वयि । विप्र इति हेतोः । निर्दयं (यथा तथा) प्रहर्तुमलं

---

ground, was strung by that powerful prince, the enemy of kings turned blan'k (pale) like fire remaining (or left) only in smoke.

(82.) The multitude of people looked upon them both, the lustre (colour) of one of whom was increasing while that of the other was fading away, and who were standing face to face, as if they were the sun and the moon in the evening at the time of their apposition (respectively rising and setting at the same time).

(83.) The descendant of Raghu who resembled the son of Hara (Skanda) and who was moved with compassion, having seen that son of Bh*ri*gu who had his prowess baffled against himself (Ráma) and considering his own arrow joined (to the bow) unfailing, addressed him thus.

(84.) Although you are an agressor, I cannot (lit. I am not disposed &c.) ruthlessly strike you, because you are a Bráhma*na*. Tell me then, if I am to destroy your locomotion by this arrow, or the regions which you have acquired by sacrifices.

प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनम् ।
गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा ॥ ८५ ॥
भस्मसात्कृतवतः पितृद्विषः पात्रसाच्च वसुधां ससागराम् ।
आहितो जयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया ॥ ८६ ॥
तद्गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे ।
पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपम् ॥ ८७ ॥

शक्तो नास्मि [" ब्राह्मणो न हन्तव्यः " इति श्रुतेः—हे० चा०] । किंत्वनेन पत्रिणा शरेण मे गतिं गमनं हन्मि । उत मखार्जितं (यज्ञोपार्जितं) लोकं स्वर्गं हन्मि शंस ब्रूहि।

(८५.) ऋषिर्भार्गवस्तं रामं प्रत्युवाच । किमिति । तत्त्वतः [ज्ञानात्—हे० परमार्थतः—चा० सु०] स्वरूपतस्त्वां पुरातनं पुरुषं (आदिपुरुषं) न वेद्मीति न । किंतु वेद्म्येवेत्यर्थः । किंतु गां गतस्य भुवमवतीर्णस्य तव वैष्णवं धाम तेजो दिदृक्षुणा द्रष्टुमिच्छुना मया कोपितो ह्यसि ।

(८६.) पितृद्विषः पितृवैरिणः [संकल्पेन—हे०] भस्मसात्कृतवतः कोपेन भस्मीकुर्वतः [इति वीर्योक्तिः-हे०] । " विभाषा सातिकार्त्स्न्ये " इति सातिप्रत्ययः । ससागरां वसुधां च पात्रसात् [पात्राय कश्यपाय देयं—चा०] पात्राधीनं देयं कृतवतः [परशुरामो हि कश्यपादिभ्यो वसुधां प्रादाद्बाहुजानपीपिडदिति—चा०] । " देये त्रा च " इति चकारात्सातिः । कृतकृत्यस्य मे परमेष्ठिना [परमे लोके वैकुण्ठाख्ये तिष्ठतीति तेन—हे०] परमपुरुषेण त्वयाहितः कृतो जयविपर्ययः पराजयोऽपि श्लाघ्य आशास्य एव (कीर्तनीय एव) ।

(८७.) तत्तस्मात्कारणाद्धे मतिमतां वर [इति विवेकयोग्यता—हे०] पुण्यतीर्थगमनायाप्तुमिष्टामीप्सितां (अभीष्टां) मे गतिं रक्ष पालय । किंतु खिलीकृता दुर्गमीकृतापि स्वर्गपद्धतिरभोगलोलुपं भोगनिःस्पृहं मां न पीडयिष्यति । अतस्तामेव जहीत्यर्थः [मुमुक्षोर्न स्वर्गस्य स्पृहा । जितेन्द्रियत्वान्न विषयाभिलाषता वा—हे०] ।

(85.) The sage replied to him " It is not that I do not know thee to be the Ancient Being from thy real nature (real appearance). But with a desire to see the All-pervading (i. e. All-surmounting) power of thee come down to the earth (incarnate on earth), thou art provoked by me ".

(86.) To me who have reduced to ashes the haters (enemies) of my father, and have given away the earth together with its oceans to deserving persons, even the reverse of victory (defeat) made (or given) by thee—the Supreme Being is undoubtedly fit to be desired.

(87.) Therefore Oh, you the best of the intelligent, spare my coveted (power of) locomotion for going to holy places. Me who I am free from cravings for sensual enjoyments, the course to heaven if barred (made impassible) shall not affect.

प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकम् ।
भार्गवस्य सुकृतोऽपि सोऽभवत्स्वर्गमार्गपरिघो दुरत्ययः ॥ ८८ ॥
राघवोऽपि चरणौ तपोनिधेः क्षम्यतामिति वदन्समस्पृशत् ।
निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्तये ॥ ८९ ॥
राजसत्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यदा ।
नन्वनिन्दितफलो मम त्वया निग्रहोऽप्ययमनुग्रहीकृतः ॥ ९० ॥

(८८.) राघवस्तथेति प्रत्यपद्यताङ्गीकृतवान् । प्राङ्मुख इन्द्रदिङ्मुखः सायकं विससर्ज च [इन्द्रलोकस्य पौरस्त्यत्वाच्छरस्य प्राङ्मुखप्रक्षेपः–हे० चा०] । स सायकः सुकृतोऽपि साधुकारिणोपि। करोतेः क्विप् । भार्गवस्य दुरत्ययः [दुःखेन अत्ययो नाशो दुरत्ययः–हे०] दुरतिक्रमः स्वर्गमार्गस्य परिघः [अर्गला–हे० चा० सु०] प्रातबन्धोऽभवत् ।

(८९.) राघवोऽपि क्षम्यतामिति वदंस्तपोनिधेर्भार्गवस्य चरणौ सम पृशत्प्रणनाम । तथा हि । तरस्विनां बलवतां तरसा बलेन निर्जितेषु शत्रुषु प्रणतिरेव कीर्तये। भवतीति शेषः ।

(९०.) मातुरागतं मातृकं राजसत्वं रजोगुणप्रधानत्वमवधूय (तिरस्कृत्य) पितुरागतं पित्र्यं शमं यदा गमितोऽस्मि [प्रापितोस्मि । इतः परं क्षत्रियेषु निर्वैरत्वात्–हे०] तदा त्वया ममापेक्षितत्वादनिन्दितमगर्हितं फलं स्वर्गहानिलक्षणं यस्य सोऽयं निग्रहः [पराजयोऽपि–हे०] अपकारोऽप्यनुग्रहीकृतो ननूपकारीकृतः खलु ।

(९१.) अहं साधयामि गच्छामि । देवकार्यमुपपादयिष्यतः संपादयिष्यस्तेऽविघ्नमस्तु विघ्नाभावोऽस्तु । " अव्ययं विभक्ति–" इत्यादिनार्थाभावेऽव्ययीभावः । सह लक्ष्मणेन सलक्ष्मणः । तम् । " तेन सहेति तुल्ययोगे " इति बहुव्रीहिः । लक्ष्मणाग्रजं राममिति च ऊचिवानुक्तवान् । ब्रूञः क्वसुः । ऋषिस्तिरोदधेऽन्तर्दधे । [धातूनामनेकार्थत्वात् । तथा क्षीरतरंगिण्यां । " क्रियावाचित्वमाख्यातुमेकोर्थः संप्रदर्शितः । प्रयोगतोनुगंतव्यः अनेकार्था

(88.) The descendant of Raghu complied with his request saying " Be it so " ; and with his face towards the east discharged the arrow which became to the son of Bh*r*igu, though he had done virtuous deeds, an impassable barrier to his path to heaven.

(89.) The descendant of Raghu also saying " Forgive me " touched the feet of the repository of the penance. Submission itself on the part of the powerful to enemies conquered by force, is for (leads to) glory.

(90.) Thou hast indeed made even my defeat bearing an irreproachable (virtuous) fruit, a favour to me, since thou having shaken off (from my nature) the condition of being influenced by the Rajo-gu*n*a (the principle of action and passion) inherited (by me) from my mother, hast brought me to peacefulness, the proper quality of my paternal descent.

साधयाम्यहमविघ्नमस्तु ते देवकार्यमुपपादयिष्यतः ।
ऊचिवानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे ॥ ९१ ॥

तस्मिन्गते विजयिनं परिरभ्य रामं
स्नेहादमन्यत पिता पुनरेव जातम् ।
तस्याभवत्क्षणशुचः परितोषलाभः
कक्षाग्निलङ्घिततरोरिव वृष्टिपातः ॥ ९२ ॥

हि धातवः " इति । प्रयोगश्च अनर्घ्यराघवे । " वामदेवः । भगवन् कौशिक साधय । शिवाः सन्तु पन्थानो वत्सयोः रामलक्ष्मणयोः " । तट्टीकायां साधय गच्छेत्यर्थः । गच्छेतिपदं परित्यज्य साधयेत्युक्तं । तत्पुरुषवादितां परिहर्तुं इति । नैषधे च । " अयि साधय साधयेप्सितं । स्मरणीयाः समये वयं वयः । तव वर्त्मनि वर्ततां शिवं । पुनरस्तु त्वरितं समागमः " इति । राधसाधसंसिद्धौ । यद्वा । षिधुसंराद्धौ । पुण्यतीर्थगमनार्थत्वात् । " साध्यतेरपारलौकिके " इत्यत्रात्त । संसिद्धिः फलनिष्पत्तिः । यद्वा । बाढमाचष्टे । साधयति तदाचष्ट इति णिच् । णाविष्टवत् प्रातिपदिकस्येष्टवद्भावे अन्तिकबाढयोर्नेदं साधाविति साध्यादेशः । " गाढबाढदृढानि च "–हे०] ।

(९२.) तस्मिन्भार्गवे गते सति । विजयिनं रामं पिता स्नेहात्परिरभ्यालिङ्ग्य पुनर्जातं (भूयोपि प्राप्तजन्मानं) एवामन्यत (अमंस्त) । क्षणं शुग्यस्येति विग्रहः । क्षणशुचस्तस्य दशरथस्य परितोपलाभः संतोपप्राप्तिः । कक्षाग्निना दावानलेन । " कक्षः शुष्ककाननवीरुधोः " इति विश्वः । लङ्घितस्याभिहतस्य तरोः (पादपस्य) वृष्टिपातः (वर्षापातः) इव । अभवत् ।

(९३.) अथ । ईषदसमाप्तः शर्वः शर्वकल्पः (शंभुतुल्यः) । " ईषदसमाप्तौ–" इति कल्पप्प्रत्ययः । अवनिपालः (दशरथः) कृताः (रचिताः) रम्याः (मनोहराः) नवा उपकार्याः (पटालयाः) यस्मिन्स तस्मिन्पथि कतिचिच्छर्वरी रात्रीर्गमयित्वा (अतिक्रमय्य) मैथिलीदर्शिनीनां (मैथिलीं सीतां पश्यन्तीति मैथिलीदर्शिन्यस्तासां) अङ्गनानां लोचनैः

(91.) "I am going ; may there be no impediment to thee who art to bring about the business of the gods ", so saying to the elder brother of Lakshmana and (i. e. as also) to Lakshmana, the sage disappeared (vanished from the sight.)

(92.) After his departure the father having embraced the victorious Râma, thought through affection that he was surely born again. To him who for a moment had to suffer grief the acquisition of satisfaction became like a shower of rain to a tree injured by the wild fire.

अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये
कतिचिदवनिपालः शर्वरीः शर्वकल्पः ।
पुरमविशदयोध्यां मैथिलीदर्शिनीनां
कुवलयितगवाक्षां लोचनैरङ्गनानाम् ॥ ९३ ॥

कुवलयानि (इन्दीवराणि) येषां संजातानि कुवलयिता । "तदस्य संजातं तारकादिभ्य इतच्" इतीतच्प्रत्ययः । कुवलयिता गवाक्षा यस्यास्तां पुरमयोध्यामविशत्प्रविष्टवान् ।
इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये सीताविवाहवर्णनो नामैकादशः सर्गः ।

द्वादशः सर्गः ।

निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान् ।
आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि ॥ १ ॥

वन्दामहे महोद्दण्डदोर्दण्डौ रघुनन्दनौ ।
तेजोनिर्जितमार्तण्डमण्डलौ लोकनन्दनौ ॥

(१.) स्नेहयन्ति प्रीणयन्ति पुरुषमिति स्नेहाः । पचाद्यच् । स्निह्यन्ति पुरुषा येष्विति वा स्नेहाः । अधिकरणार्थे घञ् । विषयाः शब्दादयस्त एव स्नेहा निर्विष्टा भुक्ता विषयस्नेहा येन स तथोक्तः [निर्विष्टः उपभुक्तः विषयाणां रूपरसादीनां स्नेहः प्रीतिर्येन—हे० निर्विष्टः उपभुक्तः विषयेषु प्रमदादिषु स्नेहः प्रेमरसो येन—चा० सु०] । "निर्वेशो भृतिभोगयोः" इति विश्वः । दशा जीवनावस्था तस्या अन्तं वार्द्धकमुपेयिवान्स दशरथः । उषसि (प्रातःकाले) प्रदीपार्चिरिव दीपज्वालेव । आसन्नं निर्वाणं मोक्षो यस्य स तथोक्तः आसीत् ।

(93.) Then the Lord of the Earth who resembled S'iva, having passed some nights on the way in which beautiful tents were pitched, entered the city of Ayodhyā where the windows (of the mansions) were full of lotuses on account (or in the form) of the eyes of the women beholding (or viewing) the daughter of Mithila-king.

(1.) He (Das'aratha) who had enjoyed the pleasures (arising from the objects) of senses (i. e. worldly pleasures), who had reached (almost) the end of life with his emancipation (release from life) drawing near, was like the flame of a lamp at dawn when, having consumed the oil in the lamp and approached the end of the wick has its extinction near,

तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति ।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा ॥ २ ॥
सा पौरान्पौरकान्तस्य रामस्याभ्युदयश्रुतिः ।
प्रत्येकं ह्लादयांचक्रे कुल्येवोद्यानपादपान् ॥ ३ ॥
तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया ।
दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः ॥ ४ ॥

अर्चिःपक्षे तु विषयो देश आश्रयः । भाजनमिति यावत् । " विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि च " इति विश्वः । स्नेहस्तैलादिः । " स्नेहस्तैलादिकरसे द्रवे स्यात्सौहृदेऽपि च " इति विश्वः । दशा वर्तिका । " दशा वर्ताववस्थायाम् " इति विश्वः । निर्वाणं विनाशः । " निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने " इति यादवः [तथा प्रदीपपक्षे । यथा निर्विष्टः पीतः विषयस्नेहः दीपभाजनतैलं येन स तादृशः दशान्तं वर्तेः प्रान्तं शिरोभागं वा प्राप्तः प्रदीपः आसन्ननिर्वाणः मोक्षोन्मुखो भवति तथा सोपि जातः इति योजनीयं—हे० चा० सु०] । [श्लिष्टोपमालंकारः—चा० सु०] ।

(२.) जरा कैकेयीशङ्कयेव पलितस्य केशादिशौक्ल्यस्य छद्मना मिषेण । " पलितं जरसा शौक्ल्यं केशादौ " इत्यमरः । कर्णमूलं कर्णोपकण्ठमागत्य (हे राजन् त्वया) रामे श्रीः राज्यलक्ष्मीर्न्यस्यतां निधीयतामिति तमाह [इत्यन्वयं—हे०] । दशरथो वृद्धोऽहमिति विचार्य रामस्य यौवराज्याभिषेकं चकाङ्क्षेत्यर्थः ।

(३.) सा पौरकान्तस्य (पौराणां लोकानां कान्तः मनोहरः तस्य लोकाभिरामस्य) रामस्याभ्युदयश्रुतिरभिषेकवार्ता [राज्यप्राप्तिः—हे०] । कुल्या कृत्रिमा सरित् । " कुल्याल्पा कृत्रिमा सरित् " इत्यमरः । उद्यानपादपानिव । पौरान्प्रत्येकं ह्लादयांचक्रे (आनन्दयामास) ।

(४.) क्रूरनिश्चया [रामं वनं प्रति निष्कासयामीति क्रूरनिश्चया—हे०] कैकेयी तस्य रामस्य कल्पितं संभृतमभिषेकस्य संभारमुपकरणं [साधनं हे० । पट्टशासनादिकं—चा०] शोकोष्णैः पार्थिवाश्रुभिर्दूषयामास । स्वदुःखमूलेन राजशोकेन प्रतिबबन्धेत्यर्थः ।

(2.) To him as if (prompted) by the fear of Kaikeyî, Old Age under the pretext of grey hairs, coming close to the root of his ears whispered, " Place the Royal Fortune (insignia or sovereignty) upon Râma ".

(3.) That report of the installation (coronation or rise) of Râma, who was the darling of the citizens, gladdened every one of them, as an artificial river blooms (all) the trees in a garden.

(4.) Kaikeyî of cruel resolve defiled the preparation made for his enthronement with the tears of the King, hot (scorching) on account of grief.

सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ ।
उद्ववामेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ ॥ ५ ॥
तयोश्चतुर्दशैकेन रामं प्राव्राजयत्समाः ।
द्वितीयेन सुतस्यैच्छद्वैधव्यैकफलां श्रियम् ॥ ६ ॥
पित्रा दत्तां रुदन्रामः प्राङ्महीं प्रत्यपद्यत ।
पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ॥ ७ ॥

(५.) चण्डयतिकोपना । " चण्डस्त्वत्यन्तकोपनः " इत्यमरः । सा किल भर्त्राश्वासितानुनीता सती तेन भर्त्रा संश्रुतौ प्रतिज्ञातौ वरौ । इन्द्रेण [मेघेन । " इन्द्रः फणिज्जके सान्द्रे घनकामनयोर्मदे " इति विश्वः–हे०] । सिक्ताभिवृष्टा भूर्बिले वल्मीकादौ मग्नावुरगाविव । उद्ववामोज्जगार [क्रूरत्वात्सर्पोपमा–हे० । रामचन्द्रवननिवासराज्यभ्रंशरूपत्वादृयोरुरगवत्क्रूरत्वं–चा०] ।

(६.) सा तयोर्वरयोर्मध्य एकेन वरेण रामं चतुर्दश समाः संवत्सरान् । अत्यंतसंयोगे द्वितीया । प्राव्राजयत्प्रावासयत् । द्वितीयेन वरेण सुतस्य भरतस्य वैधव्यैकफलां (वैधव्यमेव एकं फलं यस्यास्तां) स्ववैधव्यमात्रफलाम् [अनेन रामविरहे भर्तृमरणं सूच्यते–चा०] । न तूपभोगफलामिति भावः । श्रियमैच्छदियेष [रामवियोगेन भर्तृमरणाद्भरतेन राज्यकरणाद्वैधव्यैकफलां–हे०] । [श्लोकद्वयेन रामस्य महायशस्त्वमाह–हे० चा०] ।

(७.) रामः प्राक्पित्रा दत्तां महीं [ताते जीवत्यहं कथं प्रभुरिति–हे०] रुदन्प्रत्यपद्यताङ्गीचकार। स्वत्यागदुःखादिति भावः । पश्चाद्वनाय [गत्यर्थकर्मणीति चतुर्थी–हे०] गच्छेत्येवंरूपां तदाज्ञां पित्राज्ञां [तातस्तु सत्यसंधः इति–हे० चा०] मुदितोऽग्रहीत् [पितुर्निदेशाद्वा मुदितः–हे० चा०] । पित्राज्ञाकरणलाभादिति भावः ।

(८.) मङ्गलक्षौमे (मंगले च ते क्षौमे दुकूले च) दधतो वल्कले वसानस्याच्छादयतश्च तस्य रामस्य सममेकविधं मुखरागं मुखवर्णं जना विस्मिताः (साश्चर्याः) । ददृशुः

(5.) (She) the angry woman being kindly requested (to say what she had to say) by her husband, vomitted (i. e. demanded the fulfilment of) the two boons that had been (formerly) promised (to her) by him, as the ground showered upon by rain (Indra) throws out a pair of snakes lurking within its holes.

(6.) By one of them (i. e. of the boons) she caused Ráma to be sent into exile for fourteen years and by the other she desired the Royal Fortune (crown) for her son—the Fortune the sole result of (obtaining) which was her widow-hood (which was to result in her widow-hood).

(7.) Ráma at first with tears took charge of the Earth, offered to him by his father, (but) afterwards accepted his behest " Repair to the forest, " with great delight.

दधतो मङ्गलक्षौमे वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥ ८ ॥
स सीतालक्ष्मणसखः सत्याद्गुरुमलोपयन् ।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनः ॥ ९ ॥
राजापि तद्वियोगार्तः स्मृत्वा शापं स्वकर्मजम् ।
शरीरत्यागमात्रेण शुद्धिलाभममन्यत ॥ १० ॥
विप्रोषितकुमारं तद्राज्यमस्तमितेश्वरम् ।
रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥ ११ ॥

[समत्वाद्विस्मितत्वं–हे०] । सुखदुःखयोरविकृत इति भावः [" तत्र प्रभावाद्वाकारः क्रोध-हर्षभयादयः । भावस्थानोपलक्ष्यन्ते । तद्गांभीर्यमुदाहृतम् " इति काव्यादर्शे–हे०] ।

(९.) स रामो गुरुं पितरं सत्याद्वरदानरूपादलोपयन्नभ्रंशयन् । सीतालक्ष्मणयोः सखेति विग्रहः । ताभ्यां सहितः सन्दण्डकारण्यं [दण्डकावनं । दण्डका नाम भार्गवकन्या तयोपलक्षितं वनं–हे०] विवेश । सतां मनश्च प्रत्येकं विवेश । पितृभक्त्या सर्वे मनः संतुष्टा इति भावः [पितृवाक्याद्राज्यपरित्यागात् वनगमनाच्च सतां संतोषः–चा०] ।

(१०.) तद्वियोगार्तः (तस्य रामस्य वियोगेन विरहेणार्तः पीडितः) पुत्रवियोगदुःखितो राजापि स्वकर्मणा मुनिपुत्रवधरूपेण जातः स्वकर्मजस्तं शापं पुत्रशोकज मरणात्मकं स्मृत्वा शरीरत्यागमात्रेण देहत्यागेनैव शुद्धिलाभं प्रायश्चित्तममन्यत । मृत इत्यर्थः (" पुत्र-व्यसनजं दुःखं यदेतन्मम सांप्रतं एवं त्वं पुत्रशोकेन राजन् कालं करिष्यसि" । "दृष्टान्तमाप्स्यति भवानपि पुत्रशोकादन्तेवयस्यहमिवेति तमुक्तवन्तं " एतौ अनुरूपार्थकौ श्लोकौ) ।

(११.) विप्रोषिता गताः कुमारा यस्मात्तत्तथोक्तम् [विशेषेण प्रोषिताः स्थानान्तरं गताः कुमाराः यत्र तत् । भरतशत्रुघ्नावपि मातुलगृहं गतौ । अत एव कुमारावपि–

(8.) The people were astonished, to observe the same tinge on his countenance at the time when he put on the two bark-garments, as was at the time when he was clad in the auspicious suit of silk.

(9.) Not causing his father to fall (stray or deviate) from his truthfulness (i. e. that of conferring boons) he accompanied by Sitá and Lakshmana, entered the Dandaká Forest (and at the same time) the heart of every good man.

(10.) The King also afflicted by the (grief) of separation from him (his son), and having recollected the curse brought on by his own deed, thought the acquisition of atonement (for the curse) to be had only by the abandonment of his (own) body (or thought that atonement could be obtained by death alone).

(11.) That kingdom, from which the princes were banished (or absent) and the Lord of which was dead, became a prey (fell a victim) to the enemies who are vigilant in seeking openings (i. e. vulnerable points).

अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम्।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥ १२ ॥
श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः।
मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत्पराङ्मुखः ॥ १३ ॥
ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः।
तस्य पश्यन्ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥ १४ ॥

हे०]। अस्तमितो मृत ईश्वरो राजा यस्य तत्तथोक्तं तद्राज्यं रन्ध्रान्वेषणदक्षाणां [रन्ध्राणां दशरथमहीयसः शेषादीनां अन्वेषणे दक्षाणां पटूनां-चा० रन्ध्रान्वेषणे छिद्रावलोकने दक्षाः तत्पराः ये तेषां तथोक्तानां-सु० । " रन्ध्रं तु दूषणे छिद्रे " इति मेदिनी]। द्विषाम् (शत्रूणां) आमिषतां भोग्यवस्तुतां [अभिलषणीयतां-हे० ग्राह्यत्वं-चा० सु०] ययौ। " आमिषं भोग्यवस्तुनि " इति केशवः।

(१२.) अथानाथाः प्रकृतयोऽमात्याः [प्रजाः पौरश्रेणयो वा-हे०] ।"प्रकृतिः सहजे योनावमात्ये परमात्मनि " इति विश्वः। मातृबन्धुषु निवासिनं भरतं स्तम्भिताश्रुभिः [स्तंभितानि प्रतिरुद्धानि अश्रूणि बाष्पोद्गतानि यैस्तथोक्तैः। " यथावृत्तं ज्ञात्वैव भरतोपि प्राणिष्यति " इति स्तंभिताश्रुभिः-हे०] । पितृमरणगुप्त्यर्थमिति भावः। (मूले भवैः) मौलैः [कुलक्रमागतैः-चा०] आप्तैः सचिवैरानाययामासुरागमयांचक्रुः। ("नीवह्योर्न " इति निषेधात् न द्विकर्मता। अतो मौलैरिति तृतीया)।

(१३.) कैकेयीतनयो भरतः पितुस्तथाविधं। [रामवियोगादित्यर्थः-हे०]। स्वमातृमूलं मृत्युं मरणं श्रुत्वा स्वस्या मातुः केवलं मातुरेव पराङ्मुखो न। किंतु श्रियोऽपि (राज्यलक्ष्म्या अपि) पराङ्मुख आसीत् (अभूत्)।

(१४.) ससैन्यो भरतो राममन्वगाच्च। किं कुर्वन्। आश्रमालयैर्वनवासिभिः (मुनिभिः) दर्शितानेते रामनिवासा इति कथितान्ससौमित्रेर्लक्ष्मणसहितस्य तस्य रामस्य वसतिद्रुमान्निवासवृक्षान्पश्यन्नुदश्रु (उद्गतबाष्पः) रुदन् [उदश्रुत्वं दुःखासहत्वात्-हे०]।

(12.) Then the lordless (helpless) subjects caused Bharata who was then living with his mother's relatives, to be brought by the hereditary ministers who had checked their tears.

(13.) Having heard of his father's death (brought on) in that manner the son of Kaikeyi became averse (lit. turned his face away from) not only to his mother but also to the Royal Fortune (i. e. Kingdom).

(14) And with an army he followed (or went in search of) Râma viewing with tears the trees beneath which he had lived with Lakshmana and which were pointed out to him by the dwellers of hermitages.

चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः ।
लक्ष्म्या निमन्त्रयांचक्रे तमनुच्छिष्टसंपदा ॥ १५ ॥
स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे ।
परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः ॥ १६ ॥
तमशक्यमपाक्रष्टुं निदेशात्स्वर्गिणः पितुः ।
ययाचे पादुके पश्चात्कर्तुं राज्याधिदेवते ॥ १७ ॥

(१५.) चित्रकूटवनस्थं (चित्रकूटनाम्नो गिरेर्वने स्थितं) तं रामं च गुरोः पितुः (जनकस्य) कथितस्वर्गतिः (कथिता निवेदिता स्वर्गतिः स्वर्गमनं येन स तथोक्तः) । कथितपितृमरणः सन्नित्यर्थः । अनुच्छिष्टाननुभूताशिष्टा (अनुपभुक्ता) संपद्गुणोत्कर्षो यस्याः सा। " संपद्भूतौ गुणोत्कर्षे " इति केशवः । तया लक्ष्म्या करणेन निमन्त्रयांचक्रे आहूतवान् [राज्यमनुभवेत्याजुहावेत्यर्थः–हे०] ।

(१६.) स हि भरतः प्रथमजेऽग्रजे तस्मिन्रामेऽकृतश्रीपरिग्रहे (अकृतः श्रियो राजलक्ष्म्याः परिग्रहः स्वीकारो येन तादृशे) सति स्वयं भुवः स्वीकरणादात्मानं परिवेत्तारं मेने [" दाराग्निहोत्रसंस्कारं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः" । "परिवेत्ता परिवित्तिश्च तावुभौ पंक्तिगर्हितौ । हव्यं देवा न गृह्णन्ति कव्यं नैव पितामहाः" इति । स्मृतिश्च । "परिवेत्ता भवेद्ब्राह्मो विद्वाद्भिर्गदितः सदा" इति । संस्कारो राज्यपरिग्रहः संस्कारः–हे० राज्यश्रीर्वै वधूस्थानमित्याशयेन परिवेत्तृत्वमित्युक्तं । अतोनुपहृतराज्ये तं वरयामासेत्यर्थः–चा० अकृतदाराग्न्याधानस्य ज्येष्ठस्य पूर्वं कृतदाराग्न्याधानः कनिष्ठः । " ज्येष्ठे अनिर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिविण्णो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्ता याजकः ते सर्वे पतिताः " इति हारितः] । " परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात् " इत्यमरः । भूपरिग्रहोऽपि दारपरिग्रहसम इति भावः ।

(१७.) स्वर्गिणः [स्वर्गगतस्य । इति इदानीमाज्ञांतरासंभव उक्तः–हे० अनेन जीव-

(15.) And having acquainted him (Ràma) who was residing in the forest of the Chitrakúta, with his father's departure to heaven (death), he invited him (to return to his kingdom) on account of the Goddess of the royal fortune having her essence (youthful bloom or virginity) not (as yet) enjoyed by him.

(16.) For, he considered himself a Parivettá (one who commits the sin of marrying before his elder brother's choosing a wife) on account of his accepting the Earth (i. e. kingdom) when his elder brother had not accepted (lit. made the acceptance of) the Royal Fortune.

(17.) Of him (Ràma) who could not be made to swerve from the command of his father (now) an inhabitant of heaven, he afterwards begged for his pair of wooden slippers in order to make them the presiding deities of the kingdom during his (Ràma's) absence (lit. after him).

स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पुरीम्।
नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक्॥ १८॥
दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः।
मातुः पापस्य भरतः प्रायश्चित्तमिवाकरोत्॥ १९॥

तस्तातस्य न केवलं दाक्षिण्यवशतो राज्यानभिलाषः किन्त्वात्मनो महाशयत्वं द्योत्यते—चा०] पितुर्निदेशात् (शासनात्) अपाक्रष्टुं निवर्तयितुमशक्यं तं रामं पश्चाद्राज्याधिदेवते स्वामिन्यौ कर्तुं पादुके ययाचे (द्विकर्मकः)।

(१८.) स भरतो भ्रात्रा रामेण तथेत्युक्त्वा विसृष्टः सन् (प्रेषितः सन्) पुरीमयोध्यां नाविशदेव। किंतु नन्दिग्रामगतः संस्तस्य रामस्य राज्यं न्यासमिव निक्षेपमिवाभुनगपालयत्। न तूपभुक्तवानित्यर्थः। अन्यथा " भुजोऽनवने " इत्यात्मनेपदप्रसङ्गात्। भुजेर्लङ्।

(१९.) ज्येष्ठे दृढभक्ती राज्यतृष्णापराङ्मुखो भरत इति पूर्वोक्तानुष्ठानेन मातुः पापस्य प्रायश्चित्तं तदपनोदकं कर्माकरोदिव [प्रायश्चितमिति पारस्करादित्वात्साधुः। " प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपोनिश्चयसंयोगात् प्रायश्चित्तमितीर्यते" इत्यंगिराः—हे०]। इत्युत्प्रेक्षा। दृढभक्तिरित्यत्र दृढशब्दस्य " स्त्रियाः पुंवत् " इत्यादिना पुंवद्भावो दुर्घटः। " अप्रियादिषु " इति निषेधात्। भक्तिशब्दस्य प्रियादिषु पाठात्। अतो दृढं भक्तिरस्येति नपुंसकपूर्वपदो बहुव्रीहिरिति गणव्याख्याने दृढभक्तिरित्येवमादिषु पूर्वपदस्य नपुंसकत्वस्य विवक्षितत्वात्सिद्धिमिति समाधेयम्। वृत्तिकारश्च—दीर्घनिवृत्तिमात्रपरो दृढभक्तिशब्दो लिङ्गविशेषस्यानुपकारत्वात्स्त्रीत्वमविवक्षितमेव। तस्मादस्त्रीलिङ्गत्वाद्दृढभक्तिशब्दस्यायं प्रयोगइत्यभिप्रायः। न्यासकारोऽप्येवं। भोजराजस्तु—कर्मसाधनस्यैवभक्तिशब्दस्य प्रियादिपाठाद्भवानीभक्तिरित्यादौ कर्मसाधनत्वात्पुंवद्भावप्रतिषेधः। दृढभक्तिरित्यादौ भावसाधनत्वात्पुंवद्भावसिद्धिः पूर्वपदस्येत्याह। [भक्तिशब्दस्य प्रियादिपाठात् पुंवद्भावाप्राप्तौ भज्यते इति भक्तिरिति कर्मसाधने एव भक्तिशब्दे पुंवद्भावनिषेधः। भजनं भक्तिरिति भावसाधने तु भवत्येव। तथा सरस्वतीकंण्ठाभरणे भोजः। " भक्तौ तु कर्मसाधनायां " इति। तथा काशिकायाश्च दृढभक्तिरित्यादिषु स्त्रीपूर्वपदस्याविवक्षितत्वात्सिद्धमितिसमाधेयमिति। प्रक्रियाकौमुद्यां च। भजनादेर्दार्ढ्यमात्रं विवक्षितं न स्त्रीत्वमिति—हे०। दृढभक्तिरिति " पुंवत्कर्मधारयजातीयदेशीयेषु " इति पुंवद्भावः। दृढा भक्तिर्यस्येति बहुव्रीहौ तु

(18.) Dismissed by his brother with the words " Be it so " he did not at all enter the city, but living at Nandigràma, he protected the kingdom, as if it were, a deposit of his brother (lodged with him).

(19.) Firm in devotion to his elder brother and averse to the desire for (lit. thirst for) the kingdom, Bharata made an atonement, as it were, for the sin of his mother.

रामोऽपि सह वैदेह्या वने वन्येन वर्तयन्।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ॥ २० ॥
प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिम्।
कदाचिदङ्के सीतायाः शिश्ये किंचिदिव श्रमात् ॥ २१ ॥
ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः।
प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥ २२ ॥

भक्तिशब्दस्य प्रियादिपाठात्पुंवद्भावाभावश्चिन्त्यः। भज्यते इति भक्तिरिति कर्मसाधनोयमिति पुंवद्भावः इत्यपरे—चा०]।

(२०.) सानुजः (सलक्ष्मणः) शान्तः (शमप्रधानः) रामोऽपि वैदेह्या सह वने वन्येन वनभवेन कन्दमूलादिना वर्तयन्वृत्तिं कुर्वञ्जीवन् [तथा किरातार्जुनीये।" मदसिक्तमुखैर्मृगाधिपः। करिभिर्वर्तयते स्वयं हतैः "—हे०] वृद्धेक्ष्वाकूणां व्रतं वनवासात्मकं युवा यौवनस्थ एव चचार (तथा हि। "पुत्रसंक्रान्तलक्ष्मीकैर्यद्वृद्धेक्ष्वाकुभिर्धृतं। धृतं बाल्ये तदार्येण पुण्यमारण्यकं व्रतं"। "मुनिवनतरुच्छायां देव्या तया सहशिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतं"। "गुणवत्सुतरोपितःश्रियः परिणामे हि दिलीपवंशजाः। पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे"। एतच्छ्लोकत्रयरूपार्थकः श्लोकांशः)।

(२१.) स रामः कदाचित्प्रभावेण स्वमहिम्ना स्तम्भिता स्थिरीकृता छाया यस्य तं वनस्पतिमाश्रितः सन् [वनस्पतिः। पारस्करादित्वात्सुट्। " वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः" इत्यमरः। यद्यपि वृक्षवनस्पत्योर्भेदः तथापि " विभाषौषधिवनस्पतिभ्यः " इत्यत्र भेदेन प्रग्रहणं द्रष्टव्यं इति काशिकावृत्तौ उक्तत्वात् वृक्षमात्रेऽपि भवति। "वनस्पतिर्वृक्षमात्रे विना पुष्पफलद्रुमे" इति विश्वः—हे०]। किंचिदीषच्छ्रमादिव सीताया अङ्के (उत्सङ्गे। "उत्सङ्गचिह्नयोरङ्कः" इत्यमरः)। शिश्ये सुष्वाप।

(२२.) ऐन्द्रिरिन्द्रस्य पुत्रो द्विजः पक्षी काकः [ऐन्द्रिकाकः। " ऐन्द्रिः काकजयन्तयोः " इति विश्वः—हे०]। तस्याः सीतायाः स्तनौ। प्रियस्य रामस्योपभोगचिह्नेषु।

(20.) Râma also who was peaceful (by nature) living in the forest on wild produce (i. e. fruits, roots &c.) with his brother and the princess of the Videhas, observed, though he was young, the vow that had been practised by the descendants of Ikshváku in their old age.

(21.) Once stopping under a tree whose shade was made steady by his (supernatural) power, he slept (resting his head) on the lap of Sítá through some slight fatigue.

(22.) (When), it is said, a crow, the son of Indra, tore with his nails her breasts exhibiting, as it were, his fault-finding with regard to the marks of enjoyment made by her husband.

तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः।
भ्रान्तश्च मुमुचे तस्मादेकनेत्रव्ययेन सः ॥ २३ ॥
रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः।
आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ ॥ २४ ॥

तत्कृतनखक्षतेष्वित्यर्थः। पुरोभागिनो दोषैकदर्शिनः कर्म पौरोभाग्यम्। "दोषैकदृक्पुरोभागी" इत्यमरः। दुःश्लिष्टदोषघातमाचरन्कुर्वन्निव। नखैर्विददार विलिलेख। किलेत्यैतिह्ये [प्रियस्य रामस्य उपभोगचिन्हेषु नखक्षतेषु अपर्याप्तिरूपं दोषं दृष्ट्वा तत्परिहारं कर्तुकाम इव। नखक्षतादि दर्शनात् अस्याल्पविदारणं वा। वनवासे नखक्षतादेरसंभवात् उत्प्रेक्षाप्ययुक्तेति। केचित्तदेतच्छ्लोकद्वयस्थाने अमुं श्लोकं पठन्ति। "मृगमांसं ततः सीताम् रक्षन्तीमातपे शठः। पक्षतुण्डनखाघातैर्बबाधे वायसो बलात्"। रामायणे हि। "शरनिहतमृगमांसमातपे शोषयन्तीं" सा वीर्यमाणेन काकेन पश्यत्यपि पत्यौ उपद्रुतेत्युक्तम्—हे०। सीतायाः स्तनयो रामेण दत्तानि नखपदानि तथा न सन्तीतिदोषैकदर्शित्वं परिजिहीर्षुरिव स्तनौ विदारितवानिति भावः—चा० सु०]।

(२३.) रामया सीतयावबोधितो रामस्तस्मिन्काके इषीकास्त्रं काशास्त्रम् "इषीका काशमुच्यते" इति हलायुधः। आस्थदस्यति स्म। "असु क्षेपणे" इति धातोर्लुङ्। अस्यतिवक्तिख्यातिभ्योऽङ् " इत्यङ्प्रत्ययः। "अस्यतेस्थुक्" इति थुगागमः। स काक भ्रान्तः सन् एकनेत्रस्य व्ययेन दानेन तस्मादस्त्रादात्मानं मुमुचे मुक्तवान् [स दूरतरं गत्वा भूयोप्यागत्य रामनिकटमागमदित्यागमः—हे०]। मुचेः कर्तरि लिट्। "धेनुं मुमोच" इतिवत्प्रयोगः। [काकोऽस्त्रं सोढुं नाशक्नोत्। अपरिहार्यं ज्ञात्वा सर्वनाशात् वरं नेत्रनाशः इतितत्परित्यागेनास्त्रमशमयदिति प्रसिद्धिः—चा०]।

(२४.) रामस्त्वासन्नदेशत्वाद्धेतोः अयोध्यायाः नातिदूरे स्थितेर्हेतुत्वात् पुनर्भरतागमनमाशङ्क्योत्सुकसारङ्गामुत्कण्ठितहरिणां [उत्सुकमृगत्वं तु रक्षसामनागमनत्वात्—हे०] चित्रकूटस्थलीं जहौ तत्याज। आसन्नश्चासौ देशश्चेति विग्रहः।

(२५.) स रामः। अतिथिषु साधून्यातिथेयानि। "पथ्यतिथिवसतिस्वपतेर्ढञ्" इति ढञ्प्रत्ययः। तेष्वृषिकुलेष्वृष्याश्रमेषु। "कुलं कुल्ये गणे देहे गेहे जनपदेऽन्वये" इति हैमः। वर्षासु भवानि वार्षिकाणि। "वर्षाभ्यष्ठक्" इति ठक्प्रत्ययः। तेषु [पुष्पादिषु—

(23.) Ráma, awakened by his beloved, darted a reed missile at it; when the bird careering round and round protected itself from it (missile), by suffering the loss of one of its eyes (allowed one eye to be distroyed for saving its life).

(24.) While, Ráma left the region of the Chitrakûta-mountain where the deer were anxious for him and where on account of its vicinity to the capital, he feared lest Bharata might come again,

प्रययावातिथेयेषु वसन्नृषिकुलेषु सः ।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ॥ २५ ॥
बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता ।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ॥ २६ ॥
अनसूयातिसृष्टेन पुण्यगन्धेन काननम् ।
सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदम् ॥ २७ ॥
संध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥ २८ ॥

हे०] ऋक्षेषु नक्षत्रेषु राशिषु [कर्कटादिषु–हे०] वा भास्कर इव । वसन्दक्षिणां दिशं प्रययौ ।

(२६.) तं राममनुगच्छन्ती (अनुयान्ती) विदेहाधिपतेः (मैथिलस्य) सुता सीता कैकेय्या प्रतिषिद्धा निवारितापि गुणोन्मुखी गुणोच्छुका लक्ष्मी राज्यलक्ष्मीरिव बभौ (शुशुभे)।

(२७.) सा सीतानसूययात्रिभार्यया ("न गुणान् गुणिनो हन्ति स्तौति चान्यगुणानपि। न हसेच्चान्यदोषांश्च सानसूया प्रकीर्तिता " इत्युक्तलक्षणे असूयाभावे । "एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् । एतेषामेववर्णानां शुश्रूषामनसूयया " " यत्किञ्चिदपि दातव्यं याचितेनानसूयया " इति च मनुः) अतिसृष्टेन दत्तेन पुण्यगन्धेनाङ्गरागेण [अनुलेपेन । " पुण्यं मनोज्ञेऽभिहितम् " इति विश्वः–हे०] । काननं वनं [पुष्पादप्यतिसुरभित्वात्–हे०] पुष्पेभ्य उच्चलिता निर्गताः षट्पदाः (भ्रमराः) यस्मिंस्तत्तथाभूतं चकार [वनं त्यक्त्वा भ्रमराः सीतासमीपे समागताः इति भावः–सु०] ।

(२८.) संध्याभ्रकपिशः [सन्ध्याभ्रवत्कपिशः पिंगः–हे० सन्ध्याभ्रं संध्याकालीनं यदभ्रं मेघस्तद्वत्कपिशः अरुणः–चा० सु०] विराधो नाम राक्षसः । ग्रहो राहुरिन्दोरिव

(25.) Stopping in the hospitable families (or hermitages) of the *R*ishis, he proceeded towards the southern quarter, as the sun after residing in the autumnal lunar mansions (i. e. the ten asterisms) goes down to the south.

(26.) The daughter of the King of the Videhas following him, appeared as if she were (the Goddess) Royal Fortune who is fond of virtues, (following him) though prevented by Kaikeyî.

(27.) By the cosmetics (to be applied to the body) of holy fragrance which were given to her by Anasúyâ, she made the forest such as had the black bees flying towards her from the flowers.

(28.) A demon by name Virádha tawny (in colour) like the evening cloud, stood obstructing the path of Râma, as Râhu does that of the moon.

स जहार तयोर्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे ॥ २९ ॥
तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीम् ।
गन्धेनाशुचिना चेति वसुधायां निचख्नतुः ॥ ३० ॥
पञ्चवट्यां ततो रामः शासनात्कुम्भजन्मनः ।
अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव ॥ ३१ ॥

[चन्द्रावरोधकोऽन्योग्रहो न भवतीत्यर्थाद् ग्रहशब्देन राहुरेव–चा० सु०] । तस्य रामस्य मार्गमध्वानमावृत्यावरुन्ध्यातिष्ठत् ।

(२९.) लोकस्य शोषणः शोषकः [जनसंतापकारी–चा०] स राक्षसस्तयो रामलक्ष्मणयोर्मध्ये मैथिलीम् । नभोनभस्ययोः श्रावणभाद्रपदयोरन्तरे मध्ये वृष्टिमवग्रहो वर्षप्रतिबन्ध इव [अवग्रहोऽपि लोकशोषणः–हे० चा०] । जहार । "वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ " इत्यमरः ।

(३०.) ककुत्स्थस्य गोत्रापत्ये पुमांसौ काकुत्स्थौ रामलक्ष्मणौ तं विराधं विनिष्पिष्य हत्वा । अशुचिनापवित्रेण गन्धेन स्थलीमाश्रमभुवं पुरा दूषयति दूषयिष्यतीति हेतोः । "यावत्पुरानिपातयोर्लट् " इति भविष्यदर्थे लट् । वसुधायां निचख्नतुर्भूमौ खनित्वा निक्षिप्तवन्तौ च । (तथा हि रामायणे । " अवटे चापि मे राम प्रक्षिपेमं कलेवरं । रक्षसां गतसत्वानामेष धर्मः सनातनः। अवटे ये निधायन्ते तेषां लोका महोदयाः । तं समुद्यम्य सौमित्रिर्विराधं पर्वतोपमं गंभीरमवटं कृत्वा निचखान परन्तपः ।

(३१.) ततो रामः कुम्भजन्मनोऽगस्त्यस्य शासनात् । पञ्चानां वटानां समाहारः पञ्चवटी । " तद्धितार्थ–" इति तत्पुरुषः । " संख्यापूर्वो द्विगुः " इति द्विगुसंज्ञानां द्विगोरिति ङीप् । " द्विगुरेकवचनम् " इत्येकवचनम् । तस्यां पञ्चवट्याम् । विन्ध्याद्रिः प्रकृतौ वृद्धेः पूर्वावस्थायामिव । अनपोढस्थितिरनतिक्रान्तमर्यादस्तस्थौ [विन्ध्याद्रिरिव सोऽपि रामोऽगस्त्यस्य शासनात्तस्थौ–हे०] ।

(29.) He, the destroyer of the people, took off Maithilí from between them (Ráma and Lakshma*n*a), as drought destroys (takes off) rain between the months of S'rávana and Bhádrapada.

(30.) The two descendants of Kakutstha, having crushed him (to death) interred him under ground (fearing) lest the unholy smell (of his body) would defile the locality in future.

(31.) Then Ráma dwelt in Panchava*t*í by the advice (or order)of the Pitcher-born sage (Agastya), not transgressing the life of virtue, as the mountain Vindhya acting up to the command of the sage remained in his normal condition.

रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्ता व्यालीव मलयद्रुमम् ॥ ३२ ॥
सा सीतासंनिधावेव तं वव्रे कथितान्वया ।
अत्यारूढो हि नारीणामकालज्ञो मनोभवः ॥ ३३ ॥
कलत्रवानहं बाले कनीयांसं भजस्व मे ।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम् ॥ ३४ ॥

(३२.) तत्र पञ्चवट्यां मदनातुरा रावणावरजा (अनुजा) शूर्पणखा [शूर्पणखा रावणस्य सापत्नस्वसा । आरण्यकाण्डे । " पुष्पोत्कटायाः जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ । कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि । मालिनी जनयामास पुत्रमेकं बिभीषणं । शंकायां मिथुनं जज्ञे खरः शूर्पणखा तथा"–हे०] । " पूर्वपदात्संज्ञायामगः " इति णत्वम् । राघवम् । निदाघार्ता घर्मतप्ता व्याकुला व्याली भुजंगी मलयद्रुमं चन्दनद्रुममिव । अभिपेदे प्राप ।

(३३.) सा शूर्पणखा सीतासंनिधावेव कथितान्वया कथितस्ववंशा सती तं रामं वव्रे वृतवती । तथा हि । अत्यारूढोऽतिप्रवृद्धः (पराकाष्ठां गतः) नारीणां मनोभवः कामः कालज्ञोऽवसरज्ञो न भवतीत्यकालज्ञः (अनवसरज्ञः) हि'।

(३४.) वृषः पुमान् । " वृषः स्याद्वासवे धर्मे सौरभेये च शुक्रले । पुंराशिभेदयोः शृङ्ग्यां मूषकश्रेष्ठयोरपि " इति विश्वः । वृषं पुरुषमात्मार्थमिच्छतीति वृषस्यन्ती कामुकी । " वृषस्यन्ती च कामुकी " इत्यमरः । " सुप आत्मनः क्यच् " इति क्यच्प्रत्ययः । " अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि " इत्यसुगागमः । ततो लटः शत्रादेशः । " उगितश्च" इति ङीप् । श्लोकार्थस्तु–वृषस्कन्धः [अनेन सुलक्षणत्वं–हे०चा०सु०] रामो वृषस्यन्तीं तां राक्षसीं हे बाले (हे भद्रे) अहं कलत्रवान् (स्त्रीयुक्तः) मे कनीयांसं कनिष्ठं भजस्वेति शशासाज्ञापितवान् ।

(३५.) पूर्वं ज्येष्ठाभिगमनात् (समीपाभिसरणात्) तेन लक्ष्मणेनाप्यनभिनन्दिता नाङ्गीकृता भूयो रामाश्रया सा राक्षसी । उभे कूले भजतीत्युभयकूलभाक् [उभे कूले भजते इति उ-

(32.) There the younger sister of Râvana being smitten with love came up to the descendant of Raghu, as a female snake when oppressed by heat goes to a sandle tree.

(33.) She, having declared her lineage, made advances of love to (lit. choose for her husband) him even in the very presence of Sitâ ; for the lust of women when grown to excess does not take account of proper times.

(34.) " I have got a wife, young girl, do thou (therefore) choose my younger brother ": thus Râma whose shoulders resembled those of a bull, commanded that voluptuous woman (lit. one who wishes to enjoy a man).

ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनन्दिता ।
साभूद्रामाश्रया भूयो नदीवोभयकूलभाक् ॥ ३५ ॥
संरम्भं मैथिलीहासः क्षणसौम्यां निनाय ताम् ।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ॥ ३६ ॥
फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम् ।
मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतम् ॥ ३७ ॥
इत्युक्त्वा मैथिलीं भर्तुरङ्के निविशतीं भयात् ।
रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत ॥ ३८ ॥

भयकूलभाक् । एतच्चोभयपक्षविनीतनिद्रः इत्यत्र व्याख्यातं । यद्वा । उभयकूले भजेत इति–हे०] । नदीवाभूत् । सा हि यातायाताभ्यां पर्यायेण कूलद्वयगामिनी नदीसदृश्यभूदित्यर्थः ["वृद्धे ज्येष्ठः श्रेष्ठेपि । वृद्धेपि ज्येष्ठो मासान्तरेपि च" इति विश्वः । मासे तु चैत्रपौषवत् । ज्येष्ठः इति च भाव्यं । ज्येष्ठया युक्ता पौर्णमासी ज्येष्ठी । नक्षत्रेणेति युक्तः कालः इत्यण् । सा विद्यते तस्मिन् सः सास्मिन् पौर्णमासीति संज्ञायामित्यण् । "यस्येति च" । "जैष्ठ जेष्ठोऽपि दृश्येत" इति शब्दभेदप्रकाशे–हे०] ।

(३६.) [शूर्पणखाया उभयत्रापि निष्फलगमनत्वात्प्रोद्भूतः–चा०] मैथिलीहासः क्षणं सौम्यां [क्षणे स्वल्पकाले सौम्या इति सप्तमीसमासो वा–हे० चा० सु०] सौम्याकारां तां राक्षसीम् । निवातेन [वाताभावेन–हे०चा०सु०] स्तिमितां निश्चलामुदधेर्वेलामम्बुविकृतिम् । अम्बुपूरमित्यर्थः। "अब्ध्यम्बुविकृतौ वेला" इत्यमरः। चन्द्रोदय इव । संरम्भं संक्षोभं निनाय ।

(३७.) श्लोकद्वयेनान्वयः। अस्योपहासस्य फलं सद्यः संप्रत्येव प्राप्स्यसि । मां पश्य । [इति जनोक्तिः–चा०] त्वया । कर्त्र्या । कृतमुपहासरूपम् । करणम् । व्याघ्र्यां विषये मृग्याः। कर्त्र्याः। परिभव इत्यवेहि । [अथवा व्याघ्र्यांमृगीपरिभवः त्वया मृत्यवे कृतः–चा०]।

(३८.) भयाद्भर्तुरङ्के (उत्सङ्गे)निविशतीम् (निर्विशतीं) आलिङ्गन्तीं मैथिलीमित्यु-

(35.) Being not accepted even by him because of her having gone first to his elder brother, she again resorted to Ráma, like (the current of) a river touching (in turns) both of its banks.

(36.) The loud laughter of the Mithila-princess enraged her (or precipitated her into wild rage) who had assumed for a time a gentle appearance, as the rising of the moon ruffles the surface (lit the waves) of the ocean, steady (or calm) on account of there being no gale.

(37.) Mind (lit. look at me or hear what I say) thou shalt at no distant date (instantly) reap the fruit of this derision of mine. Know that what you have done is like an insult given by a doe to a tigress.

(38.) So saying to the Maithila-princess who in terror sought shelter in the lap (embrace) of her husband, S'urpanakhà resumed her (natural) form that was true to her epithet.

लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम् ।
शिवाघोरस्वनां पश्चाद्बुबुधे विकृतेति ताम् ॥ ३९॥
पर्णशालामथ क्षिप्रं विवृतासिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥ ४० ॥
सा वक्रनखधारिण्या वेणुकर्कशपर्वया ।
अङ्कुशाकारयाङ्गुल्या तावतर्जयदम्बरे ॥ ४१ ॥

क्त्वा शूर्पणखा [शूर्पाणि नखानि यस्याः सा–हे०] नाम्नः सदृशम् । शूर्पाकारनखयुक्तामित्यर्थः । रूपमाकारं प्रत्यपद्यत स्वीचकार [स्वाकारमवेशयदित्यर्थः–हे०] । अदर्शयदित्यर्थः ।

(३९.) लक्ष्मणः प्रथमं कोकिलावन्मञ्जुवादिनीं पश्चाच्छिवावद्घोरस्वनां (जम्बुकीभीषणरवां) तां शूर्पणखां श्रुत्वा [श्रुत्वा इतिप्रयोगस्तु " निधानमश्रूयत पाञ्चजन्यः " इत्यादिवत्–चा०] । तस्याः स्वनं श्रुत्वेत्यर्थः । सुस्वनः शङ्खः श्रूयत इतिवत्प्रयोगः । विकृता मायाविनीति बुबुधे बुद्धवान् [विकृता इत्यत्र निपातेन इति शब्देन कर्मणोऽभिहितत्वान्निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वात् । तथा माघकाव्ये । " क्रमादमुं नारद इत्यबोधि सः"–हे०] । कर्तरि लिट् ।

(४०.) अथ स लक्ष्मणो विवृतासिः (विवृतः विकृष्टः असिः खड्गः येन स तादृशः) कोशोद्धृतखड्गः सन्क्षिप्रं (शीघ्रं) पर्णशालां प्रविश्य । भीषयतीति भीषणाम् । नन्द्यादित्वाल्ल्युट् कर्तरि । तां राक्षसीं (कर्णनासाच्छेदात् यत् वैरूप्यं तस्य) वैरूप्यस्य पौनरुक्त्यं द्वैगुण्यं लक्षणया । तेनायोजयद्योजितवान् । स्वभावत एव विकृतां तां कर्णादिच्छेदेन पुनरतिविकृतामकरोदित्यर्थः ।

(४१.) सा वक्रनखं धारयतीति वक्रनखधारिणी । तया वेणुवत्कर्कशपर्वया [वेणोः कर्कशपर्वाणि इव पर्वाणि यस्यास्तया । डावुभाभ्यामितिडाप् । " ग्रंथिर्ना पर्वपरुषी " इत्यमरः–हे०] । अत एवाङ्कुशस्याकार इवाकारो यस्याः सा तया । अङ्गुल्या तौ राघवावम्बरे व्योम्नि स्थिता । " अम्बरं व्योम्नि वाससि " इत्यमरः । अतर्जयदभर्त्सयत् । " तर्ज भर्त्सने " इति धातोश्चौरादिकादनुदात्तेत्त्वादात्मनेपदेन भाव्यम् । तथापि चक्षिङो ङित्करणाज्ज्ञापकादनुदात्तेत्त्वनिमित्तस्यानित्यत्वात्परस्मैपदमूह्यमित्युक्तमाख्यातचन्द्रिकायाम् । तर्जयते भर्त्सयते । तर्जयतीत्यपि च दृश्यते कविष्विति ।

(39.) Lakshmana having first heard her speak as sweetly as a cuckoo, and afterwards terribly howl like a female jackal, knew her to be a deceitful spirit.

(40.) Then, he, with a drawn sword (in hand) immediately entering the leaf-hut added to her terrible form a repetition (or superfluity) of hideousness (i. e. made her more ugly than before).

(41.) (Standing) in the air (sky) she threatened them two with her finger which had a crooked nail, the joints of which were hard like those of a bamboo, and which (therefore) resembled (had the form of) a goad (or hook of an elephant-driver).

प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधम् ।
रामोपक्रममाचख्यौ रक्षःपरिभवं नवम् ॥ ४२ ॥
मुखावयवलूनां तां नैर्ऋता यत्पुरो दधुः ।
रामाभियायिनां तेषां तदेवाभूदमङ्गलम् ॥ ४३ ॥
उदायुधानापततस्तान्दृप्तान्प्रेक्ष्य राघवः ।
निदधे विजयाशंसां चापे सीतां च लक्ष्मणे ॥ ४४ ॥
एको दाशरथिः कामं यातुधानाः सहस्रशः ।
ते तु यावन्त एवाजौ तावांश्च ददृशे स तैः ॥ ४५ ॥

(४२.) साशु (शीघ्रं) जनस्थानं (खरनिवासं) प्राप्य खरादिभ्यो राक्षसेभ्यस्तथाविधं [नासिकाच्छेदरूपं–हे० चा० सु०] स्वाङ्गच्छेदात्मकम् । उपक्रम्यत इत्युपक्रमः । कर्मणि घञ्प्रत्ययः । रामस्य कर्तुरुपक्रमः । रामोपक्रमम् । रामेणादावुपक्रान्तमित्यर्थः । "उपज्ञोपक्रमं तदाद्याचिख्यासायाम्" इति क्लीबत्वम् । तन्नवं रक्षसां कर्मभूतानां परिभवमाचख्यौ च

(४३.) नैर्ऋता राक्षसाः । "नैर्ऋतो यातुरक्षसी" इत्यमरः । मुखावयवेषु कर्णादिषु लूनां छिन्नां तां पुरो दधुरग्रे चक्रुरिति यत्तदेव रामाभियायिनां राममभिद्रवतां तेषाममङ्गलमभूत् । [जिगमिषूणां लूननासिकस्य विलोकनं अपशकुनं–चा०] । (यात्रासमये निर्णसस्य दर्शनं विपरीतफलनिदर्शकं अर्थात् अपशकुनप्रायमित्यर्थः) ।

(४४.) उदायुधानुद्यतायुधानापतत आगच्छतो दृप्तान् (सगर्वान्) तान्खरादीन्प्रेक्ष्य राघवश्चापे (धनुषि) विजयस्याशंसामाशां लक्ष्मणे सीतां च निदधे । सीतारक्षणे लक्ष्मणं नियुज्य स्वयं युद्धाय संनद्ध इति भावः (एतदेव हेमाद्रिचारित्रवर्द्धनयोः) ।

(४५.) दाशरथी राम एकोऽद्वितीयः । यातुधानाः कामं (निश्चितं) सहस्रशः । सन्तीति शेषः । तैर्यातुधानैस्तु स राम आजौ (रणे) ते यातुधाना यावन्तो यावत्संख्याका

(42.) And hastily getting to Janasthána she informed Khara and others of the insult of that sort (given) to the Rákshasas, which was new (unprecedented) and which was instituted by Ràma.

(43.) That the demons posted her in the van who was mutilated in the portions of her face (nose and ears), this very thing became (by itself) an ill-omen to them as they started against Ráma.

(44.) Having seen those haughty demons who were coming against him with raised arms, the descendant of Raghu confided (lit., placed) his hope of victory to his bow and Sîtá to (the care of) Lakshmana.

(45.) Granted that the son of Das'aratha was all alone and the Rákshasas

असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम् ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः ॥ ४६ ॥
तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः ।
क्रमशस्ते पुनस्तस्य चापात्सममिवोद्ययुः ॥ ४७ ॥
तैस्त्रयाणां शितैर्बाणैर्यथापूर्वविशुद्धिभिः ।
आयुर्देहातिगैः पीतं रुधिरं तु पतत्रिभिः ॥ ४८ ॥

एव तावांस्तावत्संख्याकश्च ददृशे [अनेन शीघ्रगामित्वमुक्तं–हे०] । [संख्यैकवचनेति शस्–हे०] [संख्याया विधार्थे धा । अधिकरणविचाले चेति वा । अधिकरणं द्रव्यं । विचालः संख्यान्तरापादानं एकस्यानेकीकरणं । एकं राशिं पंचधा कुरु इति वामनः काशिकावृत्तौ–हे०]।

(४६.) अथ शुभाचारो रणे साधुचारी सद्वृत्तश्च स काकुत्स्थोऽसज्जनेन दुर्जनेन रक्षोजनेन च प्रयुक्तं प्रेषितमुच्चारितं च दूषणं [दूषयतीति दूषणस्तं । दुषवैकृत्ये दोषोणावित्युपधाया ऊत्वं । " कृत्यल्युट् " इति ल्युट् । " नंद्यादीनंदिवादिशमिदिदूहसधिवर्धिशोभिरार्चिभ्योण्यन्तेभ्यः संज्ञायाम् " इत्युक्तत्वात् स प्रशस्तः–हे०] दूषणाख्यं राक्षसमात्मनो दूषणं दोषमिव न चक्षमे न सेहे । प्रतिकर्तुं प्रवृत्त इत्यर्थः [शुभाचारपक्षे । असज्जनेनेति पदद्वयं । असन्मिथ्या–हे०] ।

(४७.) स रामस्तं दूषणं खरत्रिशिरसौ च शरैः प्रतिजग्राह । प्रतिजहारेत्यर्थः । क्रमशो यथाक्रमम् । प्रयुक्ता अपीति शेषः । तस्य ते शराः पुनश्चापात्समं [इति लाघवोक्तिः –हे०एतेन रामस्य लघुहस्तत्वं–चा०सु०] युगपदिवोद्ययुः । अतिलघुहस्त इति भावः (" आकर्णकृष्टा सकृदस्य योध्दुर्मौर्वीव बाणान् सुषुवे रिपुघ्नान् " । " सकृद्विकृष्टादथ कार्मुकान्मुनेः शराः शरीरादिति तेऽभिमेनिरे " इति अनुरूपार्थौ श्लोकांशौ) ।

(४८.) देहमतीत्य भित्त्वा गच्छन्तीति देहातिगाः । तैर्यथास्थिता पूर्वविशुद्धिर्येषां तैः । अतिवेगत्वेन देहभेदात्प्रागिव रुधिरलेपरहितैरित्यर्थः । शितैस्तीक्ष्णैर्बाणैस्त्रयाणांखरादीनामायुः (जीवितं) पीतं (ग्रस्तं) रुधिरं (शोणितं) पतत्रिभिः (पक्षिभिः) पीतम् ।

(४९.) तस्मिन्रामशरैरुत्कृत्ते छिन्ने महति (बहुनि) रक्षसां बले (सैन्ये) उत्थितं

---

were (counted) by thousands, nevertheless in the fight he was seen by them (in) as many (forms) as they themselves were

(46.) Then the descendant of Kakutstha who fought righteously did not excuse (forgive) the demon Dúshana who was sent to the battle-field by the wicked demons, as being of a fair conduct he would not bear any censure against himself uttered by a wicked man.

(47.) He received him and the demons Khara and Tris'iras with arrows in succession, and yet they (arrows) flew out from his bow, as it were, at one and the same moment (so dexterous was he)

(48.) The life (alone) of the three (demons) was drunk off by those

तस्मिन्रामशरोत्कृत्ते बले महति रक्षसाम् ।
उत्थितं ददृशेऽन्यच्च कबन्धेभ्यो न किंचन ॥ ४९ ॥
सा बाणवर्षिणं रामं योधयित्वा सुरद्विषाम् ।
अप्रबोधाय सुष्वाप गृध्रच्छाये वरूथिनी ॥ ५० ॥
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसाम् ।
तेषां शूर्पणखैवैका दुष्प्रवृत्तिहराभवत् ॥ ५१ ॥
निग्रहात्स्वसुराप्तानां वधाच्च धनदानुजः ।
रामेण निहतं मेने पदं दशसु मूर्धसु ॥ ५२ ॥

(उत्थितं) उत्थानक्रियाविशिष्टं प्राणिनां कबन्धेभ्यः शिरोहीनशरीरेभ्यः । "कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम्" इत्यमरः । अन्यच्चान्यत्किंचन न ददृशे । कबन्धेभ्य इत्यत्र " अन्यारात् "—इति पञ्चमी । निःशेषं हतमित्यर्थः ।

(५०.) सा सुरद्विषां (रक्षसां) वरूथिनी सेना बाणवर्षिणं रामं योधयित्वा युद्धं कारयित्वा गृध्राणां छाया गृध्रछायम् । " छाया बाहुल्ये " इति क्लीबत्वम् । तस्मिन्नप्रबोधायापुनर्बोधाय [अपुनरुत्थानाय–हे० अपुनर्जागरणाय–चा० सु०] सुष्वाप । ममारेत्यर्थः । अत्र सुरतश्रान्तकान्तासमाधिर्ध्वन्यते ।

(५१.) एका शूर्पवन्नखानि यस्याः सा शूर्पणखा । " पूर्वपदात्संज्ञायाम्–" इति णत्वम् । " नखमुखात्संज्ञायाम् " इति ङीप्प्रतिषेधः । सैव रावणं प्रति राघवास्त्रैर्विदीर्णानां हतानां तेषां रक्षसां खरादीनां दुष्प्रवृत्तिं (नाशरूपां) वार्तां हरति प्रापयतीति दुष्प्रवृत्तिहराभवत् । [" वार्ता प्रवृत्तिर्वृत्तान्तः " इति विश्वः–हे०] । " हरतेरनुद्यमनेऽच् " इत्यच्प्रत्ययः ।

(५२.) स्वसुः शूर्पणखाया निग्रहादङ्गच्छेदादाप्तानां बन्धूनां खरादीनां वधाच्च कार-

---

sharp arrows that passed right through their bodies, remaining as clean as they were before, while the blood was drunk by the birds.

(49.) In that great force of the Ràkshasas which was cut down by the arrows of Ràma, nothing was seen to rise up except headless trunks (nothing was seen standing except bodies of warriors with their heads cut off).

(50.) That army of the enemies of the gods, having made Ràma who was showering arrows to fight with it, fell asleep under the shade of vultures (carrion birds) never to be awake again (they slept a sleep that knew no waking).

(51.) Of (all) those Ràkshasas who were torn into pieces by the missiles of Ràghava, S'ûrpa*n*akhà alone became (survived to be) the bearer of the evil tidings to Ràva*n*a.

(52.) On account of the punishment (inflicted) on his sister and the slaughter of his relatives, the younger brother of Kubera (Ráva*n*a) considered that Ràma had planted his foot on his ten heads (as it were).

रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥ ५३ ॥
तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यताम् ।
प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्तिभिः ॥ ५४ ॥
स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम् ।
आत्मनः सुमहत्कर्म व्रणैरावेद्य संस्थितः ॥ ५५ ॥

णाद्धनदानुजो रावणो रामेण दशसु मूर्धसु पदं पादं निहितं मेने । [महापरिभवं अजीगणदित्यर्थः–हे० । नितरां सोढुमशक्यः स परपरिभवः। " अथ शिरसि स वामं पादमाधाय राज्ञाम्" इत्यन्यत्र] ।

(५३.) स रावणो मृगरूपेण मृगरूपमिव रूपं यस्य तेन (चित्रहरिणरूपेण) रक्षसा मारीचेन राघवौ वञ्चयित्वा [दूरतोऽपसार्य–हे०] प्रतार्य पक्षीन्द्रस्य जटायुषः प्रयासेन युद्धरूपेण क्षणं विघ्नितः संजातविघ्नः सन् सीतां जहार [विघ्नो संजातोस्य विघ्नितः । तदस्य संजातं तारकादिभ्यः इतच्प्रत्ययः । चित्रमृगं विलोक्यैनमानयेति दयिताप्रेरितो रामो निरगमत् । ततो हा लक्ष्मण इति वाक्यमाकर्ण्य लक्ष्मणमपि सीता प्रैषीत् । तदन्तरे द्वयोरप्यसन्निधानाद्दशग्रीवस्तामग्रहीत् इति प्रसिद्धं । तन्मध्ये जटायुरप्यागत्य रे रे दुराचार निशाचरापसद जीवति मयि रामप्रियां कथं हरिष्यसीति युध्यते स्म इति विघ्नितः–चा०] ।

(५४.) सीतान्वेषिणौ तौ राघवौ लूनपक्षं रावणेन छिन्नपक्षं कण्ठवर्तिभिः प्राणैर्दशरथप्रीतेर्दशरथसख्यस्यानृणमृणैर्विमुक्तं (स्वप्राणपरिव्ययेनापि संपादितसुहृत्कार्यं) गृध्रं जटायुषमपश्यतां दृष्टवन्तौ [जटायुर्हि दशरथस्य सखा–हे०] । दृशेर्लङि रूपम् ।

(५५.) स जटायू रावणहृतां मैथिलीं ताभ्यां रामलक्ष्मणाभ्यां । " क्रियाग्रहणमपि कर्तव्यम्" इति संप्रदानत्वाच्चतुर्थी । वचसा वाग्वृत्त्याचष्ट । आत्मनः सुमहत्कर्म युद्धरूपं व्रणैः (क्षतैः) आवेद्य (कथयित्वा) संस्थितो मृतः । ["परेतप्रेतसंस्थिताः" इत्यमरः–हे०] ।

(53.) Having deluded the two descendants of Raghu by means of a demon (Márícha) in the form of an antelope, he took off Sítá having been for a moment obstructed (in his progress) by a great attempt (for rescuing her by fighting) made by the lord of vultures.

(54.) They two wandering in search of Sítá, saw the Vulture whose wings were lopped off, and who with his vital breath (Prá*n*as) grouping up to (lit. staying in) his throat (about to depart) was free from the debt of friendship (or love) that he bore to Das'aratha.

(55.) He told them (two) in (human) words about the Mithila-princess being taken away byRáva*n*a ; and having acquainted them with his great heroic deed by means of his wounds, he expired.

तयोस्तस्मिन्नवीभूतपितृव्यापत्तिशोकयोः ।
पितरीवाग्निसंस्कारात्परा ववृतिरे क्रियाः ॥ ५६ ॥
वधनिर्धूतशापस्य कबन्धस्योपदेशतः ।
मुमूर्छ सख्यं रामस्य समानव्यसने हरौ ॥ ५७ ॥
स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥ ५८ ॥
इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेरुरार्तस्य रामस्येव मनोरथाः ॥ ५९ ॥

(५६.) व्यापत्तिर्मरणम् । नवीभूतः पितृव्यापत्तिशोकः(पितुः दशरथस्य व्यापत्तेः मरणस्य शोकः) ययोस्तौ तयो राघवयोस्तस्मिन्गृध्रे पितरीवाग्निसंस्काराद्ग्निसंस्कारमारभ्य परा उत्तराः क्रिया ववृतिरेऽवर्तन्त । तस्य पितृवदौर्ध्वदेहिकं चक्रतुरित्यर्थः ।

(५७.) वधेन रामकृतेन निर्धूतशापस्य [निर्धूतः निराकृतः शापो यस्य–हे०] देवभुवं गतस्य कबन्धस्य रक्षोविशेषस्योपदेशतो रामस्य समानव्यसने (कलत्रहानिरूपे) समानापदि । सख्यार्थिनीत्यर्थः। हरौ कपौ सुग्रीवे ।" शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु " इत्यमरः । सख्यं मुमूर्छ ववृधे [मुनिशप्तोहि श्रीदतनयः कबन्धत्वमागतो रामलक्ष्मणाभ्यां बाहुच्छेदेन हतः स्वमूर्तिं प्राप्य प्रत्युपकाराय ऋष्यमूकनिवासिनं समानं सुग्रीवमकथयदित्यागमः–हे०] ।

(५८.) वीरः स रामो वालिनं सुग्रीवाग्रजं हत्वा चिरकाङ्क्षिते (चिरकालाभिवांछिते) तत्पदे वालिस्थाने । धातोः स्थान आदेशमिव । आदेशभूतं धात्वन्तरमिवेत्यर्थः। सुग्रीवं संन्यवेशयत्स्थापितवान् । यथा "अस्तेर्भूः" इत्यस्तिधातोः स्थान आदेशो भूधातुरस्ति कार्यमशेषं समभिधत्ते तद्वदितिभावः । आदेशो नाम शब्दान्तरस्य स्थाने विधीयमानं शब्दान्तरमभिधीयते ।

(५९.) वैदेहीमन्वेष्टुं मार्गितुं भर्त्रा सुग्रीवेण चोदिताः प्रयुक्ताः कपयो हनुमत्प्रमुखाः । आर्तस्य विरहातुरस्य रामस्य मनोरथाः कामा इव । इतस्ततश्चेरुर्नानादेशेषु बभ्रमुश्च [अनेन

(56.) They two whose grief for the death of their father was renewed, performed the after-life-ceremonies, commencing with the rite of burning (the dead body), in honour of him, in the same way as they would do in honour of their father.

(57.) By the advice of Kabandha who had his curse shaken (removed) by his death (at the hands of Râma), Râma's friendship grew strong with the monkey (Sugrîva) who was labouring under a similar misfortune.

(58.) That warrior having killed Vâli established Sugrîva on his throne to which he had aspired for a long time, like an Ades'a (substitute) in the place of a root (Dhâtu).

(59.) The monkeys commissioned by their Lord wandered here and there in ques' of the Videha-princess like desires (lit. mental-chariots) of the distressed Râma.

प्रवृत्तावुपलब्धायां तस्याः संपातिदर्शनात् ।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥ ६० ॥
दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥ ६१ ॥
तस्यै भर्तुरभिज्ञानमङ्गुलीयं ददौ कपिः ।
प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुबिन्दुभिः ॥ ६२ ॥

अखिलगतित्वं मनोरथानामगतिर्न विद्यते– हे० अत्र हि मनोरथपदं श्लिष्टं दृश्यते चेरुरित्युत्तरपदस्य सम्यग्योजनया ध्वनिः पिशुनितः] ।

(६०.) संपातिर्नाम जटायुषो ज्यायान्भ्राता । तस्य दर्शनात् । तन्मुखादिति भावः । तस्याः सीतायाः प्रवृत्तौ वार्तायाम् । "वार्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः । उपलब्धायां ज्ञातायां सत्याम् । मारुतस्यापत्यं पुमान्मारुतिः [मारुतिपदेन मारुतात्मजत्वेन समुद्रलंघनसामर्थ्यं सूच्यते–चा०]। हनुमान्सागरम् । ममेत्येतदव्ययं ममतावाचि। तद्रहितो निर्ममः [ममत्वान्निर्गतः निर्ममः–हे० निर्गतो ममकारः(ममत्वं)यस्मात् सः] निःस्पृहः संसारमविद्याबन्धनमिव। तीर्णस्ततार [सीता लंकायामस्तीति संपातिना कथिते सति हनूमान्स्वयं पारावारमतरदित्यर्थः–चा०] । तरतेः कर्तरि क्तः [ममेति विभक्तिप्रतिरूपकमव्ययं । तथा गणदर्पणे । " चिररात्राय चिराह्नाय कस्माच्चिरस्य मम" इति–हे०] ।

(६१.) लङ्कायां रावणराजधान्यां विचिन्वता मृगयमाणेन तेन मारुतिना राक्षसीभिर्वृता जानकी । विषवल्लीभिः परीता परिवृता महौषधिः संजीवनीलतेव । दृष्टा ।

(६२.) कपिर्हनुमान्भर्तू रामस्य संबन्ध्यभिज्ञानं (अभिज्ञायते अनेनेति विश्वाससंपादकचिह्नं) प्रत्यभिज्ञानसाधकमङ्गुलीयमूर्मिकाम् । " अङ्गुलीयकमूर्मिका " इत्यमरः । " जिह्वामूलाङ्गुलेश्छः " इति छप्रत्ययः । तस्यै जानक्यै ददौ । किंविधमङ्गुलीयम् । अनुष्णैः शीतलैस्तस्याः [सीताया वल्लभांगुलीयावलोकनसमुल्लसितप्रेमवशतो निर्गतैः–चा०] आनन्दाश्रुबिन्दुभिः (बाष्पलेशैः) प्रत्युद्गतमिव (अभ्युत्थानमिव) स्थितम् [मुद्रिकावीक्षणानंतरं प्रीत्या बाष्पं निर्गतमितिभावः–चा० अंगुलीयस्य रत्नैरिव प्रत्युद्गमनं युक्तमिति कविना बिंदुषु मुक्ताफलस्य समाधिः विवक्षितः । " अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना । स-

(60.) Intelligence about her having been obtained from an interview with Sampàti, Màruti crossed the ocean, as a person free from worldly desires gets across the (ocean of) worldly life.

(61.) By him who was making his search at Lankà (the capital of Rávana) was observed the daughter of Janaka surrounded by Rakshasis (demonesses) like a great medicinal plant (life-reviving plant) entertwined by poisonous creepers.

(62.) The monkey gave her a ring (as a token) of recognition from her husband which was, as it were, received (wel-comed) by her cool tears of joy.

निर्वाप्य प्रियसंदेशैः सीतामक्षवधोद्धतः ।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः ॥ ६३ ॥
प्रत्यभिज्ञानरत्नं च रामायादर्शयत्कृती ।
हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत् ॥ ६४ ॥
स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः ।
अपयोधरसंसर्गां प्रियालिङ्गननिर्वृतिम् ॥ ६५ ॥
श्रुत्वा रामः प्रियोदन्तं मेने तत्संगमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम् ॥ ६६ ॥

म्यगाधीयते यत्र स समाधिः स्मृतो यथा" इति काव्यादर्शे–हे० चा०]। भर्त्रभिज्ञानदर्शनादानन्दबाष्पो जात इत्यर्थः ।

(६३.) स कपिः । प्रियस्य रामस्य संदेशैर्वाचिकैः (रक्षसां वधूभिः वृतां) सीतां निर्वाप्य सुखयित्वा । अक्षस्य रावणकुमारस्य वधेनोद्धतो दृप्तः सन् । क्षणं सोढोऽरेरिन्द्रजितः । कर्तुः । निग्रहो बाधो ब्रह्मास्त्रबन्धनरूपो येन स तथोक्तः सन् । लङ्कां पुरीं ददाह भस्मीचकार [तेन हि अक्षनामा विध्यमानो रावणकुमारो लंकादाहे हतः–हे०] ।

(६४.) कृती कृतकृत्यः [कृतीत्वं सीताप्रत्यभिज्ञानानयने हेतुः–चा०] कपिः स्वयमायातं मूर्तिमद्वैदेह्या हृदयमिव स्थितं तस्या एव प्रत्यभिज्ञानरत्नं [सीताचूडामणीं–हे०] च रामायादर्शयत् । [स्वच्छत्वादुत्प्रेक्षा–हे०] ।

(६५.) हृदये वक्षसि न्यस्तस्य धृतस्य मणेरभिज्ञानरत्नस्य स्पर्शेन निमीलितो मोहितः स रामोऽविद्यमानः पयोधरसंसर्गः स्तनस्पर्शो यस्यास्तां तथाभूतां प्रियाया आलिङ्गनेन या निर्वृतिरानन्दस्तां प्राप । [शेषं आलिंगनस्य सुखेन स्तनयोरेव प्राधान्यं–हे० आश्लेषस्य स्तनस्पर्शस्यैव प्राधान्यादपयोधरसंसर्गामित्युक्तं–चा०] ।

(६६.) प्रियाया उदन्तं वार्ताम् । " उदन्तः साधुवार्तयोः " इति विश्वः । श्रुत्वा तस्याः सीतायाः संगम उत्सुको रामो लङ्कायाः संबन्धी यो महार्णव एव परिक्षेपः परिवेष्टस्तं परिखालघुं दुर्गवेष्टनवत्सुतरं मेने ।

(63.) Having comforted Sítá with the messages from her dear husband he, who was emboldened by the destruction of Aksha (the son of Rávana), and who for a moment suffered capture at the hands of his enemies,set the city of Lanká on fire.

(64.) The monkey who had done his duty showed the jewel of recognition to Ràma which was, as it were, the very heart of the princess of the Videhas that had come to him of its own free will in a material form.

(65.) He (Ràma) with his eyes closed by (the delighting sensation of) the touch of the jewel which he placed on his breast, felt (lit. obtained) the pleasure of embracing his beloved without the contact of her breasts.

(66.) On hearing the (happy) news about his beloved, Ràma, eager for her union, considered the great ocean which surrounded Lanká (lit. which was its encircling belt) as easy (to ford) as a ditch around a fort.

स प्रतस्थेऽरिनाशाय हरिसैन्यैरनुद्रुतः ।
न केवलं भुवः पृष्ठे व्योम्नि संबाधवर्त्मभिः ॥ ६७ ॥
निविष्टमुदधेः कूले तं प्रपेदे विभीषणः ।
स्नेहाद्राक्षसलक्ष्म्येव बुद्धिमादिश्य चोदितः ॥ ६८ ॥
तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः
काले खलु समारब्धाः फलं बध्नन्ति नीतयः ॥ ६९ ॥
स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि ।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥ ७० ॥

(६७.) केवलमेकं भुवः पृष्ठे भूतले न किंतु व्योम्नि (आकाशे) च संबाधवर्त्मभिः [संबाधं संकटं वर्त्म मार्गो येषां तैः संकीर्णमार्गैः । " संकटं नातु संबाधः " इत्यमरः । " संबाधः संकटे भगे " इति विश्वः । " संबाधं बृहदपि तद्बभूव वर्त्म "इति माघकाव्ये । "अतो धर्मिपराप्यस्ति" । अनेन कपिसैन्यबाहुल्योक्तिः-हे०चा०सु०] संकटगामिभिर्हरिसैन्यैः कपिबलैरनुद्रुतोऽन्वितः [परिवृतः–सु०] सन्स रामोऽरिनाशाय (रावणवधाय) प्रतस्थे चचाल ।

(६८.) उदधेः (अब्धेः) कूले (तटे) निविष्टं (स्थितं) तं रामम् । विशेषेण भीषयते शत्रूनिति बिभीषणो रावणानुजः । राक्षसलक्ष्म्या स्नेहात् (प्रेमवशात्) बुद्धिं कर्तव्यताज्ञानमादिश्य उपदिश्यचोदितः प्रेरितः इव । प्रपेदे प्राप ।

(६९.) राघवस्तस्मै बिभीषणाय । "प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता " इति संप्रदानत्वाच्चतुर्थी । निशाचरैश्वर्यं राक्षसाधिपत्य [राज्यं–चा० सु०] प्रतिशुश्राव प्रतिज्ञातवान् । तथा हि । कालेऽवसरे समारब्धाः प्रक्रान्ता नीतयः फलं बध्नन्ति गृह्णन्ति [फलिता भवन्तीति भावः-चा०] । जनयन्तीत्यर्थः । खलु ।

(७०.) स रामो लवणं क्षारमम्भो यस्यासौ लवणाम्भास्तस्मिंल्लवणाब्धौ प्लवगैः प्रयोज्यैः । ["कपिप्लवङ्गप्लवग"इत्यमरः-हे०] शार्ङ्गिणो विष्णोः स्वप्नाय शयनाय रसातलात्पातालादुन्मग्नमुत्थितं शेषमिव स्थितम् [इति आयामवैफल्योक्तिः–हे०] । सेतुं बन्धयामास । ["सेतुस्तरण उच्यते" इति हलायुधः–हे०] ।

(67.) He set out for the destruction of his enemy followed by the legions of monkeys, crowding their passage not only on the surface of the earth but (even) in the sky.

(68.) Him who had encamped on the coast of the ocean approached Bibhishana who was, as it were, impelled by the Fortune of Râkshasas through affection (for him) having (first) influenced his judgment.

(69.) Râghava promised him the sovereignty of the Râkshasas. Political expedients when made use of (lit. commenced) at a proper time are sure to put forth fruits (i. e. bear fruits).

(70.) He caused a bridge to be constructed by the monkeys over the salt-waters—a bridge that appeared like the serpent S'esha that rose from the nether regions to become the bed of Vishnu (i. e. for S'ârngin to lie down upon).

तेनोत्तीर्य पथा लङ्कां रोधयामास पिङ्गलैः।
द्वितीयं हेमप्राकारं कुर्वद्भिरिव वानरैः ॥ ७१ ॥
रणः प्रववृते तत्र भीमः प्लवगरक्षसाम्।
दिग्विजृम्भितकाकुत्स्थपौलस्त्यजयघोषणः ॥ ७२ ॥
पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः।
अतिशस्त्रनखन्यासः शैलरुग्णमतंगजः ॥ ७३ ॥

(७१.) रामस्तेन पथा सेतुमार्गेणोत्तीर्य। सागरमिति शेषः। पिङ्गलैः (पिङ्गलवानरैरर्थात्) सुवर्णवर्णैरतएव द्वितीयं [द्वयोः पूरणयोः द्वितीयः तं–हे०] हेमप्राकारं [यो नगरपर्यन्तं भवति स प्राकारः कोट्टविशेषः। " प्राकारो वरणः साले " इत्यभिधानचिन्तामणिः–सु०। इष्टकादिरचिते वेष्टनाकारे प्राचीरादौ। "ऊर्ध्वं विंशतिहस्तेभ्यः प्राकारं न शुभावहम्। प्रस्थे हस्तद्वयात् पूर्वं दीर्घे हस्तत्रयं तथा। न मध्यदेशे कर्तव्यं किञ्चिन्न्यूनाधिके शुभम् " इति ब्रह्मवैवर्तपुराणे] कुर्वद्भिरिव स्थितैर्वानरैर्लङ्कां रोधयामास।

(७२.) तत्र लङ्कायां प्लवगानां रक्षसां च भीमो भयंकरो दिग्विजृम्भितं काकुत्स्थपौलस्त्ययो रामरावणयोर्जयघोषणं जयशब्दो यस्मिन्स [दिक्षु विजृम्भितयोः विख्यातयोः प्रसिद्धयोः काकुत्स्थपौलस्त्ययोः रामरावणयोः जयस्य घोषणं। यद्वा। दिक्षु श्रुतं रामरावणयोर्जयघोषणं यस्मिन् स–हे०] तथोक्तो रणः प्रववृते प्रवृत्तः। " अस्त्रियां समरानीकरणाः कलहविग्रहौ " इत्यमरः।

(७३.) किंविधो रणः। पादपैर्वृक्षैराविद्धा भग्नाः परिघा लोहबद्धकाष्ठानि यस्मिन्स तथोक्तः। " परिघः परिघातनः " इत्यमरः। शिलाभिर्निष्पिष्टाश्चूर्णिता मुद्गरा अयोघना यस्मिन्स तथोक्तः। " द्रुघणो मुद्गरघनौ " इत्यमरः। अतिशस्त्राः शस्त्राण्यतिक्रान्ता नखन्यासा यस्मिन्स तथोक्तः [एतेन कपीनां नीतिरुक्ता–चा०]। शैलै रुग्णा भग्ना मतंगजा यस्मिन्स तथोक्तः।

(71.) Having by that path crossed the ocean he caused Lankà to be besieged by the yellow monkeys who formed, as it were, another golden rampart (around it).

(72.) There (at Lankà) a terrible conflict ensued between the monkeys and the demons, in which the acclamations (war cries) of victory to Kàkutstha and Paulastya spread over all quarters.

(73.) It was a battle in which clubs studded with iron were broken down by the trees ; hammers were crushed with stones; the scars (or wounds) inflicted by the nails surpassed those inflicted by weapons and the war-elephants were destroyed (killed) by means of rocks.

अथ रामशिरश्छेददर्शनोद्भ्रान्तचेतनाम् ।
सीतां मायेति शंसन्ती त्रिजटा समजीवयत् ॥ ७४ ॥
कामं जीवति मे नाथ इति सा विजहौ शुचम् ।
प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ॥ ७५ ॥
गरुडापातविश्लिष्टमेघनादास्त्रबन्धनः ।
दाशरथ्योः क्षणक्लेशः स्वप्नवृत्त इवाभवत् ॥ ७६ ॥
ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणम् ।
रामस्त्वनाहतोऽप्यासीद्विदीर्णहृदयः शुचा ॥ ७७ ॥

(७४.) अथानन्तरम् । छिद्यत इति छेदः खण्डः । शिर एव छेद इति विग्रहः । रामशिरश्छेदस्य विद्युज्जिह्वाख्यराक्षसमायानिर्मितस्य दर्शनेनोद्भ्रान्तचेतनां (उद्भ्रान्तमस्वस्थं व्याकुलं वा चेतो मानसं यस्याः तां) गतसंज्ञां सीतां त्रिजटा नाम काचित् [रावणानुजा–हे०] सीतापाक्षपातिनी राक्षसी मायाकल्पितं नत्वेतत्सत्यमिति शंसन्ती ब्रुवाणा । "शप्श्यनोर्नित्यम्"। इति नित्यं नुमागमः । समजीवयत् ।

(७५.) सा सीता मे नाथो जीवतीति हेतोः शुचं शोकं कामं ["अकामानुमतौ कामं" इत्यमरः–चा०]। विजहौ (तत्याज)। किंतु प्राक्पूर्वमस्य नाथस्यान्तं नाशं सत्यं यथार्थं मत्वा जीविता जीवितवत्यस्मीति हेतोर्लज्जिता लज्जावती [उक्तश्च भट्टिकाव्ये । " मृतेपि त्वयि जीवन्त्या किं मयानकभार्यया–चा०] कर्तरि क्तः । दुःखादपि दुःसहो लज्जाभर इति भावः ।

(७६.) गरुडस्तार्क्ष्यः । तस्यापातेनागमनेन विश्लिष्टं मेघनादस्येन्द्रजितः । [" मेघनादस्तु वरुणे रावणस्य सुतेपि च " इति विश्वः–हे०]। अस्त्रेण नागपाशेन बन्धनं यस्मिन्स तथोक्तः क्षणक्लेशः (क्षणं क्षणमात्रं क्लेशो दुःखं यस्मात्स) दाशरथ्यो रामलक्ष्मणयोः स्वप्नवृत्तः स्वप्नावस्थायां भूत इवाभवत् [अल्पकालं दुःखदायित्वात्स्वप्नः इति–हे०] ।

(७७.) ततः पौलस्त्यो रावणः शक्त्या । कासूनामकेनायुधेन । " कासूसामर्थ्ययोः

(74) Then Trijaṭâ restored Sitâ to life, who had lost her senses at the sight of the decapitation of Râma by telling her that it was a (sheer) delusion (i. e. a fraud practised by the demon Vidyujjihva.)

(75.) She gave up her grief saying, " My lord certainly lives "; but she was ashamed (seeing) that she (still) was living, even after having already thought of (the fact of) his death to be true.

(76.) The momentary suffering of the two sons of Das'aratha in which the bonds of the missile (i e. a snake missile) discharged by Meghanâda were severed at the arrival of Garuḍa, appeared, as it were, as having occurred in a dream.

(77.) Then the descendant of Pulastya struck Lakshmana in the breast with the S'aktî weapon ; while Râma though not struck, had his heart broken through (lit. by) grief.

स मारुतिसमानीतमहौषधिहृतव्यथः ।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः ॥ ७८ ॥
नादं स मेघनादस्य धनुश्चेन्द्रायुधप्रभम् ।
मेघस्येव शरत्कालो न किंचित्पर्यशेषयत् ॥ ७९ ॥
कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः ।
रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः ॥ ८० ॥

शक्तिः ” इत्यमरः [“ शक्तिर्बलैप्रभावादौ शक्तिः प्रहरणान्तरे ” इति विश्वः–हे०]। लक्ष्मणं वक्षसि बिभेद विदारयामास । रामस्त्वनाहतोऽप्यहतोऽपि शुचा शोकेन विदीर्णहृदय आसीत् [असंगतिर्नामालंकारः वामनस्तु विरोधाभासत्वं विरोधे इति । “ सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः । सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयं सा क्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं दोषैरन्यजनाश्रयैरपटवो जातास्म इत्याद्युक्तं”–हे०] ।

(७८.) स लक्ष्मणो मारुतिना मरुत्सुतेन हनुमता समानीतया महौषध्या संजीविन्या [विशल्या नाम्न्या–चा० सु०] हृतव्यथः सन्पुनः शरैर्लङ्कास्त्रीणां विलापे परिदेवने । “ विलापः परिदेवनम् ” इत्यमरः । आचार्यकं (आचार्यस्य भावः आचार्यकं) आचार्यकर्म (उपध्यायत्वं) । “ योपधाद्गुरूपोत्तमाद्वुञ् ” इति वुञ् । चक्रे । [“ मृतसंजीविनी मुख्या विशल्यकरणी परा संधानकरणी चान्या सावर्ण्यकारिणी तथा ” इति बहुधा ओषधयः–हे०] । पुनरपि राक्षसाञ्जघानेति व्यज्यते ।

(७९.) स लक्ष्मणः । शरत्कालो मेघस्येव [शरत्कालः मेघस्येव नादं धनुश्च न सहते–हे०] । मेघनादस्येन्द्रजितो नादं सिंहनादम् । अन्यत्र गर्जितं च । इन्द्रायुधप्रभं शक्रधनुःप्रभं धनुश्च किंचिदल्पमपि न पर्यशेषयन्नावशेषितवान् [यथा शरत्काले मेघस्य नादं तथा शक्रधनुश्च नावशेषयति । कालग्रहणं तु प्रयोगार्थं अन्यथा शरदा लक्ष्मणस्योपमानं स्यात्–चा० सु०] । तमवधीदित्यर्थः ।

(८०.) कपीन्द्रेण सुग्रीवेण स्वसुः शूर्पणखायास्तुल्यावस्थो नासाकर्णच्छेदेन सदृशः

(78.) He (Lakshma*n*a) with his pain removed by the great medicinal plant brought (to him) by Màruti, again performed the duty of a tutor in teaching lamentation to the women of Lankà by means of his arrows (i. e. caused the women of Lankà to bewail the deaths of their husbands).

(79.) He allowed to remain naught of either the thundering sound or the bow, resplendent as the rain-bow (weapon of Indra), as the autumnal season completely annihilates the thunders of clouds and the rain-bow.

(80.) Reduced to a condition similar to that of his sister by the lord of the monkeys, Kumbhakar*n*a opposed (assaulted) Râma, like a mountain having its red arsenic (Manas s'ila) cut down by the stone-cutting instrument.

अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् ।
रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः ॥ ८१ ॥
इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥ ८२ ॥
निर्ययावथ पौलस्त्यः पुनर्युद्धाय मन्दिरात् ।
अरावणमरामं वा जगदद्येति निश्चितः ॥ ८३ ॥
रामं पदातिमालोक्य लङ्केशं च वरूथिनम् ।
हरियुग्यं रथं तस्मै प्रजिघाय पुरंदरः ॥ ८४ ॥

कृतः कुम्भकर्णः [रुधिरावलिप्तत्वात्–चा०] टङ्केन शिलाभेदकशस्त्रेण छिन्ना मनःशिला रक्तवर्णधातुविशेषो यस्य स तथोक्तः । " टङ्कः पाषाणभेदनः" इति । " धातुर्मनःशिलाद्यद्रेः " इति चामरः । शृङ्गी शिखरीव । रामं रुरोध ।

(८१.) प्रियस्वप्न इष्टनिद्रोऽनुजो भवान्वृथा भ्रात्रा रावणेनाकाले [असमये असंपूर्णमासषट्के–चा०] बोधित इतीवासौ कुम्भकर्णो रामेषुभी रामबाणैर्दीर्घनिद्रां मरणं प्रवेशितो गमितः । [" निमीलनं दीर्घनिद्रा " इति हलायुधः–हे०] । यथा लोकेष्विष्टवस्तुविनाशदुःखितस्य ततोऽपि भूयिष्ठमुपपाद्यते तद्वदिति भावः ।

(८२.) इतराणि रक्षांस्यपि वानरकोटिषु । समरोत्थानि रजांसि तेषां रक्षसां शोणितनदीषु रक्तप्रवाहेष्विव पेतुः । निपत्य मृतानीत्यर्थः [इत्यपुनर्निर्गमः–हे० तथा कायेषु पतिता राक्षसा नालोकिताः–चा०] ।

(८३.) अथ पौलस्त्यो रावणः । अद्य जगदरावणं रावणशून्यमरामं रामशून्यं वा भवेदिति निश्चितो निश्चितवान् । कर्तरि क्तः । विजयमरणयोरन्यतरनिश्चयवान्पुनर्युद्धाय मन्दिरान्निर्ययौ निर्जगाम । [पुनः शब्देन आदावपि युद्धमाक्षिप्तं तस्मिन् पूर्व एव पक्षः अभवत् उत्तरो नाभवत्–हे०] ।

(८४.) पादाभ्यामततीति पदातिः । तं पादचारिणं रामम् । वरूथो रथगुप्तिः । "र-

---

(81.) Fond of sleep as you are, you have been in vain awakened by your brother at an imporper time—with these words, as it were, he was made to enter into eternal (lit. long) sleep (death) by the arrows of Ràma.

(82.) Other demons also fell among the crores of monkeys as dust raised from the battle field fell into the streams of their blood.

(83.) Let the world to-day be either destitute of Ràvana or of Ràma, thus resolved he the descendont of Pulastya then set out from his palace to fight again.

(84.) Observing Ràma on foot and the lord of Lankà (seated) in a chariot, Indra sent him his chariot furnished with bay horses.

तमाधूतध्वजपटं व्योमगङ्गोर्मिवायुभिः ।
देवसूतभुजालम्बी जैत्रमध्यास्त राघवः ॥ ८५ ॥
मातलिस्तस्य माहेन्द्रमामुमोच तनुच्छदम् ।
यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषाम् ॥ ८६ ॥
अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात् ।
रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥ ८७ ॥

थगुप्तिर्वरूथो ना " इत्यमरः । अथ वरूथेन रथो लक्ष्यते । वरूथिनं लङ्केशं चालोक्य पुरंदर इन्द्रः । युगं वहन्तीति युग्या रथाश्वाः । " तद्वहति रथयुगप्रासङ्गम् " इति यत्प्रत्ययः । हरियुग्यं कपिलवर्णाश्वम् । " शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु " इत्यमरः । रथं तस्मै रामाय प्रणिधाय प्रहितवान् ।

(८५.) राघवो व्योमगङ्गोर्मिवायुभिः (मन्दाकिनीतरङ्गवातैः) आधूतध्वजपटम् [वियद्गङ्गावीचिसंमर्दशीतलैः सुखस्पर्शैः मरुद्भिः प्रेङ्खत्केतनांशुकं । इत्युक्तत्वं-हे०] । मार्गवशादिति भावः । जेतैव जैत्रो जयनशीलः । तं जैत्रम् । जेतृशब्दात्तृन्नन्तात् "प्रज्ञादिभ्यश्च" इति स्वार्थेऽण्प्रत्ययः । तं रथं देवसूतभुजालम्बी मातलिहस्तावलम्बः सन्नध्यास्ताधिष्ठितवान् । आसेर्लङ् ।

(८६.) मातलिरिन्द्रसारथिर्माहेन्द्रम् । तनुश्छाद्यतेऽनेनेति तनुच्छदो वर्म । (शीर्षण्यं च शिरस्त्रेऽथ तनुत्रं वर्मदंशनम् । उरच्छदः कंकटको जगरः कवचोऽस्त्रियाम् " इत्यमरः) । " पुंसि संज्ञायां घः प्रायेण " इति घः । तं तस्य रामस्यामुमोचासञ्जयामास [ददौ–हे० अबध्नात्–चा०] । यत्र तनुच्छदे सुरद्विषां (दैत्यानां) अस्त्राण्युत्पलदलानां यत्क्लैब्यं नपुंसकत्वं [निर्वीर्यत्वं–हे० असामर्थ्य -चा०] निरर्थकत्वं तदापुः ।

(८७.) चिरादन्योन्यदर्शनेन प्राप्तविक्रमावसरं रामरावणयोर्युद्धं योधनं चरितार्थं (कृतार्थं) सफलमभवदिव । प्राक्पराक्रमावसरदौर्लभ्याद्विफलस्याद्य तल्लाभात्साफल्यमुत्प्रेक्ष्यते [यदि द्वयोः परस्परविलोकनं नाभविष्यत् तदा समराभावात् प्रोद्भूतमपि युद्धं नाफलिष्यदित्यन्योन्यसंगात् सफलमिवासीदिति भावः–चा०] ।

(85.) Rághava, supported by the hand of the charioteer of the gods, took his seat in that victorious chariot, the banner-cloth of which was shaken by the breezes coming over the waves of the celestial Gangâ.

(86.) Màtali accoutred him with (lit. put on him) the armour belonging to the great Indra, where the missiles of the haters of the gods obtained the impotency of lotus leaves (i. e. proved as weak as lotus leaves).

(87.) The fight between Râma and Rávana which after a long time brougt about the occasion which manifested this bravery in their mutual rencountre got, as it were, its desired object.

भुजमूर्धोरुबाहुल्यादेकोऽपि धनदानुजः ।
ददृशे स यथापूर्वं मातृवंश इव स्थितः ॥ ८८ ॥
जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम् ।
रामस्तुलितकैलासमरातिं बह्वमन्यत ॥ ८९ ॥
तस्य स्फुरति पौलस्त्यः सीतासंगमशंसिनि ।
निचखानाधिकक्रोधः शरं सव्येतरे भुजे ॥ ९० ॥

(८८.) एकोऽपि स धनदानुजो रावणः भुजाश्च मूर्धानश्चोरवः पादाश्च भुजमूर्धोरु [भुजानां मूर्ध्नां च उरु महत् बाहुल्यमिति वा—हे०] । प्राण्यङ्गत्वाद्द्वन्द्वैकवद्भावः । तस्य बाहुल्याद्बहुत्वाद्धेतोः । तद्बहुत्वे यादवः—" दशास्यो विंशतिभुजश्चतुष्पान्मातृमान्दिरे । लंकेश्वरो यातुपतिः सन्नाहोस्य विलोचकः " इति । पूर्वमनतिक्रम्य यथापूर्वं (पूर्वं यथा यथापूर्वं) मातृवंशे [माता पुष्पोत्कटा नाम्नी तस्या वंशे—हे० मातुर्निकषानाम्न्या राक्षस्या वंशे अन्वये—चा०] मातृसंबन्धिनि वर्गे स्थित इव ददृशे दृष्टो हि । " वंशो वेणौ कुले वर्गे " इति विश्वः । अत्र रावणमातुः केशिन्या रक्षोजातित्वात्तद्वर्गो रक्षोवर्ग इति लभ्यते । अतश्चैकोऽप्यनेकरक्षः परिवृत इवालक्ष्यतेत्यर्थः । (अत्र हि चारित्रवर्द्धनः । स यथापूर्वं इति पाठे स रावणो यथापूर्वं रामेण विनाशितो वंश इव दृष्टः । यद्वा । यथापूर्वं शक्रादिसंग्रामवत् इत्यन्ये । तस्य स्वेच्छाचाररूपत्वादूरुबहुत्व स रावणो यथापूर्वं मातुलगृहे क्रीडनादौ वा ददृशे तथा शिरोभुजबाहुल्यादेकोपि लीलां कुर्वन् ददृशे इत्यन्यः) ।

(८९.) लोकपालानामिन्द्रादीनां जेतारम् [इति विक्रमोक्तिः—हे० अनेन शरीरबलञ्चोक्तं एतेन प्रभावोत्कीर्तनात्संग्रामदुर्द्धर्षत्वं रावणस्याराणि—चा०] । "कर्तृकर्मणोः कृति" इति कर्मणि षष्ठी । स्वमुखैः स्वशिरोभिरर्चितेश्वरं तुलितकैलासमुत्क्षिप्तरुद्राद्रिं तमेवं शौर्यवीर्यसत्त्वसंपन्नं महावीरमरातिं शत्रुं रामो गुणग्राहित्वाज्जेतव्योत्कर्षस्य जेतृष्वोत्कर्षहेतुत्वाच्च बह्वमन्यत (महान्तं मेने) । साधु मद्विक्रमस्यायं पर्याप्तो विषय इति बहुमानमकरोदित्यर्थः । बह्विति क्रियाविशेषणम् ।

(९०.) अधिकक्रोधः (अधिकः क्रोधः यस्य स) पौलस्त्यः (स्फुरतीति स्फुरन् त-

(88.) He the younger brother of the Lord of wealth (lit. the giver of wealth) though one, appeared by means of his many arms, heads and thighs, surrounded as before by the people belonging to his mother's race.

(89.) Ráma thought highly of that enemy who was the conqueror of the guardians of the quarters (Indra and others), who had worshipped the god S'iva by (offering) his own (ten) heads and who had up-lifted (lit. weighed) the Mount Kailâsa.

(90.) The descendant of Pulastya being greatly enraged, drove deep an arrow into his right (lit. other than the left) arm, which was throbbing and which (therefore) prognosticated his union with Sitâ.

रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम्॥ ९१॥
वचसैव तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतोः।
अन्योन्यजयसंरम्भो ववृधे वादिनोरिव॥ ९२॥
विक्रमव्यतिहारेण सामान्याभूद्‌द्वयोरपि।
जयश्रीरन्तरा वेदिर्मत्तवारणयोरिव॥ ९३॥

स्मिन्) स्फुरति स्पन्दमानेऽतएव सीतासंगमशंसिनि (सीतायां संगमं शंसतीत्येवं शीलः सीतासंगमशंसी तस्मिन्) तस्य रामस्य सव्य इतरो यस्मात्सव्येतरे दक्षिणे ["वामं शरीरं सव्यं स्यादपसव्यं तु दक्षिणं" इत्यमरः। दक्षिणबाहुस्फुरणं दृष्ट्वा भावी सीतासंगमसहमानस्तमिवाविद्‌ध्यादित्यर्थः। "स्पन्दो भुजस्येष्टसमागमाय" इति वसन्तराजः–हे०]। "न बहुव्रीहौ" इतीतरशब्दस्य सर्वनामसंज्ञाप्रतिषेधः। भुजे शरं निचखान निखातवान्।

(९१.) रामेणास्तः क्षिप्त आशुगो बाणः। विश्रवसोऽपत्यं पुमान्रावणः। विश्रवःशब्दादपत्येऽर्थेऽण्प्रत्यये सति "विश्रवसो विश्रवणरवणौ" इति रवणादेशः। तस्य रावणस्यापि हृदयं वक्षो भित्त्वा विदार्य। उरगेभ्यः पातालवासिभ्यः प्रियमाख्यातुमिव। भुवं विवेश [रावणहृदयविदारणवार्तां बाणः पातालभूमौ सर्पाणां वक्तुं प्रविष्टः इति भावः–सु०]।

(९२.) वाक्यं वचसैवास्त्रमस्त्रेण निघ्नतोः प्रतिकुर्वतोस्तयो रामरावणयोः। वादिनोः कथकयोरिव [वादिनावपि वचसैव वाक्यं निघ्नतोः। प्रमाणादिनियमेन पक्षप्रतिपक्षयोः परिग्रहो वादः–हे० प्रमाणतर्कसाधनोपालंभः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः। पक्षप्रतिपक्षपरिग्रहो वादः इति स विद्यते ययोस्तौ तयोर्वादिनोरिव तयोरपि किंभूतयोः वचसैव वचनेनैव वाक्यं तिरस्कुर्वतोर्यथा विजयावेशः प्रवृद्धमानः स्यात् तद्वदित्यर्थः–चा०]। अन्योन्यविषये जयसंरम्भः [आवेशः–हे० चा०] ववृधे।

(९३.) जयश्रीः (जयलक्ष्मीः) विक्रमस्य व्यतिहारेण पर्यायक्रमेण तयोर्द्वयोरपि। अन्तरा मध्ये (स्थिता)। अव्ययमेतत्। वेदिर्वेद्याकारा भित्तिर्मत्तवारणयोरिव [अन्तरा मध्ये वेदिं पिण्डकाभित्तिं कृत्वा मध्ये गजौ योध्येते इति प्रसिद्धिः। अन्तरा शब्देनासंबंधा-

---

(91.) Also the arrow (lit. swift-going) cast by Râma having pierced through the breast of Râvana entered into the earth, as if to inform the serpents of the happy news.

(92.) The zeal of victory, over each other, of them two who met words also with words and missiles with missiles, increased like that of two disputants.

(93.) The fortune of victory by reason of the interchange of heroic deeds, became common to them both, as a wall between two infuriated elephants (becomes to them).

कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः ।
परस्परशरव्राताः पुष्पवृष्टिं न सेहिरे ॥ ९४ ॥
अयःशङ्कुचितां रक्षः शतघ्नीमथ शत्रवे ।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत् ॥ ९५ ॥

द्वारणशब्दे द्वितीया न–हे० चा०] । सामान्या साधारणा (मध्यस्था) अभूत् । नत्वन्यतरनियतेत्यर्थः । अत्र मत्तवारणयोरित्यत्र द्वयोरित्यत्र च " अन्तरान्तरेणयुक्ते " इति द्वितीया न भवति । अन्तराशब्दस्योक्तरीत्यान्यत्रान्वयात् । मध्ये कामपि भित्तिं कृत्वा गजौ योधयन्तीति प्रसिद्धिः ।

(९४.) स्वयमस्त्रप्रयोगः कृतं प्रतिकृतं परकृतप्रतीकारस्ताभ्यां प्रीतैः सुरासुरैः [देवदैत्यैः । सुरसहिताः असुराः सुरासुराः । शाकपार्थिवादिः । यद्वा । कार्यकृतो हि देवानां विरोधो न जातिकृतः इति । शाश्वतिके वैराभावे नैकवद्भावः । तथा न्यासकृत् । " शाश्वतिको नित्य इति शश्वदिति त्रैकाल्यमुच्यते । तत्र भवः शाश्वतिकः इति । " मनुजन्मापि सुरासुरान्गणैः " इति माघकाव्ये । तथा च भारविः प्रयुक्तवान् । " सुरासुरैरम्बुनिधिर्ममन्थे" । तर्कदीपिकायामपि । " यत्पादाम्बुजभृङ्गालिच्छलादिवसुरासुराः " इति–हे० चा०] यथासंख्यं तयोः रामरावणयोः (उपरि) मुक्तां पुष्पवृष्टिम्। द्वयीमिति शेषः । परस्परं शरव्राताः (बाणगणाः) न सेहिरे । [निरंतरापतनादित्यर्थः–हे०] । अहमेवालं किं त्वयेति चान्तराल एवेतरेतरबाणवृष्टिरितरेतरपुष्पवृष्टिमवारयदित्यर्थः ।

(९५.) अथ रक्षो रावणोऽयसः (लोहस्य) शङ्कुभिः कीलैश्चितां कीर्णां शतघ्नीं [शतानि हन्तीति सुव्युत्पत्तिः। चतुस्तालप्रमाणां लोहगदां शक्तिं । मदनादिनिघंटौ तु ।"अयः कण्टकसंछिन्ना शतघ्नी महती शिला"इति तत्र शाल्मल्युपमानात्–हे० चा०] लोहकण्टककीलितयष्टिविशेषाम् । "शतघ्नी तु चतुस्ताला लोहकण्टकसंचिता । यष्टिः" इति केशवः । वैवस्वतस्यान्तकस्य हृतां विजयलब्धाम् । कूटशाल्मलिमिव [यातनातरुविशेषमिव–चा०] । शत्रवे राघवायाक्षिपत्क्षिप्तवान् । कूटशाल्मलिरिव कूटशाल्मलिरिति व्युत्पत्त्या वैवस्वतगदाया गौणी संज्ञा [कूटशब्देन कुत्सितं द्योत्यते । "दुर्गादौ हि परसैन्यदलनार्थं ह्याक्षिप्यते " इति क्षी-

(94.) The groups of arrows of one another did not relish (brook) the shower of flowers poured on them two (i. e. Ràma and Ràvana) by the gods and the demons pleased with the advance of their own and repulse of the opposite party (i. e. intercepted the shower of flowers).

(95.) Then the demon darted at his enemy a weapon (or club) S'ataghni full of pointed iron spikes, which (शतघ्नी) was, as it were, the Kùtas'almalí of the God of death obtained by a victory over him in a battle. (शतघ्नी an instrument studded with adamantine thorns).

राघवो रथमप्राप्तां तामाशां च सुरद्विषाम् ।
अर्धचन्द्रमुखैर्बाणैश्चिच्छेद कदलीसुखम् ॥ ९६ ॥
अमोघं संदधे चास्मै धनुष्येकधनुर्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥ ९७ ॥
तद्व्योम्नि दशधा भिन्नं ददृशे दीप्तिमन्मुखम् ।
वपुर्महोरगस्येव करालफणमण्डलम् ॥ ९८ ॥

रस्वामी-हे०] । कूटशाल्मलिर्नीमैकमूलप्रकृतिः कण्टकी वृक्षविशेषः । "रोचनः कूटशाल्मलिः " इत्यमरः । तत्सादृश्यं च गदाया अयःशङ्कुचितत्वादनुसंधेयम् ।

(९६.) राघवो रथमप्राप्तां तां शतघ्नीं [चतुस्तालप्रमाणां लोहशक्ति-हे० चा० सु०] । सुरद्विषां रक्षसामाशां [मयैव रावणेन रामो जेतव्यः इत्येवंरूपां-सु०] विजयतृष्णां च । " आशा तृष्णादिशोः प्रोक्ता " इति विश्वः । अर्धचन्द्र इव मुखं येषां तैः (अर्धचन्द्राकारैः) बाणैः कदलीवत्सुखं यथा तथा चिच्छेद [इति अयासनिरासः -हे०] । अथवा कदल्यामिव सुखमक्लेशो यस्मिन्कर्मणि तदिति विग्रहः ।

(९७.) एकोऽद्वितीयः [मुख्यः । " एको मुख्ये प्रधाने च " इत्यमरः-चा० सु०] । धनुर्धरो रामः प्रियायाः शोक एव शल्यं तस्य निष्कर्षणमुद्धारकं यदौषधं [उपायभूतं । "प्रज्ञादिः" । "अजातौ सर्वमौषधं" इत्यमरः-हे०] तदमोघं (सफलं) ब्राह्मं ब्रह्मदेवताकमस्त्रमभिमन्त्रितं बाणमस्मै रावणाय च । तद्वधार्थमित्यर्थः । धनुषि संदधे ।

(९८.) व्योम्नि दशधा भिन्नं [दशानां रावणशिरसां नाशाय दशधा भिन्नं दशशरीरं । छेद्यस्य दशसंख्यायोगात् दशधा इत्युक्त-चा० हे०] प्रसृतं दीप्तिमन्ति मुखानि यस्य तद्ब्रह्मास्त्रम् । करालं भीषणं तुङ्गं वा फणमण्डलं यस्य तत्तथोक्तम् । " करालो दन्तुरे तुङ्गे करालो भीषणेऽपि च " इति विश्वः । महोरगस्य शेषस्य वपुरिव [महोरगत्वं रत्नयोगात्-हे० महोरगत्वेन फणेषु मणयः सूच्यन्ते । तेन च दीप्तिवन्मुखं भवति-चा० सु०] ददृशे दृष्टम् ।

(96.) With crescent-faced arrows Rághava cut it off—and along with it the hope of the enemies of the gods—before it had reached his chariot as easily as (he would lop off) a plaintain tree.

(97.) And to kill (lit. for) him that unrivalled archer (lit. the sole archer) fixed on his bow the unerring missile presided over by Brahmá, which was (as it were) the physic of extracting (from his heart) the dart of grief for his beloved.

(98.) That missile with its blazing points (heads) being divided into ten splinters in the sky appeared like the body of the great serpent (i. e. S'esha) wearing the ring of his formidable hood.

47

तेन मन्त्रप्रयुक्तेन निमेषार्धादपातयत् ।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनाम् ॥ ९९ ॥
बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः ।
रराज रक्षःकायस्य कण्ठच्छेदपरंपरा ॥ १०० ॥
मरुतां पश्यतां तस्य शिरांसि पतितान्यपि ।
मनो नातिविशश्वास पुनः संधानशङ्किनाम् ॥ १०१ ॥

(९९.) स रामो मन्त्रप्रयुक्तेन तेनास्त्रेणाज्ञातव्रणवेदनाम् (अज्ञाता व्रणानां क्षताना वेदना पीडा यस्यास्तां) अतिशैघ्र्यादननुभूतव्रणदुःखां रावणशिरःपङ्क्तिं (मस्तकश्रेणीं) निमेषार्धादपातयत्पातयामास [एतेन रामस्य लघुहस्तता द्योत्यते—चा०] ।

(१००.) पतिष्यतः (पतिष्यतीति पतिष्यन् तस्य पतिष्यतः) आसन्नपातस्य रक्षःकायस्य रावणकलेवरस्य । छिद्यन्त इति छेदाः खण्डाः । कण्ठानां ये छेदास्तेषां परंपरा पङ्क्तिः । वीचिभिः (कल्लोलैः) भिन्ना (विभक्ता अर्थाच्चञ्चला) नानाकृताप्सु (जलेषु) बालार्कस्य (अरुणतरणिमण्डलस्य) प्रतिमा प्रतिबिम्बमिव । रराज (बभौ)। अर्कस्य बालविशेषणमारुण्यसिद्ध्यर्थमिति भावः [बालार्कत्वेन शिरसां सरुधिरत्वं आक्षिप्तं । कायग्रहणं तु तपनचलनद्योतनार्थं—हे०] ।

(१०१.) पतितानि तस्य रावणस्य शिरांसि पश्यतामपि पुनःसंधानशङ्किनाम् [विश्वासं न प्रापेत्यर्थः कुतः पुनः संधानं शंकन्ते तेषां ईश्वरेण कृत्तानामपि पुनरुत्पत्तेः साधित्वाच्च रावणस्य—हे० ननु छिन्नेष्वपि मस्तकेषु कथं विश्वासो नाभूदित्याह । यतः पुनःसंधानं शंकन्ते इति पुनःसंधानशाकिनस्तेषां । महेशतुष्टये शिरांसि छिन्नानि पुनरपि यथा प्ररूढानि तथाधुनापि भविष्यन्तीति शंकया विश्वासाभावः इत्यर्थः—चा० छिन्नानामपि रावणमस्तकानां पुनः मिलनं भविष्यतीति शंका देवानां अतो न विश्वासः इति भावः—सु०] । पूर्वं तथादर्शनादिति भावः । मरुताममराणाम् । " मरुतौ पवनामरौ " इत्यमरः । मनः (चित्तं) नातिविशश्वासातिविश्वासं न प्राप ।

(१०२.) अथ मदेन गजगण्डसंचारसंक्रान्तेन गुरुपक्षैर्भारायमाणपक्षैरालिवृन्दैर्लोकपा-

---

(99.) With that missile charged with its (appropriate) spell (Mantras) he caused within half a second, the row of Râvana's heads to fall—the heads which did not (even) feel the pain of the wound.

(100.) The seried necks that were severed from the demon's body which was about to drop down, shone (appeared) like the image of the young (new) sun reflected in water broken by the ripples.

(101.) The minds of the gods even though they saw his heads dropped down, suspecting their re-union, did not completely believe in the fact.

अथ मदगुरुपक्षैर्लोकपालद्विपाना-
मनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय ।
उपनतमणिबन्धे मूर्ध्नि पौलस्त्यशत्रोः
सुरभि सुरविमुक्तं पुष्पवर्षं पपात ॥ १०२ ॥
यन्ता हरेः सपदि संहृतकार्मुकज्य-
मापृच्छ्य राघवमनुष्ठितदेवकार्यम् ।
नामाङ्करावणशराङ्कितकेतुयष्टि-
मूर्ध्वं रथं हरिसहस्रयुजं निनाय ॥ १०३ ॥

लद्विपानामैरावतादीनां गगनवर्तिनां गण्डभित्तीः (कपोलपालीः) विहाय (त्यक्त्वा) अनुगत-मनुद्रुतं सुरभि सुगन्धि । " सुरभिश्चम्पके स्वर्णे जातीफलवसन्तयोः । गन्धोपले सौरभेय्यां सल्लकीमातृभेदयोः । सुगन्धौ च मनोज्ञे च वाच्यवत्सुरभि स्मृतम्" इति विश्वः । सुरविमुक्तं (सुरैः देवैर्विमुक्तं) पुष्पवर्षमुपनत आसन्नो मणिबन्धो राज्याभिषेकसमये भावी यस्य तस्मिन् [यद्वा । उपनतौ संयुक्तौ मणिबन्धौ प्रकोष्ठप्रदेशौ यस्मिन् कृताञ्जलावित्यर्थः । यदाभिषेकसमये दशरथेन दत्तो मणिरेकोऽस्तीत्येके । तन्न । " पुरं निषादाधिपतेः " इत्यत्र मौलिविसर्जनं वक्ष्यति–हे० उपनतः उपस्थितः मणिबन्धो राज्याभिषेकसमयसंबंधि शिरोरत्नं यस्य तत्रेति भद्रं–चा०] पौलस्त्यशत्रो रामस्य मूर्ध्नि (शिरसि) पपात । इदमेव राज्याभिषेकसूचकमिति भावः । (मालिनीवृत्तं) ।

(१०३.) हरेरिन्द्रस्य यन्ता मातलिः । [" यन्ता हस्तिपके सूते " इति वैजयन्ती–चा०] । सपदि संहृतकार्मुकज्यम् [संहृता अवरोपिता कार्मुकज्या कार्मुके धनुषि ज्या धनुर्गुणो यस्य तं । धनुः श्रुतिः आरूढे पतिपत्न्यौ इति वामनः । यथा धनुर्ज्याकिणचिह्ने दोष्णादौ विस्फुरितं तवेति–हे०] अनुष्ठितं देवकार्यं रावणवधरूपं येन तं राघवमापृच्छ्य साधयामीत्यामन्त्र्य । नामाङ्कैर्नामाक्षरचिह्नै रावणशरैरङ्किता चिह्निता केतुयष्टिर्ध्वजदण्डो यस्य तम् । हरीणां वाजिनां सहस्रेण युज्यते इति हरिसहस्रयुक् । तम् । " यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । हरिः " इत्युभयत्राप्यमरः । रथमूर्ध्वं (उपरि अर्थात्स्वर्लोकं) निनाय नीतवान् ।

(102.) Then on the head of the enemy of the descendant of the Pulastya (i. e. Ráma) the placing of the crown on which (by sprinkling holy waters) was approaching, there fell a shower of fragrant flowers poured down by the gods and followed (or attended) by the swarms of black bees which had left (lit. having left) the specious temples (lit. wall-like cheeks) of the elephants of the guardians of the quarters and which had wings (renderd) heavy by their temporal juice.

(103.) The charioteer of Indra (then) having bid good bye to Râghava

रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि बिभीषणे संगमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥ १०४ ॥

(१०४.) रघुपतिरपि जातवेदसि [जाते जाते विद्यते इति जातवेदाः तस्मिन् असुन्सप्तपर्णादिव वीप्सा समासेनैव प्रतीताः । जातं वेदः अस्मादिति वा । अत्रैतत्साभिप्रायं । दिव्ये दुष्टादुष्टप्रकाशकत्वात्-हे०] अग्नौ विशुद्धां जातशुद्धिं प्रियां सीतां प्रगृह्य स्वीकृत्य । प्रियसुहृदि बिभीषणे वैरिणो रावणस्य श्रियं राज्यलक्ष्मीं संगमय्य संगतां कृत्वा । गमेर्ण्यन्ताल्ल्यप्प्रत्ययः । " मितां ह्रस्वः " इति ह्रस्वः । " ल्यपि लघुपूर्वात् " इति णेरयादेशः । रविसुतसहितेन सुग्रीवयुक्तेन ससौमित्रिणा सलक्ष्मणेन तेन बिभीषणेनानुयातोऽनुगतः सन् । विमानं रत्नमिव विमानरत्नमित्युपमितसमासः । भुजविजितं यद्विमानरत्नं पुष्पकं तदारूढः सन् । पुरीमयोध्यां प्रतस्थे । " समवप्रविभ्यः स्थः " इत्यात्मनेपदम् । अत्र प्रस्थानक्रियाया अकर्मकत्वेऽपि तदङ्गभूतोद्देशक्रियापेक्षया सकर्मकत्वम् । अस्ति च धातूनां क्रियान्तरोपसर्जनकस्वार्थाभिधायकत्वम् । यथा कुसूलान्पचतीत्यादावादानक्रियागर्भः पाको विधीयत इति । [नाराचवृत्तं । तल्लक्षणं च । इह न नरचतुष्कनाराचमाचक्षते-चा०] ।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ श्रीरघुवंशे महाकाव्ये रावणवधो नाम द्वादशः सर्गः ।

---

who had at once slackened the bow-string and who had executed his commission of the gods, took his chariot above, (i. e. to heaven) the banner staff of which was marked with the arrows of Râva*n*a stamped with his name and to which were yoked one thousand horses.

(104.) The Lord of the Raghus also having accepted his beloved, purified by the fire and having united Bibhîsha*n*a his dear friend to the royal fortune (sovereignty) of the enemy, took his seat in the best of his celestial vehicles which he had conquered by (the force of) his arms, and set out for his capital accompanied by him (Bibhîsha*n*a) who was accompanied by the son of the sun (Sugrîva), and the son of Sumitrâ.